DAMAGE BOOK

TEXT FLY WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY

OU_184584

UNIVERSAL
LIBRARY

The Department of Public Instruction, Bombay.

SRÎ-BHÂSHYA

OF

RÂMÂNUJÂCHÂRYA

Edited with Notes in Sanskrit

BY

VASUDEV SHASTRI ABHYANKAR,
PANDIT, FERGUSSON COLLEGE, POONA.

Part II.

INTRODUCTION AND NOTES.

300 Copies.

1916.

[All Rights Reserved]

Price Rs. Six.

Bombay Sanskrit and Prakrit Series, No. **LXXII.**

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-Sagar' Press,
23, Kolbhat Lane, Bombay.

Published by Government Central Press, Bombay.

॥ श्रीः ॥

श्रीमद्रामानुजाचार्यप्रणीतं

श्रीभाष्यम् ।

अभ्यंकरोपाह्ववासुदेवशास्त्रिविरचितया

विवृत्या समेतम् ।

द्वितीयो भागो विवृत्यात्मकः ।

तच्च

मुम्बापुरीस्थराजकीयग्रन्थशालाधिकारिणा

प्राकाश्यं नीतम् ।

शाके १८३७ वत्सरे, १९१६ खिस्ताब्दे.

मूल्यं षड् रूप्यकाः ।

(ग्रन्थस्यास्य विषये सर्वेऽधिकारा राजकीयग्रन्थशालाधिकारिणामेव)

INTRODUCTION.

The mind of the Aryans of Ancient India was for the most part guided and ruled by the Vedic literature alone. The Vedic literature can roughly be divided into two portions—the earlier and the later. The earlier portion, consisting prominently of the nine Maṇḍalas of the Ṛigveda, deals with the material and practical things of the world; while the later portion, which begins with the tenth Maṇḍala and has the Upanishads for its major portion, tackles spiritual and extra-mundane problems. As long as the Ancient Aryans had to carry on a struggle for existence, their thoughts were naturally turned towards earthly things alone, such as, wealth, cattle, children and the like. It was the earthly happiness and affluence that stood as their goal. Consequently, the earlier Vedic religion did not aim at the correct knowledge of the Supreme Being and the consequent renunciation of the world. It did not teach devotion and unconditional surrender to the Lord. It did not expound quiet and undisturbed meditation on the Lord. So also it did not require the people to abide by moral laws alone. In short, the earlier Vedic Religion was not based on any of the following four: knowledge, meditation, devotion and ethics. It was the primitive religion that existed long before the people had any idea of meditation, devotion and the like; and consequently, it was very simple and of a thoroughly practical character. It naturally consisted of the performance of a large number of sacrifices, all meant for happiness or for power. The highest idea that these Aryans had was of Svarga or a higher region where the meritorious reaped the fruits of their good actions. Pleasures and enjoyments in Svarga were regarded as superior to the earthly ones in every respect; and consequently, the important sacrifices like Jyotishṭoma and the like aimed at nothing else but securing a temporary seat in heaven for the Yajamâna. When the Aryans were properly

settled after the necessary conquests and when they had no longer to maintain such a struggle for existence as they formerly had to do, they found leisure for introspection and were naturally led to the origin of things and the Universe that awakened the interests of man. They were not satisfied with temporary happiness in heaven. They wanted to seek eternal and complete rest for their soul after death, and they began to investigate the ways and means to get such a rest. They did not rest satisfied with the favour of God won by their meritorious deeds. They wanted to go deeper. They wanted to know the real nature of God. Actions alone, they saw, could not give knowledge; but thought and solemn meditation were the prerequisites of such a knowledge. A different sort of literature arose in which this desire for investigation is discernible. The last portion of the Rigveda (*i. e.* Vedânta which became a proper name afterwards) only began the investigation; but its development is found in the Upanishads which are really the foundation of the great edifice of the Vedânta philosophy. To answer the what, the how, and the why of all that exists and that we see, so also to answer the usual questions 'who am I', 'what am I' and 'why am I born' is the aim of these Upanishads.

The earlier portion of the Vedic Literature requires men to lead a pious and simple life of actions by observing all the rites and ceremonies enjoined by Veda; while the later portion requires men to live a life of solemn meditation and renunciation in order to obtain the real knowledge of the world and its Creator. As a consequence, the injunctions of the first portion and those of the latter seem contradictory in nature to a superficial observer, but really speaking they are not so, and it is a work possible for master-minds alone to remove the differences of view between the two, and to show that both of them aim at one and the same thing—the final, supreme and unending bliss of man. No portion of the ancient Vedic literature, that has come down to us, handles this problem of compromise. It is

only in later times that Bodhâyana, the author of the Vedânta-Sûtra-Vritti, made a synthesis of the two Mîmâṃsâs as shown by the quotation from him in the S'rîbhâshya: "This S'arîraka doctrine is connected with Jaimini's doctrine as contained in sixteen adhyāyas; this proves the two to constitute one body of doctrine" (संहितमेत...शास्त्रैकत्वसिद्धिः। Vol. I. P. 2. L. 20). Laconism and compactness, more often combined with obscurity and vagueness, form the characteristic features of the Sûtra literature. It is only in the Sûtras of Pâṇini that we find exactness and brevity happily combined. The Bâdarâyaṇa Sûtras sometimes want a number of words to be supplied. They are, it can be said, altogether unintelligible without a commentary for elucidation, and hence there is reason to believe that Vyâsa himself or some one of his pupils must have written an explanatory comment on his Sûtras. Unfortunately for us, however, and in a way unfortunately for the Divine sage himself, such a commentary, if written at all, became soon extinct and scholars of Vedânta had to grapple with innumerable difficulties and each was required to work his own way separately.

Various glosses were written by various scholars, each trying to prove his own theory. Some scholars discovered the Mâyâvâda in the Sûtras, others found therein the Upâdhivâda, still others traced the germs of Abhâsavâda, Pratibimbavâda, Saguṇavâda and the like in the same; while, Bodhâyana, Dramiḍa and Ṭaṅka laid their fingers on Vis'ishṭâdvaitavâda or Qualified Monism. The works of Bodhâyana, Dramiḍa and Ṭaṅka are however extinct and we have to rest ourselves satisfied with references to them in other books. Seeds of jealousy and hatred were sown by these differences in views leading eventually to the downfall of all the Vedântins and the success of the ritualistic Mîmâṃsakas.

Such were the circumstances when the great luminary, S'aṃkarâchârya, appeared on the horizon. In the very short career of thirty-two years he, as it were, effaced from the sur-

face of the earth the ritualistic Mîmâṃsakas and convinced the people of the pure Monism of the Upanishads by his superhuman genius. People to the extreme South of India, however, continued to be the adherents of the Bhakti School in spite of his teachings. A section of these adherents of the Bhakti School was known by the name Âchâryas. These Âchâryas felt the necessity of a Bhâshya of their School on Bâdarâyaṇa's Sûtras to serve as a rival to the Bhâshya of S'aṃkarâchârya, that had then become exceedingly popular. Yâmunâchârya, the spiritual preceptor of Râmânuja, is said to have expressed to the latter as his last wish that he should write an extensive commentary on those Sûtras.

Râmânuja was born in S'aka 1049 at Bhûtapuri, a village in the district of Trichnopelli. Kes'avabhaṭṭa was his father's name; his mother was called Kântimatî. It is said that Râmânujâchârya was the incarnation of S'esha, the vehicle of Vishṇu, for the purpose of re-establishing the Vaishṇava cult based upon Bhakti. In his youth, he was the pupil of Yâdavaprakâs'a, his maternal uncle. He showed very early his predilection for the Bhakti School. It is said that he was a devotee of Râma and passed a number of years in solemn meditation on that deity. He was convinced that the Monism of the Upanishads was Qualified Monism; and in order to convince people, he travelled through the length and breadth of the land and paid a visit to almost all the sacred cities. He joined hands with the few Vaishṇavas that still remained unconverted at every place, and founded Maṭhas or schools of learning to propagate his own theories. He wrote many books, all propounding his own theory of Qualified Monism. Vedârtha-Saṃgraha is his first original work wherein he briefly discusses the principal tenets of Qualified Monism. Vedântadîpa and Vedântasâra followed as short glosses on the Sûtras of Bâdarâyaṇa. Not satisfied with short glosses, he wrote an extensive commentary on the same Sûtras, known by the name

of S'ribhâshya in which he expounded fully and thoroughly the theory of Qualified Monism.

The theory of S'aṃkarâchârya is based on the Brahma-sûtras and the Upanishads. Râmânuja tried to disprove it, and put in its place his own theory based on the same authority. Instead of the one principle—the Absolute of S'aṃkarâchârya, Râmânuja has a Triune (Three-in-one) Principle in which the insensate world and the Individual Spirit are one with the Lord. That is insensate which has never 'the capacity of being a cogniser' or Jñâtṛitva. Though the insensate things are possessed of movement, still they can never be cognisers, inasmuch as their activity is never caused by any internal agency in them; and consequently, they are never said to do a thing or to enjoy it. The insensate things are roughly divided into Prakṛiti or the Subtile Form of the Universe, Kâla or Time and S'uddhasattva or Celestial Ether.

Prakṛiti is insensate and eternal and is composed entirely of the three qualities—Sattva *i. e.* light or goodness, Rajas *i. e.* action or passion and Tamas *i. e.* inertness or ignorance—present in equal proportion. It is this Prakṛiti that shuts out the real nature of the Lord from the view of the Individual Souls. It is the material cause of the whole Universe. It is very subtile by nature. When the Lord desires to create the world, Prakṛiti or the Subtile Matter begins to develop gradually, losing its subtileness bit by bit, in each of the three initial stages. The first stage is technically called Tamas, the second Akshara, and the third Avyakta. It is the third stage that can be called strictly effectual, as it is only here, that the development of Prakṛiti properly begins and it comes from a latent into an active state after having lost its subtileness entirely. Mahattatva or Intellect is the first manifest and active development of Prakṛiti. It is supposed to be the body of Brahmadeva or the Creator. Its chief function is to produce the discriminative capacity in the mind. In Intellect the

three qualities are not in the same proportion. Each of the three preponderates by turns. Intellect, dominated by Sattva develops into Vaikârika Ahaṃkâra, dominated by Rajas into Taijasa Ahaṃkâra, and dominated by Tamas into Tâmasa Ahaṃkâra, which last is called Bhûtâdi.

The Vaikârika Egoism produces the senses of perception, the organs of action and the mind. The senses of perception or Jñânendriyas are the special bodily faculties by which sensation is roused. They are five in number: sight, hearing, smell, taste and touch—situated respectively in eye, ear, nose, tongue and skin. Organs of Action or Karmendriyas are some particular parts of animal or vegetable body that are adapted for special vital functions. They can also be called the muscular senses. They are also five in number—organs of speech, manipulation, motion, excretion and generation. Mind is a sense that forms the seat of thought, feeling and consciousness of self. Its seat is the heart. It causes remembrance. It is by means of the mind that the organs of action are inclined to work.

Tâmasa Ahaṃkâra produces the five rudiments of the five elements—Earth, Water, Fire, Air and Ether. Râjasa Egoism is of no use by itself. It only helps the production of the senses and that of the elements. These rudiments are very subtile. They give birth to the five gross elements. The whole world is formed after the five gross elements are mixed together, according to a peculiar process technically called Pañchîkaraṇa-Prakriyâ. One of the five elements forms 50% of the mixture, while the remaining four form 12·5% each. The mixture, in consequence of this peculiar process, has five kinds according as one of the five elements dominates by turns. When Earth predominates, the mixture may be called Pṛithvî-pradhâna Pañchîkaraṇa. Of this mixture are formed human bodies and bodies of all animals on the Earth. When Water predominates, the mixture may be called Ap-pradhâna-Pañchî-

karaṇa, of which the bodies of all organisms on the moon are supposed to have been formed. In the same way the bodies of organisms on the Sun, the aerial world, and the world of Ether are supposed to have been formed of the mixtures in which preponderate Fire, Air, and Ether respectively. The mixture with 50% Earth is combined with Intellect and Egoism to give rise to another mixture technically called the Saptîkaraṇa. This mixture it is that forms the human bodies. The whole phenomenal world, that is thus produced, is called the Lîlâvibhûti of the Lord. Thus it is clearly seen, that Prakṛiti or 'the insensate original thing' develops into the twenty-three principles—Intellect, Egoism, five senses of perception, five organs of action, mind, five rudimentary elements and five gross elements—of which the entire Universe is formed. The theory of Râmânuja with respect to the creation of the world is thus exactly the same as that of the Sâṃkhyas, being borrowed from them; only instead of the one Purusha (who is neither Prakṛiti nor its transformation) of the Sâṃkhyas, Râmânuja has two entities, the Lord and the Individual Soul.

Time is the second insensate entity. It is omnipresent and is devoid of the three primary qualities—Sattva, Rajas and Tamas. Time rules and regulates the whole world and is perceived by the five senses and the mind.

S'uddhasattva or Nityavibhûti, as opposed to Lîlâvibhûti, has to be regarded as a substance inasmuch as it has expansion and contraction. It expands at the creation, and contracts at the dissolution of the world. This S'uddhasattva is a region that is entirely pervaded by pure self-illuminant goodness; and consequently, Work or Karma cannot have any sway here. This region is eternal and forms the seat of a variety of enjoyments for the Lord and for the Eternal as well as Free souls. All sources of enjoyment are found here. The body of the Lord, as well as that of these souls is entirely formed of this substance and not of the five gross elements.

Something invisible, something that we grasp mentally but cannot behold, in short, something immaterial that animates the body and excites the mental state is regarded as the 'Individual soul.' This Individual soul is not absolutely identical with the Supreme Soul as S'aṃkarâchârya holds. It is different from the Supreme Soul, though both of them have got a good many common properties. The Supreme soul is designated by the word Lord in the books of Râmânuja. The word 'Âtman' or soul is derived from the root 'at' to pervade. The terms 'body' and 'soul' are relative. That which is governed is the body, while that which governs is the soul. Thus, the Individual soul should, on the one hand, be called the 'soul of the animal body' inasmuch as it governs the body; while on the other, it should be called 'the body of the Lord' inasmuch as it is ruled by the Lord. The Lord is always the ruler, and never the body to be ruled. The insensate world never acts as soul, but is always ruled and governed by the Individual soul and the Lord together. Thus the insensate world is the body of both.

The soul, lying inside the animal body, pervades it and regulates it; similarly the Lord, lying inside the individual souls, pervades and regulates them. There is no entity that can lie inside the Lord to govern him. Thus, the Lord is the final soul just as the Paramâṇu is the final of all things. The soul is quite distinct from all the developments of Prakṛiti or matter, such as the body, the senses, the mind, the vital breaths and the like. The soul is atomic and consequently it can enter the body of the ant as easily as the body of the elephant and fill it with consciousness (Jñâna) which is its elastic (संकोचविकासशालि) essence or property. It should be borne in mind that, strictly speaking, the soul does not pervade the whole body; it is its vital property 'cognition' that pervades it, giving rise to the feeling 'I experience such and such a pain all over my body.'

The individual soul is sentient. Since it is the will of the Lord that directs the soul and chalks out a path for it, the

soul is simply an active agent of God in producing effects. Independently of His will, the soul can effect nothing. Some of its actions directly proceed from Him, while in others it is only directed by Him. The soul, by nature, is completely happy, self-luminous, eternal, atomic, immutable, and the substratum of knowledge. It is imperceptible, unthinkable, and unimaginable and depends on the Lord even for its existence.

There are three kinds of souls. Baddha or fettered down to the worldly life, Mukta or free, and Nitya or eternal. All souls with the Brahmadeva at the top and the insects at the bottom are Baddha souls as they are tied down to the circle of existences. Their weal and woe depend on their own actions and their knowledge depends on their own senses. Their body is formed of matter (consisting of the three qualities) intellect, egoism, and the five gross elements. The five senses, the five organs of action and the mind act as ornaments to it. The individual soul is required to whirl in the whirlpool of existences on account of the Liṅgadeha or the subtle body that is its Upâdhi or limitation. The Liṅgadeha is anâdi or without a beginning and consequently the soul is tied down to it from time immemorial. The soul can, however, free itself from this Liṅgadeha which it casts into the river Virajâ after it has understood the real nature of the Lord. When the Liṅgadeha is cast off, the soul is quite free from the circle of existences. There is no such distinction as the elect and the non-elect with respect to the salvation of souls. There are no chosen few that are capable of getting Final Absolution; all alike are entitled to get it, though very few actually enjoy it. The souls that become in this way free from the circle of worldly existences by the favour of the Lord are termed Mukta or Absolved souls. According to the will of the Lord, their body can either be material or immaterial. If immaterial, it is formed of S'uddhasattva or Celestial Ether regarded as Dravya. They are always waiting upon the Lord in

Vaikuṇṭha as his servants, and in his company they experience eternal and complete Bliss. There are eight qualities manifest in them: word, touch, sight, taste, and smell—which are by no means developments of Prakṛiti—and supreme power, knowledge and eternal joy. All Mukta souls are alike without any distinction. As they have no duty to perform, they are not susceptible to incarnations. They are not regarded as identical with the Lord, being only similar to Him in every respect. They can move anywhere they like in the Universe.

Eternally free souls are never subject to worldly life. They always act according to the will of the Lord. Their knowledge is boundless and eternal. Ananta, Garuḍa, Vishvaksena and the like are regarded as eternally free souls. Their body is formed entirely of pure goodness. They hold regular and eternal posts under the Lord, always helping him in his jurisdiction. These souls have the power, just like the Lord, to assume incarnations in this world at their will. They have distinctions and ranks among them according to the nature of the work prescribed to them by the Lord.

Paramâtman, Parabrahma, Bhagavan, Îs'vara, Nârâyaṇa, Vâsudeva etc. are all synonyms denoting one and the same entity *viz.* the Lord. He is eternal, all-powerful, all-pervading and controls everything. He is the resort of all. The soul and the insensate matter of which the whole Universe is formed make up his body. 'The Lord in his body' is thus the only really existing thing that is omnific, omnipotent, omnipresent and omniscient. 'The Lord in his body' is the one eternal absolute principle of which the whole world is formed. This is what is called Vis'ishṭâdvaitavâda, or 'Qualified Monism', or the doctrine of one qualified concrete Reality. Now, just as our body is regarded as different from the soul that controls it, so the souls and matter are regarded as quite different from the Lord as far as their individual nature is considered. The souls and matter are really-existing things, and not illusions, as S'aṃkarâchârya and his followers suppose.

The Lord is possessed of eight essential qualities as mentioned in the Upanishads. They are Pâtakarâhitya, Jarârâhitya, Maraṇarâhitya, Kshudhârâhitya, Pipâsârâhitya, S'okarâhitya, Satyakâmatva and Satyasaṃkalpatva. Besides these qualities, He has got other qualities like unrestricted knowledge, unrestricted power, and the immaterial pentad of word, touch, sight, taste and smell. Not only does He require everybody to work, but He advises and supervises the work and gives adequate fruit. He is, in short, the Supreme Disposer. Incitement to work proceeding from the Lord is of two sorts: 1. Incitement which is according to His desire at the time of creation and which is common and alike to the animate and the inanimate world. 2. The second sort of incitement refers only to the sentient souls and is again twofold: when propitiated, He incites His devotees to do good actions resulting in their happiness, while, on the other hand, when He is displeased, He instigates those that act against His will to indulge in bad actions. By means of Vedic rites and ceremonies it is the Lord that is propitiated and not those other minor deities; for, it is the Lord that dwells in them as their very soul. He is by nature possessed of kindness, majesty, brightness and such other qualities.

Every word and every term we use, designates the Lord. The whole Universe can roughly be divided into soul and not-soul, or subject and object, or I and not-I, or *ich* and *nicht-ich* or ego and non-ego. The Lord is the soul and the innermost controller of ego as well as non-ego; consequently, all words that are applied to ego such as Indra, Chandra, Devadatta, Yajñadatta and the like, as well as those words that are applied to non-ego such as earth, fire, pitcher, garment and the like, ultimately designate the Lord characterized by his body that is formed of Indra, Chandra etc., as well as earth, fire etc. All terms thus primarily and ultimately denote the Lord, and secondarily worldly things. The secondary meaning is, however, useful in our everyday life and business. Only a few words that are based on the idea of distinction, *i.e.* words like body, soul etc., do not primarily designate Him.

The Lord is the material as well as the efficient cause of the Universe. Before the creation of the world takes place, the body of the Lord has a subtile form, being composed entirely of subtile insensate things and of subtile sentient souls. At the time of creation, the subtile body develops into the whole Universe. Thus, as the whole Universe emanates from the Lord, He can be said to be the material cause of the Universe. He is the efficient cause as everthing depends on His will for action. He can also be called the Sahakârikâraṇa or the co-operating cause, as without His help no object gets its final shape. Or, as the Lord resides inside the material, the efficient, and the co-operating causes of each and everything, He can be called the triad of the causes with respect to everything. The three causes of a jar, for practical purposes for instance, are the earth, the wheel and time. The Lord resides in all of these as the controller, and consequently, really speaking, He is the threefold cause of the jar.

The essential qualities like omniscience, pure joy, and the like, which go to form the very nature of the Lord have already been mentioned. They have no separate existence from the Lord. As they are the very essential qualities of the Lord, they are mentioned in all those sections of the Upanishads which describe Brahma. Besides these, there are some other qualities that are merely accidental. Six of them are prominent and important, and are technically called the Shaḍguṇas or Bhagas from which the Lord is called Bhagavan (the possessor of the six noble qualities). Although they do not exist without the Lord, yet they are not His essential qualities and hence they are not mentioned in all the Brahmavidyâs. The qualities are: Jñâna, S'akti, Bala, Ais'varya, Vîrya, and Tejas. Jñâna or knowledge is that, by virtue of which, all the things in the world are always known to the Lord. It is self-luminous like the Lord Himself. S'akti or power is that quality by virtue of which, the Lord possessed of a subtile body becomes the material cause of the Universe. By means of this power it is,

that the Lord shows to us the wonderful and unexpected creation in our dreams. By His Bala or endurance, He is never fatigued while He creates the world and maintains it. By His Aiś'varya or glory the Lord produces anything independently of others and controls it. By His Vîrya or sustenance, He resists change, though His subtile body develops into the whole Universe. By His Tejas or spirit He does not require the assistance of others in exalting His devotees and in punishing the wicked. These Shaḍguṇas are all of them mentioned by all the Bhakti Schools.

Besides these, there are innumerable other qualities of the Lord. His kindness, excellence of disposition, tenderness and easy accessibility lead His devotees to resign themselves easily to His will. His compassionate nature leads to the protection of His worshippers. By His uprightness He is ever alike in mind, word and deed. His pliancy of nature cannot make it possible for Him to bear the separation from His devotees. His goodness of heart is seen in His ever being ready to protect others. The firmness of His heart is seen in His inflexibility on any occasion. By His courage He carries the thing undertaken to a successful end. By His bravery He can easily rush into the ranks of His enemies and can easily route them by His valour. By His compassionate nature He always tries to remove the hardships of others. By His liberality He gives anything to the mendicants. These and various other qualities are mentioned in Scriptural passages; they can never be conceived by imagination, much less can they be described in adequate words. The sentence "From whence, speech and mind turn away, being unable to reach it" (Tait. Up. II. 4.) attests to this very thing. The Vedic sentences like "Truth, knowledge etc'» (Tait. Up. II. 1.) teach us that Brahman or the Lord possesses attributes. The Vedic texts not only describe His qualities, but in some passages find fault with the man who does not know the attributes of the Lord. For instance, the famous text from the Chhândogya Upanishad says: "A person that has no

knowledge of the attributes of the Lord, can never move freely.' (Ch. VIII. 1, 6.) Had the Lord been without any quality as S'aṃkarâchârya says, the Vedic texts would never have described His qualities. Vedic texts are the highest authority and they can never be suspected to deceive and mislead the people. In the Chhândogyopanishad, in the chapter on Daharavidyâ (Ch. VIII. 1.) meditation on the Lord is first prescribed and immediately after it, there is prescribed meditation on his attributes. The Taittirîya Upanishad goes still further. It clearly says that one who attains to the Lord also attains to His qualities.

Thus, everywhere the Vedic texts emphasize the meditation on the Lord as possessed of all His attributes. In all the Brahmavidyâs, the Lord with His attributes is the object of worship and meditation. Of course, out of the variety of Upâsanâs or sorts of meditation prescribed in the Upanishads, any one practised fully and thoroughly is sufficient to lead to the knowledge and favour of the Lord. This same fact is acknowledged by Bâdarâyaṇa in his Sûtra: "Option, on account of the absence of difference in the results" (Brahma-sûtra III. 3. 57).

The Lord appears in five different modes: Para, Vyûha, Vibhava, Antaryâmin and Archâvatâra. Para is the Lord in His original form. He is always present in Vaikuṇṭha, attended by His consorts—S'rî, Bhû and Lîlâ. After they become free from the circle of existences, the individual souls become similar to Him and live happily in His company. Vyûha is a term for the four forms which Para assumes, *viz.* Vâsudeva, Saṃkarshaṇa, Pradyumna and Aniruddha, as well as for the twelve forms Kes'ava, Nârâyaṇa, etc. The devotees meditate on the Vyûha-form of the Lord. The body of Vyûha is formed of Celestial Ether. Vibhava designates the ten incarnations where the original form is present in every respect. Antaryâmin is always present in the hearts of living organisms. The Yogins

are able to see Him as situated in their heart by virtue of their extra-ordinary power of meditation. Situated in the heart, this Antaryâmin or Sâkshin incites or instigates the soul without in any way being polluted by the faults of the latter. Archâvatâra dwells with His immaterial body in idols or images set up in temples.

There are three ways or methods of worship and the consequent attainment to the Lord: Karmayoga, Jñânayoga and Bhaktiyoga. The three are given in a series and they are interdependent. The performance of all actions (rites, ceremonies, sacrifices and the like) without any regard for the reward is Karmayoga. Karmayoga paves the way for Jñânayoga or acquisition of the knowledge of the real nature of the Lord and the individual soul. Karmayoga leads to Jñânayoga and Jñânayoga to Bhaktiyoga. Bhakti or devotion does not necessarily require the Saṃnyâsâs'rama, or the fourth stage of life. It is also irrespective of castes and sub-castes. When the devotee completely surrenders himself to the Lord, then that Bhakti or love of his is called Prapatti. Bhakti and Prapatti are the golden means to the Moksha or the Final Release of soul.

Abbreviations used in the text and the notes.

अत्रिस्मृ.	अत्रिस्मृतिः
अथर्वसं.	अथर्वसंहिता
आ. ध. सू.	आपस्तम्बधर्मसूत्रम्
आप. श्रौ. आ. श्रौ. आ. श्रौ. सू.	आपस्तम्बश्रौतसूत्रम्
आ. सि.	आत्मसिद्धिः (सिद्धित्रयान्तर्गता)
ई.	ईशावास्योपनिषद्
उणा. सू.	उणादिसूत्रम्
ऋ. सं.	ऋक्संहिता
ऐ.	ऐतरेयोपनिषद्
ऐ. आ.	ऐतरेयारण्यकम्
ऐ. ब्रा.	ऐतरेयब्राह्मणम्
ऐ. श्रु.	ऐतरेयश्रुतिः
का.	काठकोपनिषद्
कूर्मपु. पू. ख.	कूर्मपुराणे पूर्वखण्डम्
के.	केनोपनिषद्
कौ. कौ. ब्रा.	कौषीतकिब्राह्मणोपनिषद्
गर्भोप.	गर्भोपनिषद्
गी.	भगवद्गीता
गौत. गौत. धर्मं. गौ. स्मृ.	गौतमधर्मशास्त्रम्
गौ. पा. का.	गौडपादकारिका
चू. चूलि.	चूलिकोपनिषद्
छा.	छान्दोग्योपनिषद्
जा. जाबा.	जाबालोपनिषद्
जै. सं. का.	जैमिनीयं संकर्षकाण्डम्
जै. सू.	जैमिनिसूत्रम्

ता. ब्रा.	ताण्ड्यब्राह्मणम्
तै.	तैत्तिरीयोपनिषद्
तै. आ.	तैत्तिरीयारण्यकम्
तै. ब्रा.	तैत्तिरीयब्राह्मणम्
तै. सं.	तैत्तिरीयसंहिता
दक्षस्मृ. द. स्मृ.	दक्षस्मृतिः
ना.	नारायणोपनिषद्
नृ. ता.	नृसिंहतापिनी.
नृ. पू. नृ. पू. ता.	नृसिंहपूर्वतापिनी
पा. सू.	पाणिनिसूत्रम्
प्र.	प्रश्नोपनिषद्
बृ.	बृहदारण्यकोपनिषद्
बृ. का.	बृहदारण्यकं काण्वशाखीयम्
बृ. मा. बृ. माध्यं.	शतपथब्राह्मणम्
ब्र. सू.	ब्रह्मसूत्रम्
ब्रह्मवै. प्रकृ.	ब्रह्मवैवर्ते प्रकृतिखण्डम्
भ. गी.	भगवद्गीता
भा. भी.	भारते भीष्मपर्व
भार.	महाभारतम् (Ganpat Krishṇâji's Press)
भा. शा.	महाभारते शान्तिपर्व
भा. शान्ति. रा.	महाभारते शान्तिपर्वणि राजधर्माः
म. म. ना.	महानारायणोपनिषद्
मनु. म. स्मृ.	मनुस्मृतिः
म. भार.	महाभारतम्
म. भा. शा.	महाभारते शान्तिपर्व
महा.	महानारायणम्
महाभा.	महाभारतम्
महो.	महोपनिषद्

मा.	माण्डूक्योपनिषद्
मु.	मुण्डकोपनिषद्
मुद्ग. ख.	मुद्गलोपनिषदि खण्डम्
याज्ञ. स्मृ.	याज्ञवल्क्यस्मृतिः
रा. बा.	रामायणे बालकाण्डम्
रा. यु.	रामायणे युद्धकाण्डम्
वसिष्ठस्मृ.	वसिष्ठस्मृतिः
वायुपु. उत्त.	वायुपुराणे उत्तरार्धम्
वि. पु.	विष्णुपुराणम्
वै. सू.	वैशेषिकसूत्रम्
शत. ब्रा. श. ब्रा.	शतपथब्राह्मणम्
श्वे.	श्वेताश्वतरोपनिषद्
स.	सनत्सुजातीयम्
सत्या. श्रौ. सू.	सत्याषाढश्रौतसूत्रम्
सर्वोप.	सर्वोपनिषद्
सां. का.	सांख्यकारिका
सा. ब्रा.	सामवेदीयं ब्राह्मणम्
सि. त्र.	सिद्धित्रयम्
सुबा. सुबालोप. सुबा. श्रु.	सुबालश्रुत्युपनिषद्

॥ श्रीगणेशाय नमः ॥

अथ श्रीभाष्यविवृतिः प्रारभ्यते ।

ध्यायंध्यायं सच्चिदानन्दरूपं सारंसारं पादपद्मं गुरूणाम् ।
ग्राहंग्राहं पूर्वटीकाकृदुक्तीस्तन्मूलैषा ग्रथ्यते कापि टीका ॥ १ ॥
श्रीभाष्यसिन्धावबमज्जतां श्रुतप्रकाशिकैकैव तरी विराजते ।
न ज्ञायते सापि च साम्प्रतं नृभिस्ततो मयेयं विवृतिः प्रकाश्यते ॥ २ ॥

* १-१ अखिलेति । प्रारिप्सितस्य प्रबन्धस्याविघ्नसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्टदेवतोपासनरूपं मङ्गलमेतत् । भवतीति भुवनं कार्यवर्गः तस्य जन्मोत्पत्तिः स्थेमा स्थितिर्भङ्गो नाशः । आदिशब्देन सृष्ट्याद्यौपयिकमन्तः-प्रवेशनियमनादि गृह्यते । एतादृशी लीला यस्य । लीलाशब्देन भगवतः परिपूर्णत्वानन्यप्रेर्यत्वस्वच्छन्दचेष्टितत्वादिकमभिप्रेतम् । विशेषेण नताः प्रह्वी-भूता अशेषविद्याविशेषनिष्ठा देवमनुष्यादिभेदेन विविधा ये प्राणिनः । भगव-ज्ज्ञानेन लब्धसत्ताकाः प्राणिनोऽत्र भूतशब्देन गृह्यन्ते । तत्संबन्धी व्रातस्तस्य रक्षा रक्षणमिष्टप्रापणपर्यन्तानिष्टनिवारणरूपम् । तद्विषयैका प्रधानभूता दीक्षा संकल्पो यस्य । उपासकसंबन्धिनोऽपि भगवतैव रक्ष्यन्त इति तत्संबन्धी व्रात इत्युक्तम् । तदुक्तम्—

आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवो नः कुले जातः स नः संतारयिष्यति ॥

इति । श्रूयते नित्यमिति श्रुतिः । अनेनापौरुषेयत्वान्निर्दोषत्वं विवक्षितम् । तस्याः शिरोभूत उपनिषद्भागे । शिरःशब्देन श्रुतेरनन्यपरत्वं सूच्यते । विशेषेण दीप्ते । निरतिशयानन्दरूपत्वेन परमपुरुषार्थत्वात् । श्रियो निवासभूते । अनेन नित्यविभूतिमत्त्वं सूच्यते । एतादृशे परस्मिन्ब्रह्मणि मम भक्तिरूपा शेमुषीं बुद्धिर्भवत्वित्यर्थः ।

—५ पाराशर्येति । पाराशर्यो व्यासः । पाराशर्यशब्देन जन्मोत्कर्षः सूचितो भवति । नारायणाद्विनिष्पन्ने ज्ञाने गौतमऋषेः शापादज्ञानतां गते सति संकी-र्णबुद्धयो देवा नारायणं शरणं जग्मुः । ततो भगवान्पुरुषोत्तमः पराशरात्सत्य-वत्यामवतीर्ण इति हि स्कान्दे प्रसिद्धम् । तस्य वचस्तदभिमतोर्थः । वचःशब्द-

---

* प्रथमाङ्कः श्रीभाष्यपृष्ठसंख्यानिदर्शकः । द्वितीयाङ्कः पङ्क्तिसंख्यानिदर्शकः । यत्र प्रथ-माङ्कस्थाने—ईदृशं चिह्नं तत्रोपरिनिर्दिष्ट एव पृष्ठाङ्को बोध्यः ।

स्यार्थे तात्पर्यम्। अतएवाग्रिमविशेषणसंगतिः। तद्रूपां सुधाम्। ब्रह्मण्युपनिषण्णेत्युपनिषद्। तद्रूपो यो दुग्धाब्धिस्तन्मध्यादुद्धृताम्। दुग्धशब्देन पूर्वभागादप्युपनिषदः सारत्वं सूच्यते। यथारण्यकं च वेदेभ्य इति। अब्धिशब्देनालोचितानामुपनिषदामानन्त्यं सूच्यते। मध्यशब्देन सर्ववाक्यानां मुख्यार्थापरित्यागः सूच्यते। मध्यस्य सर्वपर्यन्तदेशापेक्षया तुल्या ह्यायतिः। उद्धृतशब्देनातिनिम्नदेशनिमग्नोद्धरणमभिदधता निःशेषार्थग्रहणं सूच्यते। संसारस्य तापत्रयरूपत्वात्तद्रूपो योग्निस्तस्य विशेषेण यद्दीपनम्। विद्यालब्धेः पूर्वं कदाचिदप्यनिवार्यत्वात्। तेन व्यपगतप्राणा य आत्मानो जीवात्मानस्तेषां संजीवनीं संसारोन्मोचनकर्त्रीम्। प्राणशब्देनेह परमात्मोच्यते। तस्य व्यपगमश्च तज्ज्ञानतद्दर्शनतत्प्राप्तिष्वन्यतमस्याप्यभावः। पूर्वाचार्यो बौधायनादयस्तैः सुरक्षिताम्। बौधायनो हि व्यासस्य साक्षाच्छिष्यः सूत्रवृत्तिं चकारेति प्रसिद्धम्। बहूनां बह्वो वा या मतयस्तासां व्याघातेन परस्परविरोधेन दूरस्थिताम्। कस्यापि सूत्रयथार्थज्ञानाभावात्। निजाक्षरैरानीतां भाष्येण समीपमानीताम्। एतादृशीं वचःसुधाम्। भौमा भूमिसंबन्धिनः। देवादीनामन्यथापि ज्ञानप्राप्तिसंभवादेतदुक्तिः। सुष्ठु सारासारविवेककृन्मनो येषां तेन्वहं पिबन्तु। रसस्यातिशयादतृप्तिकरीयं सुधेति भावः।

१–९ भगवदिति। अनेन बौधायनस्य शंकरादिभ्योप्यासन्नमत्वं ध्वन्यते। बौधायनेन ह्यतिविस्तीर्णा वृत्तिः कृता। द्रमिडभाष्यकारादयोपि परपक्षप्रतिक्षेपाद्यनादरेणातिसंक्षिप्तान्ग्रन्थानरचयन्। अतिविस्तीर्णातिसंकुचितग्रन्थानां साफल्यमायुष्मद्बुद्धिमज्जनप्रचुरेष्वेव भवति। न हीदानींतनपुरुषाणां सर्वेषां शतायुर्ङ्यावज्जीवं ग्रन्थपरिश्रमः सहजधीविशेषाश्च सन्ति। तस्मात्परमतनिरासाद्यर्थमनतिविस्तरतया सुग्रहत्वार्थं च सूत्रं व्याख्यातव्यम्।

—१० तन्मतानुसारेण। न तु स्वोत्प्रेक्षितमतान्तरेण। सूत्राक्षराणि। सूत्रस्थपदानां प्रकृतिप्रत्ययविभागानुगुणं वदामः। न तु स्वोत्प्रेक्षितार्थेषु सूत्राणि यथाकथंचिद्योजयितव्यानीति भावः। व्याख्यास्यन्ते। व्याङ्भ्यामुपसर्गाभ्यामपेक्षितविस्तरसंक्षेपौ द्योतितौ।

—१२ अत्रेति। मङ्गलं तु नाथशब्दवाच्यम्। अपि तु शङ्खस्वनादिवच्छ्रूयमाणोथशब्दो मङ्गलावह इत्योंकारस्येवार्थान्तरपरत्वेपि मङ्गलत्वं सिध्यति।

आनन्तर्य इति। अधिकारार्थत्वं तु न युक्तम्। अधिकारो हि प्रस्तावः। तस्य च प्रारभ्यत इत्युक्तिं विनापि प्रारम्भादेवावगमात्।

अत इति। वृत्तस्येतीदंशब्दार्थः। हेतुभाव इति तसिल्प्रत्ययार्थः।

१-१३ आनन्तर्यं हेतुभावं चोपपादयति—अधीतेति। अल्पमस्थिरं च फलं यस्य तादृशस्य केवलस्य ब्रह्मज्ञानरहितस्य कर्मणो ज्ञानमधिगतं येनेत्यर्थः। केवलकर्मज्ञानमेव वृत्तं वर्तिष्यमाणब्रह्मजिज्ञासाहेतुः। अनन्तमविनाशि स्थिरं च फलं मोक्षरूपं यस्येति ब्रह्मणो विशेषणम्। मोक्षस्य च ब्रह्मफलत्वं ज्ञानद्वारा। जिज्ञासाया अपीदं विशेषणम्। तस्या अप्यागमोत्थविवेकादिजन्यज्ञानद्वारेण मोक्षहेतुत्वात्।

२-१ कर्त्रीति। कृत्प्रत्ययप्रकृतिभूतधातुवाच्यक्रियानिरूपितकर्तृकर्मवाचकाच्छब्दाच्छष्ठीति तत्सूत्रार्थः।

—२ यद्यपीति। ब्रह्मसंबन्धिजिज्ञासेत्यर्थे किं जिज्ञास्यमिति जिज्ञासायाः कर्माकाङ्क्षायामर्थाद्ब्रह्मण एव कर्मत्वं लभ्यत इति भावः।

—३ तथापीति। संबन्धिषष्ठ्यामाक्षेपतः प्राप्तस्यापि कर्मत्वस्य विलम्बोपस्थितिकत्वम्। कर्मणि षष्ठ्यां तु तस्य षष्ठीवाच्यत्वाच्छीघ्रोपस्थितिकत्वमिति तदेव युक्तम्।

—४ प्रतिपदेति। विशेषविहिता या षष्ठी तदन्तस्य न समास इति तदर्थः।

—६ कृद्योगा। कर्तृकर्मणोरितिसूत्रेण विहिता। प्रतिप्रसवः। अपवादस्यापवादः।

—७ ब्रह्मशब्दार्थमाह-ब्रह्मशब्देनेति। बद्धजीवस्यापि निरस्तकतिपयदोषत्वात्तद्व्यावृत्यर्थं निखिलेत्युक्तिः। तथापि मुक्तेतिव्याप्तिरतः स्वभावत इति। अनवधिकेति। अत्रापि स्वभावत इति संबध्यते। तेन गुणानामविद्याकल्पितत्वनिरासः। अनवधिकोतिशयो यस्यैतादृशोसंख्येयः कल्याणकारको गुणगणो यस्येति बहुव्रीहिगर्भो बहुव्रीहिः। ब्रह्मगुणातिशयस्य च वाङ्मनसागोचरतयानवधिकत्वम्। अनवधिकातिशयशब्देन नित्यसिद्ध्यावृत्तिः। तद्गुणानां जगद्व्यापारानुगुणत्वेन भगवद्गुणापेक्षया सावधिकातिशयत्वात्।

—८ सर्वत्रेति। भगवद्व्यतिरिक्तस्थले केवलबृहत्त्वगुणयोगेन गौणो ब्रह्मशब्दप्रयोगः।

—९ मुख्यार्थमाह-बृहत्त्वमिति। बृहत्त्वं महत्त्वम्। स्वरूपतो गुणतश्चानवधिकातिशयमहत्त्वं ब्रह्मशब्दप्रवृत्तिनिमित्तम्। भगवद्गुणानां स्वरूपतस्तादृशमहत्त्वात्तत्राप्तिव्याप्तिवारणाय गुणत इति। न हि तेषां ब्रह्मत्वम्। तावन्मात्रोक्तौ यद्यपि न दोषस्तथापि शब्दशक्तेरसंकोचस्य स्वतः प्राप्तत्वात्तथोक्तिः।

—११ मुख्यवृत्तः। वाचकः।

औपचारिकः । लाक्षणिकः ।

२–१२ सर्वत्र मुख्यः कुतो न स्यादित्याशङ्क्याह–अनेकार्थेति । अयोगादिति पदच्छेदः । तदुक्तं गारुडे—

वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि ।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने ॥
यस्मिन्प्रयुज्यमाने तु गुणयोगः सुपुष्कलः ।
तत्रैव मुख्यवृत्तोयमन्यत्र ह्युपचारतः ॥ इति ।

—१२ भगवच्छब्दवदिति । तथा च भगवच्छब्दस्य पुरुषोत्तम एव मुख्यत्वमन्यत्रामुख्यत्वं पराशरेणोक्तम् ।

—१२–३ तापत्रयम् । आध्यात्मिकाधिभौतिकाधिदैविकरूपम् । अमृतत्वाय । मोक्षाय ।

—१३ अत इति । निर्दोषमङ्गलगुणाकरस्य सर्वेश्वरस्यैव तापत्रयातुरैर्जिज्ञास्यत्वादित्यर्थः ।

—१४–५ इच्छाया इति । यथा 'प्राङ्मुखो भुञ्जीत' इत्यत्र भुजिधातोर्विधिप्रत्ययान्तत्वाद्भोजनस्य कर्तव्यत्वे प्रतीतेपि भोजनस्य रागप्राप्तत्वात्प्राङ्मुख्यविधावेव तात्पर्यमवगम्यते तथात्रेच्छाया विधेयत्वासंभवात्तद्विषयभूतविचारात्मकज्ञानविधावेव तात्पर्यमवगम्यते । इष्यमाणेति । इष्यमाणं ज्ञानं प्रधानं यस्यास्त्वादित्यर्थः । क्रियायाः कर्मसिद्ध्यर्थत्वेन तच्छेषत्वात्क्रियापेक्षया कर्मणः प्राधान्यं बोध्यम् । विधीयत इति । अज्ञातज्ञापनमिह विधिः । न स्वप्रवृत्तप्रवर्तनम् । रागतः प्रवृत्तेर्वक्ष्यमाणत्वात् । अतस्तेन ग्रन्थेन न विरोधः । रागतः प्रवृत्तस्यापि पूर्वपक्षयुक्त्यानारम्भणीयतायुद्धौ सत्यामारम्भणीयत्वज्ञापनमज्ञातज्ञापनम् ।

—१६ सूत्रस्य वाक्यार्थमाह–मीमांसेति । मीमांसाया हि भागद्वयं कर्ममीमांसा ब्रह्ममीमांसा चेति । तत्र कर्ममीमांसा जैमिनिप्रतिपादिता द्वादशाध्यायी पूर्वमीमांसाशब्देन व्यवह्रियते । ब्रह्ममीमांसा त्वियं चतुरध्याय्युत्तरमीमांसाशब्देन व्यवह्रियते ।

—१८ कर्माधिगमस्यैव पूर्ववृत्तत्वमित्यत्र वृत्तिकारोक्तिं प्रमाणयति–तदाहेति ।

—१९–२० न केवलं वृत्तिकारोक्तिरेव प्रमाणं किं तु तदुक्ता युक्तिरपीत्याह–वक्ष्यति चेति । ऐकशास्त्र्यम् । एकशास्त्रत्वम् । उभयत्रापि धर्मस्यैव प्रतिपाद्यमानत्वात् । अलौकिकं श्रेयःसाधनं हि धर्मः । स च साध्यरूपः

क्रियादिः पूर्वभागेन प्रतिपाद्यते । सिद्धस्तु ब्रह्मरूपो धर्मोनेनोत्तरभागेन प्रतिपाद्यते । सिद्धरूपे वस्तुनि धर्मशब्दप्रयोगो महाभारते दृष्टः । यथा–

ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥

इति । यद्यपि कर्मब्रह्ममीमांसयोरेकशास्त्रत्वमविवक्षितं जैमिनिना तथापि तदङ्गीकृत्य तदेकशास्त्रतया बादरायणेन ब्रह्मसूत्रप्रणयनं युक्तम् । यतोतदर्थतया क्लृप्तमपि योग्यमपेक्षितं तादर्थ्यमर्हति । पूर्वसिद्धतडागस्य पश्चात्कल्पितग्रामार्थत्ववत् । न च 'आम्नायस्य क्रियार्थत्वात्' (जै. सू. १।२।१) इति सिद्धपरवाक्यानां क्रियाशेषत्वं जैमिनिना कण्ठोक्तमेकशास्त्रत्वे विरुध्यत इति वाच्यम् । उत्सर्गापवादन्यायेन शास्त्रैक्याविरोधात् । व्याकरणे 'कर्मण्यण्' (पा. सू. ३।२।१) 'आतोनुपसर्गे कः' (पा. सू. ३।२।३) इतिवत् । सामान्येन सिद्धपरवाक्यानां क्रियाशेषत्वेभिहिते सिद्धपरवाक्यविशेषस्य किं विधिशेषत्वं न वेतिविचार्य स्वयं पुरुषार्थविरहिणामेव सिद्धपराणां क्रियाशेषत्वं स्वयं पुरुषार्थपर्यवसायिनां तु सिद्धपरवाक्यानां न तच्छेषत्वमिति हि निर्णेतुं युक्तम् । शारीरकं ब्रह्ममीमांसा । जगच्छरीरः परमात्मा शारीरः । 'तस्यैष एव शारीर आत्मा' (तै. २।४।१) इति श्रुतेः । तद्विषयं शास्त्रं शारीरकमित्युच्यते । लक्षणशब्दोध्यायवाची । एतच्छारीरकं जैमिनीयेन षोडशलक्षणेन षोडशाध्यायरूपेण संहितं नियतपौर्वापर्यैकव्याख्येयव्याख्यानरूपतया संगतमिति शास्त्रैकत्वसिद्धिरित्यर्थः । यद्यपि जैमिनीयं द्वादशलक्षणं तथाप्यध्यायचतुष्टयात्मकेन संकर्षकाण्डेन सह षोडशलक्षणत्वं बोध्यम् ।

२–२१ प्रतिपिपादयिषितेति । यथा जैमिनीये प्रकृतिविकृतिप्रयोजनभेदेन षट्कभेदो यथा वा प्रमाणाद्यर्थभेदेनाध्यायभेदस्तद्वदत्र साध्यसिद्धरूपधर्मभेदेन पूर्वोत्तरमीमांसयोर्भेदो न तु शास्त्रभेदाद्भेद इति भावः ।

–२३–३–१ अस्त्वेकशास्त्रत्वं तत्र कथं पौर्वापर्यनियम इति शङ्कां परिहरन्वृत्तिग्रन्थस्थं संहितपदं विवृणोति–मीमांसाशास्त्रमिति । पूर्वोत्तररूपभागद्वयघटितमित्यर्थः । विशिष्टक्रमम् । क्रमविशेषवत् ।

३–१–२ प्रथममिति । प्राथम्यं च शास्त्रान्तरश्रवणयोग्यावस्थापेक्षया पूर्वभावित्वम् । गर्भाष्टमोपनीतस्य ह्यध्ययनम् । ततः पूर्वं शास्त्रान्तरपरिश्रमानर्हत्वात् । अध्ययनविधिपरतन्त्रस्य साङ्गाध्ययनानन्तरं कर्मविचारावश्यंभावस्य स्वरससिद्धत्वाच्च । एतेन साधनचतुष्टयादिपूर्ववृत्तान्तरनिष्पादनस्यानवसरग्रस्तत्वं सूचितम् । अध्ययनेनैवेति । एवशब्देन नियमविधित्वं द्योतितम् । न तु पुस्तकनिरीक्षणादिनेत्यर्थः ।

३-३-४ तत्। स्वाध्यायोध्येतव्य इति वाक्यप्रतिपादितम्। किंरूपम्। स्वतन्त्रोच्चारणरूपं परतन्त्रोच्चारणरूपं वा, सकृदुच्चारणरूपमसकृदुच्चारणरूपं वेत्यर्थः। कथम्। किमङ्गकम्। उपनयनस्याध्ययनाङ्गत्वं दर्शयति-अष्टवर्षमिति।

—७ इत्यादीति। आदिशब्देन

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत्॥

इत्यादिवचनानां संग्रहः। व्रतम्। उपाकर्मकाण्डव्रतादि। नियमः। देशकालभक्ष्याभक्ष्यादिव्यवस्थारूपः।

फलितमाह-एवमिति। सत्कुलप्रसूतः सदाचारसंपन्न आत्मगुणैरक्रोधादिभिर्युक्तो वेदविच्च य आचार्यस्तेनोपनीतस्य पूर्वोक्तव्रतनियमविशेषयुक्तस्य माणवकस्याचार्यकर्तृकोच्चारणानन्तरभाव्युच्चारणरूपमक्षरराशिग्रहणं फलं यस्यैवंभूतमध्ययनमित्यर्थः। आचार्योच्चारणानूच्चारणमित्यनेन परतन्त्रोच्चारणरूपता दर्शिता। अक्षरराशिग्रहणफलमित्यनेनासकृदावृत्तिरूपता दर्शिता। यथा 'व्रीहीनवहन्ति' इत्यत्रावहननस्य वैतुष्यपर्यन्तत्वादशुताप्यावृत्तिः सिध्यति तद्वदत्रापि। अनेन द्विविधापि किंरूपमित्याकाङ्क्षा शामिता। वेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्येत्यनेन च कथमित्याकाङ्क्षा पूरिता।

—१० नन्वध्ययनस्य पुरुषसंस्कारत्वेनापूर्वसिद्ध्यर्थतया स्वाध्यायसिद्ध्यर्थत्वाभावादक्षरराशिग्रहणफलकत्वाभावेनावृत्त्यसिद्धिरत आह-अध्ययनं चेति। स्वाध्यायसंस्कारः। न तु पुरुषसंस्कारः।

—११ कर्मत्वेति। यद्यपि यद्यत्कर्म तत्तत्संस्कार्यमेवेति न नियमः। उत्पाद्यसंस्कार्यप्राप्यभेदेन कर्मणस्त्रिविधत्वात्। ओदनं पचतीत्याद्यम्। तण्डुलं पचतीति द्वितीयम्। स्थाणुं पश्यतीति तृतीयम्। तथाप्यत्र स्वाध्यायरूपकर्मण उत्पाद्यत्वासंभवः। न ह्यध्ययनेन वेदराशिरुत्पद्यते। फलान्तरे संभवति प्राप्यत्वमात्रपर्यवसानं चायुक्तम्। अतोत्र स्वाध्यायस्य संस्कार्यकर्मत्वमेवेति भावः।

—१२ नामेति। प्रसिद्धौ।

—१३ अवबोधित्वात्। अनुष्ठानौपयिकबोधजनकत्वात्।

—१४ स्वरूपेणापि। अर्थज्ञानतदनुष्ठानविरहेणापि।

—१४-५ यतः स्वाध्यायस्य स्वरूपतोऽपि धर्मादिसाधनत्वमतोध्ययनविधेरर्थज्ञानपर्यन्तं तात्पर्यकल्पने मानाभाव इत्याह-एवमिति। मन्त्रवदिति। यथा 'शं नो मित्रः' इत्यादिमन्त्राणामर्थज्ञानेपि केवलजपमात्रेणोपकारकत्वम्, यथा च काण्डव्रतादिनियमेषु तदङ्गभूतमन्त्राणां केवलपाठेनोपकारकत्वम्। न हि बालानां मन्त्रार्थावबोधसंभवस्तद्वदिति भावः। पर्यवस्यतीति।

स्वाध्यायशब्दश्च नार्थज्ञानवाची । अपि तु स्वशास्त्रामात्रवाची । स्वाध्याय-शब्दात्स्वरसतस्तथैव प्रतीतेः ।

३–१५–९ तर्हि कथं स्वाध्यायस्यानुष्ठानौपयिकबोधजनकत्वं किमर्थं च मीमांसाया आरम्भणीयत्वमित्यत आह–अध्ययनेति । स्वभावतः । शब्दस्य बोधकत्वशक्तिस्वाभाव्यात् । व्युत्पन्नपदपदार्थं प्रति शब्दस्यार्थावबोधकत्वं स्वाभाविकमिति प्रसिद्धम् । एवकारो विधिनैरपेक्ष्यपरः । प्रयोजनेति । अनेनाध्ययनविधेः परम्परया पुरुषार्थपर्यवसायित्वमुक्तम् । साक्षात्प्रयोजनं त्वक्षरराशिग्रहणमेव । मीमांसारम्भे हेतुमाह–गृहीतादिति । गृहीतमात्रा-दित्यर्थः । अर्थस्य प्रयोजनं पुरुषार्थरूपं तद्विशिष्टार्थस्यापाततो ज्ञाने सत्यापात-प्रतीतेः संशयविपर्ययसहत्वात्तन्निराकरणाय मीमांसेति भावः । स्वरूप-विशेषाः अङ्गिनः । प्रकारविशेषाः अङ्गानि । पूर्वपक्ष्युक्तस्वरूपप्रकारा-पेक्षया सिद्धान्त्युक्तस्वरूपप्रकारयोर्वैषम्यं विशेषशब्देन विवक्षितम् । प्रयो-जनवदर्थस्वाध्यायवेदमीमांसाशब्दाः पूर्वोत्तरभागस्याधारणाः । स्वयमेव । न तु विधिना । पुरुषस्य चेतनत्वात्प्रयोजनवदर्थापातप्रतीतेश्च तन्निर्णयेच्छाजन-कत्वादिति भावः ।

—२०–३ एकशास्त्रत्वं रागतः प्रवृत्तिश्चास्तु तत्र कथं पौर्वापर्यनियमस्तत्राह–तत्रेति । तत्र वेदे । कर्मभागस्य वेदोपक्रमत्वादधीतक्रमेणैव निरूपणं प्राप्तमिति कर्मविचारस्य पूर्वभावित्वमिति भावः । अध्ययनेति । अध्ययनस्य कृत्स्नस्वा-ध्यायविषयत्वादुपनिषदश्च स्वाध्यायशब्दान्तर्गतत्वादिति भावः । तन्निर्णयः फलं यस्येति विचारविशेषणम् । अधिकरोति । अधिकारी भवति । एवं च कर्मविचारकृत्वमेवाधिकारप्रयोजकं न तु साधनचतुष्टयसंपन्नत्वमित्य-भिप्रायः ।

—२३ शारीरकमीमांसारम्भणीयत्वप्रयोजकापातप्रतीतिजनकवेदान्तवाक्या-न्याह–तथा चेति । केवलशब्देन ज्ञानाङ्गकर्मव्यावृत्तिः ।

४–१ तद्यथेहेति । ननु पूर्वं कर्मविचारेण कर्मफलक्षयिष्णुत्वस्य निर्ण-यादिह पुनः किमर्थं तत्प्रतिपादकानि 'तद्यथेह' इत्यादीनि वाक्यान्युदाहियन्त इति चेन्न । अधिगतकर्मणः पुरुषस्य निर्णीतार्थसंवादिवाक्यदर्शनात्कर्मफलास्थि-रत्वस्येव ब्रह्मज्ञानफलाक्षय्यत्वस्य प्रामाणिकत्वं संभवतीति श्रद्धास्थिरीकरणार्थं दृष्टान्तत्वेन तदुपन्यासात् । क्रमेचितः । राजसेवादिकर्मणा चितोऽर्जितो लोको यथा क्षीयत एवमेव परलोकेपि पुण्यसंपादितो लोकः क्षीयत इत्यर्थः ।

४–३ तत् । ज्ञानरहितं कर्म ।

अध्रुवैः अस्थिरैः कर्मभिः । ध्रुवं स्थिरमात्मतत्त्वम् ।

४–४ प्लवाः । यज्ञप्रधानाः पुरुषा जीर्णनौका इव संसारार्णवसंतरणासमर्था इत्यर्थः ।

—५ परीक्ष्य । मीमांसान्यायैर्निरूप्य । ब्राह्मणः । अधीतसाङ्गसशिरस्कवेदः । अकृतः । नित्यः परमात्मा कृतेन कर्मणा न लभ्यते । गुरुमेवेति । एवकारेण गुरूपसदननियमो गम्यते । समित्पाणिः । न रिक्तपाणिः । श्रोत्रियं श्रुतवेदान्तम् । ब्रह्मनिष्ठम् । ब्रह्मसाक्षात्कारवन्तं गुरुमभिगच्छेदेवेत्यन्वयः । उपसन्नाय । प्राप्ताय । शमान्विताय । बाह्येन्द्रियनियमयुक्ताय । एतेन श्रवणोपयुक्तमवधानं विवक्ष्यते, न तूपासनोपयुक्तमत्यन्तेन्द्रियजयादि । येन । विज्ञानेन । अक्षरम् । स्वरूपेणाविकारम् । अनेन जडव्यावृत्तिः । सत्यम् । गुणद्वाराप्यविकारम् । अनेन जीवव्यावृत्तिः । प्रोवाच प्रब्रूयात् ।

—१० मृत्युः प्रमादो मोहो वा । यथावस्थितात्मस्वरूपाज्ञानं प्रमादः । भ्रान्तिज्ञानं मोहः । पश्यः । ब्रह्मदर्शी ।

—११ स्वराट् । स्वतन्त्रः । कर्मवश्यो न भवतीत्यर्थः ।

—१३ अयनाय । मोक्षाय ।

—१३–४ पृथगिति । पृथक्शब्देन तदुपासनरूपज्ञानं नात्मैक्यविषयमपि तु पृथक्त्वविषयमिति दर्शितम् । तेन परमात्मना । जुष्टः प्रीतिविषयीकृतः । इत्यादीनीति । अस्य 'वेदान्तवाक्यानि' इति पूर्वेणान्वयः ।

—१५ एकशास्त्रत्वप्रयोजकीभूतं पूर्वमीमांसाप्रतिपादितसाध्यधर्मविचारस्य ब्रह्मविचारापेक्षया पूर्वत्वमसहमानः पृच्छति–ननु चेति ।

—१७ ब्रह्मजिज्ञासायाम् । मीमांसोत्तरभागप्रतिपादितायाम् ।

धर्मविचारः । मीमांसापूर्वभागप्रतिपादितः साध्यधर्मविचारः ।

—१८ परिहरति–एवं तर्हीति । उदाहृतवाक्यमात्रतृप्तोसि चेदित्यर्थः ।

—१९ कृत्स्नस्येति । ब्रह्मणोपीति भावः ।

पुनः पृच्छति–सत्यमिति । अर्धाङ्गीकार एतदव्ययम् ।

आपाततः प्रतीतिरज्ञाननिवृत्तिमात्रेण संशयविपर्ययसहं ज्ञानम् ।

–२०–१ न्यायानुगृहीतस्येति । अन्यथा 'तान्येवानुविनश्यति' (बृ. २।४।१२) 'असद्वा इदमग्रआसीत्' (तै. २।७।१) इत्यादिश्रुतिष्वात्माऽनित्यत्वादिप्रतीतिर्दुष्परिहरा स्यात् । विपर्ययो मिथ्याज्ञानम् । नातिवर्तते । नातिक्रामति ।

४—२२ परिहरति—**तथैवेति** । अत्रापि न्यायानुग्रहाभावे 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' (आ. श्रौ. सू. ८।१।१) इत्यादिवाक्येषु कर्मफलस्थिरत्वप्रतीतिर्दुष्परिहरेति भावः ।

—२४ एवं फलद्वारा हानाय कर्मज्ञानापेक्षा दर्शिता । अथ ' स्वरूपेणोपादानाय च नियमेन कर्मज्ञानापेक्षास्ति ' इति स्वमतं पूर्वोत्तरपक्षद्वारा दृढीकर्तुं ' मुमुक्षोः कर्मणो नियमेनानपेक्षा ' इति लघुपूर्वपक्षमुद्घाटयति—**ननु चेत्यादिना साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यमित्यन्तेन** ।

५—१ **अधीतेति** । वेदान्तवाक्याध्ययनेन तत्रैवापातप्रतीतिर्बुभुत्सा च भवतीति भावः । एवं च हानाय कर्मज्ञानापेक्षा नास्तीति सिद्धम् ।

—२—३ अथोपादानार्थमपि न कर्मापेक्षेत्युपपादयितुं वेदान्तमात्रबुभुत्सोरपि कर्मविचारापेक्षां शङ्कते—**कर्माङ्गाश्रयाणीति** । कर्माङ्गभूतोद्गीथादिविषयाणीत्यर्थः । एकस्य साम्नः पञ्च भागाः प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः । तत्र द्वितीय उद्गीथः प्रणवपूर्वं गीयते । तादृशोद्गीथावयवप्रणवोपासनम् ' ओमित्येतदक्षरमुद्गीथमुपासीत ' (छा. १।१।१) इति श्रुतौ विधीयते । अनधिगते कर्मण्युद्गीथादिविषयोपासनचिन्ताया अशक्यत्वात्कर्मविचारोपेक्षित इति भावः । अत्रैव । शारीरकमीमांसायामेव (अ. ३ पा. ३ सू. ५३) ।

—४ पूर्वपक्षी परिहरति—**अनभिज्ञ इति** । अस्मिन्शास्त्रे प्रधानतया प्रतिपाद्यं ज्ञानमिति त्वया न ज्ञातमित्यर्थः ।

—५—७ **विविधः** । अवान्तरभेदबहुलः । **भेदः** । ज्ञातृज्ञेयज्ञानरूपः । **मरणादीति** । आदिशब्देन नरकगर्भवासादिग्रहणम् । **संसारः** प्रकृतिसंबन्धः । **तत्प्रभवं सांसारिकम्** । **मिथ्याज्ञानं** भेददर्शनरूपभ्रान्तिज्ञानम् । **तस्य निबर्हणं** नाशः । **आत्मैकत्वविज्ञानमिति** । सर्पभ्रमस्य हि रज्वयाथात्म्यज्ञानं निवर्तकं न तु कर्मविशेषः । एवं भेददर्शनस्याविद्याकृतत्वादैक्यज्ञानमेव तन्निवर्तकमिति तत्रैव तात्पर्यं वेदान्तवाक्यानामित्यर्थः ।

—८ **क्वोपयुज्यते** । न कुत्रचित् । ज्ञानस्वरूपोत्पत्तौ तत्फलोत्पत्तौ ज्ञानोत्पत्तिसाधनानुग्रहे वा नोपयुज्यत इत्यर्थः ।

—९ **ज्ञानस्वरूपत्वाविशेषादिति** । ज्ञानस्वरूपत्वसाम्याद्बुद्धिस्थतया कृतः, न तु प्रधानार्थोपयोगित्वादिति भावः ।

—११ यत्प्रधानं यस्मिन्निति बहुव्रीहिः । **तदपेक्षितमेव** । तेन प्रधानार्थेनापेक्षितं साधनचतुष्टयमेव । न त्वन्यत्कर्मज्ञानादीत्यर्थः ।

५—१२ अत्र ज्ञानकर्मसमुच्चयवादिनो भास्करीयाः प्रत्यवतिष्ठन्ते—बाढमिति। समुच्चयेऽपि नोभयोः समप्राधान्यं किं तु ज्ञानमेव प्रधानं कर्म तु तदङ्गमिति केचित्। अन्ये तु समप्राधान्यमिच्छन्ति।

—१३ सर्वापेक्षेति। विद्याग्निहोत्रादिसर्वकर्मापेक्षैव। 'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' (बृ. ४।४।२२) इत्यादिश्रुतेः। यथा पुरुषगमनसाधनभूतोश्वः परिकरबन्धादिकर्मापेक्षस्तद्वदिति तत्सूत्रार्थः।

—१४ अपेक्षिते चेति। नित्यनैमित्तिकयोः समुच्चयो न तु काम्यनिषिद्धयोरिति विभागः कर्माज्ञाने ज्ञातुं न शक्यत इत्यर्थः।

—१६ पूर्वपक्षी परिहरति—नैतदिति।

सकलविशेषाः। सजातीयविजातीयस्वगतभेदरूपाः। तेषां प्रत्यनीकं सर्पाद्याकाराणां रज्जुत्वमिव तेषां निवर्तकम्। चिन्मात्रं ज्ञानरूपम्। मात्रशब्देन ज्ञातृत्वज्ञेयत्वव्यावृत्तिः। एवकारेण कर्मव्यावृत्तिः।

—१७ अविद्यानिवृत्तिरेव। न ब्रह्मप्राप्तिः। तस्याः सिद्धत्वात्।

—१७–८ वर्णेति। वर्णविशेषा ब्राह्मणादयः। आश्रमविशेषा ब्रह्मचर्यादयः। साध्यं स्वर्गादि। साधनं यागादि। इतिकर्तव्यता प्रयाजाद्यङ्गजातम्। आदिशब्देन निषिद्धानि प्रायश्चित्तानि च कर्माणि संगृह्यन्ते। एतादृशा अनन्ता ये विकल्पा भेदास्तदास्पदमित्यर्थः।

६–३–५ वस्तुविरोधादिति। कर्मणोनन्तभेदास्पदत्वेनानित्यफलदत्वेन च विद्यया सह विरोधादित्यर्थः। श्रुत्यक्षरपर्यालोचना। विविदिषन्तीति क्रियापदस्थसन्प्रत्ययार्थनिरूपणम्। न फलोत्पत्तौ। न मोक्षोत्पत्तौ। श्रुतौ हि (बृ० ४।४।२२) यज्ञसाध्यत्वं विविदिषाया एवोक्तं न तु मोक्षस्येति भावः।

—६ शमादीनामेवेति। अनेन ज्ञानोत्पत्तावपि न कर्मापेक्षेति ध्वन्यते। शमादीनामिन्द्रियव्यापारोपरतिरूपत्वेन यज्ञादिकर्मणश्च तत्प्रवृत्तिरूपत्वेनान्योन्यविरोधित्वात्।

—७ शान्त इति। शमो मनोनिग्रहः, दमो बाह्येन्द्रियनिग्रहः, उपरतिः संन्यासः, तितिक्षा क्षमा, समाधानं चित्तैकाग्रता। एतद्युक्त आत्मनि जीवात्मनि तदभेदेन परमात्मानं पश्येदित्यर्थः।

—८–१३ जन्मान्तरेति। जन्मान्तरशतानुष्ठितं फलविशेषाभिसंधिरहितं यत्कर्म तेन मृदितकषायस्य नष्टपापस्य विविदिषा जायते। स्वर्गादिसाधनस्य कर्मणो विविदिषासाधनत्वानुपपत्तिपरिहारायानभिसंहितफलशब्दः। विविदि-

षारूपफलाभिसंधिसत्त्वाद्विशेषेत्युक्तम् । **सदेवेति** । इदं कारणवाक्यम् । अनेन 'कारणं नास्त्येव' इत्यज्ञानं निवर्तते । **सत्यमिति** । इदं शोधकवाक्यम् । अनेन 'शून्यस्य कारणत्वम्' इत्यज्ञानं निवर्तते । **निष्कलं** निरवयवम् । **निष्क्रियं** क्रियारहितम् । **शान्तमशनायापिपासाशोकमोहजरामृत्युरूपोर्मिषट्करहितम्** । **निरवद्यमनिन्द्यम्** । **निरञ्जनं** कर्मतत्फलसंबन्धरहितम् । अनेन सत्यज्ञानादिवाक्यफलितव्यावृत्तिर्विशदी क्रियते । **अयमात्मा ब्रह्म तत्त्वमसीति** । अनेन जीवब्रह्मभेदरूपाज्ञाननिवृत्तिः ।

६—१५ तर्हि किमर्थं श्रवणादिविधानमित्याशङ्क्याह—**वाक्यार्थेति** । वाक्यार्थज्ञानोत्पत्तिविरोधिनिरसनोपयोगीनीत्यर्थः ।

—१६ **प्रतिपादकानि** । निष्पादनक्षमाणि ।

—१८ **एतद्विरोधिनी** । आत्मैकत्वविद्याविरोधिनी ।

—२३ **इहामुत्रेति** । ऐहिकामुष्मिकफलभोगवैतृष्ण्यमित्यर्थः ।

—२४ **अर्थस्वभावादेव** । अर्थशब्देन साधनचतुष्टयज्ञानकर्मणां ग्रहणम् । एष हि तेषां स्वभावः—नित्यानित्यवस्तुविवेकादनित्यसांसारिकफलोपभोगविरागे नित्यपुरुषार्थेच्छायां च सत्यां श्रवणादौ प्रवृत्तिरवश्यं भवति । शमादीनां च मनोऽवधानहेतुत्वेन तदुपयोगित्वं निवृत्तिरूपत्वेन च प्रवृत्तिरूपकर्मविरोधित्वम् । ज्ञानस्य कर्मनिरपेक्षोपायत्वम् । कर्मणश्च भेदावलम्बित्वेन तद्विरुद्धत्वमिति । **इदमेव** । साधनचतुष्टयमेव ।

—२६ **बन्धः** । संसारबन्धः ।

७-१ **ज्ञानेनैव** । न तु कर्मणा । एतेन समुच्चयवादो निरस्तः ।

—२ ज्ञानं प्रत्यपि कर्मणो न साधनत्वमित्याह—**निवर्तकमिति** ।

—२-३ **तस्य** । कर्मनिरपेक्षस्य । अतएवेदृशज्ञानस्वरूपे कर्मणो नोपयोगः । समुच्चयवादे तु कर्मसहितज्ञानस्य मोक्षहेतुत्वेन तादृशज्ञानस्वरूपस्य कर्मघटितत्वात्स्यादुपयोगः । **एतस्य** । अद्वैतविषयस्य । **तदुत्पत्तौ** । तादृशज्ञानोत्पत्तौ । **कार्ये** । मोक्षे ।

—७ **अनुपयोगात्** । हानार्थमुपादानार्थं च कर्मज्ञानस्यानपेक्षितत्वात् । अत्रायं संग्रहः—

विरोधादप्रमाणत्वाच्चित्तशुद्ध्युपयोजनात् ।
ज्ञानमात्रस्य हेतुत्वश्रुतेः सामर्थ्यतोऽपि च ॥
शमाद्यङ्गकताज्ञानान्न धीकर्मसमुच्चयः ।
श्रवणादिक्रमोद्भिन्नवाक्यजा धीर्विमोचिका ॥ इति ।

७—९ लघुसिद्धान्तमारभते—अत्रोच्यत इति ।

—११ वेदान्तवाक्यैः । ' प्रज्ञां कुर्वीत ' इत्यादिविधिवाक्यैः ।

—१२ वाक्यात् । ' तत्त्वमसि ' (छा. ६।८।७) इत्यादिवाक्यात् ।

—१३ विधानमन्तरेणापीति । प्रमाणज्ञानं वस्तुतन्त्रं न पुरुषतन्त्रमिति न तद्विधेयमिति भावः ।

—१४ न चेति । वाक्यादविद्यानिवर्तकज्ञानोत्पत्तौ भेदवासना प्रतिबन्धिकेत्याशयः । वाक्यं कर्तृ ।

—१६—७ 'सनकादीनां ज्ञानित्वेन प्रसिद्धत्वाद्भेदवासनायाः प्रतिबन्धकत्वं नास्ति ' इति चेत्तत्राह—जातेपीति । उत्पन्नेपि ज्ञान इत्यर्थः । सर्वस्येति । ज्ञानोत्पत्तावपि भेदज्ञाननिवृत्तिः केषांचिदेव भवति न तु सर्वस्येत्यर्थः । 'ज्ञानोत्पत्तौ सत्यां भेदज्ञानं न निवर्तते' इत्यत्र दृष्टान्तमाह—चन्द्रैकत्व इति ।

—१७—८ अनिवृत्तं चेद्भेदज्ञानं बन्धकं स्यादित्यत आह—अनिवृत्तमपीति । छिन्नमूलत्वेन । छिन्नमविद्याख्यमूलं यस्य भेदज्ञानस्य तत्त्वेनेत्यर्थः । यथा कुलालभ्रमितं चक्रं भ्रमयितृव्यापारोपरमेऽपि पूर्ववेगवशात्किंचित्कालं स्वयमेव भ्रमेत्क्रमेण चोपरमेत तद्वत् । इतिशब्दः शङ्कासमाप्तिद्योतकः ।

—१८ प्रथमं ज्ञानानुत्पत्तिं दूषयति—सत्यामिति ।

—१९ भेदवासना प्रतिबन्धिकेति चेत्तत्राह—सत्यामपीति । निवर्त्याया भेदवासनाया निवर्तकज्ञानोत्पत्तिप्रतिबन्धकत्वं न संभवतीत्यर्थः । आप्तोपदेशः शाब्दज्ञानहेतुः । लिङ्गं चानुमानहेतुः । आदिना प्रत्यक्षप्रमाणसंग्रहः ।

—२०—१ जातेपीत्याद्युक्तं निरस्यति—सत्यपीति । भवता । ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्ववादिना ।

—२१ भेदेति । वासनाया अपि मिथ्यात्वाविशेषात्तस्या अपि ज्ञानेन निवर्त्यत्वमवश्याश्रयणीयमिति भावः ।

८—४ वासनेति । ' वासनायाः कार्यं भेदज्ञानं छिन्नाविद्याख्यमूलमनुवर्तते ' इति मूर्खोक्तिः । ' छिन्नमूलम् ' ' अनुवर्तते ' इत्युक्तेर्व्याहतत्वात् । अकारणकार्योत्पत्तिस्वीकारे तु मुक्तिरपि ज्ञाननिरपेक्षा स्यात् । श्रवणादिभिर्विना वाक्यार्थज्ञानं स्यात् । अविद्यया विना जगद्भ्रमश्च स्यात् । अधिष्ठानेन विनाऽविद्यापि कार्यकरी स्यादिति भावः ।

—५—६ बाधकः । एकश्चन्द्र इत्याप्तोपदेशः । तिमिरो नेत्ररोगः ।

८—७ **प्रबलेति** । ऐन्द्रजालिकभ्रमादिषु वस्तुतो भ्रमत्वेपि भ्रमहेतोः प्राबल्यादसत्यविषयत्वनिश्चयप्रतिबन्धः स्यादिति तद्व्यावृत्त्यर्थं प्रबलप्रमाणशब्दः । **भयादीति** । रज्जुसर्पभ्रान्तिमत्पुरुषापेक्षया भयादिकार्यनिवृत्तिः फलत्वेनोक्ता । आदिना पलायनम् ।

—१३–७ **विज्ञायेति** । आत्मानं विज्ञाय श्रवणमननाभ्यां ज्ञात्वा प्रज्ञां निदिध्यासनं कुर्वीतेत्यर्थः । **अनुविद्य** । ज्ञात्वा । **विजानाति** । विजानीयात् । ध्येयादिति यावत् । **निचाय्येति** । अनेन ज्ञानस्य प्रत्यक्षसमानाकारता दर्शिता । चायृ दर्शन इति हि धातुः । एतेन केवलवाक्यार्थज्ञानस्य मोक्षसाधनत्वं नास्ति किं तु साक्षात्कारप्रयोजकीभूतध्यानस्येति सूचितम् । **निदिध्यासितव्य इति** । सन्प्रत्ययार्थेच्छाया अविधेयत्वात्तत्कर्मीभूतध्यानस्यैव विधेयत्वं बोध्यम् । एवं विजिज्ञासितव्य इत्यत्रापि । आद्यशब्दादात्मानं ध्यायथेत्यादेर्ग्रहणम् ।

—१९ ननु प्रज्ञाविजानातिशब्दयोर्ज्ञानसामान्यवाचित्वात्कथं तद्विशेषस्य ध्यानस्य विधानमत आह–**अत्रेति** । **ऐकार्थ्यम्** । एकार्थप्रतिपादकत्वम् ।

—२२ ननु श्रोतव्य इत्यनेन मन्तव्य इत्यनेन वैकार्थ्यात्प्रज्ञाविजानातिशब्दयोः श्रवणपरत्वं मननपरत्वं वाऽस्त्वित्याशङ्क्याह–**श्रोतव्य इति** ।

—२३ **अर्थपरत्वेन** । अर्थप्रतिपादकत्वेन । **प्रयोजनेति** । स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनादित्यर्थः ।

९–२ अन्य आह–**श्रवणप्रतिष्ठार्थत्वादिति** । आचार्योपदिष्टस्यार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनमेव मननमिति भावः ।

—३ **आवृत्तिरिति** । वेदान्तेषु मोक्षसाधनतया विहितं वेदनमसकृदावृत्तिरूपम् । उपासनारूपमिति यावत् । श्रुतौ विद्युपास्त्योरेकार्थत्वेनोपदेशादिति सूत्रार्थः ।

—५ तमेवाह–**तदिदमिति** ।

—६ **अव्यतिरेकेण** । अभेदेन ।

—६–८ **मनो ब्रह्मेति** । अत्रोपासीतेत्युपास्तिनोपक्रम्य य एवं वेदेति विदिनोपसंहृतम् । भाति चेति । अत्र वेदेत्यस्योपासीतेत्यर्थः । मनो ब्रह्मेत्युपासीतेत्युपक्रमानुरोधात् । य एवमुपासीत स कीर्त्या यशसा च भाति ब्रह्मवर्चसेन च तपति । कीर्तिः परत्वविषयप्रथा यशः सौलभ्यप्रथेति कीर्तियशसोर्भेदः । **ब्रह्मवर्चसं** ब्रह्मतेजः ।

९—८ **न स इति**। योत एकैकमुपास्ते इत्युपक्रमवाक्यम्। यः प्राणादिष्वेकैकमुपास्ते स न वेद हि यत एषोऽकृत्स्नोऽकृत्स्नवित्। किं त्वात्मेत्येवोपासीतेत्यर्थः। अत्रोपक्रमोपसंहारयोरुपासनशब्दो मध्ये वेदनशब्दः।

—९-१० **यस्तदिति**। अत्र वेदेति विदिनोपक्रम्योपास्स इत्युपास्तिनोपसंहारः कृतः। तद्ब्रह्म यो रैक्वो वेद, स रैक्वो यद्ब्रह्म वेद, एतदुभयं स रैक्व एतद्ब्रह्म चेत्येवंलक्षणं तव मयोक्तमित्यर्थः। **अनु म इति**। हे भगवो हे भगवंस्त्वं यां देवतामुपास्स एतां देवतां मेऽनुशाधि विविच्य ज्ञापयेत्यर्थः।

—१२ **अविच्छिन्नेति**। अविच्छिन्नत्वं विजातीयप्रत्ययान्तराव्यवहितत्वम्। ध्रुवस्मृतेरविच्छिन्नस्मृतिसंतानमेव स्वरूपम्। सा ध्रुवा स्मृतिरेव ध्यानमित्यर्थः।

—१४ **समानाकारेति**। वक्ष्यमाणरीत्यापरोक्षत्वेनेति भावः।

—१५ **भिद्यत इति**। हृदयस्य मनसो रागादिग्रन्थिः। यद्वा हृदयस्य तत्स्थजीवस्य ग्रन्थिः प्रकृतिसंबन्धः। हृदयं शरीरं तद्रूपो ग्रन्थिरिति वा। संशयशब्देन देहात्माभिमानादिर्विपर्ययोऽप्युपलक्षणीयः। **कर्माणि**। पुण्यपापरूपाणि। परे सर्वोत्कृष्टत्वेन प्रसिद्धा अपि हिरण्यगर्भादयोऽवरे निकृष्टा यस्मात्तस्मिन्ब्रह्मणीत्यर्थः। अस्मिन्वचने ग्रन्थिभेदहेतुत्वेन ब्रह्मदर्शनमुक्तम्। पूर्वत्र तु स्मृतिरुक्तेत्यनयोरेकवाक्यत्वं न स्यात्। अतः स्मृतिर्दर्शनसमानाकारेत्यङ्गीकर्तव्यमिति भावः।

—१७-८ **एवं च सति**। उपायदशापन्नज्ञानस्य दर्शनरूपत्वे सिद्धे सति। **इत्यनेन**। इत्यादिनोपायप्रदर्शनपरेण वाक्येन।

—१८-९ स्मृतेरपरोक्षत्वं कथमिति चेत्तत्राह—**भवति चेति**। **भावना** वासना। दर्शनरूपत्वं च विशदतराभासरूपत्वम्।

—१९ **वाक्यकारेण**। सूत्रकाराभिप्रायज्ञेन। **प्रपञ्चितम्**। वाक्यचतुष्टयेन पूर्वपक्षसिद्धान्तरूपेणोक्तमित्यर्थः।

वेदनमिति। इदं सिद्धान्तवाक्यम्।

—२१-२ पूर्वपक्षमाह—**सकृदिति**। यथा प्रयाजादयः सकृदनुष्ठिता दर्शपूर्णमासफलोपकारिणस्तथा सकृत्प्रत्यय एव मोक्षोपकारीति तमेव कुर्यान्न तदावृत्तिरूपं ध्यानम्, तावता शब्दार्थस्य शास्त्रार्थस्य कृतत्वाच्छास्त्रस्य कृतार्थत्वादित्यर्थः। **सिद्धं त्विति**। सिद्धान्तस्त्वित्यर्थः।

—२३-१०-१— उपासनशब्दार्थं चतुर्थवाक्येनाह—**उपासनमिति**। **दर्शनात्**। लोके तथा दर्शनात्। **निर्वचनम्**। निष्कृष्टं प्रमाणभूतं वचनं निर्वचनं श्रुतिवाक्यम्। अथ वोपासनशब्दस्य निरुक्तिः। उपपूर्वस्यासधातोर्हि विजातीयप्रत्ययान्तराव्यवहितं चिन्तनमर्थः।

१०—४ **विशिनष्टीति** । साक्षात्काररूपत्वेनेत्यर्थः । अग्रिमश्रुतौ 'विवृणुते तनुं स्वाम् ' इत्युक्तेः ।

—५ **प्रवचनेन** । मननेन । प्रवचनशब्देन तत्साधनीभूतं मननं लक्ष्यते । निदिध्यासनश्रवणार्थकमेधाश्रुतशब्दसमभिव्याहारात् । **मेधया** । निदिध्यासनेन । **यमेवेति** । एष आत्मा यमेव भक्तं वृणुते स्वीकरोति स्वात्मप्राप्त्यर्थं प्रयतते बुद्धियोगं ददातीति यावत् । तेनैव भक्तेनायमात्मा लभ्यः । एष आत्मा स्वां तनुं तस्य भक्तस्य विवृणुत इत्यर्थः ।

—७ **केवलेति** । केवलत्वं च परमात्मकृतवरणरहितत्वम् ।

—९-१० **यस्य** । भक्तस्य । **अयम्** । परमात्मा । **सः** । भक्तः । **अस्य** । परमात्मनः ।

—१० **यथायमिति** । अयम् । भगवति निरतिशयप्रीतिमान् । **प्रियतमः** । निरतिशयभगवत्प्रीतिविषयः ।

—१२ **सततयुक्तानाम्** । सततयोगं काङ्क्षन्ताम् । ' आशंसायां भूतवच्च ' (पा० सू० ३।३।१३२) इति कर्तरि क्तः । प्रीतिपूर्वकमिति मध्यमणिन्यायेनोभयान्वयि ।

—१७-८ **स्मर्यमाणेति** । स्मृतिविषयस्य परमात्मनो निरतिशयप्रियत्वेन स्मृतेरपि निरतिशयप्रियत्वम् ।

अर्थेनैव विशेषो हि निराकारतया धियाम् ।

इत्युक्तेः । स्वतो निराकारायां बुद्धौ विषयसंबन्धेनैव विशेष इति तदर्थः । **यस्य** । भक्तस्य ।

—२०-११-१ **अत एव** । मोक्षसाधनज्ञानस्य भक्तिरूपत्वादेव । **तमेव** । परमात्मानमेव । विदित्वा मृत्युमत्येतीत्यर्थः । **अयनाय** । मोक्षाय । **इज्यया** । यज्ञेन ।

११-५ अस्त्वेवं वेदनस्य भक्तिरूपोपासनत्वं, तस्य कर्मापेक्षा कथमत आह—**एवंरूपाया इति** । मोक्षोपायभूतज्ञानावस्थाविशेषाः कर्मसाध्या इति भावः । ' यज्ञेन विविदिषन्ति ' (बृ. ४।४।२२) इत्यत्र यज्ञस्य पूर्वोक्तवेदनसाधनत्वमेव, न त्विच्छासाधनत्वम् । असिना जिघांसतीतिवत् ।

—७-९ **इच्छासाधनत्वेऽप्याह-यद्यपीति** । **अभ्यासेति** । अभ्यासेनाधेयः फलोत्पादनक्षमत्वरूपो विशेषो यस्मिन्नित्यर्थः । **आ प्रायणात्** । मरणपर्यन्तम् ।

—११-३ अस्मिन्नर्थे सूत्रकारसंमतिमाह—**आ प्रायणादिति** । मोक्षसाधनमुपासनमा प्रायणादा मरणादनुवर्तनीयम् । हि यत उपासनोद्योगमारभ्य

मरणपर्यन्तं यः कालस्तत्र सर्वत्राप्युपासनं 'स खल्वेवं वर्तयन्यावदायुषम्' (छा. ८।१५।१) इति श्रुतौ दृष्टमिति सूत्रार्थः। अग्निहोत्रादीति। अग्निहोत्रादि कर्म तु तेषां विद्याख्यकार्यायैव, 'विविदिषन्ति यज्ञेन' (बृ. ४।४।२२) इति श्रुतौ तस्य विद्यासाधनत्वदर्शनादिति तदर्थः। सहकारित्वेनेति। विद्योत्पत्तिद्वारेण विद्यासहकारितयाप्यनुष्ठेयानि कर्माणीति तदर्थः।

११—१४-६ विवेकादिभ्यः। विवेकादिसप्तसाधनेभ्यः। न तु केवलकर्मणा शमादिना चेत्यर्थः। वाक्यकारग्रन्थमाह—तल्लब्धिरिति। ध्रुवानुस्मृतिलब्धिरित्यर्थः। अत्र विवेकादिषु कारणत्वं व्यासज्यवृत्ति, न तु प्रत्येकपर्याप्तमिति बोध्यम्। निर्वचनम्। अप्रमाणेभ्यो निष्कृष्टं प्रमाणभूतं वचनं निर्वचनम्।

—१६ जातीति। जातिदुष्टं कलञ्जगृञ्जनादि। आश्रयदुष्टं पतितादिस्वामिकम्। निमित्तदुष्टमुच्छिष्टादि। एतत्त्रिविधदोषरहितादन्नात्कायशुद्धिर्विवेक इत्यर्थः।

—२० आरम्भणेति। आरम्भणमालम्बनं शुभाश्रयस्तस्य पुनः पुनः संशीलनं परिशोधनमित्यर्थः।

—२१ भाष्यकारेण। द्रमिडाचार्येण।

—२४ अनाशकेन। कामानशनयुक्तेन। रागद्वेषप्रयुक्तं यद्विषयसेवनं तदभावः कामानशनम्। यदृच्छालाभसंतुष्टत्वमिति यावत्।

—२५ सत्येति। सत्यं भूतहितम्। आर्जवं वाक्कायानामैकरूप्यम्। दया स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वम्। दानं लोभराहित्यम्। अहिंसा कायेन वाचा मनसा च परपीडानिवृत्तिः। अभिध्या परकीये स्वबुद्धिः। यद्वा निष्फलचिन्ता। अथ वा परकृतापराधचिन्ता। तद्राहित्यमनभिध्या।

१२-१ शोकवस्तु। शोकनिमित्तवस्तु। आदिशब्देन भयसंग्रहः। अतीतविषयः शोकः। आगामिविषयं भयमिति विवेकः। अभास्वरत्वमिति दैन्यशब्दविवरणम्। तच्चाभीष्टकार्यप्रवृत्त्यक्षमत्वरूपम्।

—३ बलहीनेन। मनोबलहीनेन।

—४ तद्विपर्ययजेति। देशकालसाद्गुण्यप्रियवस्त्वाद्यनुस्मृतिजन्येत्यर्थः। तुष्टिः। संतोषः। अतिसंतोष इति। शोकस्येवास्यापि मनःशैथिल्यहेतुत्वादिति भावः।

—७ एवं नियमयुक्तस्य। विवेकादिसाधनसप्तकयुक्तस्य।

—८ विद्यां चेति। अविद्याशब्देन विद्याङ्गभूतं कर्म। उभयं सह साहित्येन वेद। अनेन विद्यायाः कर्मसापेक्षत्वं सूच्यते।

१२-१० शंकराचार्यास्तु सः ह इति पदच्छेदं कृत्वाऽविद्याया ज्ञातव्यत्वं च हेयत्वेन । अविद्ययाऽज्ञानेन मृत्युं संसारं तीर्त्वा प्राप्य स्थितो विद्ययाऽमृतमश्नुत इति व्याचख्युः । तन्निरासार्थमाह-अत्रेति । विद्यां ब्रह्मोपासनरूपां तदङ्गभूतकर्मरूपामविद्यां चैतदुभयं सह वेद । अङ्गाङ्गिभावेन सहानुष्ठेयं वेदेत्यर्थः । यद्वा विद्यां चाविद्यां चेत्यस्य विद्यानुबन्धि शमदमादि कर्मानुबन्धि फलाभिसंधिकर्तृत्वाभिमानराहित्यादिकं चेत्यर्थः । अथवा चशब्दावुक्तार्थविरोधिसमुच्चयपरौ । तथा च विद्या ब्रह्मज्ञानं तद्विरोधि विषयरागद्वेषादिकम् । अविद्या विद्याङ्गं कर्म तद्विरोधि संसारहेतुभूतं फलाभिसंधिसहितं कर्म । एतदुभयस्य ज्ञातव्यत्वं च हानार्थमित्यर्थः ।

—११ प्राचीनं कर्म । पुण्यपापरूपम् । अपोह्येति । तरतेरुत्तरणवाचित्वं स्वरससिद्धम् । प्राप्तिवाचित्वे तु स्वरसभङ्ग इति भावः ।

—१३ विद्येतरदिति । अविद्याशब्दस्य विद्येतरत्वं प्रवृत्तिनिमित्तम् । तच्च विहितकर्मण्यस्तीति भावः ।

—१४-५ ' अविद्यया मृत्युं तीर्त्वा ' इति पदानां स्वोक्तेर्थे संमतिमाह-इयाजेति । स ब्रह्मवेत्ता राजा जनकः । ज्ञानव्यपाश्रयः । आगमोत्थज्ञानवान् । इयाजाकरोत् । पाकं पचतीत्यत्र पचेरिवात्र यजेः सामान्यवाचित्वम् । ब्रह्मविद्यामधिष्ठाय । उपासनात्मकं ज्ञानं साध्यत्वेनावलम्ब्य । अत्र तर्तुमिति तृधातोः प्राप्त्यर्थो नैव संभवति । न हि ब्रह्मवेत्ता संसारप्राप्त्यर्थं कर्म करोतीति युक्तम् ।

—१७ अनिष्टफलतयेति । इदमेव पापशब्दप्रवृत्तिनिमित्तम् । अलौकिकत्वे सत्यनिष्टफलासाधारणकारणत्वं पापत्वम् । अत एव शास्त्रादावीश्वरे च नातिव्याप्तिः । देवेन्द्रत्वस्यापि वासुदेवभक्त्यन्तरायत्वेन निरयतुल्यतया तज्जनकपुण्यस्यापि मुमुक्षुं प्रत्यनिष्टफलत्वमेवेति बोध्यम् ।

अस्य च । पापस्य च ।

—१९-२० असाधु कर्म । फलाभिसंधिकर्तृत्वाभिमानसहितं यज्ञादिकं ब्रह्महत्यादिकं च । अधो निनीषतीति । अधोनयनं स्वर्गप्रापणं नरकप्रापणं च । यत्समस्तलोकेभ्य उन्नयनमपवर्गप्रापणरूपं तदपेक्षया स्वर्गप्रापणस्याप्यधोनयनत्वात् ।

—२३ अतः । पापस्य ज्ञानविरोधित्ववचनात् । पापं कर्म । पूर्वोक्तमुभयविधम् ।

—२४ अनभिसंहितफलेनेति । अनेन स्वर्गादिफलप्रदकर्मव्यावृत्तिः । अनुष्ठितेन । न तु ज्ञानमात्रेण । धर्मेणेति । निष्कामकर्मस्वरूपधर्मेण पूर्वोक्तोभयविधपापस्य नाश इत्यर्थः ।

१३-१ ज्ञानस्य कर्मसापेक्षत्वं निगमयति-तदेवमिति। तत्। श्रुतिस्मृतितदनुग्राहकोपपत्तिसूत्रवाक्यकारवचनेभ्यः।

अतः। ब्रह्मज्ञानस्य फलाभिसंधिरहिताश्रमकर्मापेक्षत्वात्। अत्रेदं बोध्यम्। कर्मज्ञानं कर्मण उपादानार्थं हानार्थं च। तत्र विहितकर्मणः स्वरूपेणोपादानं फलद्वारा च हानम्। निषिद्धकर्मणस्तु स्वरूपेणापि हानमेवेति।

—५ इदानीं साधनचतुष्टयस्यानपेक्षितत्वेन पूर्ववृत्तत्वं खण्डयति—अपि चेति। नित्यानित्यवस्तुविवेकादयश्चेति। चकारः प्रत्युतेत्यर्थे। मीमांसाश्रवणम्। पूर्वोत्तरभागद्वयरूपमीमांसाश्रवणम्।

—६-७ फलेति। फलविशेषो भोगमोक्षरूपः। साधनविशेषो यज्ञोपासनादिः। इतिकर्तव्यताविशेषः प्रयाजादिः साधनसप्तकं च। अधिकारिविशेषो बुभुक्षुर्मुमुक्षुश्च। कर्मस्वरूपं साङ्गं यज्ञात्मकमुपासनात्मकं च। दुरवबोधत्वादिति। तथा चैतन्मीमांसाया न साधनचतुष्टयापेक्षा। किं तु साधनचतुष्टयस्यैव मीमांसापेक्षेति भावः। किं च तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् (बृ. ४।४।२३) इति श्रुतिरेवंविच्छब्देन शास्त्रजन्यज्ञानमनूद्य पश्येदिति प्रतिपन्नस्योपासनस्याङ्गतया शमादीनुपदिशति। अतः शमादीनां श्रवणपूर्ववृत्तत्वं श्रुतिविरुद्धम्। 'प्रशान्तचित्ताय' (मु. १।२।१३) इत्यादिश्रुतिस्तु श्रवणौपयिकावधाननिष्पादनार्थेति बोध्यम्।

—८ प्रकारान्तरेण साधनचतुष्टयस्य कर्मविचारापेक्षत्वं दर्शयति-एषामिति। शमादीनामित्यर्थः। विनियोगः। अङ्गत्वज्ञापनम्।

—८-९ श्रुतिलिङ्गादिभ्य इति। आदिशब्देन वाक्यप्रकरणस्थानसमाख्यानां ग्रहणम्। तत्र निरपेक्षो रवः श्रुतिः। व्रीहीन्प्रोक्षतीत्यत्र द्वितीयाश्रुत्या व्रीहीणां प्रोक्षणाङ्गत्वम्। शब्दसामर्थ्यं लिङ्गम्। बर्हिर्देवसदनं दामीति मन्त्रस्य दाधातोश्छेदनार्थत्वेन कुशच्छेदनाङ्गत्वम्। समभिव्याहारो वाक्यम्। यस्य पर्णमयी जुहूर्भवतीत्यत्र पर्णताजुह्वोः समभिव्याहारेण पर्णताया जुह्वङ्गत्वम्। उभयाकाङ्क्षा प्रकरणम्। प्रयाजादिषु समिधो यजतीत्यत्र फलविशेषस्यानिर्देशात्किमित्यस्युपकार्याकाङ्क्षा। दर्शपूर्णमासवाक्ये च कथमित्यस्युपकारकाकाङ्क्षा। अतः प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्। स्थानं क्रमः। ऐन्द्राग्नमेकादशकपालमित्येवं क्रमविहितेष्टिष्विन्द्राग्नी रोचनेत्यादिमन्त्राणां प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं क्रमेण विनियोगः। समाख्या यौगिकः शब्दः। आध्वर्यवनामककर्मण आध्वर्यवेति समाख्ययाऽध्वर्युकर्तृकत्वं ज्ञायते। अधिकं पूर्वमीमांसायां तृतीयाध्याये द्रष्टव्यम्। तदेवाह—तार्तीय इति। पूर्वमीमांसातृतीयाध्यायोक्त इत्यर्थः। इदमुपलक्षणम्। ब्रह्मविचारस्य कर्मविचारोक्तप्रमाणादिविषयककृत्स्नन्यायसापेक्षत्वात्।

१३—९–१० अथ ब्रह्मविचारस्य कर्मविचारापेक्षत्वेऽभ्युच्चययुक्तिरुच्यते–उद्गीथादीत्यादिना सर्वसंमतेत्यन्तेन। कर्मसमृद्ध्यर्थानि। कर्मफलसंपादकानि। समृद्धिरप्रतिबन्धफलत्वम्। ब्रह्मदृष्टिरूपाणीति। अब्रह्मणि ब्रह्मत्वेन दृष्टिर्ब्रह्मदृष्टिः। इहैव। उत्तरमीमांसायामेव।

—११ नोद्गीथाद्युपासनानां केवलं ब्रह्मज्ञानापेक्षत्वेनैवेह चिन्तनीयत्वमपि तु ब्रह्मविद्योत्पादकनिष्कामकर्मसाद्गुण्यापादकत्वेनापीत्याह–तान्यपीति। यत्समृद्ध्यर्थान्युद्गीथाद्युपासनानि तान्यपीत्यर्थः। प्रबलप्रतिबन्धके सत्यपि शीघ्रफलदत्वं साद्गुण्यापादकत्वम्।

—१२ अस्तूद्गीथाद्युपासनानामिह चिन्तनीयत्वं तथापि कथं ब्रह्मविचारस्य कर्मविचारापेक्षेत्यत आह–तेषां चेति। उद्गीथाद्युपासनानां चेत्यर्थः। तथाचोद्गीथविद्याविचारस्य साक्षात्संगतत्वात्तदपेक्षितं कर्मचिन्तनं पूर्ववृत्तमित्यभ्युच्चयहेतुः।

—१४ अथ साधनचतुष्टयपूर्ववृत्तत्ववादिनां शंकरमतानुयायिनां मतं महापूर्वपक्षरूपेणोपक्रमते–यदप्याहुरिति। अशेषविशेषा ज्ञात्रादयस्तत्प्रत्यनीकं स्वज्ञानेनैव तन्निवर्तकं शुक्तिरिव रजतस्येत्यर्थः। चिन्मात्रमिति। चिच्छब्देन तुच्छत्वव्यावृत्तिः। स्वयंप्रकाशत्वं हि चित्त्वम्। मात्रशब्देन ज्ञेयत्वज्ञातृत्वादिव्यावृत्तिः। प्रत्यनीकत्वधर्मोप्यनेन व्यावर्त्यते। ब्रह्मैवेति। एवकारेण सगुणब्रह्मव्यावृत्तिः। परमार्थः। तत्त्ववेदकप्रमाणविषयः।

—१४–१५ तदतिरेकि। तद्व्यतिरिक्तम्। आदिशब्देन जन्मजरामरणादिसंग्रहः। तस्मिन्नेवेति। अनेन निरधिष्ठानभ्रमव्युदासः। एवकारेणाधिष्ठानबहुत्वनिषेधः। तथा सति हि प्रपञ्चस्य तज्ज्ञाननिवर्त्यत्वसिद्धिः।

—१६ अत्र प्रमाणभूतवाक्यान्युदाहरति–सदेवेत्यादिना। हे सोम्येदमग्रे सृष्टेः पुरा सदेवासीदित्यर्थः। अनेन विजातीयभेदव्यावृत्तिः। एकमेवेति। अनेन सजातीयभेदव्यावृत्तिः। अद्वितीयमिति। अनेन स्वगतभेदव्यावृत्तिः।

—१७–१९ अथेति। अथ परा विद्या कथ्यते यया परविद्यया तदक्षरं ब्रह्माधिगम्यत इत्यर्थः। अद्रेश्यम्। प्रत्यक्षागोचरम्। अग्राह्यम्। अनुमानाद्यगोचरं कर्मेन्द्रियागोचरं वा। अगोत्रम्। अनामकम्। अवर्णम्। वर्णो नीलादिस्तद्रहितम्। अचक्षुःश्रोत्रम्। ज्ञानेन्द्रियरहितम्। अपाणिपादम्। कर्मेन्द्रियरहितम्। नित्यम्। कालतः परिमाणरहितम्। विभुम्। देशतः परिमाणरहितम्। सर्वगतम्। सर्वेण जगताधिष्ठानतया गतमाश्रितम्। अनेन वस्तुपरिच्छेदरहितत्वं सूच्यते। अदृश्यत्वादिषु हेतुः—सुसूक्ष्ममिति। न तु तुच्छत्वं हेतुरित्याशयः। भूतयोनिम्। भूतानां योनिं मूलकारणम्।

१४-१ निष्कलमिति। व्याख्यातं प्राक् (विवृति-पृ. ११ प. ३)।

—२-३-यस्येति। यस्य ब्रह्मविदोऽमतमविज्ञातं ब्रह्मेति मतमभिप्रायो निश्चयस्तस्य मतं ज्ञातं सम्यग्ब्रह्मेत्यभिप्रायः। यस्य पुनर्मतं ज्ञातं विदितं मया ब्रह्मेति निश्चयः स न वेदैव, न ब्रह्म विजानाति सः। विद्वदविदुषोर्थोक्तौ पक्षावधारयत्युत्तरार्धेन-अविज्ञातममतमविदितमेव ब्रह्म विजानतां विज्ञातमित्यभिमानवताम्। अविजानतां तदभिमानरहितानां विदुषां विज्ञातमेवेत्यर्थः। अनेन ज्ञेयत्वनिषेधः सूचितः।

—४-न दृष्टेरिति। अनेन ज्ञातृत्वनिषेधः सूच्यते।

—५-इदं सर्वमिति। योयं सर्पः सा रज्जुरित्यत्रेव बाधार्थमेतत्सामानाधिकरण्यं न तु शरीरशरीरिभावबोधनार्थमित्याशयः।

—६ भेददर्शयन्ताश्च इति दर्शयति-मृत्योरिति। मृत्योः सकाशान्मृत्युं पुनर्मृत्युमित्यर्थः। यद्वा मृत्युरविद्या। इवशब्देन नानात्वस्यापारमार्थ्यं दर्शितम्।

—९ वाचारम्भणमिति। वाचारम्भणं वागालम्बनम्। कोसौ विकारो नामधेयम्। वागालम्बनमात्रं नामैव केवलं न विकारो नाम वस्त्वस्ति। परमार्थतो मृत्तिकैव सत्यं वस्त्वस्तीत्यर्थः।

—११ यदेति। एतस्मिन्नात्मनि। उदिति निश्चये। अरं स्वल्पमन्तरं भेदं कुरुते मन्यत इत्यर्थः।

—१२ न स्थानत इति। परस्य ब्रह्मण उभयलिङ्गं सविशेषनिर्विशेषलिङ्गं स्वभावतस्तु नास्त्येव परं तु स्थानतोप्युपाधितोऽपि नास्ति। हि यतः सर्वत्र ब्रह्मस्वरूपप्रतिपादनपरेषु ' अशब्दम् ' (का. ३।१५) इत्यादिवाक्येष्वपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यत इत्यर्थः।

—१३ मायामात्रमिति। स्वप्नसृष्टिर्मायामात्रमेव, कात्स्न्र्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपत्वाभावादित्यर्थः। अनेन स्वप्नसृष्टिमिथ्यात्ववज्जगन्मिथ्यात्वं दृष्टान्ततया दर्शितम्।

—१५ प्रत्यस्तमितभेदमिति। सजातीयविजातीयभेदरहितमित्यर्थः। सत्तामात्रम्। स्वगतभेदरहितम्। अत एव वचसामगोचरम्।

१५-८ वेणुरन्ध्रेति। यथा मुरलीवादनादौ।

—१९ अभिधानादिति। अस्य ' अशेषविशेष ' (श्रीभाष्य-पृ. १३ प. १४) इत्यादिपूर्वप्रतिज्ञावाक्येन सहान्वयः।

मिथ्यात्वमिति। यथा रज्जौ सर्पस्य मिथ्यात्वम्। तस्य सर्पस्य पूर्वं प्रतीयमानत्वात्। पश्राद्रज्जुरूपयथावस्थितवस्तुनो ज्ञानेन तस्य सर्पस्य निवर्त्त-

त्वाच्च। दण्डनिवर्त्ये घटादावतिव्याप्तिवारणाय ज्ञानशब्दः। प्रबलभ्रान्तिज्ञाननिवर्त्यसत्यरजतादिष्वतिव्याप्तिवारणाय यथावस्थितवस्तुशब्दः। ज्ञानप्रागभावेऽतिव्याप्तिवारणाय प्रतीयमानत्वपूर्वकेति। प्रतीयमानत्वं च नियमेन प्रतीयमानत्वम्। तेन ज्ञानप्रागभावस्य कदाचित्प्रतीयमानत्वेऽपि न क्षतिः। यद्यपि यथावस्थितस्य ज्ञानमित्यर्थेनेष्टसिद्धिस्तथापि यथावस्थितं यज्ज्ञानमित्यर्थश्चकारनिरासाय वस्तुशब्दः। निवर्त्यत्वं च निवर्तनार्हत्वम्। तेन रज्जुसर्पस्य कदाचिद्भूरम्भ्रमेण निवृत्तावपि न क्षतिः।

१६-२-३ दोषश्चेति। अनाद्यविद्यैव दोषः। सा चाविद्याऽवस्थाभेदेन ब्रह्मस्वरूपतिरोधानहेतुर्विविधविचित्रसंसारहेतुश्च भवति। सदसदिति। सत्त्वेनासत्त्वेन च निर्वक्तुमशक्येत्यर्थः। एतेनाविद्याया अपरमार्थत्वं सूचितम्। परमार्थत्वे तु ज्ञाननिवर्त्यत्वं न स्यात्। न चापरमार्थत्वे तस्याः कल्पकान्तरापेक्षायामनवस्था स्यादिति वाच्यम्। अनादित्वेनादोषात्।

—३-१० ईदृशाविद्यासत्त्वे प्रमाणमाह—अनृतेनेत्यादिना। अनृतं मिथ्याज्ञानम्। तत्प्रयोज्यविषयतृष्णेहानृतशब्देनोच्यते। तेनानृतेन प्रजाः प्रत्यूढाः। अविद्यादिदोषैः स्वरूपाद्बहिरपकृष्टा इत्यर्थः। तेषामिति। तेषां सत्यानामात्मस्थानां कामानां 'ब्रह्मज्ञानिनः संकल्पादेव पित्रादयः समुत्तिष्ठन्ति' इत्यादिपूर्वोक्तानामनृतं मिथ्याज्ञानमपिधानमाच्छादनमिवेत्यर्थः। प्रकेतं प्रकर्षेण ज्ञातुमशक्यम्। मायामिति। जगतः प्रकृतिर्मायैवेति विद्यात्। तथा महेश्वरं मायिनं मायायाः सत्तास्फूर्त्यादिप्रदतयाऽधिष्ठानत्वेन प्रेरयितारं विद्यादित्यर्थः। इन्द्र इति। इन्द्रः परमेश्वरो मायाभिर्नामरूपकृतमिथ्याभिमानैर्न तु परमार्थतः पुरुरूपो बहुरूप ईयते गम्यत एकरूप एव सन्नित्यर्थः। ब्रह्मैव। इन्द्रादिशब्देन प्रतिपन्नमपि स्वरूपपरवाक्योपदिष्टं ब्रह्मैवेति भावः।

—१३ ज्ञानेति। शैलाऽध्यादिसंघो न वस्तुभूतः। यतोऽसावशेषमूर्तिर्भगवाञ्ज्ञानस्वरूप एवेत्यर्थः। विज्ञानमविद्या। विविधं ज्ञायतेऽनेनेति करणव्युत्पत्तेः।

—१५ यदेति। शुद्धमविद्यारहितम्। अत एव निजरूपि भेददर्शनरहितम्। दोषा रागादयः। तद्रहितं ज्ञानं यदा भवति तदा वस्तुष्वविद्यावस्तुषु वस्तुभेदा देवाद्याकारभेदास्तद्रूपाणि संकल्पवृक्षस्य फलानि न भवन्तीत्यर्थः। समन्तात्कल्प्यन्ते भेदा अनेनेति संकल्पशब्देनाविद्योच्यते।

—१९ निजेति। स्वस्वकर्मभेदेन भिन्नानि चित्तानि चित्तसंकल्पा येषां तैः।

—२१ सदैकम्। जन्मवृद्ध्यादिरहितम्।

१७-१ अयमेव सिद्धान्त इत्याह—सद्भाव इति। सद्रूपो भावः सिद्धान्त इति यावत्। एतदिति। भुवनेनाधिष्ठानतयाश्रितं समन्ताद्व्यवहारास्पदं यदेतद्वर्तते तत्रापि कारणमविद्येत्युक्तमित्यर्थः।

१७—५ न पुनरिति। यस्तदेकं पश्यति स पुनर्मृत्यवेऽविद्यायै न प्रभवति। मृत्युकारणस्य रोगादेरपि निवृत्तिं ज्ञापयति—न पश्य इति। 'न रोगं नोत दुःखताम्' इति हि तच्छेषः।

—६-७ एतस्मिन्। ब्रह्मणि। अनात्म्ये। अशरीरे। अनिरुक्ते। नाम्नाऽनिर्वचनीये। अनिलयने। अनाधारे। अभयमिति। अव्ययीभावः। अभयार्थमित्यर्थः। प्रतिष्ठाम्। निष्ठाम्।

—११ ब्रह्म वेदेति। यथोपासनं हि फलम्। ऐक्यज्ञानमेव बन्धनिवर्तकमिति भावः।

—१३ नन्वत्राविद्यानिवृत्तिर्न प्रतीयते। अविद्यावाचिशब्दाश्रवणादित्यत आह—अत्रेति।

—१४ मोह इति। वस्तुनः स्वरूपेणाज्ञानं प्रमादः। अन्यस्वरूपेण ज्ञानं मोहः। तत्र मोह एव मृत्युरिति कवीनां संमतमस्ति। परं त्वहं मोहहेतुः प्रमाद एव मृत्युरिति ब्रवीमीति फलितोर्थः।

—१६-१७ ननूदाहृतेषु वाक्येषु ज्ञानस्याविद्यानिवर्तकत्वं दृष्टम्। परं तु ब्रह्मणो निर्विशेषचिन्मात्रत्वं तादृशमात्मन एकत्वविज्ञानं निवर्तकमिति च न प्रतिपन्नमत आह—सत्यं ज्ञानमिति। इत्यादीति। आदिशब्देनास्थूलमनण्वित्यादिवाक्यसंग्रहः। इत्यादिशोधकवाक्यावगम्यमानं यन्निर्विशेषस्वरूपं ब्रह्म तेन सह जीवात्मन एकत्वविज्ञानं च वक्ष्यमाणवाक्यसिद्धमित्यर्थः।

१८-१ आत्मेति तूपेति। आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः। यतो मुमुक्षव उपासने तथाऽभ्युपगच्छन्ति। ग्राहयन्ति च तथा शास्त्राणीति सूत्रार्थः।

—२ तन्निष्पत्तेः। तत्र ब्रह्मणि कल्पितत्वात्।

—३ युक्तिमप्याह—अनेन चेति। मिथ्यारूपस्येति। हेतुगर्भविशेषणमेतत्।

—५ भेदवादी शङ्कते—ननु चेति। द्विचन्द्रस्वप्नादिभेदनिवृत्तेः प्रत्यक्षविरुद्धत्वाभावात्सकलपदोपादानम्। प्रत्यक्षविरुद्धा। भेदप्रत्यक्षविरुद्धा।

—६-७ तत्राभेदवादी चोदयति—कथं वेति। प्रत्यक्षविरुद्धा। सर्पप्रत्यक्षविरुद्धा। न च सर्पप्रत्यक्षस्याभासत्वाद्बाध्यत्वमिति वाच्यम्। प्रतीतिदशायामाभासत्वानवगमात्। पश्चात्प्रमाणभूतरज्जुप्रत्यक्षेण बाधादाभासत्वं ज्ञायत इति चेत्। प्रपञ्चग्राहिप्रत्यक्षस्यापि तुल्यम्। आभासत्वज्ञानोत्तरं बाधसिद्धिस्तत्सिद्धौ चाभासत्वसिद्धिरित्यन्योन्याश्रयप्रसक्तत्वाच्च।

—७-९ पुनर्भेदवादी शङ्कते—तत्रेति। द्वयोः प्रत्यक्षयोः। रज्जुप्रत्यक्षसर्पप्रत्यक्षयोः। प्रत्यक्षमूलस्य। प्रत्यक्षेतरप्रमाणानां प्रत्यक्षमूलकत्वात्। 'प्रत्यक्षेण

प्रत्यक्षस्य बाधो हि युक्तः। शास्त्रेण तु स्वप्रयोजकप्रत्यक्षस्य बाधोऽनुचितः। शास्त्रस्य प्रत्यक्षसापेक्षत्वात्प्रत्यक्षस्य शास्त्रनिरपेक्षत्वात् ' इत्याशयः। अभेदवादी चोदयति– **तुल्ययोरिति**। रज्जुप्रत्यक्षसर्पप्रत्यक्षयोर्मध्ये केन कस्य बाध इति निश्चेतुमशक्यमिति भावः।

१८—९–१० पुनर्भेदवादी शङ्कते–**पूर्वोत्तरयोरिति**। पूर्वस्य सर्पप्रत्यक्षस्य दोषजन्यत्वाद्बाध्यत्वमुत्तरस्य रज्जुप्रत्यक्षस्य दोषजन्यत्वाभावाद्बाधकत्वमिति भावः। अभेदवाद्युत्तरयति–**शास्त्रेति**। प्रपञ्चग्राहिभेदप्रत्यक्षस्याविद्यारूपदोषजन्यत्वाच्छास्त्रस्य तदभावात्। एवं च त्वदुक्तशङ्काऽनवकाश इति भावः।

—११ **निरपेक्षत्वादीति**। आदिशब्देन दुष्टकारणजन्यत्वतदभावपरोक्षत्वापरोक्षत्वादिसंग्रहः।

—१२ **ज्वालेति**। अस्यान्यथेत्यादिः। सादृश्यमूलकं ज्वालैक्यप्रत्यक्षं हि निरपेक्षमप्यपरोक्षमपि दुष्टकारणाजन्यमपि तद्विरुद्धेनानुमानेन बाध्यते। एवमन्यत्रापि प्रत्यक्षस्यानुमानेन बाधो द्रष्टव्यः।

—१३–१४ तर्हि किं बाध्यबाधकभावप्रयोजकमित्यत्राह–**एवं सतीति**। **संभाव्यमानेति**। यस्य प्रमाणस्यान्यथा वादप्रस्तविषयेऽप्रवृत्तौ स्वीकृतायां सत्यामन्यत्र सिद्धिः संभाव्यते तदित्यर्थः। सावकाशमिति यावत्।

—१६–१९ **तस्मादिति**। नादिर्निधनं च यस्य, न विच्छिन्नः संप्रदायो यस्य, न संभाव्यमानो दोषगन्धो यस्य, नावकाशो यस्येति चत्वारि शास्त्रविशेषणानि। **निधनं** नाशः। **विच्छिन्नो** भ्रष्टः। **शास्त्रं** श्रुतिः। अविच्छिन्नसंप्रदायत्वादेवानादिनिधनत्वं तत एवासंभाव्यमानदोषगन्धत्वमिति बोध्यम्। **शास्त्रजन्येति**। इदमवबोधविशेषणम्। **नित्यं** कालापरिच्छिन्नम्। **शुद्धमविद्यारहितम्**। **मुक्तमविद्याकृतजन्मादिरहितम्**। **बुद्धं** भासमानम्। **विविधः** देवादिरूपेण स्वकार्यजन्मजरामरणादिरूपेण च। **विकल्पः** ज्ञातृज्ञेयादिः।

—२० **भेदवासनादीति**। आदिशब्देन भेददर्शनम्। तयोश्च वासनादर्शनयोः परस्परं हेतुहेतुमद्भावः। अनादित्वाद्बीजाङ्कुरवन्नान्योन्याश्रयः।

१९–३–४ **पूर्वापरापच्छेद इति**। अपच्छेदो विच्छेदः। पञ्चर्त्विजः समन्वारब्धाः सर्पन्ति। अध्वर्युं प्रस्तोताऽन्वारभते। प्रस्तोतारं प्रतिहर्ता। प्रतिहर्तारमुद्गाता। उद्गातारं ब्रह्मा। ब्रह्माणं यजमानः (सत्या.श्रौ.सू.८।४।२२,आप.श्रौ.सू.१२।१७।१) इति विहितस्यान्वारम्भणस्य विच्छेदे प्रायश्चित्तमुच्यते। बर्हिष्पवमानं प्रसर्पतां यद्युद्गाताऽपच्छिद्येत, अदक्षिणः स यज्ञः संस्थाप्यः। तेन पुनर्यजेत। तत्र तद्यद्याद्यत्पूर्वस्मिन्दास्यन्स्यात्। अथ प्रतिहर्ताऽपच्छिद्येत, सर्ववेदसं दद्यादिति। अत्रोद्गातृप्रतिहर्त्रोरेकस्मिन्प्रयोगे युगपदपच्छेद उद्गातुः प्राधान्यात्तत्प्रायश्चित्तेनैव

निर्वाहः। क्रमेणापच्छेदे तु पूर्वस्य प्रायश्चित्तशास्त्रस्य दौर्बल्यं परस्य प्राबल्यं पूर्वमीमांसायामुक्तम्। अयमाशयः। पूर्वशास्त्रस्योत्पत्तिरविरोधेनैव। तदानीं विरोधिनः परस्याभावात्। परशास्त्रस्योत्पतिस्तु विरोधेनैव। तदानीं विरोधिनः पूर्वस्य सत्त्वादिति विरोधेनोत्पन्नं परमेव प्रबलं भवति। अयमेवापच्छेदन्यायः। बाध्यत एवेति। भेदावलम्बि कर्मशास्त्रमिति शेषः। एवं पूर्वोत्तरभागयोर्विरोधः परिहृतः।

१९—४ अधुनोत्तरभागे विरोधपरिहारमाह–वेदान्तवाक्येष्वपीति।

—६ सर्वज्ञः। सर्वं स्वरूपेण जानाति। सर्ववित्। सर्वं प्रकारतो जानाति।

—१२ इत्यादिवाक्यानीति। आदिशब्देन यत्तदद्रेश्यमित्यादि गृह्यते।

—१४ इतराणि। यः सर्वज्ञ इत्यादीनि। सगुणमिति। प्रतिपादयन्तीत्यनुषज्यते।

—१५ गुणापेक्षत्वेन परत्वादिति। निषेधस्य निषेध्यसापेक्षत्वेन परत्वमित्यर्थः। सगुणवाक्यानां तूपासनार्थत्वान्न वैयर्थ्यमिति बोध्यम्।

—१७ निर्गुणवाक्येषूपात्तस्य 'सत्यं ज्ञानम्' इति वाक्यस्य सगुणपरत्वबुद्ध्या चोदयति–ननु चेति। सत्यज्ञानादय इति। भावप्रधानो निर्देशः। सत्यत्वज्ञानत्वादय इत्यर्थः।

—१८ सामानाधिकरण्येनेति। सामानाधिकरण्यं च भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे प्रवृत्तिः। उक्तश्रुतौ सत्यादिशब्दानां निषेधमुखप्रवृत्तत्वेन तत्तत्पदार्थविरोधिप्रत्यनीकपरत्वम्। अतद्व्यावृत्तपरत्वमिति यावत्। तथा च सत्यशब्दस्य सत्येतरव्यावृत्तमित्यर्थः। एवमेव ज्ञानानन्तशब्दयोर्बोध्यम्। तथा च ब्रह्मणः सकलेतरविरोधित्वं प्रतिपादयदिदं शोधकवाक्यं व्यावृत्तिपरमेव भवितुं युक्तमिति नात्र विधिमुखेन प्रवृत्तिः शङ्कनीया। न चानेन वाक्येन ब्रह्मण्यतद्व्यावृत्तिरूपधर्मबोधनेनास्य वाक्यस्य सगुणपरत्वमेवेति वाच्यम्। अभावानामधिकरणात्मकत्वेन भेदरूपाया व्यावृत्तेर्ब्रह्मात्मकत्वेन धर्मधर्मिभावासंभवात्। अतः सत्यादिशब्दानां सामानाधिकरण्येनैकस्मिन्ब्रह्मणि तात्पर्यनिश्चयेनैकब्रह्मरूपार्थकत्वमेवेति सत्यत्वादिगुणानामप्रतीतिरित्यभिप्रायः।

—१९ एतदभिप्रायमजानानः शङ्कते–अनेकेति। यः सर्वज्ञ इत्यत्र सत्यं ज्ञानमित्यत्र च गुणविशिष्टस्य ब्रह्मरूपैकार्थस्याभिधानं तुल्यमेवेति शङ्काशयः।

—२० शङ्कमुपालभते–अनभिधानज्ञ इति। अभिधानमभिधा। वृत्तिरिति यावत्। तदनभिज्ञो देवानांप्रियो मूर्ख इत्यर्थः।

१९—२१ विशिष्टेति । यथा शूरः सुन्दरो देवदत्त इत्यत्र शूरत्वविशिष्टस्य सुन्दरत्वविशिष्टस्य चैकत्वेऽपि शूरत्वसुन्दरत्वरूपविशेषणयोर्भेदेन शूरादिपदानामर्थभेदोऽवश्यंभावी तथैव यः सर्वज्ञ इत्यादिष्वित्येकार्थत्वाभाव इति भावः ।

—२२ तर्हि सत्यं ज्ञानमित्यत्र विशेषणस्यापि भेदो नास्तीति चेद्घटकुम्भशब्दवत्पर्यायतापत्तिः। ततश्चानेकशब्दोपादानमनर्थकमित्याशयेनाह–एवं तर्हीति ।

२०–१ स्वाभिप्रायं स्फोटयन्नुत्तरयति–एकार्थेति ।

—३ अर्थवत्त्वं साफल्यम् ।

—४ लक्षणतः । स्वरूपलक्षणतः । न तु तटस्थलक्षणतः । अतद्व्यावृत्तिमुखेनास्य वाक्यस्य स्वरूपपरत्वात् ।

—९ परिच्छिन्नादिति । अनन्तपदं सान्ताद्व्यावृत्तपरम् । सान्तत्वस्य परिच्छिन्नत्वव्यापकत्वेन व्यापकनिवृत्तौ व्याप्यनिवृत्त्यवश्यंभावेन परिच्छिन्नाद्व्यावृत्तिः फलिता भवतीति भावः ।

भावरूप इति । प्राभाकरपक्षे सिद्धान्ति–(रामानुज–)मते च व्यावृत्तेर्भावरूपत्वं, वैशेषिकादिमते चाभावरूपत्वम् ।

—१० स्वरूपस्यैव व्यावृत्तित्वे दृष्टान्तमाह–यथेति । अनुपलम्भादनवस्थानाच्च न धर्मान्तरमिति भावः ।

—१४ इत्युक्तमिति । सत्यज्ञानादिवाक्येनेति शेषः ।

—१४–५ सत्यज्ञानादिवाक्यस्य वस्तुमात्रपरत्वे कारणान्तरमाह–एवमिति । इत्यादिभिः । जगत्कारणत्वप्रतिपादकैर्वाक्यैः ।

—१६ यतो वेति । कारणवाक्ये ह्येकमेवाद्वितीयमित्यादिशब्दैः सजातीयव्यावृत्ताद्वितीयब्रह्मावगतौ सत्यां तदेकवाक्यतया तादृशकारणवाक्यप्रतिपन्नब्रह्मस्वरूपशोधकस्य सत्यज्ञानादिवाक्यस्यापि सजातीयव्यावृत्ताद्वितीयवस्तुमात्रपरत्वमेवोचितमिति भावः ।

—२० ननु सर्वेषु कारणवाक्येषु सजातीयव्यावृत्ताद्वितीयब्रह्मावगतिर्नास्ति । 'यतो वा' इत्यत्र तदभावादित्यत आह–तत्र सर्वेति । सर्वशाखासु प्रत्ययो ज्ञानमेकरूपमिति न्यायशरीरम् । तेनैकत्रोक्तस्य तत्सदृशेऽन्यत्र संग्रहो भवतीति यतो वेत्यत्रापि तदर्थावगतिरस्तीति भावः ।

—२१–२१–१ ततः किमित्यत आह–जगदिति । प्रतिपिपादयिषितम् । तात्पर्यभूमिः । वस्तुमात्र एव तात्पर्यमित्यर्थः ।

२१–२ ननु नरपतिरद्वितीय इत्यादिवत्समाभ्यधिकराहित्येऽप्यद्वितीयत्वमुपपन्नमिति तदैकार्थ्येऽपि न निर्गुणपरत्वसिद्धिरिति चेत्तत्राह–अद्वितीयत्वेति ।

२१—३ अतश्चेति। ब्रह्मस्वरूपलक्षणपरं सत्यं ज्ञानमित्येतद्वाक्यं निर्विशेषस्यैकस्वभावमेव प्रतिपादयतीत्यर्थः।

—५ स्वार्थेति। स्वार्थो हि विशेषणद्वारकं विशेष्यं तत्प्रहाणेनेत्यर्थः।

—७ अभिधानेति। अभिधानवृत्तिः शक्तिः। तदपेक्षयापि तात्पर्यानुरोधिवृत्तेर्बलीयस्त्वात्। तात्पर्यानुरोधिनी वृत्तिश्चात्र लक्षणैव। वाक्यतात्पर्यानुगुणत्वात्। अतस्तस्या वाक्यतात्पर्यविरोधिमुख्यवृत्त्यपेक्षयापि बलीयस्त्वमिति भावः।

—९ न दृष्टचरीति। क्वाप्यन्यत्र पूर्वं न दृष्टेत्यर्थः।

—११ एकस्येवेति। यथा तात्पर्याविरोधायैकस्य पदस्य लक्षणायां न दोषस्तथैव द्वयोस्त्रयाणां सर्वेषां वा पदानामित्यर्थः। विरोध एव लक्षणास्वीकारे प्रयोजको न त्वेकपदत्वम्। विषं भुङ्क्ष्वेत्यादौ 'मा चास्य गृहे भुङ्क्था' इत्यर्थे सर्वपदलक्षणाया दृष्टत्वादिति भावः।

—१२ अत्रार्थे संमत्यर्थं गुरुमतमाह—तथा चेति। कार्येति। कार्यं कृतिसाध्यं स एव वाक्यार्थ इति वदद्भिरित्यर्थः। तेषामयमाशयः—अपूर्वरूपं यत्कार्यं तस्मिन्नर्थे लिङादीनां मुख्यवृत्तत्वम्। शक्तिरिति यावत्। तथा च ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र ज्योतिष्टोमनामकयागविषयकं स्वर्गकामस्यापूर्वरूपं कार्यमिति बोधः। आरोग्यकामो भेषजपानं कुर्यादित्यादिलौकिकप्रयोगे त्वपूर्वरूपवाच्यार्थस्यासंभवाल्लिङादेः क्रियाकार्यार्थे लक्षणेति।

—१५ इतरपदानां लक्षणामुपपादयति—कार्यान्विते ति। अन्विताभिधानवादिनये हि घटमानयेत्यत्र घटपदस्यानयनान्वितस्वार्थे शक्तिः। तद्वदत्राप्यारोग्यकामपदस्यापूर्वरूपकार्यान्वितस्वार्थे शक्तिः। तदसंभवादारोग्यकामपदस्य क्रियाकार्यान्वितस्वार्थे लक्षणा स्वीकार्या। एवमेवेतरपदानामपि लक्षणा बोध्या।

—१८ अर्थजातमिति। वस्तुनो निर्विशेषत्वं तस्यैव पारमार्थ्यं तद्व्यतिरिक्तस्य मिथ्यात्वं दोषपरिकल्पितत्वं च दोषस्य सदसदनिर्वचनीयत्वं ज्ञानमात्रनिवर्त्यत्वं चेत्यर्थः।

—२१ शास्त्रस्य प्रत्यक्षादिविरोधमङ्गीकृत्यापि तस्य प्राबल्यमुक्तम्। इदानीं विरोध एव वस्तुतो नास्तीत्याह—विरोध एव नेति। लौकिकघटादिप्रत्यक्षेऽपि निर्विशेषं सन्मात्रं ब्रह्मैव गृह्यत इति भावः।

२२-१ इदमनुभवविरुद्धमित्याशयेनाशङ्कते—ननु चेति।

—३ विलक्षणेति। अयं घटोऽयं सर्प इत्यादीनां सर्वेषां ज्ञानानां घटसर्पादिभिन्नविषयकत्वाभाव एकब्रह्मविषयकत्वेन घटोयं घटोयमिति धारावाहिकज्ञानस्येव प्रवृत्तिव्यवहारहेतुत्वमेव स्यात्। सर्पोयं सर्पोयमिति धारावाहिकज्ञानस्येव निवृत्तिव्यवहारहेतुत्वमेव वा स्यादिति भावः।

२२—५ अस्तित्वं तद्भेदश्चेति। घटास्तित्वं घटेतरभेदश्चेत्यर्थः। भिन्न इति व्यवहार इव घट इति व्यवहारेपि घटस्य पटाद्व्यावृत्तत्वेन प्रतीतेरिति भावः।

—६ तयोरिति। अस्तित्वव्यवहारप्रयोजकघटस्वरूपप्रत्यक्षानन्तरं घटेतरस्मृतौ सत्यां तादृशेतरप्रतियोगिकभेदप्रत्यक्षसंभव इति गूढाशयः। 'घटोऽस्तीत्यत्र प्रत्यक्षद्वयं जायते' इति त्वनुभवविरुद्धम्।

—७ क्षणिकैकप्रत्यक्षाङ्गीकारेऽपि तस्य स्वरूपविषयकत्वमेव कुत इत्याह—तत्रेति।

—८ गूढाशयं स्फोटयति—भेदग्रहणस्येति।

—११ न्यायविद्भिः। न त्वापातप्रतीतिमात्रतृप्तैः।

—१३ सर्वस्मादिति। भेदस्य वस्तुस्वरूपत्वेन प्रतियोगिनिरपेक्षतया घटस्वरूपे गृहीते पटादिभ्य इव घटादपि भेदप्रसक्तेरित्यर्थः।

—१४ एतदेव शङ्कासमाधानेन स्फुटयति—न चेत्यादिना।

—१९ नापीति। यथा भेदो न वस्तुस्वरूपं तथैव वस्तुधर्मोपि नेत्यर्थः।

२३—२ भेदे चेति। वस्तुधर्मस्य भेदस्य वस्तुस्वरूपाङ्गेदे स्वीकृते द्वितीयभेदस्य धर्मिभूतप्रथमभेदधर्मत्वं वाच्यम्। ततश्च धर्मस्य धर्मिस्वरूपाङ्गेदाङ्गीकारेण प्रथमभेदप्रतियोगिको द्वितीयभेदनिष्टस्तृतीयभेदोऽङ्गीकार्यः। तत्रापि पूर्ववच्चतुर्थभेद इत्यनवस्थेति भावः।

—४ भेदग्रहणे सतीति। अगृहीते हि घटस्य पटाङ्गेदेऽयं घटजातीय इति ज्ञातुमशक्यमिति भावः।

—६ सदनुभूत्योरेकत्वं वक्ष्यमाणं हृदि निधायानुभूतेरनुवृत्तिं दर्शयति—घटोऽनुभूयत इत्यादिना।

—८ तदेव। न तु भेदप्रतीतिजनका घटाद्याकाराः।

विशेषाः। भेदाः। तेषामुत्तरोत्तरप्रतीतिविषयेष्वविद्यमानतया व्यावर्तमानत्वं बोध्यम्।

—११ सर्पेति। रज्जौ स्थितायां कदाचिदयं सर्प इति भ्रमो भवति। कदाचिदत्र भूमिर्द्विधा भग्नेति भ्रमो भवति। कदाचिदियमम्बुधारा वहतीति भ्रमो भवति।

—१३ सर्पादेरिति। इदं मध्यमणिन्यायेनोभयान्वयि।

—१४ अनुवर्तमानतया। उत्तरोत्तरप्रतीतिविषयेषु विद्यमानतया। मिथ्यात्वे बाधितत्वं हेतुः सत्यत्वे चाबाधितत्वमिति शङ्काशयः।

२३—१५ घटादाविति। घटपटादौ पटघटादिव्यावृत्तेस्त्वापि संमतत्वेन तस्याश्चाभावरूपत्वेन चालनीन्यायेन पटादीनां सर्वेषां बाधितत्वात्तेषामपारमार्थ्यं तवापि गले पतितमित्युत्तराशयः।

—२० प्रयोगः। अनुमानप्रयोगः। सदिति पक्षनिर्देशः। परमार्थमिति साध्यनिर्देशः।

२४-१ शङ्करमतानुसारिणो मायावेदान्तिनो हि केवलज्ञानस्यैव परमार्थत्वं वदन्ति। तदत्र तन्मते प्रस्तुते किमर्थं सतः परमार्थत्वसाधनमित्यत्राह—एवं सतीति।

सैव सतीति। सदनुभूत्योरेकत्वादिति भावः।

—२ विषयतयेति। घटतज्ज्ञानयोर्विषयविषयिणोर्भेदस्य प्रत्यक्षसिद्धत्वादित्याशयः।

—४ निरस्त इति। न चैवं घटपटयोरपि भेदो न स्यादिति वाच्यम्। घटपटयोर्वस्तुतोऽपरमार्थत्वेन तद्भेदकथाप्रसङ्गस्यैवाभावात्।

अत एव। भेदस्य निरस्तत्वादेव। भेदमूलिका हि विषयविषयिभावकल्पनेति भावः। अनुभूतिविषयभावः। अनुभवनिष्ठविषयितानिरूपितविषयत्वम्।

—५ ननु ज्ञानभिन्नस्य सर्वस्यापरमार्थत्वे ज्ञानस्य ग्राहकाभावात्तस्यापि शून्यत्वं स्यादित्यत आह—सा चेति। यथा ग्राह्यत्वं ग्राहकत्वं चेति शक्तिद्वयं तेजसस्तथैव ज्ञानस्येत्यर्थः।

—७ सत्तयैवेति। यथा दीपः सत्तयैव प्रकाशते तद्वदेव ज्ञानं सत्तयैव प्रकाशत इति भावः।

—९ एतदसहमानः शङ्कते—अथैवमित्यादिना स्वात्मस्पर्शवदशक्यत्वादितीत्यन्तेन। यदि ज्ञानं स्वप्रकाशं स्यात्तर्हि घटादिवत्तस्यापि सर्वत्रावभासोऽवश्यंभावी। स तु न भवति। न हि यदा घटोऽयमिति जानाति तदानीं 'घटोऽनुभूयते' इति जानाति कश्चिदिति ज्ञानस्य स्वप्रकाशत्वं नास्तीत्याशयः।

—१०-१ घटोनुभूयत इतीति। अस्योत्तरत्रानुभवतीत्यत्रान्वयः। अविषयभूताम्। विषयभूतो यो घटशब्दार्थस्तद्व्यतिरिक्ताम्। घटत्वविशिष्टं पृथुबुध्नोदराकारद्रव्यं घटशब्दार्थः। अनिदंभावाम्। अयंशब्दार्थव्यतिरिक्ताम्। संनिहितदेशवर्तमानकालविशिष्टत्वमिदंशब्दार्थः। एतदुभयव्यतिरिक्तो ह्यनुभवः। स तु घटोऽयमित्यनुभववेलायां नानुभूयत इत्यर्थः।

—१२ ननु यद्यनुभवो नानुभूयते तर्हि तस्य घटादिप्रकाशकत्वं न स्यात्। न ह्यज्ञातस्य शब्दादेरर्थप्रकाशकत्वं दृष्टमिति चेत्तत्राह—तस्मादिति। प्रकाशकं

हि क्वचित्स्वयमज्ञातमपि सत्तयैव केवलमर्थं प्रकाशयति। यथेन्द्रियाणि तेषां संनिकर्षश्च, तथैवात्रेति भावः।

२४—१३ ननु यद्यनुभवस्य प्रकाश्यत्वं नास्ति तर्हि किं तत्सद्भावे प्रमाणमत आह–तदनन्तरमिति। घटादिविषयगतप्रकाशातिशयस्य कादाचित्कत्वात्कार्यत्वं कार्यत्वाच्च सहेतुकत्वमित्यनुमानेनानुभवो ज्ञायत इत्यर्थः।

—१४ एवं तर्हि। अनुभवस्य न स्वप्रकाशत्वं किं त्वनुमानेन परप्रकाश्यत्वमेवेत्यङ्गीकारे।

—१६ सत्तायाः प्रकाशाव्यभिचारः। विद्यमानदशायां सर्वदाऽनुभूयमानत्वम्।

—१७ सुखादिष्विति। यदि ज्ञानस्य विद्यमानदशायामप्यनुभूयमानत्वाभावेन जडत्वमापद्यते तर्हि सुखादीनां विद्यमानदशायां सर्वदाऽनुभूयमानत्वेनाजडत्वमापद्येत। तच्चानिष्टम्। तथा च न तदजडत्वे तन्त्रमिति भावः।

—१८ ननु स्वप्रकाशत्वमजडत्वम्। ज्ञानस्य च परप्रकाश्यत्वेन जडत्वापत्तिरित्युच्यते चेदीदृशजडत्वमिष्टमेवेत्याह–अत इति। यथाहुः–

अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति।
स्वांशेन, ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति॥ इति।

—१९ स्वप्रकाशत्ववाद्युत्तरयति–तदिदमिति। अनाकलितानुभवविभवस्य। अनुभवमाहात्म्यमजानतः। माहात्म्यं च 'अयमनुभवः स्वातिरिक्तसर्वप्रकाशकः सन्स्वस्मिन्ननन्यापेक्षः। तथाऽयमेवानुभवः प्रकाशत इति व्यवहारहेतुः, न त्वेतद्भिन्नः कश्चन प्रकाशाख्यो विषयधर्मोऽस्ति'इत्येवंरूपं बोध्यम्।

—२० अनुभूतीति। येन घटादिविषयगतप्रकाशरूपलिङ्गेनानुभवोऽनुमीयते सोऽनुभवभिन्नत्वेन त्वदभिमतः प्रकाशः प्रत्यक्षयोग्यो न वा। नाद्यः। अनुभवभिन्नस्य तस्यानुपलब्धेः। नान्त्यः। अप्रत्यक्षेण हेतुनाऽनुमानासंभवात्। तथा च प्रकाशरूपस्यानुभवस्य स्वप्रकाशत्वमेवागत्या स्वीकार्यमिति भावः। रूपादिवदिति वैधर्म्ये दृष्टान्तः।

२५–२ नन्वनुभूतेः सुखादिवन्मानसप्रत्यक्षवेद्यत्वमस्त्वित्यत आह–नापीति। तथात्वे हि सति तस्यापि मानसप्रत्यक्षस्यान्यमानसप्रत्यक्षग्राह्यत्वमित्येवमनवस्था स्यादिति भावः।

—३ अथ स्वयंप्रकाशत्वेऽनुमानमाह–प्रयोगश्चेति। अनुभवः पक्षः। अनन्याधीनस्वधर्मत्वमनन्याधीनस्वव्यवहारत्वं चेति साध्यद्वयम्। स्वसंबन्धादर्थान्तरे तद्धर्महेतुत्वं, स्वसंबन्धादर्थान्तरे तद्व्यवहारहेतुत्वं चेति क्रमेण हेतुद्वयम्। अनुभूतेः स्वधर्मः प्रकाशमानत्वम्। तच्च नान्याधीनम्। अनुभूतिसंबन्धे-

नैव घटादौ प्रकाशमानत्वरूपधर्मदर्शनेनानुभूतेस्तादृशधर्महेतुत्वात् । यथा रूपम् । तत्र हि रूपसंबन्धेनैव घटादौ चाक्षुषत्वधर्मदर्शनेन रूपस्य तादृशधर्महेतुत्वं, स्वगतचाक्षुषत्वे च तस्य रूपस्यान्यरूपानधीनत्वं दृश्यते । एवमनुभूतेः स्वव्यवहारः 'प्रकाशते' इति । तत्रापि पूर्ववद्बोध्यम् ।

२५—६ तयोः । धर्मव्यवहारयोः ।

—८ स्वस्मिन्निति । अस्य चाक्षुषत्वादावित्यत्रान्वयः । रूपादिः स्वगतचाक्षुषत्वादावन्यरूपादिसंबन्धाधीनो नेत्यर्थः ।

—१० अथ ज्ञातृज्ञेयनिरसनं ज्ञानस्य स्वप्रकाशत्वं च बौद्धपक्षेऽपि समानमिति तद्व्यावर्तकं ज्ञानस्य नित्यत्वं साधयति— सेयमिति । स्वयंप्रकाशेति हेतुगर्भं विशेषणम् । स्वयंप्रकाशत्वस्य नित्यत्वव्याप्यत्वात् ।

—११ स्वतःसिद्धत्वादेव । स्वयंप्रकाशत्वादेव ।

—१२-३ अनुभूतेः प्रागभावोऽनुभूत्यैवावगम्यतेऽन्येन साधनेन वा । प्रथमेऽपि विद्यमानयाऽनुभूत्याऽविद्यमानया वा । आद्य आह— अनुभूतिरिति । सती । विद्यमाना । न हि विद्यमानं वस्तु तदानीमेव स्वाभावं बोधयतीति भावः ।

—१४ अन्त्य आह—एवमिति । असती । अविद्यमाना । न ह्यविद्यमानं वस्तु कस्यापि ग्राहकं भवतीति भावः ।

—१६ द्वितीय आह—नापीति । यथा रूपग्राहकमेव चक्षुस्तदभावं ग्राहयति । न हि रूपाग्राहिणा श्रोत्रेण क्वचिदपि रूपाभावो गृह्यते । तथात्रानुभूत्यभावग्राहकं साधनमनुभूतिग्राहकमस्त्येवेति वक्तव्यम् । तच्च पुरस्तादेव (पृ. २५ प. ४) निराकृतमिति भावः । तदेवाह—अस्या इति ।

—२० ननूत्पत्त्यभावेऽपि प्रागभावस्येवानुभूतेरनित्यत्वं स्यादत आह—उत्पत्तिप्रतिबद्धा इति । उत्पत्तिसापेक्षा इत्यर्थः । उत्पत्तिव्याप्ता इति वा । प्रतिबन्धशब्दस्य व्याप्तिवाचकत्वात् । 'उत्पत्तिप्रतिबन्धात्' इति पाठ उत्पत्त्यभावादुत्पत्तिव्याप्तेरिति वार्थः । भावविकाराः । जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवंरूपाः षड्भावविकाराः । तत्रानुभूतौ प्रथमस्यैवाभावेनान्येऽपि न सन्तीत्यर्थः । प्रागभावे तु नैवम् । तस्याभावरूपत्वात् । एतेषां च भावविकारत्वात् ।

—२१ अथ बौद्धाभिमतमनुभूत्यनेकत्वं खण्डयति—अनुत्पन्नेति । आत्मनि । अनुभूतौ ।

—२२ व्यापकेति । नानात्वव्यापकोत्पत्तिविरुद्धानुत्पत्त्युपलब्धेरित्यर्थः । न हीति । अनुभूतिरनाना । अनुत्पन्नत्वात् । यन्नाना तदुत्पत्तिमद्यथा घट

इति प्रयोगः । मायावेदान्तिनां मते ब्रह्मव्यतिरिक्तस्य सर्वस्यासत्त्वेन न परमाणुषु व्यभिचारः ।

२६-१ भेदादीनामिति । अनुभूतेर्नानात्वे हि तास्वनुभूतिषु मिथो भेदोऽवश्यं वाच्यः । स च न संभवति । रूपादीनामिव भेदस्याप्यनुभाव्यत्वेन तस्यानुभूतिधर्मत्वाभावात् । तथा च प्रयोगः-भेदादयो नानुभूतिधर्माः । अनुभाव्यत्वात् । रूपादिवदिति ।

—२ अन्योऽपि । नित्यत्वैकत्वस्वयंप्रकाशत्वादिरपि धर्मो नास्तीत्यर्थः । पूर्वत्र तथोक्तिस्त्वनित्यत्वनानात्वपरप्रकाश्यत्वादिविरुद्धधर्मनिरासायैव । न तु तस्यास्तत्र नित्यत्वादिधर्मविधौ तात्पर्यमिति बोध्यम् ।

—३ यत इति । सकलभेदनिषेधेन विजातीयभेदोऽपि निषिद्ध इति विजातीयभेदप्रतियोगित्वेन पराभिमतस्य ज्ञातुर्मिथ्यात्वेन न स आत्मा । अपि तु परमार्थभूताऽनुभूतिरेवात्मा । एवं च 'आत्मा आत्मा' इति यो लोके गीयते सोऽनुभूतिस्वरूप एव नानुभूत्याश्रय इति भावः ।

—५ तत्रैव हेत्वन्तरमाह-अजडत्वाच्चेति ।

व्याप्तमिति । कर्तरि क्तः । अनात्मत्वस्य व्यापकमित्यर्थः । तथा चानुभूतौ व्यापकस्य जडत्वस्याभावाद्व्याप्यस्यानात्मत्वस्याप्यभाव इत्यात्मत्वं सिद्धमित्यर्थः । संविदि । अनुभूतौ । अनुभूतिरात्मा । अजडत्वात् । यदनात्मा तज्जडं यथा घट इति प्रयोगः ।

—७ प्रतीतिसिद्धेति । तथा च ज्ञातुर्मिथ्यात्वं न संभवतीति भावः ।

—८ किमनुभूतिस्वरूपस्यात्मनो ज्ञातृत्वं ब्रूषेऽनुभूतिव्यतिरिक्तस्य वा । नाद्य इत्याह-अनुभूतेरिति । स्वात्मनि । अनुभूतौ । स्वनिरूपितकर्तृत्वस्य स्वस्मिन्नेवासंभवादिति भावः । नान्त्यः । अनुभूतिव्यतिरिक्तस्यात्मनः प्रागेव निरस्तत्वात् ।

—१० पक्षद्वयेऽपि कर्तृत्वायोगमुपपादयति-ज्ञातृत्वं हीति ।

—११-२ विक्रियात्मकमिति । क्रियाया उत्पत्तिविनाशयोगात्तदाश्रयत्वमपि कादाचित्कमिति तद्विकाररूपमित्यर्थः । जडं ज्ञेयम् । अत एव विकारिद्रव्याहंकारग्रन्थिस्थम् । अहंकारस्यापि विकारित्वाज्ज्ञेयत्वाच्च । द्रव्यशब्देन ज्ञेयत्वं सूच्यते । द्रव्यत्वस्य ज्ञेयत्वव्याप्यत्वात् । आत्मनश्च द्रव्यत्वानभ्युपगमात् । साक्षिणीति । साक्षित्वं च न ज्ञातृत्वम् । किं त्वविद्यानुभवस्वरूपत्वमेव । चिन्मात्रात्मनि । स्वयंप्रकाशे ।

—१३ दृशीति । दृशिक्रियाधीना सिद्धिर्यस्य तत्त्वादित्यर्थः । अनेन 'कर्तृत्वादिर्नात्मधर्मो दृशिक्रियाधीनसिद्धित्वाद्रूपादिवत्' इत्यनुमानं दर्शितम् । कर्तृत्वादेरित्यादिपदेनाहंधीवेद्यत्वसंग्रहः ।

२६—१४ अहमर्थो ह्यात्मा । तेन समानाधिकरणतया प्रतीतो ज्ञातात्मा स्यादित्यत्राह–सुषुप्तीति । अहंप्रत्ययाभाव इति । 'नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति ' (छा. ८।११।१) इति श्रुतेरिति भावः ।

—१६ जडत्वेति । जडत्वं ज्ञेयत्वम् । पराक्त्वं परस्मै भासमानत्वम् । आत्मत्वं देहनियन्तृत्वेन व्यापकत्वम् । तदभावोऽनात्मत्वम् । आदिशब्देन क्षयिष्णुत्वादिसंग्रहः ।

—१७–८ जडत्वादिप्रसङ्गस्येष्टापत्तिं परिहरति–अहंप्रत्ययेति । तत्क्रियाफलस्य । देहकृतयागादिक्रियाफलभूतस्य । प्रामाणिकानाम् । चार्वाकातिरिक्तानाम् ।

—१८ स्वर्गादिभोक्तुरात्मत्वे सिद्धे ज्ञातैवात्मा स्यादित्यत्राह–तथेति । आत्मा हि शरीरातिरिक्तत्वेन प्रमाणबलादभ्युपगम्यते तथा ज्ञातृत्वातिरिक्तत्वेनापि प्रमाणबलात्स्वीकार्यः । अहं जानामीति प्रत्ययस्तु भ्रम एवेति भावः ।

—२० तत्र हेतुमाह–एवमिति । स्वाश्रयतया । स्वमाश्रयो यस्य तत्त्वेन । अहंकारो ज्ञानस्वरूपमात्मानं स्वनिष्ठत्वेनाभिव्यनक्तीत्यर्थः ।

२७–१ आत्मस्थतयेति । अभिव्यञ्जकानामयं स्वभावो यदभिव्यङ्ग्यपदार्थानां स्वनिष्ठत्वेनाभिव्यञ्जनम् । यथा दर्पणादिः स्वनिष्ठत्वेनैव मुखादीनभिव्यनक्ति तथाऽहंकारोऽपि स्वनिष्ठत्वेनैव ज्ञानस्वरूपमात्मानमभिव्यनक्ति । अतश्च युक्तोऽयं भ्रम इति भावः । गवादिसमुदायः खण्डपदार्थः ।

—४ स्वप्रकाशाया इति । अनुभूतेः स्वप्रकाशत्वेन कथमितराभिव्यङ्ग्यत्वम् । कथं च जडस्याहंकारस्येतराभिव्यञ्जकत्वम् । कथंतरामनुभूत्यभिव्यङ्ग्यस्याहंकारस्य स्वाभिव्यञ्जकानुभूतिव्यञ्जकत्वमित्याशयः ।

—६ करतलस्य किरणाभिव्यञ्जकत्वं क्व दृष्टमित्यत्राह–जालकेति । एवं ज्ञातृत्वस्यापारमार्थिकत्वमुक्तम् ।

—८ एतदेव परमार्थवस्तुभासनवेलायां ज्ञातृत्वानवभासप्रदर्शनेन द्रढयति–यत इति । ज्ञातृत्वस्यापारमार्थिकत्वं साध्यमप्यत्र हेतुतया निर्दिश्यते । यथा यतोऽग्निमानतो धूमवानिति । उत्पादकहेतुतया चायं निर्देशः । अनुमाने तु ज्ञापको हेतुः ।

—१२ महापूर्वपक्षमुपसंहरति–तस्मादिति । निर्विशेषत्वं स्वगतभेदराहित्यम् । कूटस्थत्वं निर्विकारत्वं सर्वाधिष्ठानत्वं वा । शुद्धमविद्यारहितम् । बुद्धं स्वयंप्रकाशम् । मुक्तं परमार्थतो भेददर्शनजन्मादिरहितम् । एवंविधब्रह्मात्मैकत्वज्ञानाय सर्वे वेदान्ता आरभ्यन्त इत्यर्थः ।

२७—१७-२० अथ महापूर्वपक्षं खण्डयितुं सिद्धान्ती प्रतिजानीते-तदिदमिति । उपनिषत्प्रतिपादितः परमात्मा भक्तं वृणुते बुद्धियोगं ददाति तादृशवरणस्य हेतुभूता ये भक्त्यादयो विशेषगुणास्तद्रहितानामित्यर्थः । मायावादिनो भक्तिरहिता इत्यभिप्रायः । तत्र हेतुगर्भं विशेषणमाह-अनादीति । पापवासनाबुद्धिदोषयोरन्योन्याश्रयपरिहारायानादिशब्दः । शेमुषी । मोक्षोपयोगि ज्ञानम् । दूषितशेमुषीफलं सम्यग्ज्ञानाभावमाह-अनधिगतेति । प्रकृतिप्रत्ययोगेन पदत्वमिति पदस्वरूपम् । अनेकपदार्थसंसर्गविशेषाभिधायित्वं वाक्यस्वरूपम् । तदर्थयाथात्म्यं पदार्थवाक्यार्थतात्पर्यविषयत्वम् । प्रत्यक्षादिसकलप्रमाणैर्वृत्तं बोधनम् । आदिशब्देनानुमानादिसंग्रहः । सकलशब्देन प्रत्यक्षादिव्याप्यानां चाक्षुषादीनां संग्रहः । तेभ्यः प्रमाणेभ्य इतिकर्तव्यताया रूपं स्वरूपनिश्चयः । समीचीनन्यायमार्गः समीचीनस्तत्तन्न्यायसंचारविषयः । एतत्सर्वमनधिगतमज्ञातं यैस्तेषामित्यर्थः । तर्हि कथं तैर्मायावादिभिर्ग्रन्थाः कृता इत्यत्राह-विकल्पेति । विविधा ये कुतर्काः प्रमाणविरुद्धा मूलशैथिल्यमिथोविरोधादिदोषाक्रान्ताश्च तर्कास्ते च विकल्पासहा एवं वैवं वेति विचार्यमाणे सद्यो विनाशिन इत्यर्थः । तद्रूपैः कल्कैः कल्पितम् । तर्काणां कल्कत्वं च कुतर्ककल्पनापटुभिर्बौद्धैरात्तसारत्वात् । इतिर्हेतौ ।

२८-३ सविशेषेति । विशेषरहितस्य वस्तुनो रूपाद्यभावान्न तत्र प्रत्यक्षं क्रमते । नापीतरप्रमाणानि । प्रत्यक्षमूलकत्वात्तेषाम् । ननु विशेषाणां विशेषरहितत्वान्न तेषां प्रमाणविषयत्वम् । विशेषानवगमाच्च सविशेषवस्तुन्यपि न प्रमाणप्रवृत्तिः स्यादिति चेन्न । विशेषाणामाश्रयद्वारा सविशेषत्वात् । एवं च यद्वस्तु कस्यचिद्धर्मभूतं कस्यचिद्धर्मिभूतं वा न भवति तत्प्रमाणशून्यमिति फलितम् । अतो मायावादिनां मते ब्रह्मणस्तथात्वापत्तिर्दोष इति भावः ।

—४ ननु न वयं प्रमाणान्तरेण निर्विशेषवस्तुसिद्धिमभ्युपगच्छामः । किं तु स्वानुभवसिद्धमेव तदिति चेत्तत्राह-यस्त्विति । स्वेति । स्वगोष्ठीषु स्थितः संकेत इत्यर्थः । अनेन परवाद्यसंमतत्वं ध्वन्यते ।

—५ आत्मसाक्षिकानुभवस्य सविशेषत्वं दर्शयति-इदमहमिति । इदमित्यनेनानुभवस्य कर्मरूपविशेषवत्त्वमहमित्यनेन कर्तृरूपविशेषवत्त्वमदर्शमित्यनेनापरोक्षत्वातीतत्वरूपविशेषवत्त्वं च दर्शितम् । विशिष्टविषयत्वं विशिष्टतया भासमानत्वम् ।

—७-८ ननु न वयमिदमहमदर्शमिति प्रतीतिमपलपामः । किं तु सा तर्कव्यवस्थापितविषया निर्विशेषे प्रमाणमिति चेत्तत्राह-सविशेषोऽपीति । स्वभावविशेषैः । धर्मविशेषैः । निर्विशेषवस्तुवादिनस्तव निर्विशेषत्वसाधकत्वेनाभिमता धर्मा अवर्जनीया एवेति भावः ।

२८—१०-१ कैश्चिद्विशेषैः।स्वासाधारणैः प्रामाणिकैर्धर्मैः। अन्ये विशेषाः। अप्रामाणिका रूपादयो धर्माः। न तु सर्वे धर्माः। यथाऽग्न्यभाववदवृत्तिर्धूमः पर्वतादावग्न्यभावमेव निवर्तयति न तु स्वं नाप्याकारान्तरं तद्वदिति भावः।

—१२ किं च स्वदङ्गीकृतैर्धीत्वादिधर्मैरपि ज्ञानस्य सविशेषत्वमेव सिध्यतीत्याह–धिय इति। धीत्वं विषयप्रकाशकत्वं साधनतया त्वयोपन्यस्तम्। स्वप्रकाशतारूपधर्मश्च साध्यतयोपन्यस्तः।

—१३ ज्ञातुरिति। ज्ञातुर्यद्विषयप्रकाशनमयमेव धियः स्वभाव इत्यर्थः।

—१३-४ ननु नोक्तधर्मविशिष्टस्य लौकिकज्ञानस्य निर्विशेषत्वं वदामः। किं तु स्वापाद्यवस्थास्वनुभूतस्यात्मभूतस्यैवेति चेत्तत्राह–स्वापेति। अथ वा विषयप्रकाशनस्वभावश्चेत्स कथं स्वापादौ न दृश्यत इत्यत्राह–स्वापेति। अनुभवः। आत्मस्फुरणम्। स्वावसरे। अहमर्थस्यैवात्मत्वसमर्थने। निपुणतरम्। परदर्शितयुक्तयैव। तत्र 'सुखमहमस्वाप्सं मामप्यहं न ज्ञातवान्' इति त्वदर्शिताकार एव विशेष इति भावः। किं चाहमिति भासमानस्यात्मस्वरूपभूतज्ञानस्य प्रत्यक्त्वादिधर्मैः सविशेषत्वमग्रे वक्ष्यते।

—१५ नित्यत्वादय इति। आदिपदेन स्वयंप्रकाशत्वैकत्वानन्दत्वादिधर्मसंग्रहः।

—१६ न शक्योपपादनाः। वक्तुमशक्याः।

—१७ विधाभेदः। प्रकारभेदः।

स्वाभिमतेति। बौद्धैरात्मनः क्षणिकत्वमुक्तं त्वया तु नित्यत्वम्। वैशेषिकादिभिश्च जडत्वं बहुत्वं चोक्तं त्वया तु स्वप्रकाशत्वमेकत्वं च। तथा च तैः सह विवदता त्वया तद्विरुद्धमात्मनि किंचित्साध्यते न वा। आद्ये यत्साध्यते तेनैवात्मनः सविशेषत्वम्। द्वितीये तव केवलं बहुप्रलापित्वापत्तिः। निर्विशेषत्वमेव साध्यते चेन्निर्विशेषत्वरूपधर्मेणैव सविशेषत्वं दुर्वारमिति भावः।

—१९ अथ पूर्वप्रतिज्ञातं प्रमाणानां सविशेषविषयत्वं वक्तुमारभते–शब्देति। पूर्वपक्षिमते प्रत्यक्षादपि शब्दस्य प्राबल्यादादौ तन्निरूपणम्।

—२० शब्दस्य हि द्विधा प्रवृत्तिः। पदरूपेण वाक्यरूपेण च। तत्राद्यां विवृणोति–प्रकृतीति। यथा पाचक इत्यत्र 'पच्' इति प्रकृतेः पचनमर्थः। ण्वुल्प्रत्ययस्य च कर्तृरूपोर्थः। तयोः संबन्धेन पाचकशब्दात्पचनकर्तृत्वं यद्बुध्यते स एव विशेष इति सविशेषमेव वस्तु पाचकशब्देनाभिधीयते। पदस्यैवेति। आदौ पदमेव सविशेषवस्तुप्रतिपादकं भवति किमुत वाक्यमित्यनेन सूच्यते।

—२२ द्वितीयां विवृणोति–पदभेद इति। तत्तत्पदार्थसंसर्गो हि वाक्यार्थो न तु पदार्थप्रहाणमिति सविशेषमेव वस्तु वाक्येन प्रतिपाद्यत इति भावः।

२९—१ प्रत्यक्षप्रमाणस्य सविशेषविषयत्वं दर्शयति–प्रत्यक्षस्येति।

—४ स्वस्मिन्निति। स्वस्मिन्निर्विकल्पकेऽनुभूतो यो घटत्वादिपदार्थस्तद्विशिष्टघटादेः सविकल्पके यदनुसंधानं भवति तद्धेतुत्वं निर्विकल्पकस्येत्यर्थः। तथा च यद्याश्रयद्वारापि निर्विशेषं (निर्धर्मिकं) वस्तु निर्विकल्पकज्ञानविषयो भवेत्तर्हि कथं तद्विशिष्टत्वेन सविकल्पके प्रतिसंधानं भवेत्। अथ निर्विशेषमित्यस्य निर्धर्मकमित्येवार्थस्तथापि दोष एव। निर्विकल्पकज्ञानविषयीभूतं घटत्वाद्यपीदमित्थमित्याकारेणैव तत्र तत्र प्रतीयत इति सविशेषमेव तत्। निर्धर्मके वस्तुनीत्थंताया असंभवात्। इदं किंचिदिति निर्विकल्पकज्ञानविषयीभूतमपि वस्तु सविशेषमेव। विशेषरहितस्येदंतया बोधासंभवात्। किं च प्राथमिकज्ञाने जातेरग्रहणे द्वितीयादिषु तदनुवृत्तिर्दुर्ग्रहा। अनुवृत्तिश्चानेकव्यक्त्यन्वयः। स चान्वयोन्वयिनः पूर्वव्यक्तिस्थतया परामर्शेनैव द्वितीयादिषु गृह्यते। एतेन जात्यादयो विशेष्यं च निर्विकल्पके संबन्धविरहेण गृह्यत इत्यप्यपास्तम्।

—७ केनचिद्विशेषेणेति। तथा च निर्विकल्पकशब्दे विकल्पशब्दो विकल्पविशेषपरः। विकल्पविशेषश्च गोत्वादेरनुवृत्ताकारतारूपः।

—८ त्रिकोणं गोमुखम्। सास्ना गोगलकम्बलः। संस्थानमवयवरचना।

—९ ननु निर्विकल्पकेऽपि सविकल्पकवत्त्रिकोणसास्नादिसंस्थानविशेषप्रतीतौ किं तयोर्भेदकमिति चेत्तत्राह–अत इति। पिण्डो व्यक्तिः। अनेकगोव्यक्तिषु मध्ये प्रथमत एव गोव्यक्तेर्यज्ज्ञानं जायते तन्निर्विकल्पकम्। तत्र त्रिकोणसास्नादिसंस्थानरूपगोत्वस्य ज्ञानेपि तस्य गोत्वस्यानुवृत्तत्वेन तत्र ज्ञानाभावात्। अनुवृत्तत्वं चैकरूपेणानेकत्रावस्थितत्वम्। तदनन्तरं गोव्यक्तेर्यज्ज्ञानं जायते तत्सविकल्पकम्। तदानीं तादृशगोत्वस्यानुवृत्तत्वेन ज्ञातत्वात्। अनुवृत्तत्वेन ज्ञाने च प्राथमिकज्ञानजन्यसंस्कारस्य हेतुत्वात्। एवं च गोत्वादेरनुवृत्तत्वेन प्रतीतिरेव सविकल्पकशब्दप्रवृत्तिनिमित्तम्। तस्य तत्त्वेनाप्रतीतिरेव च निर्विकल्पकशब्दप्रवृत्तिनिमित्तमिति बोध्यम्।

—१७ ऐन्द्रियकत्वाविशेषादिति। ऐन्द्रियकत्वमिन्द्रियजन्यज्ञानविषयत्वम्। एवं च निर्विकल्पके गोव्यक्तेरिव गोत्वजातेरपि ग्रहणं दुर्वारमिति भावः।

—२० संस्थानिवदिति। यथा संस्थानिरूपा व्यक्तिः सर्वज्ञानेषु गृह्यते यथा वा व्यक्तिधर्मः संस्थानं सर्वज्ञानेषु गृह्यते तथैवानुवृत्तिरूपः संस्थानधर्मोऽपि द्वितीयादिसर्वज्ञानेषु गृह्यत एवेत्यर्थः।

३०—३ प्रसङ्गाद्भेदाभेदवादं निराकरोति–अत एवेति। सर्वत्रेति। सजातीयव्यक्तिद्वयमध्ये जातिव्यक्तिमध्ये गुणगुणिमध्ये क्रियातदाश्रयमध्ये कार्यकारणमध्ये चेत्यर्थः। व्यक्तिद्वयमध्ये जात्यात्मनाऽभेदो व्यक्त्यात्मना च भेदः। न चाभेदस्य जातिनिष्ठत्वाद्व्यक्त्योरभेदः कथमिति वाच्यम्। जातिव्यक्त्योरभे-

दस्याप्यङ्गीकारेण जातिनिष्ठस्यापि व्यक्तिनिष्ठत्वात्। जातिव्यक्तिमध्ये भेदस्तु प्रसिद्ध एव। अभेदस्तु व्यक्तेः प्रथमतो ग्रहणे तयोरभेदेन प्रतीत्योपपादनीयः। किं चैकशब्दानुविद्धप्रत्ययो मत्वर्थीयानपेक्षसामानाधिकरण्यं सहधीनियमश्च जातिव्यक्त्योरभेदे प्रमाणमिति तेषामाशयः।

तत्र जातिव्यक्त्योर्भेदेनैव प्रतीतेरभेदस्य प्रतीतिविरोधं दर्शयति–इदमित्थमिति। इदंभावो व्यक्त्यंशः। इत्थंभावो जात्यंशः।

३०—५ तद्विशेष्यमिति। सास्नादिसंस्थानविशेषरूपजातेर्विशेष्यभूता व्यक्तिरित्यर्थः। तथा चाभेदे विशेषणविशेष्यभावासंभवात्प्रथमज्ञानेऽपि जातिव्यक्त्योर्भेदेनैव प्रतीतिरिति भावः।

—७ व्यावृत्तमेवेति। तथा च व्यावृत्तिप्रयोजकीभूतधर्मस्य जातेस्तत्र विशेषणतया भानमावश्यकमित्याशयः।

व्यावृत्तिश्चेति। गोत्वादिसंस्थानविशेषविशिष्टतयेत्थमिति प्रतीतेर्व्यावृत्तिश्च निश्चीयत इत्यर्थः।

—८ सर्वत्रेति। एवं च यथा मनुष्यविशेषणीभूता दण्डकुण्डलादयो मनुष्याद्भिन्नास्तथैव जातिरपि व्यक्तेः सकाशाद्भिन्नेति भावः।

—९–१० ननु दण्डतद्वतोरिव जातिव्यक्त्योरपि भेदः स्याच्चेत्तत्रैव कुतः सहोपलम्भनियमो न दण्डतद्वतोरित्यत्राह–तत्रेति। पृथगिति। विशेष्यभूतमनुष्यादिभ्यः पृथगवयवरचनया स्थिता इत्यर्थः।

—११ द्रव्यसंस्थानतयैवेति। एतेन व्यक्त्यपेक्षया जातेरपृथक्सिद्धत्वं सूचितम्। एतदेव च सहोपलम्भनियमप्रयोजकं न त्वभेदः। जातिव्यक्त्योरेकशब्दानुविद्धप्रत्ययो मत्वर्थीयानपेक्षसामानाधिकरण्यं चेत्येतद्वयमप्यपृथक्सिद्धत्वमूलकमेवेत्याशयः।

—१४ प्रतिपत्तिः। ज्ञानम्। पृथक्स्थितेः पृथग्ज्ञानस्य च योग्या इत्यर्थः।

—१५ अत इति। 'वस्तुविरोधः प्रतीतिपराहतः' इति हि भेदाभेदवादिनो वदन्ति। यद्यपि भेदरूपवस्तुनोऽभेदरूपस्य वस्तुनश्चैकत्र विरोधस्तथापि स त्याज्यः। लोके भेदाभेदयोरेकत्र प्रतीतेः। 'न हि दृष्टेऽनुपपन्नं नाम' इति न्यायादिति तस्यार्थः। परं त्वेतद्वास्तविकप्रतीतिप्रकारमपलप्यैव तैरुक्तमिति भावः।

—१८ नैकस्मिन्निति। जैनमतं नोपपद्यते। एकस्मिन्वस्तुन्यस्तित्वनास्तित्वादेर्विरुद्धस्य च्छायातपवद्युगपदसंभवादिति तत्सूत्रार्थः।

—१९ प्रत्यक्षादीति। प्रत्यक्षादिदृष्टधूमादिसंबन्धविशिष्टाग्न्यादिविषयत्वादित्यर्थः।

३०—२० **प्रमाणसंख्येति**। प्रत्यक्षमेकमेव प्रमाणमिति चार्वाकाः। अनुमितिरपीति काणादबौद्धौ। उपमितिरपीति नैयायिकैकदेशिनः। शब्दोपीति नैयायिकाः। अर्थापत्तिरपीति प्राभाकराः। अनुपलब्धिरपीति भाट्टवेदान्तिनौ। संभवैतिह्यकावपीति पौराणिकाः। चेष्टापीति तान्त्रिकाः। इत्थं प्रमाणसंख्याविवादेऽपि प्रमेयविषये न विवादः। सर्वैरपि प्रायशः स्वस्वाभ्युपगतप्रमाणेष्वेवातिरिक्तप्रमाणान्तर्भावस्योक्तत्वात्।

३१—२ **वस्तुगतेत्ति**। सविशेषत्वबाधकतया परोक्तयुक्त्यभ्युपगमेऽपि युक्तिरूपविशेषैः सविशेषत्वमवर्जनीयमिति भावः।

—७ **जात्यादिविशिष्टस्यैवेति**। उपपादितमेतत्। एतेन प्रत्यक्षस्य सन्मात्रग्राहित्वं निरस्तम्। **जात्यादेरेवेति**। वस्तुनो घटादिव्यक्तेर्यः पटादिप्रतियोग्यपेक्षया भेदव्यवहारस्तथाऽवयवसंस्थानरूपजात्यादेरेव भेदस्वरूपत्वेन स्वस्य जात्यादेर्यः पटाद्यवयवसंस्थानप्रतियोगिकभेदव्यवहारस्तद्धेतुत्वं जात्यादेरेव। तादृशजात्यादिविशिष्टस्यैव च प्रत्यक्षविषयत्वमिति भेदस्य प्रत्यक्षविषयत्वमर्थासिद्धमेवेति भावः।

—९ **संवेदनवदिति**। पूर्वपक्ष्युक्ता—(श्रीभाष्य—पृ. २५ प. ४) नुमाने संवेदनं पक्षः। रूपं च सपक्षः। अतस्तदुभयमत्र निर्दिष्टम्।

—११ **अत इति**। जात्यादेः स्वपरनिर्वाहकत्वात्तद्विशिष्टग्रहणस्यैव भेदग्रहणत्वाच्चेत्यर्थः। **नानवस्थेति**। भेदस्य दीपवत्स्वस्यैव स्वव्यवहारहेतुत्वेन भेदनिष्ठान्यभेदाङ्गीकारे प्रमाणाभावेन न पूर्वपक्ष्युक्ता—(श्रीभाष्य-पृ. २३ प. ३) नवस्थादोषः। तथाऽवयवसंस्थानरूपजात्यादेरेव भेदस्वरूपत्वेन जात्यादिधर्मविशिष्टवस्तुग्रहणमेव भेदग्रहणमिति नान्योन्याश्रयदोषः। जात्यादेरेव भेदस्वरूपत्वेन घटभिन्नशब्दयोरर्थानतिरेकेपि ब्रह्मस्वरूपादिशब्दवत्सङ्कोक्तिः। तथा तयोः शब्दयोः पर्यायत्वेपि शब्दस्वाभाव्याद्भिन्नशब्दजबोध एव प्रतियोग्यपेक्षा न पटशब्दजबोध इति भावः।

—१४ **अपि चेति**। अनेन प्रतिपत्तिविरोध उक्तः।

—१५ **यदि चेति**। अनेन व्यवहारविरोध उक्तः।

—१७ **सर्वास्विति**। अनेन शब्दव्यवस्थाविरोध उक्तः।

—१९–२० प्रतीतिविरोधविशेषं दर्शयति—**किं चेति**। **उपरितनस्येति**। अश्वज्ञानानन्तरं जायमानस्य हस्तिज्ञानस्य पूर्वज्ञानगृहीतविषयातिरिक्तविषयाग्राहित्वप्रसक्तौ पूर्वज्ञानजन्यसंस्कारविलक्षणसंस्कारानुत्पत्तिरिति स्मृतिवैलक्षण्यं न स्यात्। **विशेषाभावाच्चेति**। धारावाहिकस्थले चित्रदर्शनादौ ज्ञानानामेकविषयत्वेपि स्मृतिवैलक्षण्यप्रयोजकं प्रतिक्षणं विशेषदर्शनं भवति तदप्यत्र नास्ति। भवन्मते प्रत्यक्षस्य सन्मात्रग्राहित्वादिति भावः।

३२—३ रूपरूपीति । रूपं शुक्लादि, रूपिणो घटादयः, रूपेण सहैकस्मिन्घटादिरूपेर्थे समवेता आश्रिताश्च ये पटाभावादय एतत्त्रितयान्यतमग्राहित्वादित्यर्थः ।

—५ श्रोत्रादीनीति । आदिना जिह्वाघ्राणयोः संग्रहः ।

—८ अनुवादकत्वमेव स्यादिति । तच्चानिष्टम् । 'शास्त्रं ह्यप्राप्तविषयतयार्थवत् । अत एव भेदस्य लोकसिद्धत्वात्तद्विषयकत्वं शास्त्रस्य' इति तेषामेवोक्तेः ।

—९ प्रमेयभावश्चेति । प्रमेयत्वं च प्राप्नोतीत्यर्थः । सति हि तस्मिंस्तद्व्यापकजडत्वादिधर्मप्रसङ्गः ।

अत इति । वस्तुसंस्थानमेव जातिर्जातिरेव च भेद इत्याशयः ।

—१०–२ तत्र संस्थानमेव जातिरित्युपपादयति–संस्थानातिरेकिण इति । संप्रतिपन्नत्वाच्च । स्वीकृतत्वाच्च ।

—१३ स्वासाधारणेति । स्वस्य घटादेरसाधारणं यत्कम्बुग्रीवादिमत्त्वं रूपं तदेव तस्य संस्थानम् । न तु द्रव्यत्वम् । तस्य घटसाधारणरूपत्वात् ।

—१४–५ अथ जातिरेव भेद इत्युपपादयति—जातिग्रहणेनेति । न च जातेः प्रतियोगिनिरपेक्षत्वेन भेदस्य च प्रतियोगिसापेक्षत्वेन वैषम्यात्कथं तयोरैक्यमिति वाच्यम् । ईदृशवैषम्यस्याप्रयोजकत्वात् । अन्यथा घटाद्यभावाभावस्य घटादिस्वरूपत्वानापत्तावभावानामनवस्था दुर्वारा स्यादिति भावः । दर्शनं च नेत्याह—पदार्थेति । ननु तर्हि शशशृङ्गादिवत्तस्य तुच्छत्वमेव स्यादित्यत आह—अर्थान्तरत्वादिनेति । अन्योन्याभावरूपो भेदोऽप्यस्तीति वदतेत्यर्थः ।

—१८–९ गोत्वादाविति । पशुत्वेन गोसजातीया ये महिषादयस्तद्बुद्धिस्तद्व्यवहारश्च संस्थानरूपगोत्वज्ञानेन निवर्तत इति गोत्वमेव व्यावृत्तिरिति भावः ।

३३–१–२ ननु प्रतियोगिनिरपेक्षगोत्वादिस्वरूपस्य भेदस्य कथमयमस्माद्भिन्न इत्यत्र प्रतियोगिसापेक्षत्वमिति चेत्तत्राह–अयमिति । तदपेक्षत्वात् । प्रतियोग्यपेक्षत्वात् । प्रतियोग्यपेक्षायां हि स निर्दिश्यते नान्यथा । एवं च शब्दस्वाभाव्यात्कचित्तादृशशाब्दव्यवहारविशेषस्थले भेदस्य प्रतियोगिसापेक्षत्वेऽपि सर्वत्र तथाङ्गीकारे मानाभावः । उक्तयुक्तिसिद्धस्य भेदस्वरूपस्य त्यागानौचित्यादित्याशयः ।

—५ अनालोचितेति । बाध्यबाधकभावस्य व्यावृत्त्यनुवृत्त्योश्च विशेषोऽनालोचितो येन तस्येत्यर्थः ।

—७ व्यावृत्तिरिति । अत्र व्यावृत्तिशब्देन मिथ्यात्वसाधकीभूतो व्यावृत्तिविशेष उच्यते । न व्यावर्तमानत्वमात्रमपारमार्थ्ये हेतुरिति वक्ष्यमाणत्वात् । तत्र मात्रशब्देनोक्तव्यावृत्तिविशेषस्य व्यवच्छेदः ।

३३—८ विरोध एव नास्तीति। घटे पटस्य व्यावर्तमानत्वेन प्रतीतावपि तस्य घटस्य तस्मिन्काल एवान्यत्र स्थितेन पटेन सह न विरोधः। नापि तस्य घटस्य तस्मिन्देश एवान्यस्मिन्काले स्थितेन पटेन सह विरोधः। किं तु तद्देश एव तत्काल एव स्थितेन पटेन विरोधः। एवं च यथा रज्ज्वास्तद्देश एव तत्काल एव प्रतीतेन सर्पेण विरोध इति तत्र सर्पस्य मिथ्यात्वेऽपि नान्यत्र सर्पस्य मिथ्यात्वं तथैव पटादीनामिति भावः।

—१२ अन्यत्रेति! घटे व्यावर्तमानस्य पटस्य पटेऽपि निवृत्तिः कथमुच्यत इत्यर्थः।

—१५ न दृष्टमिति। यत्र व्यावर्तमानत्वं तत्र मिथ्यात्वमिति नियमो नास्ति। घटे पटस्य व्यावर्तमानत्वेऽप्यन्यत्र पटस्य सत्यत्वदर्शनादिति भावः।

—१७ न साधनमिति। प्रतिपक्षमतेन यदसिद्धं तदेव साधनमर्हति। इतरथा तु सिद्धसाधनं दोषाय भवति।

३४—१ तद्विषयेति। यदा देवदत्तस्य घटज्ञानं जायते तदा तज्ज्ञानं देवदत्तस्य स्वप्रकाशं भवति न तु यज्ञदत्तस्य। न हि देवदत्तस्य घटज्ञानवेलायां 'देवदत्तस्य घटज्ञानं जातम्' इति यज्ञदत्तस्य ज्ञानं जायते। किं तु तज्ज्ञानोत्तरं देवदत्तेन त्यक्ते स्वीकृते वा घटे यज्ञदत्तेन दृष्टे सति तेन लिङ्गेन देवदत्तस्य ज्ञानं जातमिति यज्ञदत्तोऽनुमिनोति। अतो ज्ञानं न सर्वेषां स्वप्रकाशम्।

—३ किं च ज्ञातुरपि कदाचिज्ज्ञानं ज्ञानान्तरप्रकाशं भवतीत्याह—स्वानुभवस्येति।

—४ अत इति। 'अनुभवस्यानुभवविषयत्वेऽनुभवत्वमेव न स्यात्' इति यो दोषः परैरुद्भावितः स नास्ति। अनुभवस्य सर्वत्र स्वतःसिद्धत्वस्य वक्तुमशक्यत्वात्। अनुभवत्वानुभवविषयत्वयोर्विरोधस्यैवाभावाच्चेति भावः।

—७ परानुभवेति। घटादिशब्दस्य तदर्थेन यः संबन्धस्तज्ज्ञानं देवदत्तस्य जातमित्यनुमानादिभिर्निश्चित्यैव तेन देवदत्तेन सह घटमानयेत्यादिशब्दैर्यज्ञदत्तो व्यवहरतीति भावः।

—९ अनुभूयेति। अनुमानेनेति शेषः। अनुमायेति पाठस्तु सुगम एव। तदुपसत्तिः। आचार्यसमीपे विद्याग्राह्यर्थं गमनम्।

—१० अनुभूतित्वमिति। अनुभूतिशब्दो ज्ञानमात्रपरः। न तु स्मृतिविलक्षणपरः। वर्तमानेति। प्रकाशमानत्वमित्येतावन्मात्रोक्तौ घटादावतिव्याप्तिरतः स्वाश्रयं प्रतीत्युक्तम्। आत्मधर्माणामणुत्वादीनां ज्ञानान्तरप्रकाश्यत्वात्तद्व्यावृत्त्यर्थं स्वसत्तयैवेति। अतीतानुभवव्यावृत्त्यर्थं वर्तमानतादशायामिति। वर्तमानतादशायां स्वसत्तयैव प्रकाशमानत्वमित्युक्ते परानुभवे तदसंभवात्तद्व्यावृत्त्यर्थं स्वाश्रयं प्रतीत्युक्तम्।

३४—११ स्वसत्तयैवेति। स्वाश्रयं प्रति वर्तमानतादशायामिति संबध्यते। साधनत्वं प्रकाशकत्वम्। यद्यपि चक्षुरादीन्द्रियाणि रूपादीन्स्वविषयान्प्रकाशयन्ति तथापि ज्ञानद्वारा न तु साक्षादिति तद्व्यावृत्त्यर्थमेवकारः।

—१२ ते च। तौ धर्मौ च।

—१३ नन्वनुभवविषयत्वस्यानुभूतित्वप्रयोजकत्वाभावे कथं घटादेरननुभूतित्वमत आह—घटादेरिति।

—१४ परमते दूषणमाह–तथेति।

—१७ निबन्धनं प्रयोजकम्।

—१८–२० शङ्कते–अनुभूतेरिति। अननुभाव्यत्वेपीति। यथा शङ्काकृताऽनुभाव्यत्वमज्ञानाविरोधित्वप्रयोजकमिति घटादिदृष्टान्तेन प्रतिपाद्यते तथा गगनकुसुमादिदृष्टान्तेनानुभाव्यत्वमपि तत्प्रयोजकमिति कुतो नोच्यत इत्याशयः।

—२१ उपहास्यमिति। समीपस्थैरपि हास्यमित्यर्थः।

३५—१–२ संविदः। अनुभूतेः। तदन्धस्येति। असिद्धमत्यन्तासिद्धेन हेतुना साध्यत इत्यर्थः।

—७ अनुभूतिप्रागभावादेरिति। अनुभूतिप्रागभावादीन्विषयविशेषान्यदाऽनुभूतिः साधयति तदैव तत्समकालभावनियमो न तु सर्वविषयकानुभूताविति्यर्थः।

—९ न तदभावेति। अनुभूतिप्रागभावो नास्तीति वक्तुं न शक्यत इत्यर्थः।

—१३ योगिप्रत्यक्षादिष्विति। आदिशब्देनेश्वरप्रत्यक्षं गृह्यते। ननु प्रमाणज्ञानेऽपि प्रमेयासङ्गावे किं तस्याप्रमाणज्ञानाद्भेदकमिति चेन्न। प्रमेयाविनाभावस्यैव तद्भेदकत्वात्।

तदेवोपपादयति–अत एवेति। ज्ञानमात्रस्य समकालवर्तिविषयग्राहकत्वनियमाभावेनैव प्रमेयाविनाभावश्च सिद्ध इत्यर्थः।

—१४ न हीति। प्रमाणस्य स्वसमकालवर्तिनार्थेन यः संबन्धः सोऽविनाभावो नेत्यर्थः।

—१५–१६ कालादीति। आदिशब्देन संस्थानसंग्रहः। तथाविधेति। तादृशदेशकालविशिष्टाकारस्य यन्मिथ्यात्वं तस्य प्रत्यनीकं शत्रुभूतं प्रमाणं तज्ज्ञानत्व एवाविनाभाव इत्यर्थः।

—१७ स्मृतिर्नेति। बौद्धैकदेशिसंमतं स्मृतेर्निर्विषयत्वं निरस्तमित्यर्थः। नष्टेऽप्यर्थे समकालत्वनियमाभावेन तस्यैव स्मृतिविषयत्वात्।

—१८ अथोच्येतेति। यद्यप्यनुभव एवानुभवप्रागभावं गृह्णातीति स्थापितं तथापि तन्न संभवति। निर्विशेषं न सामान्यमिति न्यायात्। अनुभवविशेषस्य प्रत्यक्षादेः कस्याप्यन्नासंभवादित्याशयः।

३५—१८ अवर्तमानत्वादिति। प्रत्यक्षं हि वर्तमानविषयमेव गृह्णातीति सर्वैरभ्युपेतम्।

—२० नानुपलब्धिरिति। नानुपपत्तिरिति पाठः साधुः। यथा पीनो देवदत्तो दिवा न भुङ्क्त इत्यत्र रात्रिभोजनं विना पीनत्वानुपपत्तिर्दृश्यते तथा यदि ज्ञानप्रागभावं विना कस्यचिदर्थस्यानुपपत्तिर्दृश्येत तर्हि तयार्थापत्त्या ज्ञानप्रागभावः सिध्येदित्याशयः।

—२२-३ उत्तरयति—यद्येवमिति। स्वयंसिद्धत्वाभिमानेन किमपि वक्तुं प्रवृत्तोऽसि चेत्तर्हि किमपि नास्माभिरुच्यते। अथ वा युक्तिविरुद्धमपि ज्ञानस्य स्वयंसिद्धत्वं गृहीत्वा तत एव तस्य सर्वदा प्रकाशमानत्वयोग्यतया प्रागभावो नास्तीति ब्रूषे तर्ह्यप्यस्माभिर्नोच्यते। यदि शास्त्रमर्यादया वक्तुं प्रवृत्तोऽसि तर्ह्युच्यत इत्यर्थः। योग्येति। ज्ञानस्य प्रागनुपलम्भेन तत्प्रागभावोऽनुपलब्धिप्रमाणेन सिध्यतीति ज्ञानस्य नित्यत्वं नास्तीत्यर्थः।

३६—१ अर्थापत्तिप्रमाणेनापि तत्सिद्धिमाह—किं चेति। स्वं प्रत्यक्षज्ञानम्।

—३ तदप्रतीतिश्चेति। घटादेः पूर्वोत्तरकालसत्ताया अप्रतीतौ बीजं तु ज्ञानस्य कालपरिच्छिन्नतया प्रतीतिरेव। तथा प्रतीतिश्च ज्ञानस्य नित्यत्वेऽनुपपन्नेत्यर्थात्तदनित्यत्वं सिध्यति।

—४-६ अर्थापत्त्यन्तरमाह—घटादीति। नित्यः स्यादिति। तथा च घटाद्यनित्यत्वस्यान्यथानुपपत्त्या ज्ञानानित्यत्वं सिध्यतीत्यर्थः।

—६ पुनरप्यर्थापत्तिमाह—नित्यमिति। पूर्वपक्षिणा यथा ज्ञानस्य ज्ञानान्तराविषयत्वेन तत्प्रागभावो दुर्ग्रह इत्युक्तं तथैव तन्मते ज्ञाननित्यत्वमपि ज्ञानान्तरेण दुर्ग्रहमेव। तथा च यदि ज्ञानं स्वयमेव नित्यमिति प्रतीयेत तर्हि तन्नित्यत्वसिद्धिः स्यात्। तथा तु न प्रतीयते। तदन्यथानुपपत्त्या ज्ञानानित्यत्वं सिध्यतीत्यर्थः। एवं १ ज्ञानस्य कालपरिच्छिन्नतया प्रतीतेः २ घटाद्यनित्यत्वस्य ३ ज्ञाननित्यत्वाप्रतीतेश्चान्यथानुपपत्त्याऽर्थापत्तित्रयेण ज्ञानानित्यत्वं साधितम्। अथ वा प्रथमार्थापत्तेरेवानुग्राहकं तर्कद्वयं घटादीत्यादिग्रन्थेन नित्यं चेदित्यादिग्रन्थेन च प्रदर्शितमिति बोध्यम्।

—१० अथ निर्विषयानुभूतेर्नित्यत्वमिति पक्षं निराकरोति—न चेति।

—११ स्वप्रकाशत्ववादिनो मतेऽपि ज्ञानस्य निर्विषयत्वं न सिध्यतीत्याह—विषयप्रकाशनेति।

—१९ निखिलेति। निखिला ये स्मरणप्रयोजकाः संस्कारास्तेषां तिरस्कृतिकरा ये देहनाशादयः प्रबलहेतवस्तेषामभावेऽपि यतः स्वापाद्यवस्थास्थानुभूतेः स्मरणं कदापि न भवत्यतः सा नैवानुभूतेति निश्चीयते। यद्यपि यत्र य-

नानुभवस्तत्र तत्र स्मरणं भवत्येवेति न नियमः । पथि गच्छता स्पृष्टतृणादेः स्मरणस्यावश्यंभावादर्शनात् । तथापि यत्र यत्र कदाप्यस्मरणं तत्र तत्र नानुभव इति नियमोऽस्त्येवेत्यर्थः ।

३७—३ **न चेति** । अस्मरणनियमस्याननुभवो न कारणं किं तु स्वापाद्यवस्थासु विषयसंबन्धराहित्यमहंकारनाशो वा कारणमित्याशयः ।

—४ **अर्थान्तरेति** । अर्थान्तराननुभवस्येति पाठः । घटाननुभवः पटविनाशश्चानुभूतकुड्याद्यस्मरणकारणं न दृष्टमित्यर्थः । एवं च स्वापाद्यवस्थास्वनुभूतिर्नानुभूयत एवेति सिद्धम् ।

—७ अनुभवोस्तीति । तथा चात्र तासु दशास्वनुभूतिर्नास्तीति वदतस्तव पूर्वोक्तिविरोध इति शङ्काशयः ।

—८ आत्मानुभवः । आत्मस्फुरणम् । दीपस्यौज्वल्यवत् ।

—९ **निराश्रयेति** । ज्ञानमेवात्मेति वदद्भिर्ज्ञानं निराश्रयमेव स्वीकृतमिति भावः ।

शब्दान्तरेण पूर्वपक्षिमतमेवाङ्गीकृतमित्याशयेनाशङ्कते—**केवलैवेति** ।

—११ **न साधयतीति** । इतिशब्दः प्रागभावासिद्धावन्वेति ।

—१२ नाप्यन्यत इत्यादि प्रागुक्तं (श्रीभा. पृ. २५ प. १६) खण्डयति—**अनुभूतेरिति** ।

—१७ **भावेष्विति** । यत्र भावेषु जन्माभावस्तत्र विकाराभाव इत्युक्ते यद्यपि प्रागभावे न व्यभिचारस्तस्याभावरूपत्वात्तथापीयं केवलं तर्ककुशलता । कस्यचिद्वस्तुनः कस्मिंश्चिल्लक्षणे प्रतिपादिते यत्र दोषस्तद्भिन्नत्वेन निवेशे च यद्यपि तल्लक्षणं निर्दुष्टं भवति तथापि न तल्लक्षणं तद्वस्तुस्वरूपपरिचायकं भवतीति भावः ।

—१८ भावेष्वपि व्यभिचारं दर्शयति—**तथा चेति** । भावरूपा चेत्यर्थः । **अनैकान्त्यं** व्यभिचारः ।

—१९ शङ्कते—**तद्विकारा इति** । यत्र भावेषु जन्माभावस्तत्र सत्यविकाराभाव इत्येवं विकारस्य सत्यत्वविशेषणे न व्यभिचारः । अविद्याविकाराणां मिथ्याभूतत्वादित्याशयः ।

—२१ **न ह्यसाविति** । अद्वैतवादिना त्वया परमार्थविकारस्यानङ्गीकारात् ।

३८—१ अनुत्पन्नेयमित्याद्युक्तं (श्रीभा.पृ. २५ प. २१) खण्डयति—**यदपीति** । **विभागं** भेदम् ।

—२ तत्राजेपि विजातीयभेदोऽस्तीति दर्शयति—**अजस्यैवेति** ।

—३ **अभ्युपगताया इति** । त्वयेत्यादिः ।

३८—४ शङ्कते-स विभाग इति । यन्नाजत्वं तत्र परमार्थतो विभागो नास्तीत्येव नियमः । तेन तत्र मिथ्याविभागसत्त्वेऽपि न क्षतिरिति शङ्काशयः ।

—५ जन्मप्रतिबद्धः । उत्पत्तिव्याप्तः । प्रागुक्तनियमे हि परमार्थतो विभाग उत्पत्तिसत्त्व एव स्यादिति तस्योत्पत्तिव्याप्तत्वम् । क्वचिदिति । पूर्वपक्षिणा परमार्थतो विभागस्य क्वाप्यनङ्गीकारेण प्रतियोग्यप्रसिद्ध्या 'परमार्थतो विभागो नास्ति' इति वक्तुं न शक्यत इति भावः ।

—६ विभागस्य मिथ्यात्वे दूषणान्तरमाह-अविद्याया इति ।

—७ अथ सजातीयभेदं दर्शयति-अबाधितेति । अबाधिता या घटोऽयं पटोऽयमित्यादिप्रतिपत्तिस्तया सिद्धो यो दृश्यानां घटादीनां भेदस्तत्समर्थनेन ज्ञानभेदोऽपि समर्थित एव । न च घटादिभेदेनाकाशस्यापि भेदः स्यादिति वाच्यम् । घटादीनामाकाशं प्रत्यनुत्पादकत्वात् । घटादयो ह्याकाशस्य केवलं व्यञ्जका एव । ज्ञानस्य तूत्पादका व्यञ्जकाश्चेत्युत्पादकभेदेनोत्पाद्यभेदावश्यंभाव इत्याशयः ।

—९-११ अथ स्वगतभेदं दर्शयति-यदपीति । दृशेः । अनुभूतेः । अयं पक्षनिर्देशः । दृशिस्वरूपाया इति । हेतुनिर्देशः । अनुभूतिर्न दृश्यधर्मवती दृशिस्वरूपत्वात् । यद्दृश्यधर्मवत्तन्न दृशिस्वरूपं यथा घट इति व्यतिरेक्यनुमानम् । अन्वय्यनुमानमाह-दृश्यत्वादेवेति । दृश्यो न दृशिधर्मो दृश्यत्वाद्यथा घटत्वम् । एतदुभयविधलिङ्गस्य परोक्तस्य व्यभिचारमाह-तदपीति । आदिपदेनैकत्वसंग्रहः ।

—१२ ते । नित्यत्वादयो धर्माः । तेषां मिथ्यात्वं तु न । ज्ञानवृत्तिनित्यत्वस्य मिथ्यात्वे ज्ञानस्यानित्यत्वप्रसङ्गात् । अतस्तेषां ज्ञानस्वरूपत्वं परैरुक्तम् । तदपि न संभवतीत्यर्थः ।

—१४ प्रकाशश्चेति । सर्वे पदार्थास्तदा व्यवहारानुगुणा भवन्ति यदा तद्व्यवहारहेतुषु मध्ये ज्ञानं संनिधत्त इत्याशयः ।

—१६ अथ तेषां धर्माणामभावरूपत्वेऽपि व्यभिचारमाह-तेषामिति ।

—१८-२० अभावरूपाणामपि तेषां धर्माणां ज्ञानस्वरूपानतिरिक्तत्वे दूषणमाह-संविदीति । किमपि नोक्तमिति । तदुक्तं संवित्सिद्धौ-

न वेद्यं वित्तिधर्मः स्यादिति यत्प्रागुदीरितम् ।
तेनापि साधितं किंचित्संविदोऽस्ति न वा त्वया ।
अस्ति चेत्पक्षपातः स्यान्नचेत्ते विफलः श्रमः ॥ (सं. सि. पृ. ९७) इति ।

३९-१ अथ ज्ञानस्यात्मत्वं निराकर्तुमारभते-अपि चेति ।

सिध्यति चेदिति । सिद्धिश्च व्यवहारानुगुण्यम् । तच्च प्रमाणविषयतामन्तरेण न संभवति । प्रमाणानां च सविशेषविषयत्वस्य प्रागुक्तत्वेन प्रमाणवि-

षयीभूतायाः संविदः सविशेषत्वेन सधर्मकता दुर्वारैव । अथ वा सिद्धिरूपधर्मेण संविदः सधर्मकता बोध्या । सा च पूर्वपक्षिणोऽनिष्टेति भावः ।

३९—२ शङ्कते-सिद्धिरेवेति । प्रतीतिरेवेत्यर्थः । तस्याश्च प्रतीत्यन्तरानपेक्षत्वेन न प्रमितिविषयत्वप्रयुक्तं सविशेषत्वं नापि च तुच्छत्वमित्याशयः । तत्रापि सविशेषत्वमाह-कस्येति । प्रतीतेराश्रयो विषयश्च वक्तव्य इत्यर्थः ।

—७ तत्संबन्धिनीति । पुरुषसंबन्धिन्याः संविदः पुरुषरूपत्वं दुर्वचमिति भावः ।

—१३ भवतापीति । एतेन ज्ञानं द्विविधं सकर्मकमकर्मकं च । तत्राद्यं जडरूपम् । द्वितीयं त्वात्मरूपमिति परोक्तमपास्तम् । स्वोक्तिविरोधादिति भावः ।

—१४ अस्येति । यथा सकर्मकस्य कर्मत्वं नास्ति तथा कर्तृधर्मस्य कर्तृत्वमपि नास्तीति ज्ञानस्यात्मरूपत्वं न संभवतीत्यर्थः ।

—१५ तथेति । किं चेत्यर्थः । हिर्हेतौ । ज्ञानस्यास्थिरत्वादपि तस्य स्थिरात्मस्वरूपत्वं नास्तीत्यर्थः ।

—२० अथ प्रत्यभिज्ञाश्रयत्वेन स्थैर्यं दर्शयति-एवमिति ।

—२२ ननु ज्ञानस्य नित्यत्वेन क्षणभङ्गित्वाभावान्नायं दोष इत्यत आह-किं चेति ।

४०—४ अनुभूतिमात्रमेवेति । यथा गमनक्रियाया गन्तृत्वासंभवस्तथैव ज्ञानस्य ज्ञातृत्वासंभव इत्याशयः ।

ननु न वयं ज्ञानसामान्यस्यात्मत्वं वदामः, किं तु तद्विशेषभूतायाः संविदः । संविच्च निराश्रया निर्विषयात्मरूपैवेति चेत्तत्राह-संविन्नामेति ।

—६ ननु त्वन्मतेऽपि साश्रया सविषया च संविदङ्गीकार्यैव । तथा च तस्या एव लाघवादात्मत्वमस्तु । किमतिरिक्तधर्मिभूतात्मकल्पनेन । धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायादिति चेत्तत्राह-उभयेति । आत्मत्वस्याहं जानामीति ज्ञातृत्वसामानाधिकरण्येनोपलब्ध्या पराहतम् । उक्तलाघवन्यायस्तु कल्पनायामेव न तूपलब्धाविति बोध्यम् ।

अनुभूतीति । 'अनुभूतिमात्रमेव परमार्थः' इति यो निष्कर्षः सिद्धान्तस्तत्साधकत्वेन पूर्वपक्षिणा प्रदर्शिता ये हेतवस्ते हेत्वाभासा एव । ते च प्रागेव निराकृता इति भावः ।

—८ अथ ज्ञानात्मवाद्युपलब्धिपराहतत्वं निराकुर्वंश्चोदयति-ननु चेति । अनिदमंशः । इदमंशः परागर्थस्तद्व्यतिरिक्तो यः प्रकाशैकरसत्वात्प्रत्यगर्थश्चित्पदार्थो ज्ञानं स एवात्मा न त्वहमर्थ आत्मा । परप्रकाश्यत्वं पराक्त्वम् । स्वप्रकाशत्वं च प्रत्यक्त्वम् । यश्चाहं जानामीति प्रतीतावहमर्थः सिध्यति स तु ज्ञान-

बलेन निर्भासितः प्रकाशितोऽत एव युष्मदर्थलक्षणः। ज्ञानबलप्रकाशितत्वरूपं यद्युष्मदर्थस्य लक्षणं तद्विशिष्टः। अतो युष्मदर्थ एव। एवं चाहं जानामीत्यत्र प्रत्यक्त्वलक्षणात्मत्वस्य न ज्ञातृत्वसामानाधिकरण्येनोपलब्धिरिति न तदुपलब्धिपराहतमित्याशयः। प्रयोगश्च ज्ञानं चित्त्वात्स्वप्रकाशम्। ततः प्रत्यक्। तत आत्मा। यन्नैवं तन्नैवं यथा घटः। ज्ञाता चिदन्यत्वात्परप्रकाशः। ततः पराक्। ततो नात्मा यथा घट इति।

४०—११ धर्मधर्मितयेति। ज्ञानं हि यस्यात्मनो भवति स ज्ञानस्वरूप एवेति ज्ञानं ज्ञानस्यैव भवतीति पर्यवसन्नम्। तथा चाहं ज्ञानमिति प्रत्ययेन भाव्यं न त्वहं जानामीति धर्मधर्मितयेति प्रत्यक्षप्रतीतिविरोधोऽस्त्येवेत्यर्थः।

—१३ अहमर्थ इति। प्रत्यक्त्वं च न ज्ञानस्यात्मत्वसाधकं किं तु ज्ञातुरहमर्थस्यैव। यतः प्रत्यक्त्वं न स्वेन प्रकाशमानत्वम्। किं तु स्वस्मै प्रकाशमानत्वम्। पराक्त्वं च न परेण प्रकाशमानत्वम्। किं तु परस्मै प्रकाशमानत्वम्। इदंताविशिष्टात्परागर्थादहंबुद्ध्यैव प्रत्यगर्थस्य भेदानुभवात्। ईदृशं प्रत्यक्त्वमहमर्थस्यैव न ज्ञानस्य। तस्य तु प्रत्युत पराक्त्वमेवेति ज्ञानात्मवाद एवात्मनः प्रत्यक्त्वं न सिद्ध्यतीत्यर्थः। एवं च ज्ञानस्य प्रत्यक्त्वाभावाज्ज्ञातुश्च पराक्त्वाभावात्पूर्वोक्तानुमानद्वयं दूषितं वेदितव्यम्।

—१७ अहमर्थविनाशश्चेदिति। ज्ञानात्मवादेऽनात्मभूतस्याहमर्थस्य मोक्षे विनाशाङ्गीकारात्।

—१९ अहमर्थस्य नाशेऽपि ज्ञानं नित्यं तिष्ठत्येवेति चेत्तत्राह—मयीति। न हि मयि नष्टेऽपि स्तम्भस्तिष्ठतीति बुद्ध्या कृतः शिरश्छेदः पुरुषार्थो भवति। किं च मोक्षप्राप्तयेऽहमर्थस्य या श्रवणादौ प्रवृत्तिर्जायते सा त्वन्मते न स्यात्। न हि कश्चित्स्वनाशाय प्रवर्तत इति भावः। ज्ञप्तिर्ज्ञानम्।

—२१ किं च मोक्षेऽहमर्थस्य विनाशाङ्गीकारे केवलज्ञानस्यास्तित्वमपि न संभवतीत्याह—स्वसंबन्धितयेति। विज्ञप्तिता। विषयप्रकाशत्वम्।

४१—३ विज्ञातारमिति। श्रुतौ विज्ञातारमित्यनेन जानात्येवेत्यनेन च स्मृतौ यो वेत्ति तमित्यनेन सूत्रे च ज्ञ इत्यनेन ज्ञातुरेवात्मत्वं सिध्यतीत्यर्थः। ज्ञोत एवेत्यत्रात्मशब्दानुवृत्तिसूचनार्थं नात्मा श्रुतेरित्युपात्तम्।

—७ दूषणान्तरमाह—अहंप्रत्ययसिद्धो हीति। अत्र सिद्धशब्देनास्मदर्थस्य स्वतःसिद्धिः सूच्यते। हिशब्देन प्रसिद्धिं दर्शयति। यतो ज्ञानात्मवादिभिरपि शारीरभाष्यारम्भे युष्मदस्मत्प्रत्ययगोचरयोरित्युक्तम्।

—१२ स्वप्रभेति। यथा घटादिर्दीपप्रभाया बलेन निर्भासितः सन्नेव प्रकाशते तत एव चान्याधीनप्रकाशो भवति न तथा दीपः। तस्य प्रकाशस्वभावत्वात्।

४१—१३ अन्यानपीति । विषयप्रकाशनक्षमस्यापि दीपस्य सर्वत्र व्याप्त्यभावेन विषयसंबन्धाभावात्तस्य स्वरूपेण न प्रकाशकत्वं किं तु विषयसंबन्धिनी या स्वपरिकरभूता प्रभा तद्द्वारेणेत्यर्थः ।

—१४ यथेति । अस्य दूरतर एवमात्मा चिद्रूप इत्यत्रान्वयः । यथैकमेवैकजातीयमेव तेजोद्रव्यं प्रभारूपेण प्रभावद्रूपेण चावतिष्ठते तथैवात्मा चिद्रूप एव चैतन्यगुण इति भावः ।

—१५-१६ प्रभाया गुणत्वमाशङ्कते-यद्यपीति । प्रभावतो द्रव्यस्य गुणभूतात्यन्तपरतन्त्रा प्रभेत्यर्थः । उत्तरयति-तथापीति ।

—१६ स्वाश्रयादिति । स्वं प्रभा तस्या आश्रयभूतो यो दीपस्तस्मादन्यत्र तत्समीपप्रदेशे वर्तमानत्वात् । न हि शौक्ल्यादयो गुणा एवं दृश्यन्ते । किं च तेषां न रूपवत्त्वं प्रभायास्तु रूपवत्त्वमित्यपि वैधर्म्यम् ।

—२० अथ विशीर्णाश्रयावयवानां प्रभात्वं प्रतिक्षिपति-न चेति ।

—२१ द्युमणिः । सूर्यः ।

—२२ दूषणान्तरमाह-दीपेऽपीति । दीपावयवानां प्रथमतो यत्पिण्डीभावेनोर्ध्वमुद्गमनं नियमेन भवति तत्तेषां विशरणस्वभावत्वेन न स्यात् । ततश्च दीपज्ञानं न स्यादिति भावः ।

४२-४ पुष्कलेति । पुष्कलं यत्कारणं महती वर्तिर्बहु तैलमित्यादि तस्य दीपे क्रमेण संबन्धो भवति । अग्रिमावयवस्य पूर्वमग्निसंयोगः । तत्पश्चात्तनावयवस्य पश्चात् । सर्वेषां च दीपकारणत्वं वर्तत एव । एकदैव सर्वत्राग्निसंयोगे कृते सर्वत्र दीपोत्पत्तिदर्शनात् । ततश्च यद्येक एव दीपः स्थायी स्यात्तर्हि तस्याग्रिमावयवसंबन्धेनैवोत्पत्तौ सत्यामितरावयवसंयोगानपेक्षा स्यात् । चरमावयवसंयोगनाशे दीपनाशश्च न स्यात् । अतो दीपस्य क्षणिकत्वं स्वीकार्यमिति भावः ।

—५ ननु प्रभाया विशीर्णावयवत्वाभावे दीपसमीप एवौष्ण्यप्रकाशयोराधिक्यं दूरे च न्यूनत्वं कथमुपलभ्यत इति चेत्तत्राह-प्रभाया इति ।

—७ चिद्रूप एवेति । ज्ञानस्वरूपस्य धर्मिण आत्मनो गुणोऽपि ज्ञानस्वरूपः । न च धर्मधर्मिणोरुभयोर्ज्ञानस्वरूपत्वं कथमिति वाच्यम् । व्यक्तिभेदेनाविरोधात् । यथा नरस्यैव राज्ञो नरा एव सेवका इति सेव्यसेवकयोर्व्यक्तिभेदेनोभयोरपि नरत्वमविरुद्धं तद्वदित्याहुः । ज्ञानस्य ज्ञानाश्रयत्वं व्याप्तिविरुद्धं चेज्ज्ञानस्य निराश्रितत्वमपि व्याप्तिविरुद्धम् । श्रुतिश्चेच्छरणं तर्ह्यग्रिमश्रुतिभिर्ज्ञानस्वरूपस्यापि ज्ञानाश्रयत्वस्वीकारे बाधकाभावः । गुणभूतज्ञानस्य तु न ज्ञानाश्रयत्वम् ।

४२—९-२१ सैन्धवेति । अनेन दृष्टान्तेनात्मनि स्वल्पस्यापि जडांशस्य व्यावृत्तिः । सैव कृत्स्नशब्देन प्रदर्शिता । विज्ञानघन एवेति श्रुतावेवकारस्याप्येतदेव तात्पर्यम् । ज्ञानगुणकत्वज्ञानस्वरूपत्वप्रतिपादकवाक्यमाह—एष हीति । ज्ञेयं यन्निकृष्टात्मस्वरूपं तत्रापि ज्ञातृत्वमाह—विज्ञातारमिति । अनेन ज्ञातृत्वं स्वाभाविकमिति फलितम् । जानात्येवायमिति । एवकारार्थस्यावधारणस्य संकोचे प्रमाणाभावेन सार्वत्रिकत्वान्मुक्तावपि ज्ञातृत्वमस्तीत्यर्थः । मुक्तौ ज्ञाननिषेधश्रुतीनां न प्रेत्य संज्ञास्तीत्यादीनां विषयविभागं दर्शयति—न पश्य इति स उत्तम इति च । नोपजनमिति । स्त्रीपुंसयोरन्योन्योपगमेन जायत इत्युपजनं शरीरं मुक्तौ न स्यादित्यर्थः । निषेधस्य प्रतियोगिसापेक्षत्वेन मुक्तौ ज्ञातृत्वमस्तीत्येतच्छ्रुतिः सूचयति । एवमिति । पुरुषं प्राप्तस्य मुक्तस्य ज्ञातृत्वे सत्येव देहेन्द्रियविगम इत्याशयः । १ प्राणः २ श्रद्धा ३ पञ्च भूतानि ८ इन्द्रियम् ९ मनः १० अन्नम् ११ वीर्यम् १२ तपः १३ मन्त्राः १४ कर्म १५ लोकाः १६ नाम चेत्येताः षोडशकलाः । पुरुषोयनं स्थानं यासां ताः पुरुषायणाः ।

४३-१ ज्ञोत एवेति । अत एव पूर्वोक्तश्रुतिभ्य एवात्मा ज्ञो ज्ञातृस्वरूप एवेति सूत्रार्थः ।

—३ कस्यचिदेव । स्वान्यस्य न तु स्वस्य ।

—४ केवलज्ञानस्यात्मस्वरूपत्वे दूषणान्तरमाह—संविदिति । तथा च तत्संबन्धित्वेनाश्रयविषयावश्यं स्वीकार्याविति निराश्रयस्य निर्विषयस्य ज्ञानस्यासिद्धिरिति भावः ।

—९ संविदतिरिक्तेति । स्वसत्ताप्रयुक्तप्रकाशत्वमित्युक्तवता स्वपदग्राह्याज्ञानात्तत्सत्ताप्रयुक्तप्रकाशस्यातिरिक्तत्वमवश्यं स्वीकार्यमेव । तस्य च तेन ज्ञानात्मवादिनाऽनङ्गीकाराद्विरोध इति भावः ।

—१० अव्यभिचरितेति । यस्य सत्तायां प्रकाशो न व्यभिचरति तत्त्वमजडत्वमित्यर्थः ।

—१२ अथ स्वस्मै प्रकाशमानत्वमेवाजडत्वमित्याशयेनाशङ्कते—यद्युच्येतेति ।

—१३ उत्तरयति—ज्ञानं किमिति ।

—१७ तत्संबन्धेति । ज्ञातृसंबन्धेत्यर्थः । ज्ञातृसंबन्धं विना ज्ञानस्फुरणस्यासंभवात् ।

४४-४ संविदपि मिथ्या किं न स्यादित्यत्राह—निरधिष्ठानेति ।

—५ अनुभूतिरहमितीति । अत्रानुभूतिः स्वरूपसती विवक्षिता । भ्रमाधिष्ठानभूताया अनुभूतेर्भ्रमे स्वरूपेण ज्ञानासंभवात् ।

४४—१० इतिप्रत्ययवदिति । यथा केवले दण्डे दण्डीति प्रत्ययो न भवति तथेत्यर्थः ।

—१४ अनुभूतेर्मिथ्यात्वे हेतुमाह-तद्वत एवेति । देहात्माभिमानवत एवेत्यर्थः ।

—१५ शङ्कते-सकलेति । सकलेतरपदार्थोपमर्दि यत्तत्त्वज्ञानं तेनाबाधितत्वादनुभूतेर्न मिथ्यात्वमिति शङ्काशयः ।

—१६ तदबाधादिति । ज्ञातृत्वस्याबाधितत्वं तु 'जानात्येवायं पुरुषः' इति मुक्तावपि ज्ञातृत्वपरश्रुतिवाक्यादवसेयम् ।

४५-२ ज्ञातृत्वमन्तःकरणस्य धर्म इति दूषयति-देहस्येवेति । अन्तःकरणं न ज्ञातृ । अचेतनत्वाद्देहवदिति प्रयोगः । नन्वचेतनत्वादिना घटादिसाधर्म्येपि देहस्येन्द्रियाश्रयत्वेन वैधर्म्यमिवान्तःकरणस्य ज्ञातृत्वेन वैधर्म्यं स्यादिति चेन्न । ज्ञातृत्वस्य चेतनमात्रधर्मत्वेनाचेतने प्रकृतिपरिणामभूतेऽन्तःकरणे तदयोगात् ।

—५ तत्प्रत्यनीकेति । दृश्यत्वस्य प्रत्यनीकं विरुद्धं द्रष्टृत्वम् । पराक्त्वस्य च विरुद्धं प्रत्यक्त्वम् । तादृशद्रष्टृत्वादेः सकाशाद्देहादिर्विविच्यते दूरं तिष्ठति तैर्धर्मैर्न संबध्यते तद्वदेवान्तःकरणमपीति नान्तःकरणस्य द्रष्टृत्वमित्याशयः ।

—६ तद्दृश्यत्वादिति । तद्द्रव्यत्वादिति पाठः साधुः । प्रकृतिपरिणामभूतद्रव्यत्वादिति तदर्थः ।

—९ ज्ञातृत्वस्य विक्रियात्मकत्वं परोक्तं खण्डयति-न चेति ।

—११ नात्मा श्रुतेरिति । आत्मा नोत्पद्यते । 'न जायते म्रियते' (का० २।१७) इत्यादिश्रुतेः । ताभ्यः 'नित्यो नित्यानाम्' (का० ५।१३) इत्यादिश्रुतिभ्य आत्मनो नित्यत्वावगमाच्चेति सूत्रार्थः ।

—१४ वक्ष्यतीति । 'यावदात्मभावित्वाच्च' (ब्र. सू. २।३।३०) इति सूत्रेण्येतत्स्पष्टम् ।

—१५-१६ ज्ञानं स्वाभाविकनित्यधर्मश्चेत्सर्वदा सर्वज्ञत्वप्रसङ्ग इत्यत्राह-स्वयमिति । उपपादयिष्याम इति । जीवात्मनः परं ज्योतिरुपसंपद्य ज्ञानविकासो भवतीति 'संपद्याविर्भावः' (ब्र. सू. ४।४।१) इत्यत्र वक्ष्यते ।

—१७ ननु ज्ञानस्य संकोचविकासार्हत्वे मुक्तावेव विकासः प्रागेव च संकोच इति कुतो नियम इत्यत आह-कर्मणेति । संकोचकोपाधिः । क्षेत्रज्ञावस्थायामेव संकोच इत्यर्थः ।

—१९ प्रवर्तत इति । ज्ञानमुत्पन्नं ज्ञानं नष्टमिति व्यवहारो विकाससंकोचमूलक एवेत्यर्थः ।

४५—२० अस्त्येवेति । एतेनात्मनोऽकर्तृत्वं निरस्तम् । एतादृशकर्तृत्वस्येष्टत्वात् । आत्मनो मुक्तावचेतनवत्परिणामाङ्गीकारस्यानुचितत्वात् ।

नन्वात्मनः कर्तृत्वे विकारापत्तिरत आह–तच्चेति । स्वाभाविकविकारो ह्यचेतनस्यैव न त्वात्मनः । आत्मनि विकारनिषेधश्च स्वाभाविकविषय इति नैमित्तिकविकारेपि न क्षतिः ।

—२१ ज्ञानस्वरूपस्येति । ज्ञानमेव स्वरूपमसाधारणो धर्मो यस्य स ज्ञानस्वरूपः । स्वरूपशब्दोऽसाधारणधर्मपरः । ज्ञानधर्मकस्यात्मन एव स्वधर्मभूतज्ञानप्रसरणकर्तृत्वं संभवति न जडस्वरूपस्यातद्धर्मकस्याहंकारस्येत्यर्थः ।

४६—२ शङ्कते–जडस्वभावस्येति । तच्छायापत्त्या । चिच्छायापत्त्या ।

—४ आदौ द्वितीयं दूषयति–न तावदिति । संविदश्छायाहंकारे नेत्यर्थः ।

—५ अनभ्युपगमादिति । तथा च संविद्येव ज्ञातृत्वाभावेन तच्छायायान्यत्र ज्ञातृत्वं सुतरां न संभवतीति भावः ।

प्रथमं दूषयति–नापीति । अहंकारस्य च्छाया संविदि नेत्यर्थः ।

—६ उक्तरीत्येति । अचेतनस्य प्रकृतिपरिणामभूतस्याहंकारस्य ज्ञातृत्वं न संभवतीत्यर्थः ।

—१२ उभयत्र । अहंकारे संविदि च ।

अनुभूतेः । अनुभूतिस्वरूपस्यात्मनः ।

—१४ स्वयंज्योतिष इति । अनेनात्मनो व्यञ्जकापेक्षा नास्तीति सूचितम् । जडरूपेति । अनेनाहंकारस्य व्यञ्जकत्वशक्तिर्नास्तीति सूचितम् ।

—१५–१७ तदुक्तमिति । आत्मसिद्धावित्यर्थः । शान्ताङ्गार इति । यथा शान्ताङ्गार आदित्यं व्यनक्तीति न युक्तिसहं तथेत्यर्थः ।

—२१ परिहसन्तीति । ईदृशमनुभवमीदृशोहंकारोभिव्यनक्तीत्युक्तवतस्तव त्वदीया एव हसन्तीत्यर्थः ।

४७–१ स्वभावविरोधादिति । अनुभवस्याशेषार्थसिद्धिहेतुत्वादहंकारस्य तदभावादनुभवाधीनसिद्धित्वाच्च विरोधः । अननुभूतित्वप्रसङ्गाच्चेति । विमताऽनुभूतिर्नानुभूतिर्व्यङ्ग्यत्वाद्घटवदित्यनुमानेनाननुभूतित्वप्रसङ्ग इत्यर्थः । व्यङ्क्तृव्यङ्ग्यभावः । व्यञ्जकव्यङ्ग्यभावः ।

—३ प्रातिकूल्यतः । विरोधात् ।

—९ बहुला इति । न चात्रापि संविद्बाहुल्यहेतुत्वमहंकारस्य शङ्कनीयम् । तन्नये ब्रह्मस्वरूपायाः संविदः प्रसरणस्वभावत्वाभावात् ।

—११ अहंकारनिर्वर्त्या । अहंकारेण जायमाना । किंरूपेति । उत्पत्तिरूपा प्रकाशनरूपानुभवसाधनानुग्रहरूपा वेत्यर्थः ।

४७—१३ तत्प्रकाशनम् । संविद्रूपात्मविषयकज्ञानोत्पत्तिः ।

अननुभाव्यत्वात् । अविषयत्वात् ।

तत एव । संविद्रूपात्मविषयकज्ञानोत्पत्तेरसंभवादेव ।

—१४ द्विधेति । ज्ञेयगतदोषदूरीकरणद्वारा ज्ञातृगतदोषदूरीकरणद्वारा चेत्याशयः । तदेवाह—ज्ञेयस्येति ।

—१८ अभूमित्वात् । अविषयत्वात् । संविद्रूपस्यात्मन इन्द्रियाविषयत्वान्नाहंकारस्य संविज्ज्ञानजनकेन्द्रियसंबन्धहेतुत्वं नापि बोद्धृगतकल्मषापनयहेतुत्वमिति भावः ।

—२१ अनुभाव्येति । अनुभाव्या यानुभूतिस्तस्या योऽनुभवस्तदुत्पत्तौ यत्प्रतिबन्धकं तन्निरसनमहंकारः करोतीत्यर्थः । परं त्वेतादृशं किंचित्प्रतिबन्धकमेवात्र न संभवतीत्याशयः ।

४८—१ संतमसम् । गाढान्धकारः ।

—३ संविदात्मगतमिति । संविद्रूपो य आत्मा ज्ञेयत्वेनाभिमतस्तन्निष्ठमित्यर्थः ।

—४ अस्ति हीति । संविदाश्रयकं संविद्विषयकं चाज्ञानमेव प्रतिबन्धकमिति शङ्काशयः ।

तथाविधाज्ञानस्यासंभवेऽपि तुष्यतु दुर्जनन्यायेन तत्स्वीकृत्य प्रकारान्तरेण दूषयति—अज्ञानस्येति ।

—६ संविदाश्रयत्वमिति । आश्रयणं संबन्धः । स च विषयत्वेनाधारत्वेन च । आश्रयश्चेतसो ब्रह्मेत्यत्र यथा । तथा च संविन्निष्ठत्वं संविद्विषयकत्वं चेत्यर्थः ।

ज्ञानसमानेति । यो हि ज्ञानाश्रयो भवति स एव कालविषयादिभेदेनाज्ञानाश्रयो भवति नान्यो ज्ञातृभावरहितो घटादिः । तथा च संविदो ज्ञातृभावरहितत्वेन न तन्निष्ठत्वमज्ञानस्य संभवतीत्यर्थः । तत्समानेति । ज्ञानसमानेत्यर्थः । यो हि ज्ञानस्य विषयो भवति स एव कालज्ञात्रादिभेदेनाज्ञानस्य विषयो भवति नान्यो ज्ञानाविषयो वन्ध्यापुत्रादिः । तथा च संविदो ज्ञानविषयभावरहितत्वेन न तद्विषयत्वमज्ञानस्य संभवतीत्यर्थः ।

—१२ स्वविषय एवेति । यद्यविषयेऽप्यज्ञाननिवृत्तिस्तर्हि शुक्तिज्ञानेनापि सर्पभ्रमनिवृत्तिः स्यात् ।

—१४ किं चाहंकारापनोद्यत्वेनोक्तमेतदज्ञानं किं सदसदनिर्वचनीयं ज्ञानप्रागभावरूपं वा । आद्य आह—अस्य चेति ।

४८—१५-६ अन्त्य आह-ज्ञानप्रागभावेति। उत्पत्तिविरोधित्वाभावेन। उत्पत्तिप्रतिबन्धकत्वाभावेन। न हि घटप्रागभावो घटोत्पत्तिं प्रतिबध्नाति।

—१७ केनापि प्रकारेण। उत्पादकतया प्रकाशकतया तदनुग्राहकतया चेत्यर्थः।

—१८ स्वाश्रयतयेति। बहुव्रीहेस्तल्।

—१९ यथावस्थितेति। ज्ञानस्य चाक्षुषादेस्तत्साधनस्येन्द्रियादेरनुग्राहकस्य चालोकादेरीदृश एव स्वभावः। ज्ञानस्य स्वतःप्रमाणत्वात्। यथावस्थितपदार्थप्रतीतिजनकत्वमेव प्रमाणत्वम्। तच्च स्वत एवेति ज्ञानस्य तादृशस्वभावः सिध्यति। ज्ञानस्य तादृशस्वभावत्वे च तत्साधनानुग्राहकयोरपि तादृशस्वभावत्वमर्थादेव सिध्यतीत्यर्थः। स्वतःप्रामाण्यन्यायसिद्धमिति पाठः।

—२१ ननु प्रदीपादिष्वदर्शनादित्यसिद्धो हेतुः। दर्पणे व्यक्तौ च दर्शनादिति चेत्तत्राह-न चेति।

४९—१ तद्दोषेति। अन्यथाज्ञानहेतुत्वादेव प्रतिफलनस्य दोषत्वमिति भावः।

—४ आकारः। अपृथक्सिद्धो धर्मः।

—५ वस्तुत इति। यथा जातेर्व्यक्तिनिष्ठत्वेनोपलब्धिर्भवति। तस्याः कारणं वस्तुतस्तयोर्धर्मधर्मिभावः। मुखस्य दर्पणनिष्ठत्वेनोपलब्धिर्भवति। तस्याः कारणं दोषतः प्रतिफलनम्। तथाहंकारनिष्ठत्वेन या संविदुपलब्धिर्भवति तस्याः कारणं किंचिन्न संभवतीत्यर्थः।

—८ ननु ज्ञानस्य प्रत्यक्त्वात्तस्यैवात्मत्वमस्त्वित्यत आह-अहंभावेति। ज्ञानेऽहंभावाभावेन स्वस्मै प्रकाशमानत्वरूपप्रत्यक्त्वाभावान्न प्रत्यक्त्वं ज्ञानस्यात्मत्वसाधकं किं त्वहंताविशिष्टस्य ज्ञातुरेवेत्यर्थः। सुषुप्तावप्यस्फुटोऽहंभावोऽस्त्येव।

—९ तमेव साधयति-तमोगुणेति। तमोगुणकृताभिभवेनाहमर्थस्य किंचिद्विशेषणविशिष्टत्वेन प्रतिभासो न भवति। परागर्थः। इदमर्थः। तस्यानुभवाभावेनाहमर्थस्येतरव्यावृत्तत्वेन प्रतिभासो न भवति। इतरव्यावृत्तत्वेन प्रतिभास एव विविक्तप्रतिभासः। विशेषणविशिष्टत्वेन प्रतिभास एव स्फुटावभासः।

—११-२ ननु यदि सुषुप्तावहंभावोऽस्फुटस्तर्हि तदस्तित्वे किं प्रमाणमिति चेन्मदवत्संमतानुभूतावपि तुल्यमेतदित्याह-भवदिति। यथा तव ज्ञातृज्ञेयसंबन्धाभावेन ज्ञानस्य सुषुप्तावस्फुटावभासस्तथा ममापीदमर्थानुभवाभावेनाहमर्थस्यास्फुटावभास इत्याशयः। वक्तव्यमिति। अन्यथा धियोप्यप्रकाशत्वप्रसङ्गो भवतो दुर्वारः स्यात्।

४९—१३ अहंभावविवियुक्ता। ज्ञातृसंबन्धरहिता। अर्थान्तरप्रत्यनीकाकारा। ज्ञेयादिसमस्तविशेषरहिता। ज्ञप्तिरहमिति। अत्राहंशब्दोपादानं प्रत्यक्त्वसिद्ध्यर्थम्। तथा च परपक्षानुगुणः परामर्शो नास्तीति सिद्धम्।

—१४ अथ स्वपक्षानुगुणं परामर्शं दर्शयति–एवं हीति।

—१७ यथेदानीमिति। पूर्वं कृतास्त्वापादिदानीमहं सुखमनुभवामीत्येव सुखमहमस्वाप्समिति परामर्शस्यार्थो न तु स्वापकाल इति शङ्काशयः।

—१८ उत्तरयति–अतद्रूपत्वादिति। सुखमहमस्वाप्समिति वाक्यात्स्वरसतस्त्वदुक्तार्थाप्रतीतेः। न हि मन्दमगच्छमिति–वाक्यादिदानीं यथा मान्द्यं भवति तथा पूर्वमगच्छमित्यर्थः प्रतीयत इति भावः।

शङ्कते–न चेति। स्वरसतः प्रतीतोऽप्यर्थो नोपपद्यते। अहमर्थस्यात्मनोऽस्थिरत्वात्। अतः सोऽर्थस्त्याज्य एवेत्याशयः।

—१९ उत्तरयति–यत इति। कृतमिति कायिकः परामर्शः। अनुभूतमिति मानसः। अवोचमिति वाचिकः। एभिः परामर्शैरात्मनः स्थिरत्वमेव सिध्यतीति स्वारसिकार्थस्य न काचिदनुपपत्तिरिति भावः।

—२१–२ पुनः शङ्कते–एतावन्तमिति। उत्तरयति–ततः किमिति। अहमर्थो न निषेधविषय इत्याशयः।

५०—१ अनुमाशयमजानानः शङ्कते–न किंचिदिति। परिहरति–नेति।

—४ सुषुप्तिसमयेऽपीति। अहं न किंचिदवेदिषमिति–परामर्शेऽहमर्थो न प्रतिषिध्यते। अहंशब्देन तस्य परामर्शेन तदानीं तस्यानुवर्तमानत्वात्। किं तु तदीयवेदनमेव प्रतिषिध्यते। भवांस्त्वनेनैव परामर्शेन प्रतिषिध्यमानस्यापि वेदनस्य सिद्धिं कल्पयत्यनुवर्तमानस्याप्यहमर्थस्यासिद्धिं कल्पयतीति विरुद्धं वदन्देवानां प्रियो मूर्ख एवेत्यर्थः। 'देवानामेव साधयतु' इति पाठे देवाः प्रतिवचनं न ददतीति तदग्र एव भवान्यथेच्छं वदतु न तु ममाग्र इत्यर्थः।

–९–१० शङ्कते–मामपीति। परिहरति–स्वानुभवेति। अनुभवानुसारेण न ब्रवीषीत्यर्थः।

—११ पुनः शङ्कते–अहमिति।

—१२ तदुच्यत इति। अहंशब्देन कस्यानुवृत्तिर्मामित्यनेन च कस्य निषेधस्तदुच्यत इत्यर्थः।

५१–१ साक्षाद्द्रष्टरीति। साक्षाच्छब्दादिनिप्रत्ययो भवति द्रष्टर्यर्थे गम्यमाने संज्ञायां सत्यामिति सूत्रार्थः। साक्षद्द्रष्टा साक्षीत्युदाहरणम्।

५१—४ आत्मने स्वयमिति। सुषुप्तौ भासमान आत्माहमित्येव भासते स्वस्मै प्रकाशमानत्वाज्जाग्रदात्मवदित्यनुमानमनेन सूचितम्।

—८ तथा सतीति। ज्ञानसंतत्युच्छेद एव मोक्ष इति बौद्धमतं स्वरूपनाशस्यापुरुषार्थत्वेन दूषयता त्वयापि शब्दान्तरेण स्वरूपनाश एवोक्त इति भावः।

—११ ज्ञानप्रतीतेरेवेति। एवं च मोक्षे ज्ञानरूपधर्मस्य सत्त्वेन तद्धर्मिणोऽहमर्थस्यापि सत्त्वमङ्गीकार्यमिति सिद्धम्।

—१२–६ प्रत्युत तदनङ्गीकारे बाधकमाह–अपि चेति। भ्रान्त्या वेति। यथा वास्तविकदुःखे दुःखिनः स्वदुःखनाश एवापेक्ष्यते न तु स्वविनाशस्तथा दुःखभ्रमेपि द्विचन्द्रज्ञानादिभ्रान्तिमतः स्वभ्रमनाश एवापेक्ष्यते न तु स्वविनाश इति भावः। आध्यात्मिकादीति। आदिशब्देनाधिभौतिकाधिदैविकयोः संग्रहः। आध्यात्मिकं द्विविधं शारीरं मानसं च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधादिनिमित्तम्। आधिभौतिकं मानुषपशुपक्षिसर्पस्थावरादिनिमित्तम्। आधिदैविकं यक्षराक्षसग्रहाद्यावेशनिमित्तम्। अपुनर्भवमिति। अपोह्येतिक्रियाविशेषणमेतत्। न पुनर्भवः पुनरुत्पत्तिर्यत्रेत्यर्थः। अनाकुलः। आगामिदुःखशङ्कया मनःक्षोभ आकुलत्वं तद्रहितः। अपसर्पेदेवेति। तथा च मोक्षमार्गप्रवृत्त्यन्यथानुपपत्त्या मोक्षेऽहमर्थोऽनुवर्तत एवेत्यर्थापत्तिप्रमाणेन सिद्धमिति भावः।

—१८ शङ्कते–अहमिति।

५२–१ अनुमानमाह–स चेति।

—६ संसारित्वादीति। आदिशब्देन रागद्वेषदुःखादिसंग्रहः।

—७ मोक्षविरोधादिति। मोक्षेण सहाज्ञत्वादीनां विरोधान्न तत्प्रसङ्ग इत्यर्थः। तथा च श्रुतिः 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्' (छा. ७।१६।२) इति। कारणं च कार्यमुत्पादयत्येवेति न नियमः। घटानुत्पादकानामपि दण्डानां दर्शनादित्यहंभावे सत्यपि न तत्कार्यस्याज्ञत्वादेः प्रसक्तिरिति बोध्यम्। अथ कार्यकारणभावोऽपि नास्तीत्याह–अज्ञत्वादीति। संसारित्वाहमर्थत्वयोः सहदर्शनमात्रेण कार्यकारणभावस्वीकारे त्वन्मतेऽपि संसारित्वानुभवयोस्तथात्वापत्तिः।

अहंप्रत्ययस्याज्ञत्वाद्यहेतुत्वमुपपादयति–अज्ञानमिति। क्वचित्केवलं स्वरूपाज्ञानम्। यथा तमसि घटादेः। क्वचित्तु तत्पूर्वकमन्यथाज्ञानम्। यथा पीतः शङ्ख इति। अत्र पाण्डुरत्वविशिष्टशङ्खस्वरूपस्याज्ञानं वर्तत एव। क्वचिच्च तत्पूर्वकं विपरीतज्ञानम्। यथा शुक्ताविदं रजतमिति।

५२—१० तत् । अज्ञत्वम् ।

ब्रह्मेति । ब्रह्मात्मभावस्यापरोक्षेण प्रत्यक्षेण निर्धूता निरवशेषा समग्राऽविद्या येषामित्यर्थः ।

—१४-५ ब्रह्मणोऽपि तथा प्रतिपत्तिमाह—सकलेति । अज्ञानविरोधिनो नाज्ञानवश्यत्वमिति भावः । न हि विषहन्तुर्गरुडस्य विषवश्यत्वं दृश्यते । सच्छब्देति । सच्छब्दः सदिति प्रत्ययश्च तन्मात्रभाजः । मात्रचा नामरूपव्यावृत्तिः । एवमेव । अहंप्रत्ययघटित एव । तिस्रो देवताः । तेजोबन्नरूपा अनुप्रविश्य नामरूपे व्याकरवाणीत्यर्थः । देवतानुप्रवेशनामरूपव्याकरणबहुभवनक्षराक्षरातीतत्वादयो धर्मा नान्तःकरणरूपाहंकारस्य संभवन्ति । एषु श्रुतिस्मृतिवाक्येष्वहंशब्देन चिन्मात्रमुपलक्ष्यत इति चेल्लक्षणैव दोषः । अनेकवचनोपादानं 'महाभूतान्यहंकारः' 'अहंकारं बलं दर्पम्' इत्यादिपरमतोपपादकद्वित्रवचनापेक्षयाधिक्यद्योतनार्थम् ।

५३-६ क्षेत्रान्तर्भाव इति । 'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते' इति पूर्वमुक्त्वा तादृशशरीररूपक्षेत्रेऽहंकारस्यान्तर्भावः कृतः । अहंकारस्यात्मस्वरूपत्वे तु स न संभवतीत्याशयः ।

—८ उच्यत इति । अहंभावोऽहंकारश्च भिन्नः । तत्राहंभाव एवात्मस्वरूपम् । अहमहंभावं करोत्यनेनेत्यहंकारः । अभूततद्भावे च्विप्रत्ययः । अनेन ह्यहंकारेणानहंभूतेऽनात्मभूते देहादावहंबुद्धिरुत्पद्यते । अयमहंकार एव क्षेत्रान्तर्भूतो नाहंभाव इति भावः ।

अहमित्येव । नत्वहंकार इति ।

—१३ शास्त्रेषु । 'अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः' (गी. १६।१८) इत्यादिषु । तत्र ह्येतादृशान्नराधमान्संसारेषु क्षिपामीत्यग्र उच्यत इति तेषामहंकारादीनां हेयत्वमर्थात्सिध्यति ।

—१४ बाधकापेता । बाधकरहिता ।

—२१-२ उक्तार्थ आत्मसिद्धिग्रन्थमुदाहरति—अत इति । प्रत्यक्षसिद्धत्वं धर्मधर्मिभावेन प्रतीतत्वम् । उक्तन्यायः । प्रागुक्तार्थापत्तिः । आगमः । उक्तश्रुतिवाक्यानि । अविद्यायोगः । अनात्मन्यात्मबुद्धिरूपाविद्यायोगात्समनन्तरोक्ता शरीरे ज्ञातृत्वभ्रान्तिर्न तु ज्ञानत्वभ्रान्तिः ।

५४-१ ज्ञानस्यानात्मत्वे चात्मसिद्धिग्रन्थमुदाहरति—देहेन्द्रियेति । अत्र धियोऽन्यत्वमात्मनः स्पष्टमेवोक्तम् ।

—६ शास्त्रबाध्यत्वमिति । अद्वैतशास्त्रेण भेदप्रत्यक्षस्य बाध्यत्वमित्यर्थः ।

—८ तिमिरादीति । आदिशब्देन सादृश्यं गृह्यते । तद्धि निर्वापितायाः सद्यः समुत्पादितायाश्च ज्वालाया ऐक्यभ्रमहेतुः ।

५४—१४ तन्मूलत्वेनेति । ब्रह्मव्यतिरिक्तस्य सर्वस्य भेदवासनामूलत्वेन शास्त्रस्यापि तत्त्वं बोध्यम् । भेदवासनामूलत्वेनासत्यमेव शास्त्रं सत्यस्य ब्रह्मज्ञानस्य सूचकमिति मृषावादिनो मतम् ।

—१७ परत्वादिति । निषेध्योपस्थापकप्रत्यक्षप्रमाणापेक्षया तन्निषेध्यसापेक्षस्य निषेधकशास्त्रस्य पश्चादुपस्थितिकत्वेन परत्वम् । नेदं रजतमिति परज्ञानस्येदं रजतमिति पूर्वज्ञानबाधकत्वं दृष्टमेव ।

—१९–२० भ्रान्तोऽयमितीति । नायं सर्प इति वदन्भ्रान्त इति श्रोत्रा परिज्ञात इत्यर्थः । भ्रान्तिश्च वस्तुसती श्रोतुर्भ्रान्त्या कल्पिता वा । भयानिवृत्तीति । उत्तरज्ञानस्य दोषमूलत्वेन प्रामाण्यानिश्चयाद्भयानिवृत्तिः ।

—२१ श्रवणावगतेति । तथाच मननमूलभूतश्रवणकाल एव ब्रह्मात्मैकत्वावगतौ सत्यां निखिलभेदस्य काल्पनिकत्वेन दोषमूलत्वनिश्चयात्तदन्तर्गतस्य शास्त्रस्यापि दोषमूलत्वं ज्ञायत इति भावः ।

५५–३ सर्वविषयविरक्तत्वादिति । निर्विषयत्वादित्यर्थः । न हि ज्ञानं स्वाविषयं प्रकाशयतीति भावः । शास्त्रेति । निर्विषयाया अप्यनुभूतेः किंचिदर्थबोधकत्वे प्रत्यक्षस्याप्यसंभाव्यमानदोषतां किं न बोधयेदित्याशयः ।

—४ नापीति । ऐन्द्रियकं प्रत्यक्षमपीममर्थं नावगमयतीत्यर्थः ।

दोषमूलत्वेन । भेदवासनारूपदोषमूलत्वेन ।

—५ तन्मूलत्वादेव । इतरप्रमाणानां प्रत्यक्षमूलत्वादेव । प्रमाणानीति । इममर्थमवगमयन्तीति संबन्धः ।

—१० यौक्तिकबाधादेवेति । युक्त्या बाधो यौक्तिकबाधः । धूमबुद्ध्या गृहीतस्य बाष्पस्य वह्निनिश्चयहेतुत्वादर्शनात् ।

अथोच्येतेति । प्रत्यक्षेण ज्ञातस्य घटादेः शास्त्रेण पश्चाद्बाधो दृश्यते । एवं शास्त्रेण ज्ञातस्य ब्रह्मणो न केनापि पश्चाद्बाधो दृश्यते । तादृशं ब्रह्मैव परमार्थ इत्याशयः ।

—१५–६ काचादीति । काचो नेत्ररोगः । 'काचबिन्दु' इति प्रसिद्धः । आदिना कामल–(कावीळ इति प्र.) संग्रहः । पुरुषान्तरागोचरेति । अनेन द्विचन्द्रज्ञानस्य परतोऽबाधितत्वं सूच्यते । तैमिरिकजनस्येति । तिमिराख्यनेत्ररोगविशेषविशिष्टजनस्येत्यर्थः । अज्ञातस्वतिमिरस्येति । अनेन स्वतोऽप्यबाधितत्वं सूच्यते ।

—१८ तत् । द्विचन्द्रज्ञानम् । मिथ्या न भवतीति न किं तु मिथ्यैवेत्यर्थः । एवमेव पशुपक्ष्यादीनां देहात्मज्ञानं तद्दृष्ट्याऽबाधितमपि मिथ्यैवेत्यप्यत्र दृष्टान्तत्वेन योजनीयम् ।

५५—१९ **अविद्यामूलत्वेन**। अविद्याजन्यभेदवासनामूलकशास्त्रजन्यत्वेन।

—२२ **अविद्यावदिति**। अविद्याऽस्ति यस्य तदविद्यावच्छास्त्रम्। प्रयोजकत्वं षष्ठ्यर्थः। अविद्यामूलकशास्त्रोत्पन्नज्ञानविषयत्वादित्यर्थः।

५६-१ **असत्येति**। असत्यो यः शास्त्ररूपो हेतुस्तज्जन्यज्ञानविषयत्वादित्यर्थः।

—३ नन्वयमसिद्धो हेतुः। यतोऽसत्यस्यापि सत्योत्पत्तिहेतुत्वं दृश्यत इत्याशयेनाशङ्कते—**न चेति**।

—५ परिहरति—**स्वाप्नज्ञानस्येति**।

—६ विषयाणामेवेति। इदं पूर्वपक्षिमतानुसारेण। स्वमते तु विषयाणामपि सत्यत्वमग्रे (श्रीभाष्य पृ. ९६) वक्ष्यते।

—९ **दर्शनं तु**। ज्ञानं तु। अर्थाः। विषयाः।

—१० **मायामयम्**। मिथ्याविषयकम्। **सत्यमेवेति**। मन्त्रौषधादीनां ज्ञानकारणानां सत्यत्वात्।

—११ **विषयेन्द्रियादीति**। विषयदोषः सादृश्यादिः। इन्द्रियदोषः काचादिः। आदिशब्देन दूरत्वादिदोषसंग्रहः। न चासत्यादोषात्कथं सत्यज्ञानोत्पत्तिरिति वाच्यम्। दोषस्यासत्यत्वाभावात्।

—१२ **सत्यैवेति**। सर्पसंनिधानज्ञानं कारणं सत्यम्। दष्टबुद्धिश्च सत्यैव। दंशः परमसत्योऽस्तु नामेति भावः।

—१४ **वस्त्विति**। जलादि सत्यम्। तत्कृतचाक्षुषतेजःप्रतिघातश्च सत्य एव।

—१५ **उत्पत्तिमत्त्वादिति**। न ह्यसत्यं शुक्तिरजतमुत्पत्तिमन्नापि कार्यकरमिति भावः। अर्थभूता प्रयोजनभूता या क्रिया तत्कारकत्वादित्यर्थः।

—१६-७ ननु स्वप्नादौ ज्ञानकारणीभूतानां हस्त्यादीनां विषयाणामसत्यत्वे कथं तस्मात्सत्यज्ञानोत्पत्तिरित्याशयेनाशङ्कते—**हस्त्यादीनामिति**। परिहरति—**नैतदिति। बुद्धीनां सालम्बनत्वमात्रेति**। सविषयत्वमात्रेत्यर्थः। न तु तस्य विषयस्य सत्यत्वापेक्षेति भावः।

—१८ मिथ्याभूतस्य कथं विषयत्वमित्यत्राह—**अर्थस्येति**। अतीतादेर्विषयत्वदर्शनात्तमसि वस्तुसतोपि घटादेर्विषयत्वादर्शनाच्चेति भावः।

५७-१ **प्रतिभासमानता चेति**। प्रतिभासमानतायाः सत्यो दोष एव कारणं नासत्यो विषय इत्यर्थः।

विषयस्यैव कथमसत्यत्वमित्यत्राह—**स त्विति**। अर्थस्त्वित्यर्थः। एवं चोत्पत्तिहेतुत्वं ज्ञानहेतुत्वं च सत्यस्यैवेति सिद्धम्।

५७-५ उपायत्वायोगात्। वर्णबुद्धिहेतुत्वायोगात्।

—६ निरुपाख्यस्य। तुच्छस्य वन्ध्यापुत्रादेः।

अथेति। वर्णबुद्धिहेतुत्वेन प्रतिपादिता या वर्णात्मना प्रतिपन्ना रेखा तस्या-मस्त्यंशद्वयम्। वर्णात्मता तद्रूपेण बुद्धिश्च। तत्र प्रथमांशस्यासत्यत्वेन हेतुत्वा-संभवेऽपि द्वितीयांशस्य सत्यत्वात्तस्यैव हेतुत्वमङ्गीक्रियत इति शङ्काशयः।

—७ परिहरति-एवं तर्हीति। असत्यात्सत्योत्पत्तिसिद्ध्यर्थं हि त्वया रेखो-दाहरणं प्रदर्शितम्। तत्रापि त्वदुक्तरीत्याऽसत्यात्सत्यबुद्धिर्नोत्पद्यते। कारण-भूताया बुद्धेः सत्यत्वादेवेत्यर्थः।

—८ उपायेति। वर्णबुद्धिरूपद्वितीयांशस्यैव कारणत्वे कार्यकारणयोरैक्यप्र-सङ्गः। वर्णबुद्धेरेव कार्यत्वादिति भावः।

—९ अथ प्रथमांशस्यैव कारणत्वे दूषणान्तरमाह-रेखाया इति।

—१४ उदाहरणान्तरं परिहरति-रेखागवयादिति। गवयचित्रादित्यर्थः।

—१६ स्फोटवादाश्रयेणोच्यमानमुदाहरणान्तरं तदाश्रयेणैव प्रथमतः परि-हरति-न चेति। नादैः स्फोट्यत इति व्युत्पत्त्या स्फोट एकरूपः शब्दः।

—१७ नानेति। कत्वखत्वादिविशेषविशिष्टतत्तन्नादकृतोऽभिव्यक्तिविशेषः सत्यः। तद्विशिष्टः सत्यशब्दोऽर्थज्ञानहेतुः। कत्वादेरारोपेपि तज्ज्ञानं सत्यमेव। तदेव चार्थज्ञानहेतुरित्याशयः।

—१९ संप्रति स्फोटवादं खण्डयति-शब्दस्येति।

५८-१ बोधकस्यैवेति। एवकारेण स्फोटव्यावृत्तिः।

—१० शास्त्रजन्यज्ञानस्य न केनापि पश्चाद्बाधो दृश्यत इति पूर्वपक्ष्युक्तं (श्रीभाष्य-पृ. ५५ प. १२) खण्डयति-पश्चात्तनेति।

—११ तस्यापि। शास्त्रजन्यज्ञानस्यापि।

—१२ तत्। शून्यमेव तत्त्वमिति। एतदपि। शास्त्रजन्यज्ञानमपि। त्वयेति। शास्त्रस्याविद्याजन्यभेदवासनामूलकत्वं वदतेत्यर्थः।

—१३ तस्यैव। शून्यमेव तत्त्वमित्यस्यैव। सर्वशून्यवादिनो मते निषेध्या-भावेन ततः परं निषेधानुदयादिति भावः।

-१५-६ ज्ञानैकरसेति। विज्ञानघन इति श्रुतौ ज्ञानैकरसत्वेन प्रतिपाद-नान्निर्विशेषत्वम्। वस्तुमात्रशब्देन श्रुतेः सगुणे ब्रह्मणि तात्पर्याभावः सूच्यते। सदेवेति। पूर्वं येनाश्रुतम् (छा० ६।१।३) इति श्रुतौ कृताया एकवि-ज्ञानेन सर्वविज्ञानं भवतीति प्रतिज्ञायाः समर्थिकेयं श्रुतिः। घटादिषु या सत्ता सा ब्रह्मसत्तैव ब्रह्म च सत्स्वरूपमेवेति तादृशब्रह्मसत्तयाऽर्थादेव घटादिज्ञानं भवतीति तात्पर्यम्।

५८-१७ **एकविज्ञानेनेति** । ब्रह्मणा ज्ञातेनाज्ञातमपि घटादि ज्ञातं भवतीत्येव प्रतिज्ञार्थः । न तु ब्रह्मसत्तया सर्वं ज्ञातं भवतीति । मृदादिदृष्टान्तानुरोधात् । कारणसत्तया कार्यज्ञानायोगाच्च । न हि मृत्पिण्डसत्तया घटज्ञानं भवति । किं तु मृत्पिण्डज्ञानेनेति । तथा च नानया श्रुत्या सन्मात्रस्वरूपब्रह्मसिद्धिः ।

—२४ **अथ परेति** । अस्यामपि श्रुतावदृश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् (मु. १।१।६) इत्यनेन प्रकृतिसंबन्धिनो गुणा एव ब्रह्मणि निषिध्यन्ते । न सर्वथा निर्गुणत्वं प्रतिपाद्यते । अत एव तदुत्तरं नित्यं विभुम् (मु. १।१।६) इत्यत्र नित्यत्वादयो गुणा उक्ता इति भावः ।

५९-५ **अनेकविशेषणेति** । यथा नीलो घट इत्यत्र नीलत्वविशिष्टो घटत्वविशिष्टश्च य एकोऽर्थो घटरूपस्तस्यैवाभिधानं नीलशब्देन घटशब्देन च क्रियते तथा सत्यं ज्ञानमित्यत्रापि सत्यादिशब्दैः सत्यत्वादिगुणविशिष्टस्यैव ब्रह्मणः प्रतिपादनं न निर्गुणस्येति बोध्यम् ।

—६ **प्रवृत्तीति** । नीलशब्दस्य नीलत्वं प्रवृत्तिनिमित्तम् । नीलत्वं निमित्तीकृत्यैव नीलशब्दस्य घटाद्यर्थे प्रवृत्तत्वात् । घटशब्दस्य च घटत्वं प्रवृत्तिनिमित्तम् । तादृशप्रवृत्तिनिमित्तभेदेन नीलघटपदयोर्यद्घटरूपैकार्थप्रतिपादकत्वं तदेव सामानाधिकरण्यमित्यर्थः ।

—७-८ **मुख्यार्थैरिति** । स्वमतमेतत् । पूर्वपक्षिणा तु सत्यज्ञानादिपदानां तत्तत्पदार्थविरोधिप्रत्यनीकपरत्वं प्रागुक्तम् (श्रीभाष्य-पृ. २० प. ३)। तदनुसारेऽप्याह-**तत्तद्गुणेति** । **अवश्याश्रयणीय इति** । सिद्धे च प्रवृत्तिनिमित्तभेदे ब्रह्मणः सगुणत्वमर्थादेव सिध्यतीत्याशयः ।

—१० **न चेति** । सत्यज्ञानादिगुणविरोधिनो येऽसत्यत्वाज्ञानादयस्तत्प्रत्यनीकता या ब्रह्मरूपवस्तुनि वर्तते सा न धर्मान्तरं किं तु वस्तुस्वरूपमेवेति न लक्षणापक्षे सगुणत्वं सिध्यतीति शङ्काशयः ।

—१३ **ननु** सिद्धान्तिमतेऽपि सत्यज्ञानादिपदानां भिन्नभिन्नार्थत्वाद्घटपटपदयोरिव सामानाधिकरण्यं न संभवतीति चेत्तत्राह-**न चेति** । न हीत्यर्थः । न केवलमविरुद्धं प्रत्युतानुकूलमेवेत्यर्थः ।

—१८ **अद्वितीयपदमिति** । सदेवेत्यनेन विजातीयभेदव्यावृत्तेरेकमेवेत्यनेन सजातीयभेदव्यावृत्तेश्च सिद्धौ परिशेषादद्वितीयपदेन स्वगतभेद एव व्यावर्त्यत इत्याशयः ।

—१९ **सर्वशाखेति** । एतन्न्यायस्वरूपं प्राक् (विवृति-पृ. २५प.२५) उक्तम् ।

६०-५ **स्वव्यतिरिक्तेति** । ब्रह्मापेक्षयाऽन्यज्जगत्कारणं नास्ति किं त्वेकमेव

ब्रह्म जगदुत्पादनसमर्थमित्येवाद्वितीयपदस्य तात्पर्यम्। एकमेवेत्यनेन तु निमित्तकारणान्तरं व्यावर्तयत इति न पुनरुक्तिः।

६०–७ **विचित्रशक्तियोगमेवेति**। न तु निर्गुणत्वमित्यर्थः।

—८ शङ्कते–**अविशेषेणेति**।

—१५ **विपरीतफल इति**। सर्वशाखाप्रत्ययन्यायेन हि न श्रुत्युक्तानां गुणानां त्यागो भवति किं त्वनुक्तानां संग्रह एवेति भावः।

—१८ **न चेति**। निर्गुणब्रह्मवादिनो मते सगुणवाक्यापेक्षया निर्गुणवाक्यस्यापच्छेदन्यायेन बलीयस्त्वान्न निर्गुणसगुणवाक्यविरोधः। सगुणब्रह्मवादे तु तथा वक्तुमशक्यत्वात्स्यादेव विरोध इति शङ्काशयः।

—१९ परिहरति–**प्राकृतेति**। एवं च विषयभेदान्न विरोध इति भावः।

—२१ **ज्ञानमात्रस्वरूपवादिन्यः**। विज्ञानघन इत्याद्याः।

६१–३–६ **ज्ञातृत्वमेवेति**। एवकारेण ज्ञातृत्वस्यानन्यथासिद्धिरभिप्रेता। **लोकानुसृजा इति**। इति श्रुतयो वदन्तीति संबन्धः।

–७–१६ **नित्य इति**। अत्र मन्त्रे कामप्रदत्वगुण आत्मनः सूचितः। **चेतनः**। ज्ञाता। **ज्ञाज्ञाविति**। अत्र ज्ञातृत्वमीश्वरत्वं च सूचितम्। **तमीश्वराणामिति**। अत्रेश्वरत्वदेवतात्वपतित्वानि सूचितानि। ईश्वरत्वं च नियन्तृत्वम्। तेन ज्ञातृत्वं सिध्यति। ज्ञातृत्वमन्तरेण नियन्तृत्वायोगात्। देवतात्वं कर्माराध्यत्वम्। **कार्यं** शरीरम्। करणमिन्द्रियादि। **न तत्सम इति**। अस्मिन्विशेषनिषेध एवाद्वितीयमितिसामान्यनिषेधस्य पर्यवसानं बोध्यम्। अत्र च ज्ञानशक्त्यादीनां स्वाभाविकत्वं स्पष्टमेवोक्तम्। **स्वाभाविकानिति**। अनेन गुणानामविद्याकल्पितत्वनिरासः।

–१७–२० **विषयमिति**। अस्य विविनक्तीत्यनेन संबन्धः। श्रुतिरेव सगुणनिर्गुणवाक्ययोर्विषयविभागं दर्शयतीत्यर्थः। न चापच्छेदन्यायेन सगुणवाक्यानां बाध्यत्वमिति वाच्यम्। यत्र परशास्त्राविषये पूर्वशास्त्रस्य चारितार्थ्यं तत्रैव तदपायप्रवृत्तेः। अत्र तु निर्गुणवाक्याविषये सगुणवाक्यस्य न क्वचिदपि चरितार्थ्यमिति निर्गुणवाक्यविरोधेनैव सगुणवाक्योपस्थितिः। यथा प्रतियोगिसापेक्षत्वेन न हिंस्यादिति निषेधस्य परत्वेपि तद्विरोधेनैव यागीयहिंसाविधेरुपस्थितिरित्यपच्छेदन्यायाप्रवृत्त्या यागीयहिंसाविधेर्न बाध्यत्वं तद्वदेवात्र बोध्यम्। **मिथ्याविषयतेति**। अविद्याकल्पितत्वेन मिथ्याभूता ये गुणास्तद्विषयकत्वं सगुणवाक्यानां पूर्वपक्षिणा यत्प्रतिपादितं तन्नाशङ्कनीयमित्यर्थः।

—२१ ननु ब्रह्मणः सगुणत्वे तस्य वागादिविषयत्वेन यतो वाच इति श्रुतिविरोधोऽत आह–**भीषेति**। ब्रह्मणो वागाद्यविषयत्वं तु न निर्गुणत्वमूल-

कम्। किं तु गुणातिशयमूलकम्। तथैवोपक्रमात्। आदौ भीषास्मादित्यत्राज्ञापयितृत्वगुण उक्तः। ततस्ते ये शतमित्यादिना मनुष्यगन्धर्वादिक्रमेणोत्तरोत्तरं ब्रह्मपर्यन्तमानन्दगुणस्य शतगुणाधिकत्वमुक्तम्। यतो वाच इत्यत्र ब्रह्मणो निर्गुणत्वेऽभिधेये तु गुणानां न्यूनतैव प्राक्प्रतिपादिता स्याद्गाधिक्यम्। किं च श्रुतिरेव ब्रह्मस्वरूपापेक्षयाऽपि तद्गुणेष्वादराधिक्यं दर्शयति। श्रुतौ ह्यानन्दं ब्रह्मणो विद्वानित्युक्तम्। न त्वानन्दान्वितं ब्रह्म विद्वानिति।

६२-२ **ब्रह्मवेदनफलम्**। ब्रह्मज्ञानस्य फलं सर्वकामप्राप्तिरूपम्। **अवगमयत्**। बोधयत्।

—३ **विपश्चितेति**। विपश्चित्त्वं च ब्रह्मगुण एवात्र भोग्यत्वेनोक्तः।

—४ **ब्रह्मणा सहेति**। भोग्यत्वेन ब्रह्मसाहित्यं कामानाम्। न तु भोक्तृत्वेन तच्छब्दवाच्योपासकस्य। **तद्गुणानिति**। ब्रह्मगुणानित्यर्थः। कामानश्नुत इत्यत्र किंनिष्ठान्कामानित्याकाङ्क्षायां संनिधानाद्ब्रह्मनिष्ठानिति प्रतीतेः।

—५ **तस्मिन्यदिति**। तस्मिन्ब्रह्मणि यदन्तरन्तर्वर्त्यपहतपाप्मत्वादिगुणजातं तदन्वेष्टव्यमिति गुणप्राधान्यं दहरोपासनायां यथोक्तं तथैवात्राप्युपासनायां सहशब्देन गुणप्राधान्यं द्योत्यते।

—६-७ ननु फलप्रतिपादके सोऽश्नुत इत्यादिवाक्ये गुणप्राधान्येऽपि कथमुपासनायां गुणप्राधान्यमत आह-**फलोपासनयोरिति**। **यथाक्रतुः**। यथाकामः। इच्छानुरूपं फलं तथैव चोपासनेति भावः।

—९ शङ्कते-**यस्यामतमिति**। ब्रह्मणो निर्गुणत्व एव तस्य ज्ञानाविषयत्वं संगच्छत इति शङ्काशयः।

—१२ **न स्यादिति**। ब्रह्मणो ज्ञानाविषयत्वे ब्रह्मज्ञानमेव न संभवतीत्यर्थः।

—१३ ब्रह्मणो ज्ञानविषयत्वे श्रुतेरादरातिशयं दर्शयति-**असन्नेवेति**।

—१६ **अत इति**। उक्तश्रुतिषु ब्रह्मज्ञानस्यैव मोक्षसाधनत्वेन सिद्धत्वादित्यर्थः। यद्यपि 'विद्ययामृतमश्नुते' (ई. ११) इत्यादिषु कासुचिच्छ्रुतिषु सामान्यतो ज्ञानस्यैव मोक्षसाधनत्वमवगम्यते तथापि तत्र ज्ञानं ब्रह्मविषयकमेव न तु प्रपञ्चमिथ्यात्वविषयकम्। ब्रह्मविदाप्नोतीति श्रुतेः सर्वशाखाप्रत्ययन्यायादिति भावः।

—१७ अथोपासनात्मकज्ञानाविषयत्वपक्षं दूषयति-**ज्ञानं चेति**। इत्युक्तमिति। निर्गुणपरत्वेन पूर्वपक्ष्युक्तायाः सद्विद्याया एव सगुणविषयत्वोपपादनादिति भावः।

६२–१७–९ ननु ब्रह्मणो ज्ञानविषयत्वे यस्यामतमित्यस्य कोर्थस्तथा यतो वाच इति श्रुतिविरोधश्चेति चेत्तत्राह–यतो वाच इति । अपरिमितगुणस्येति । अत एवोक्तम्—

संख्यातुं नैव शक्यन्ते गुणा दोषाश्च शार्ङ्गिणः ।
आनन्त्यात्प्रथमो राशिरभावादेव पश्चिमः ॥

इति । प्रथमो राशिः । गुणराशिः । पश्चिमो दोषराशिः । परिच्छेदः । इयत्ताविशेषः ।

–२४–५ एवं ज्ञेयत्वनिषेधे परिहृते ज्ञातृत्वनिषेधं परिहरति–यत्त्विति । तदागन्तुकेति । 'ज्ञातात्मा न ज्ञानस्वरूपः किं तु जडः । ज्ञानं तु तस्यागन्तुको धर्मः' इति नैयायिकाद्युक्तकुतर्कमवलम्ब्य तादृशमात्मानं न पश्येः, अपि तु ज्ञातारमपि ज्ञानस्वरूपमेव पश्येरिति श्रुत्यर्थः ।

६३–५ अन्यथा । आत्मनो ज्ञातृत्वाभावे ।

–८–९ आनन्दमात्रमेवेति । आनन्दरूपस्यानन्दाश्रयत्वाभावादित्याशयः । परिहृतमिति । ज्ञानानन्दयोरैक्यादिति भावः ।

—१० तदेवाह–ज्ञानमेवेति ।

तर्हि श्रुतिषु विज्ञानानन्दशब्दयोः सहप्रयोगोऽनुपपन्न इत्यत आह–विज्ञानमानन्दमिति । स्वप्रकाशत्वानुकूलत्वरूपप्रवृत्तिनिमित्तभेदात्सहप्रयोग उपपद्यत इति भावः ।

—११ अत एवेति । ज्ञानानन्दशब्दयोरेकविषयत्वादेवात्मन एकरसता भवदभिमता संगच्छत इत्याशयः ।

–१७–२२ अथ भेदनिषेधपरत्वेन पूर्वपक्ष्युक्तां श्रुतिं योजयितुमनुवदति–यदिदमिति । परिहरति–तत्कृत्स्नस्येति । जगतो ब्रह्मकार्यत्वं तदन्तर्यामिकत्वं च तज्जलानिति श्रुतिसिद्धम् । चिदचिद्विशिष्टं ब्रह्मैव जगतः कारणं जगतोऽन्तर्यामि चेति जगतो ब्रह्मात्मकत्वेन ब्रह्मणा सहैक्यम् । एतादृशैक्यस्य प्रत्यनीकं विरुद्धं यन्नानात्वं तदेवोक्तश्रुतिभिर्निषिध्यते । सामान्यनिषेधस्य विहितविशेषातिरिक्तविषयत्वात् । यस्य ब्रह्म कारणं न भवति नाप्यन्तर्यामि भवति तादृशं ब्रह्मभिन्नं वस्तु किंचिदपि नास्तीति यावत् । ब्रह्मकार्यस्य तु नानात्वं बहु स्यामिति श्रुत्यनुरोधेन स्वीकार्यमेवेति भावः ।

६४–३ शङ्कते–नानात्वेति । नेह नानास्ति नानात्वनिषेधकश्रुत्यविरोधाय बहु स्यामिति श्रुतेर्मिथ्याभूतकार्यविषयकत्वं कल्प्यते । तथा चानेन नानेति निषेधसिद्ध्यर्थं बहु स्यामिति श्रुतौ मिथ्याभूतं नानात्वमनूद्यते । प्रतियोगिप्रसिद्धिं विना निषेधानुदयादित्याशयः ।

६४-३-५ प्रत्यक्षादीति । नानात्वस्य मिथ्याभूतत्वेन प्रत्यक्षादिसकलप्रमाणागोचरत्वं तत एव च तस्य दुरारोहत्वं दुर्ज्ञेयत्वम्। ततश्च प्रतिपादनाविषयमपि प्रतिपाद्यते पुनस्तदेव बाध्यते चेत्युपहासास्पदमेतदिति भावः ।

—१० सर्वस्य जगत इति । तस्मात्परमात्मनः सकाशाद्य उत्पत्तिस्थितिलयास्तद्रूपा क्रिया यस्य जगत इत्यर्थः । कर्मशब्दः क्रियावाची । अथ वोत्पत्त्यादिशब्दा अन्तर्भावितण्यर्थाः । कर्मशब्दश्च कर्मकारकवाची । अयं भावः-नानात्वस्य भयप्राप्तिहेतुत्वं नास्ति । ब्रह्मणः कार्यजगद्रूपेण नानात्वानुसंधानस्य मुक्तिहेतुत्वात् । अत एव श्रुतौ सर्वं खल्विदं ब्रह्मेत्युक्तम् । न तु केवलं ब्रह्मेति । सर्वशब्दश्च विविधभेदप्रपञ्चपरः । तथा च नानार्थानुसंधानस्य शान्तिहेतुत्वद्वारा समस्तभयनिवृत्तिरूपमोक्षहेतुत्वं सिद्धमिति भेदबुद्धेर्भयप्राप्तिहेतुत्वोक्तिर्विरुद्धेति भावः ।

—१५ अदृश्य इति । अनेनाचिद्व्यावृत्तिः । अनात्म्ये । आत्म्यं व्याप्यं कर्मकृतं शरीरं तद्रहिते । अनिरुक्ते । अनेन मुक्तव्यावृत्तिः । मुक्तो हि बद्धावस्थायां देवादिशब्दैरुक्तो भवति । अनिलयने । निराधारे । अनेन नित्यमुक्तव्यावृत्तिः । तस्य भगवद्रूपाधारसत्त्वात् ।

—२० हानिः । इष्टहानिः । छिद्रम् । अनिष्टप्राप्तिरन्ध्रम् । भ्रान्तिः । छिद्रेण कृतं चित्तस्खलनम् । विक्रिया । भ्रान्तिमूलको विरुद्धव्यापारः ।

—२१ अन्तरमवकाश इति । यदा ह्येवेति श्रुतावन्तरशब्दस्य न भेदोर्थः । किं त्ववकाशः । ब्रह्मचिन्तनं विना क्षणमपि न स्थेयम् । तदुक्तम्—

एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते ।

दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं पुनः ॥

इति । तथा च तादृशावकाशो ब्रह्मप्रतिष्ठाविच्छेद एवेति तस्मिन्सत्येव महद्भयं न तु नानात्वज्ञान इति बोध्यम् ।

६५-२ सविशेषमिति । न स्थानतोपीति सूत्रस्य ह्ययमर्थः । परस्य परमात्मनः पृथिव्यादिस्थानतोऽपि नापुरुषार्थगन्धः संभवति । हि यतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्म निर्दोषत्वसगुणत्वैतदुभयलिङ्गमभिधीयत इति ।

—४ पारमार्थिकत्वमेवेति । मायामात्रं त्विति सूत्रस्यायमर्थः । स्वप्नसृष्टिर्जीवकृतेति पूर्वपक्षं निरस्यति तुशब्दः । स्वप्नस्थरथादिपदार्थानां स्वरूपं कात्स्न्र्येनाभिव्यक्तं न भवतीति स्वाप्नसृष्टिर्मायामात्रमाश्चर्यरूपेति । तथा चैवंविधाश्चर्यकारकसृष्टेर्जीवकर्तृकत्वं न संभवति किं त्वीश्वरकर्तृकत्वमेवेति पारमार्थिकत्वमर्थात्सिध्यतीति भावः ।

६५—७ यो मामजमिति । अत्राजत्वादिविशेषविशिष्टमेव ब्रह्मेति प्रतीयते ।

—८–१० मत्स्थानि । मदायत्तस्थितीनि । न चाहमिति । अहं तदायत्तस्थितिको नेत्यर्थः । न च मत्स्थानीति । जलादीनां घटादिरिव नाहं भूतानामाधारः । अपि तु संकल्पमात्रेण । एतादृशमसाधारणमाश्चर्यकारकं ममैश्वरं योगं पश्य । कोऽसौ योग इत्याह–भूतभृदिति । सर्वेषां भूतानां भर्ताऽहम् । न च तैः कश्चिदपि ममोपकारः क्रियते । ममात्मैव संकल्प एव भूतानां भावयिता धारयिता नियन्ता चेत्यर्थः ।

—१२ मत्त इति । मद्व्यतिरिक्तं ज्ञानबलादिगुणान्तर्योगि किंचिदपि नास्ति । इदं सर्वं चिदचिद्वस्तुजातं कार्यावस्थं, कारणावस्थं च मच्छरीरभूतं सूत्रे मणिगणवदात्मतयावस्थिते मयि प्रोतमाश्रितमित्यर्थः ।

—१४ एकांशेन । अयुतायुतांशेन संकल्पैकदेशेन वा ।

—१६ अन्यः । क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः ।

—२१–६६–७ अथ पूर्वपक्षिणा प्रदर्शितस्य प्रत्यस्तमितभेदमिति वचनस्यार्थं व्याचिख्यासुस्तदर्थं तदुपक्रमोपसंहारयोः सविशेषपरत्वं दर्शयिष्यन्नुपक्रमवचनानि दर्शयति–स सर्वेति । सर्वभूतप्रकृतिं प्रधानं विकारान्महदादीन्सत्त्वादिगुणहेतुकान्क्लेशादिदोषांश्च विशेषेणातीतस्तत्संबन्धानर्हः । अतीतं सर्वमावरणं ज्ञानसंकोचस्तद्धेतुभूतं प्रकृतिसंबन्धकर्मवासनादिकं वा येन सः । समस्तेति । समस्तकल्याणगुण आत्मा यस्य सः। स्वगुणलवधृतभूतजातः।अवतारद्वारा सम्यक्साधितमशेषजगद्धितं येन सः । तेजोबलैश्वर्यावबोधवीर्यशक्त्यादिगुणानामेकराशिः । अपरिच्छिन्नत्ववाचको महच्छब्दो मङ्गलत्ववाचकः सुशब्दश्च सर्वगुणसाधारणः । पर इति । पूर्वोक्तरीत्या स्वरूपतो विग्रहतो गुणतश्च परत्वं बोध्यम् । क्लेशादय इति । आदिना कर्मविपाकाशयसंग्रहः । विपाका जात्यायुर्भोगाः । आशयो वासना । व्यष्टीति । कार्यावस्थश्चेतनवर्गो व्यष्टिः । कारणावस्थश्चेतनवर्गः समष्टिः । एतादृशं रूपं शरीरं यस्य सः । सर्वदृक् । स्वरूपतः सर्वज्ञः । सर्ववेत्ता । प्रकारतः सर्वज्ञः । संज्ञायत इति । दोषरहितं शुद्धं निर्मलमेकरूपं तत्परं ब्रह्म येन शास्त्रजन्यज्ञानेन संज्ञायते तथा तद्ब्रह्म येनोपासनात्मकेन ज्ञानेन संदृश्यते तथा तद्ब्रह्म येन भक्तिरूपेण ज्ञानेन प्राप्यते तदेव ज्ञानम् । अन्यत्सर्वमज्ञानमेवेत्यर्थः । स ज्ञायत इति पाठेऽस्तदोषमित्यादीनि ज्ञानक्रियाविशेषणानि ।

६६–९–१६ पूर्वं यतो वाच इति श्रुतिप्रतिपादितं वागविषयत्वं गुणानन्त्यमूलकत्वेन साधितम् । ब्रह्मणोऽनन्ता गुणा वक्तुं न शक्यन्त इति तदाशयः । तथा च कतिचिद्गुणैर्वाग्विषयत्वं वर्तत एवेति सिद्धम् । तत्रैव प्रमाणवचनान्याह–शुद्ध इति । अथ भगवच्छब्दस्यावयवशोर्थमाह–संभर्तेति । भृधातो-

डप्रत्यये 'भ' शब्दः सिध्यति। तस्य संभर्ता भर्तेत्यर्थद्वयम्। संभरणमुपकरणसंविधानम्। प्रकृतिपुरुषकालान्कार्योत्पत्तियोग्यान्यः करोति स संभर्तेत्युच्यते। भर्ता स्वामी। तथा गमेर्ण्यन्ताड्डप्रत्यये 'ग' शब्दः सिध्यति। गमयिता स्थितिकर्ता नेतेत्युच्यते। संगमयिता संहारकर्ता गमयितेत्युच्यते। उद्गमयितोत्पत्तिकर्ता स्रष्टेत्युच्यते। उपसर्गाणां द्योतकत्वेन तदर्थस्य धातुनैवाभिधानात्समुदोरप्रयोगः। भग इत्यक्षरद्वयस्य मिलितेनार्थमाह–ऐश्वर्यस्येति। समग्रशब्दः सर्वत्रान्वेति। गुणवत्त्वेन ख्यातिर्यशः। श्रीर्भाग्यसंपत्। वैराग्यमनादरः। वकारार्थमाह–वसन्तीति। वसधातोरधिकरणे कर्तरि वा डप्रत्यये 'व' शब्दः सिध्यति। भूतात्मनि। भूतानामात्मनि। अखिलात्मनि। अखिलशरीरके।

६६—१८–९ अथ भकारादिवर्णसमुदायशक्तिनिष्पन्नमर्थमाह–ज्ञानेति। ज्ञानादीनां प्रत्येकं न भगवच्छब्दप्रवृत्तिनिमित्तत्वमपि तु समुच्चित्येत्यशेषत इत्यनेन सूच्यते। भगवच्छब्दान्तिमतकारस्यार्थो विना हेयैरित्यादिः। हेयगुणांस्त्यजतीति त्यजधातोर्यकारादिभागस्तदुत्तरकर्तृप्रत्ययश्च पृषोदरादित्वाल्लुप्त इति तकाररूपं व्यञ्जनमात्रमवशिष्यते।

—२१–६७–२ महाशब्द इति। उक्तरीत्याऽवयवशक्त्या समुदायशक्त्या च महतोऽर्थस्य क्रोडीकाराद्भगवच्छब्दस्य महाशब्दत्वम्। तत्रेति। पूज्यानामवयवीभूतभकारादिपदार्थानामुक्तिः पूज्यपदार्थोक्तिर्योगः। परिभाषा च रूढिः। तथा च योगरूढिभ्यां प्रवृत्तो भगवच्छब्दो मुख्यः। अन्यत्र मुक्तादौ तु लाक्षणिक इति भावः।

६७–४–९ अथ तस्मिन्नेव योगप्रकरण उपसंहारेऽपि सविशेषात्मप्रतिपादकवाक्यानि दर्शयति–समस्ता इति। शक्तयः। विष्णुशक्तिरित्यग्रिमश्लोके वक्ष्यमाणाः। विश्वरूपवैरूप्यम्। विलक्षणसंनिवेशयुक्तम्। देवेति। देवतिर्यङ्मनुष्यादिशब्दस्य चेष्टावच्छब्दस्य च कर्मधारयः। उभयमपि रूपाणीत्यस्य विशेषणम्। एतादृशानि रूपाणि समस्तशक्ति तद्ब्रह्म करोतीत्यन्वयः। मनुष्याख्य इति पाठेपि तथैव। मनुष्याख्या इति पाठे तु पृथक्पदम्। आर्षः शेलोपः। ता ता पिण्डानामितिवत्। जगतामुपकाराय। न तु स्वकर्मफलभोगाय। व्यापिनी। सर्वावतारानुगुणा। अव्याहतात्मिका। केनाप्यप्रतिहता।

—१५–९ रूपेति। रूपं जातिः। वर्णो रूपम्। आदिशब्देन गन्धादिगुणानां क्रियायाश्च संग्रहः। निर्देशो रूपादिप्रतिपादकः शब्दः। रूपादिभिर्विशेषणैः कर्मणा संपादितैर्विवर्जितः। जायतेऽस्तीत्यवस्थाद्वयं जन्मशब्देन विवक्षितम्। षड्भावविकाररहित इत्यर्थः। सर्वत्रेति। सर्वत्र वसतीति वासुः। सर्वं वसत्यत्रेति वा। स चासौ देवश्च वासुदेवः।

६८-११-६ क्षेत्रज्ञाख्या । जीवाख्या । अविद्येति । कर्मनामिकाऽविद्याशक्तिस्तृतीया । अनयैव चतुर्मुखादिपिपीलिकान्तसर्वशरीरस्था जीवशक्तिर्वेष्टितेत्यर्थः । तारतम्येनेति । कर्मतारतम्यानुगुणज्ञानतारतम्यवती क्षेत्रज्ञशक्तिरित्यर्थः ।

—१८-२० प्रधानं चेति । प्रधानमचित् । पुमांश्चित् । एतौ संश्रयधर्मिणौ भगवदपृथक्स्थितिधर्मकौ सर्वभूतव्यापिकया विष्णोर्नियमनशक्त्या व्याप्तावित्यर्थः । महाबुद्धे इति संबोधनम् । तयोरिति । तयोश्चिदचितोः संश्रयः संबन्धः संसारः । तयोः पृथग्भावो मोक्षः । सा विष्णुशक्तिरेव संसारमोक्षयोः कारणमित्यर्थः ।

—२२ यथेति । असक्त इति पदच्छेदः । प्रकृतिपुरुषगतदोषलेशराहित्ये दृष्टान्तः । यथा वायुः कणिकाशतं तत्स्वभावास्पृष्टो बिभर्ति तद्वत्प्रधानमचित्पुरुषो बद्धो जीव आत्मा मुक्तात्मैतान्सा शक्तिर्बिभर्तीत्यन्वयः । असक्तमिति पाठे कणिकाशतस्य विशेषणम् । स्वेन मिथश्चासंकीर्णमित्यर्थः ।

६९-३ एवंविधस्य जगतः परमार्थत्वमाह-तदेतदिति । मिथ्याभूतं हि वस्तु बाध्यं सदनित्यं भवति जगत्तु न तथेति भावः ।

—६-११ निरस्तेति । इदं 'स सर्वभूत' इतिश्लोकप्रतिपाद्यम् । समस्तेति । इदं 'समस्तकल्याण' इतिश्लोकप्रतिपाद्यम् । जगदुत्पत्तीति । इदं भगवच्छब्दार्थसिद्धम् । नियमनादीति । आदिशब्देनाध्यक्षत्वानुमन्तृत्वसंग्रहः । चिदचिदिति । अस्यैव 'सर्वावस्थावस्थितस्य' इति 'पारमार्थिकस्य' इति च विशेषणम् । बद्धमुक्तावस्थस्य चिद्वस्तुनः कार्यकारणावस्थस्याचिद्वस्तुन इत्यर्थः । तस्य पारमार्थिकत्वं चात्मनियम्यत्वेन सिद्धम् । तस्य परब्रह्मशरीरत्वं च द्वे रूपे इत्यादिश्लोकेषु शरीररूपशक्तिविभूत्यादिशब्दैः प्रतिपादितम् । किं च तत्र शरीरादिशब्दानां चिदचिद्वस्तुनः सामानाधिकरण्यं कृतम् । ततोऽपि तस्य परब्रह्मशरीरत्वं सिध्यतीति भावः । क्षेत्रज्ञेति । 'अविद्या कर्म' इतिश्लोकप्रतिपाद्यमिदम् ।

—१६-८ अथ पूर्वपक्ष्युदाहृतवचनानि सविशेषपरत्वेन व्याचिख्यासुः प्रथमं प्रत्यस्तमितेति श्लोकं व्याचष्टे-प्रत्यस्तेति । देवमनुष्यादिशरीरं दुःखाज्ञानादयश्च प्रकृतिपरिणामविशेषास्तैः संसृष्टस्यापि तद्वतरूपवर्णादिभेदरहितत्वेनेत्यर्थः । अनेन प्रत्यस्तमितभेदमिति व्याख्यातम् । तद्ब्रह्मेति । अनेन वचसामगोचरमिति व्याख्यातम् । योगयुगिति । योगयुक्तप्रक्रान्तयोगः सिद्धदशानापन्नो योगी । तस्य यन्मनस्तदविषयमित्यर्थः । एतच्चानुपदमेव स्पष्टीभविष्यति ।

—२०-७०-९ अस्मिन् । विष्णुपुराणे षष्ठांशे । संसारैकेति । तदुक्तम्-'क्लेशानां च क्षयकरं योगादन्यन्न विद्यते' इति । योगावयवानिति । योगाङ्गानीत्यर्थः । तथा हि । 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि' (यो. सू. २।२९) । 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः'

(यो. सू. २।३०) । ' शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ' (यो. सू. २।३२) । ' स्थिरसुखमासनम् (यो. सू. २।४६) । आस्यतेऽनेनेत्यासनं पद्मासनादि । तद्यदा स्थिरं निष्कम्पं सुखमनुद्वेजनीयं च भवति तदा तद्योगाङ्गतां भजत इत्यर्थः । 'तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः' (यो. सू. २।४९) । तस्मिन्सत्यासनस्थैर्ये सतीत्यर्थः । ' स्वस्वविषयसंप्रयोगाभावे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः' (यो. सू. २।५४) । इन्द्रियाणि स्वस्वविषयेभ्यः प्रत्याह्रियन्ते प्रतिकूलतया ह्रियन्ते यस्मिन्निति प्रत्याहारः । चक्षुरादीन्द्रियाणां रूपादिविषयप्रवृत्त्यभावे सतीन्द्रियाणि चित्तस्वरूपमात्रानुकारीणि यद्भवन्ति स प्रत्याहार इत्यर्थः । ' देशबन्धश्चित्तस्य धारणा' (यो. सू. ३।१)। देशे चित्तस्य बन्धो विषयान्तरपरिहारेण यत्स्थिरीकरणं सा चित्तस्य धारणेत्यर्थः । निराधारायाश्चित्तधारणाया असंभवात्तदाश्रयीभूतः कश्चन कल्याणकारको देशोऽवश्यं वाच्यः । अयमेव शुभाश्रय इत्युच्यते । ध्येयस्वरूपमिति यावत् । स च न चतुर्मुखादिः । तस्य जगदन्तःपातित्वेनाविद्यावेष्टितत्वेन शुभाश्रयत्वाभावात् । नापि सिद्धयोगी । तस्य पूर्वं बद्धत्वेन स्वाभाविकशुद्धत्वाभावात् । नापि विष्णोः शक्तिः । सा हि त्रिधा । मूर्तामूर्तकर्मभेदात् । तत्र न तृतीया । तस्या अविद्यास्वरूपत्वेन ध्येयत्वाभावात् । न च प्रथमा । देहविशिष्टोऽविद्यावेष्टितो यो जीवस्तत्स्वरूपा हि सा । तस्याश्च भावनात्रयसंबन्धवत्त्वेनाशुभत्वात् । त्रिविधा भावना च विष्णुपुराणे (६।७) उक्ता ।

त्रिविधा भावना विप्र विश्वमेतन्निबोधत ।

ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका ॥

इति । नापि द्वितीया । अविद्यारहिता देहरहिता ज्ञानैकस्वरूपा हि सा । तस्याश्च भगवत्प्रसादैकलभ्यायाः सिद्धदशानापन्नयोगिना ध्यातुमशक्यत्वात् । किं तूक्तशक्तित्रयाश्रयं परमात्मनोऽसाधारणं रूपं यत् ' आदित्यवर्णम् ' (श्वे. ३।८) इत्यादिश्रुतिभिः प्रतिपाद्यते तदेव शुभाश्रयः । ' तत्र प्रत्ययैकतानता ध्यानम् ' (यो. सू. ३।२) । तत्र शुभाश्रये प्रत्ययस्य ज्ञानस्यैकतानता तदालम्बनतयैव निरन्तरमुत्पत्तिर्ध्यानमित्यर्थः । 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' (यो. सू. ३।३) । सम्यगाधीयत एकाग्रीक्रियते यत्र मनः स समाधिरिति बोध्यम् । निष्पन्नयोगिध्येयतयेति । निष्पन्नयोगी । सिद्धयोगी । ध्येयमित्यत्र शक्यार्थे यत् । न त्वर्हार्थे । इतेनासिद्धयोगिनो ध्यातुमशक्यत्वं सूचितम् । तदेवाह–योगयुगिति । असिद्धयोगिमनस इत्यर्थः । अनालम्बनतयेति । तथा च तस्याश्रयत्वं नास्तीति शुभाश्रयत्वं न संभवतीति सिद्धम् । शुभत्वमपि नास्तीत्याह–स्वतःशुद्धिविरहादिति । अत्र न स्वाभाविकशुद्धिः स्वतःशुद्धिशब्देनोच्यते । किं त्वन्यानपेक्षत्वेन ध्यातृनिष्ठदोषनिरासासामर्थ्यम् । तच्च परमा-

त्मन्येव। न तु तदीयायामप्युक्तशक्तौ। तस्या ज्ञानमात्रस्वरूपायाः केनाऽपि सह विरोधाभावेन दोषाविरोधित्वात्।

७०-१० परिशुद्धात्मस्वरूपस्य। द्वितीयशक्तेः।

७१-१ स्तम्बः। कर्मवश्यो जन्तुः।

—१० ज्ञानस्वरूपमित्यत्रापि। ज्ञानस्वरूपमत्यन्तनिर्मलमिति प्रागुक्त-(श्रीभाष्य-पृ. १४ प. १७) श्लोकेपि।

—११ ज्ञानस्वरूपस्येति। ज्ञानस्यार्थाकारत्वेन योऽवभासः स भ्रमोऽस्तु नाम। परं त्वर्थस्य योर्थाकारत्वेन भासः स भ्रमो न भवतीत्यर्थः।

—१४ शङ्कते-जगद्ब्रह्मणोरिति। दृष्टान्ते हि शुक्तिसामानाधिकरण्येन भासमानस्य रजतस्य मिथ्यात्वम्। तस्य शुक्त्या सह विरोधात्। तस्यैवाग्रे बाधितत्वाच्च। तस्माच्छुक्तिवैयधिकरण्येन भासमानस्य सत्यत्वम्। अत्र तु सर्वस्य जगतो ब्रह्मसामानाधिकरण्येन भासमानत्वात्सर्वस्य मिथ्यात्वं सिध्यतीत्याशयः।

—१८ महाविभूतेरिति। अनेन जगन्मिथ्यात्वानुपपत्तिः सूचिता। तस्य। विभूत्यन्तर्गतस्य जगतः। कर्मषष्ठ्यन्तं दर्शनेन्वेति।

—१९ बाधासहमिति। यथा शुक्तिरजतं बाधितं भवति तथेदं न भवतीत्यर्थः। अविरुद्धमिति। जगद्ब्रह्मणोः शरीरशरीरिभावसंबन्धसत्त्वादविरोधः।

—२१ एवं पूर्वपक्षिमतानुसारेण ज्ञानस्वरूपमत्यन्तेतिश्लोकतात्पर्यं न संभवतीत्युक्तम्। अथ स्वमतानुसारेण स श्लोको व्याख्येयः। व्याख्या च प्रकरणानुरोधेन कर्तव्या। प्रकरणं चात्र विचारितानां प्रश्नानां विस्तरेण प्रतिवचनरूपम्। द्वितीयाध्याये तथैव प्रकरणात्। प्रश्नश्च श्रुतवेदान्तस्य मैत्रेयस्य विशेषबुभुत्सयैव। अन्यथा यन्मयं चेत्यादिविशेषप्रश्नायोगात्। विशेषप्रश्नश्च ज्ञातवेदार्थोपबृंहणार्थ एव। तथा च प्राग्वेदार्थज्ञानम्। तत उपबृंहणेच्छा। ततस्तदनुसारेण प्रश्नाः। प्रश्नानुरोधेन संक्षेपतो विस्तरतश्च प्रतिवचनानि। विस्तरेण प्रतिवचनारम्भे चायं श्लोक इति क्रमेण दर्शयति-तथा हीत्यादिना नमस्करोति (पृ. ७३ प. २१) इत्यन्तेन।

७२-२ वेदम्। वेदस्योत्तरभागं वेदान्तरूपम्। पूर्वभागस्य कर्मप्रतिपादकस्य तु धर्मशास्त्रेणोपबृंहणमिति बोध्यम्।

—५-६ विदितेति। विदितः सकलवेदस्तदर्थश्च यैस्तेषां परोक्षज्ञानवतामित्यर्थः। तावन्मात्रेणानुभवजनकवाक्यप्रयोक्तृत्वं नियमेन न संभवतीत्यतः प्रत्यक्षज्ञानवत्त्वमाह-स्वयोगेति। स्वयोगमहिम्ना साक्षात्कृतो वेदतत्त्वभूतोऽर्थो यैस्तेषामित्यर्थः। विवेकजज्ञानवतामिति यावत्। व्यक्तीकरणम्। अज्ञातविशेषैः सह स्वावगतार्थनिष्कर्षः।

७२-८ पुलस्त्येति। पराशरस्य परदेवतातत्त्वज्ञानं पुलस्त्यवसिष्ठकृतवरदानलब्धमित्यर्थः। तदुक्तम्—

अथ तस्य पुलस्त्यस्य वसिष्ठस्य च धीमतः।

प्रसादाद्वैष्णवं चक्रे पुराणं वै पराशरः॥ (लि. पु. ६४।१२०) इति।

—१३ यतश्चैतदिति। उद्भूतमिति शेषः।

—१५ ब्रह्मस्वरूपेति। स्वरूपशब्दो विभूत्यादिव्यावर्तकः। विभूतिभेदानां प्रकारो विभूतिभेदप्रकारः। ब्रह्मस्वरूपविशेषो विभूतिभेदप्रकारस्तदाराधनस्वरूपं फलविशेषश्चैतद्विषयकप्रश्ना इत्यर्थः।

—१७ यतश्चैतदिति। तथा च यन्मयमिति प्रश्नो न निमित्तोपादानविषयकः। पुनरुक्त्यापत्तेरिति भावः। स्थितिलयेति। स्थितिलयपदाभ्यां रक्षणसंहारयोर्ग्रहणम्। यथाश्रुतार्थत्वे स्थितिलययोरकर्मकत्वेन जगतस्तत्कर्मत्वासंभवात्।

—१९-२० इदं च तादात्म्यमिति। ' जगच्च स ' इत्यत्र जगद्ब्रह्मणोः सामानाधिकरण्येन सिद्धमित्यर्थः। आत्मतयेति। अन्तः प्रविश्य नियन्तृत्वमेवात्मत्वमिति भावः। व्याप्यव्यापकयोः। जगद्ब्रह्मणोः।

—२१ यन्मयमिति प्रश्नस्येति। मयट्प्रत्ययो ह्यत्र प्राचुर्यार्थ इत्यग्रे वक्ष्यते। तथा च जगति प्राचुर्येण किं प्रस्तुतमिति प्रश्नार्थः। तस्य चोत्तरं जगच्च स इति वस्त्वैक्यतात्पर्यकं न संभवतीत्यर्थः।

—२२ पृथक्प्रश्नेति। विकारार्थत्वे ह्युपादानमेव पृष्टं स्यात्। तच्च यतश्चैतदित्यत्र पृष्टमेव। गोबलीवर्दन्यायेनोपपत्तिस्तु सत्यां गतावयुक्तेति भावः।

७३-१ उत्तरानुपपत्तेरिति। मयटः स्वार्थिकत्वे हि यदिदं जगत्तत्किमिति प्रश्नार्थो भवति। तस्य च जगत्किं सत्यमुत मिथ्येत्ययमेवाभिप्रायो वाच्यः। अन्यस्यासंभवात्। तथा च तदनुसारेण जगन्मिथ्येत्याशयेन ' विष्णुरेव ' इत्येवोत्तरं वक्तव्यम्। न तु जगद्ब्रह्मैतदाकारद्वयोपस्थापकं सामानाधिकरण्यमित्याशयः।

—१० ' जगच्च स' इति सामानाधिकरण्यं वस्त्वैक्यकृतमित्यत्र दूषणान्तरमाह-जगद्ब्रह्मणोरिति।

—१४ स्थाप्यत इति। अनन्तरमेव स्थापयिष्यत इत्यर्थः।

—१४-२० अत इति। उक्तरीत्या शास्त्रस्य सविभूतिकसगुणवस्तुपरत्वावगमात्सामानाधिकरण्यस्य विशिष्टवस्तुनि मुख्यवृत्तत्वाच्चेत्यर्थः। अविकारायेतीति।

अविकाराय शुद्धाय नित्याय परमात्मने।

सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ (वि. पु. १।२।१)

इति श्लोकेनेत्यर्थः । सदैकरूपरूपायेत्यस्य सदैकरूपमेकस्वभावं रूपं यस्येत्यर्थः । स्वावतारः । विष्णुः । परमात्मैव तत्तच्छरीरकः सृष्ट्यादिकं करोति । ब्रह्मविष्णुमहेश इति मूर्तित्रयम्, प्रधानम्, कालः, क्षेत्रज्ञसमष्टिः, क्षेत्रज्ञव्यष्टिश्चेत्येतद्रूपेणावस्थितमित्यर्थः ।

७४–३–१० अन्योपि प्रश्नप्रतिवचनविशेषः पूर्वपक्षिमते नोपपद्यत इत्याह–यदीति । भावशक्तयः । वस्तुशक्तयः । न घटत इति । निर्विशेषब्रह्मपक्षेऽयं परिहारो न संभवति । सर्गाद्या भावशक्तय इति शक्तिसंबन्धप्रतिपादनादिति भावः ।

—१२ अथ स्वमतेन प्रश्नोत्तरयोस्तात्पर्यमाह—उत्पत्त्यादीति । सत्त्वादिगुणयुक्ता अपरिपूर्णाः कर्मवश्याश्च ये चतुर्मुखादयो जीवविशेषास्तेष्वेवोत्पत्त्यादि कार्यं दृश्यत इत्यर्थः ।

—१६ जलादीति । यथा जलादिविसदृशस्याग्नेरौष्ण्यादिशक्तियोगस्तथा चतुर्मुखादिविसदृशस्य ब्रह्मणः सर्वशक्तियोगः संभवतीत्यर्थः । तथा च ब्रह्म नोत्पत्त्यादिकर्तृ सत्त्वादिगुणरहितत्वात्परिपूर्णत्वादकर्मवश्यत्वात्कर्मसंबन्धानर्हत्वाद्वा । यत्नैवं तत्नैवं यथा चतुर्मुखादिरित्यनुमानमग्निरनुष्णो द्रव्यत्वाज्जलवदित्यनुमानवदप्रयोजकमिति भावः ।

७५–३ उपपादयतीति । उत्तरार्धेनेति शेषः ।

—५ येन । यतः ।

—८ अन्यथेति । व्याप्यस्य जगतो व्यापेश्च मिथ्यात्वे सर्वव्याप्तिस्तव महिमेति न वक्तव्यमित्यर्थः ।

कृत्स्नस्य मिथ्याभूतत्वे दूषणान्तरमाह–जगत इति । जगतो मिथ्याभूतत्वे तत्पतित्वासंभवान्मिथ्याभूतार्थवाचकपदानां तदधिष्ठाने लक्षणा स्वीकार्या स्यात् । तथा त्वंशब्दस्य स्वाभिमुखाहमर्थे लक्षणा स्वीकार्या स्यादिति भावः ।

—१० विरोधश्चेति । मिथ्याभूतार्थस्यान्यत उद्धरणासंभवेनेदृशस्तुतेरसंभवादित्याशयः ।

—१०–१२ यदेतदृश्यत इति प्रागुक्त–(श्रीभाष्य–पृ. १४ प. २०) श्लोकतात्पर्यमाह–यत इति । आत्मतया । अन्तर्यामिरूपेण । तव मूर्तेमिति । मूर्तं मूर्तिः । दृश्यमानं जगत्तवैव मूर्तिरित्यर्थः । केवलमिति । एतत्परमात्मनः शरीरमित्यनुसंधानरहितं स्वतन्त्रमित्यर्थः । अत एवेयं भ्रान्तिः । परमात्मसंबन्धस्य सत एवाज्ञानेन परतन्त्रस्यापि स्वतन्त्रत्वेनाभ्युपगमात् ।

७५-१३-४ ज्ञानस्वरूपमिति प्रागुक्त-(श्रीभाष्य-पृ.१४ प. २२) श्लोकतात्पर्यमाह-न केवलमिति । देवमनुष्यादीति । देवमनुष्यादयो येऽर्थाः शरीराणि स एवात्मेति ज्ञानं भ्रम इत्यर्थः ।

—१६-७ ये तु ज्ञानविद इति प्रागुक्त-(श्रीभाष्य-पृ. १५ प. १) श्लोकं व्याचष्टे-ये पुनरिति । सर्वस्येति । सर्वस्य यद्भगवदात्मकत्वं तदनुभवसाधनीभूतो यो योगस्तेन योग्यं परिशुद्धं च मनो येषां तथाभूता इत्यर्थः ।

—२० पौनरुक्त्यमिति । स्वातन्त्र्यभ्रमो देहात्मभ्रमश्चेति विभागाभावेन 'यदेतदृश्यते' 'ज्ञानस्वरूपम्' इति श्लोकयोः पौनरुक्त्यम् । लक्षणा चानुपदमेव प्रदर्शिता । अर्थविरोधः प्रमाणविरोधः । प्रत्यक्षादिप्रमाणैरबाध्यत्वेन सिध्यतो जगतो मिथ्यात्वाङ्गीकारात् । स्वरूपतिरोधानानुपपत्त्यादिरूपो वा । प्रकरणविरोधः स्तुतिप्रकरणविरोधः । रोमान्तरस्था मुनयः स्तुवन्तीति हि स्तुतिः प्रकृता । स्तोतृणामद्वैतज्ञानवत्त्वे स्तुतिर्न संभवतीति तद्विरोधः । तदभावे च नितरामुपक्रमोपसंहारादिवचनविरोधाच्छास्त्रतात्पर्यविरोध इति बोध्यम् ।

—२२-७६-२ पूर्वपक्षिणा प्रदर्शितं (श्रीभाष्य-पृ. १५ प. ४) तस्यात्मपरदेहेष्विति श्लोकं व्याचष्टे-तस्येति । एकमयमित्यत्र स्वार्थे मयट् । जीवाः परस्परं भिन्ना एव । किं तु भिन्नानामपि तेषामेकजातीयत्वाज्जीवैक्यमिति व्यवहारः । ऐक्यं तुल्यत्वम् । एको व्रीहिरितिवदेकशब्दस्य तुल्यार्थत्वात् । जीवाद्वैतमिति व्यवहारस्याप्येतदेव तात्पर्यम् । प्रकारविशिष्टानां जीवानां द्वैतेऽपि तद्गतप्रकारस्यैक्यात् । प्रकाराद्वैतमिति यावत् । अत एव नित्यानामात्मनां बहुत्वश्रुतिर्बद्धमुक्तशिष्याचार्यादिव्यवस्था च संगच्छते । ब्रह्माद्वैतमिति व्यवहारस्य तु प्रकार्यद्वैतमित्यर्थः । ब्रह्मणः प्रकारीभूता ये जीवास्तेषु द्वैतेपि तद्विशिष्टस्य (प्रकारिणः) ब्रह्मण एकत्वात् । अत एवैकः सन्बहुधेति श्रुतिः संगच्छते । अतथ्यमिति । द्वैतमिथ्यात्वदर्शिन इत्यस्य देवमनुष्यादिद्वैतमिथ्यात्वदर्शिन इत्यर्थः । जीवब्रह्मणोर्भेदस्य सत्यत्वात् । न च जीवद्वैतस्यापि सत्यत्वेन कथं तस्य मिथ्यात्वमिति वाच्यम् । तत्र वास्तविकद्वैतस्य सत्यत्वेपि देवमनुष्यादिशरीरसंबन्धकृतद्वैतस्य मिथ्यात्वात् । शरीरद्वैतस्य शरीरेष्वेव सत्त्वात् ।

७६-५-७ साम्ये प्रमाणमाह-यथोक्तमिति । निर्दोषमिति । आत्मवस्तु प्रकृतिसंसर्गदोषवियुक्ततया सर्वत्र सममित्यर्थः ।

—८ ननूक्तश्लोकयोरात्मैक्यप्रतिपादन एव तात्पर्यमस्त्विति चेत्तत्राह-तस्यात्मेति ।

—१३ अन्याकारत्वेति । देवमनुष्याद्याकारत्वेत्यर्थः । परशब्देन स्वव्यतिरिक्तं धर्मिणमनूद्य तस्य ज्ञानव्यतिरिक्ताकारसंबन्धो विधिध्यते । अन्यशब्दो ज्ञान-

व्यतिरिक्ताकारविशिष्टपरः। अस्य श्लोकस्य सर्वथाऽद्वैते तात्पर्यं चेदन्यपरशब्दयोर्मध्य एकस्य वैयर्थ्यं स्यात्।

७६-१८-९ **वेणुरन्ध्रेति**। स्वतस्तुल्याकाराणामुपाधिवशादवान्तरभेदसद्भावमात्रे दृष्टान्तः। सर्वथा साम्ये ह्यात्मनो जडत्वादिकमपि प्रसज्येतेत्याशयः। पिण्डः। शरीरम्।

—२० **न स्वरूपैक्यमिति**। यथाग्न्यवयवानामनेकस्फुलिङ्गानां स्वरूपसाम्येपि स्वरूपैक्यं न वक्तुं शक्यते तद्वदेवेति भावः।

७७-५ **भेदमोहमिति**। देहगतदेवत्वाद्याकारभेदो य आत्मन्यारोप्यते स भेदमोहः। तथा च नानेन श्लोकेन जीवब्रह्मद्वैतं निषिध्यते। नापि जीवबहुत्वं निषिध्यते। किं तु जीवात्मनां यो देहाद्याकारेण प्रकारभेदो भासते स देहात्मविवेकप्रतिपादनद्वारा निषिध्यत इति भावः।

—६ **कृत्स्नभेदनिषेधपरत्वेऽनिष्टमाह-अन्यथेति**।

—७ **अहमिति**। इत्यनेनेत्यस्योपलक्ष्येणेत्यत्रान्वयः। अहं त्वमित्यादिशब्दाः सर्वमेतदात्मस्वरूपमित्यर्थस्य लक्षका इति लक्षणयैकार्थप्रतिपादकत्वरूपसामानाधिकरण्योपपत्तिरित्यपि न संभवति। अहं त्वमित्यादिभेदनिर्देशायोगादिति भावः।

—१६ **देहात्मनोरिवेति**। यथा देहात्मनोर्जडत्वाजडत्वादिविरुद्धधर्मत्वान्नैक्यं तद्वदेव जीवपरयोर्नियम्यत्वनियन्तृत्वादिविरुद्धधर्मत्वान्नैक्यमित्यर्थः।

—१७-७८-१ **द्वेति**। द्वा द्वौ जीवेश्वरौ। सुपर्णा सुपर्णौ। शोभनपतनौ। पक्षिसामान्याद्वा। सयुजा सयुजौ। सहैव सर्वदा युक्तौ। सखाया सखायौ। समानं वृक्षं शरीरम्। पिप्पलम् कर्मफलम्। अभिचाकशीति। स्वयमनशनात्परस्याशयितृत्वाच्च भृशं शोभते। ऋतमिति। सुकृतस्य कर्मण ऋतं फलं पिबन्तौ। पिबन्तावित्यत्र शतृप्रत्ययः कर्तरि। कर्ता च प्रयोज्यो जीवः प्रयोजकः परमात्मा च। गुहां हृदयगुहाम्। परार्धे श्रेष्ठे। छायातपौ। अज्ञसर्वज्ञौ। त्रिनाचिकेताः। त्रिः कृत्वो नाचिकेतोऽग्निश्चितो यैस्ते। कर्मविशेषनिष्ठा इत्यर्थः। शास्ता। नियन्ता। तथा च नियम्यनियन्तृभावेन जीवेश्वरयोर्भेदः सिद्ध इत्यर्थः।

७८-२-८ **अस्मिन्नपि शास्त्रे**। विष्णुपुराणे। **स सर्वेति**। अत्र दोषातीतत्वसमस्तगुणवत्त्वादिभिः परब्रह्मणो जीवाज्जेदो व्यपदिश्यते। **अविद्येति**। अत्र जीवस्य हेयास्पदत्वेन तस्य परब्रह्मणः सकाशाज्जेदो व्यपदिश्यते।

—१०-१२ **उभयेऽपीति**। उभये माध्यंदिनाः काण्वाश्चैनं शारीरमप्यन्तर्यामिणः सकाशाज्जेदेन नियाम्यत्वेन विभज्याधीयत इति सूत्रार्थः। तथा च

श्रुतिर्य आत्मनि तिष्ठन् (श. ब्रा. १४।१६।७।३०)। यो विज्ञाने तिष्ठन् (बृ. ३।७।२२) इति। भेदव्यपदेशादिति। 'य आदित्ये तिष्ठन्' (बृ. ३।७।९) इत्यादिश्रुतावादित्यादिजीवेभ्यः सकाशात्परमात्मनो भेदव्यपदेशात्परमात्मा जीवादन्य इति सूत्रार्थः। अधिकं त्विति। ब्रह्म जीवादधिकं भिन्नम्। करणाधिपाधिपः प्रधानक्षेत्रज्ञपतिः पृथगात्मानमित्यादिश्रुतिभिर्जीवाद्भेदेन ब्रह्मणो निर्देशादिति सूत्रार्थः।

७८–१३–६ य आत्मनीति। अत्रात्मशब्दा जीवात्मपराः। प्राज्ञेन। परेण। संपरिष्वक्तः। सम्यगालिङ्गितः। अन्वारूढः। अधिष्ठितः। प्रत्यनीकाकारेण। विरुद्धाकारेण।

—१८ तदनर्हत्वेति। तदनर्हमविद्यासंबन्धानर्हं ब्रह्म। तत्त्वस्य जीवेऽसंभवात्। न हि कारागृहान्निर्गतस्य तन्निग्राहकानुग्राहकनृपतेरैक्यं संभवतीत्यर्थः।

—२०–१ परमात्मेति। परमात्मात्मनोः परजीवयोर्योग ऐक्यमेव परमार्थ इति यदिष्यत एतन्मिथ्या यतोऽन्यद्द्रव्यमन्यद्द्रव्यस्वरूपतां न प्राप्नोतीत्यर्थः।

७९–१ ननु ब्रह्म वेद ब्रह्मैव भवतीति श्रुतिस्तयोरैक्ये प्रमाणमिति चेत्तत्राह–मुक्तस्येति। एवशब्देनैक्यव्यावृत्तिः। उक्तश्रुत्यर्थस्त्वनुपदमेव मूले स्पष्टीभविष्यति।

—५–७ इहापीति। योगसंक्षेपकथनारम्भ इत्यर्थः। आत्मभावमिति। आकर्षको वन्हिः। सुवर्णादिगतदोषाकर्षणात्। स यथा विकार्यमवस्थान्तरप्राप्तियोग्यं लोहमात्मनः स्वस्य शक्त्यात्मभावं नयति स्वव्यापारं कारयति तथैतद्ब्रह्म विकार्यं ध्यायिनमुपासकमेनं स्वशक्त्यात्मभावमात्मनः स्वभावं निर्दोषत्वं नयतीत्यर्थः।

—९–११ जगदिति। जगद्व्यापारो निखिलचेतनाचेतनजगन्नियमनादिरूपस्तद्वर्जं मुक्तस्यैश्वर्यम्। कुतः। प्रकरणात्। परब्रह्मप्रकरणे यतो वेत्यादिश्रुतौ निखिलजगन्नियमनमाम्नायते। यद्येतन्नियमनसामर्थ्यं मुक्तानामपि स्याद्वेत्तस्य ब्रह्मलक्षणत्वं न स्यात्। निखिलजगन्नियमनप्रसङ्गेषु मुक्तस्य संनिधानाभावाद्वेति सूत्रार्थः। भोगेति। सोश्नुत इति श्रुतौ ब्रह्मयाथात्म्यानुभवरूपभोगमात्रेण मुक्तस्य ब्रह्मसाम्यप्रतिपादनाल्लिङ्गान्मुक्तस्यैश्वर्यं जगद्व्यापारवर्जमेवेत्यर्थः। मुक्तेति। द्युपृथिव्याद्याश्रयभूतः पुरुषः परमात्मैव। यतो निरञ्जनः परमं साम्यमुपैतीत्यादिश्रुतावयं पुरुषो मुक्तैरपि प्राप्यतया व्यपदिश्यत इत्यर्थः।

—१३ ज्योतिषा। परब्रह्मणा।

—१३–४ अशरीरस्य। मुक्तस्य। तस्य कर्मप्राप्यशरीराभावात्। सिद्धिः। अनुभवः।

७९—१४-२० मुक्तौ जीवपरयोर्भेदोस्तीत्यत्र श्रुतीर्दर्शयति–श्रुतय इति। कामान्नी। कामतोऽन्नमस्येति कामान्नी। कामरूपी। कामतो रूपाण्यस्येति कामरूपी। इमाँल्लोकाननुसंचरन्नित्यन्वयः। रसो वै स इति। परमात्मा तृप्तिकरत्वाद्रसस्वरूप इत्यर्थः। अयं जीवात्मा।

८०-३-५ नन्वेताः श्रुतयः सगुणोपासकस्य सगुणब्रह्मप्राप्तिं वदन्ति। निर्गुणविद्याप्रतिपादिकास्वन्या एव सदेव सोम्येत्यादयः श्रुतय इति चेत्तत्राह–परविद्यास्विति। परशब्देन ब्रह्मोच्यते। आनन्दादयः प्रधानस्येति। उपासनप्राप्त्योः सगुणविषयतैकरूप्यज्ञापनाय सूत्रद्वयोपन्यासः। सूत्रस्यायमर्थः। अभेदादिति पूर्वसूत्रादनुवर्तते। प्रधानस्य गुणिनो ब्रह्मणः सर्वेषूपासनेष्वभेदादानन्दादयो ब्रह्मस्वरूपनिरूपका गुणाः सर्वब्रह्मविद्यासु संग्राह्याः। तस्मात्सर्वासु ब्रह्मविद्यासु सगुणमेव ब्रह्मोपास्यमिति सिद्धम्। विकल्पोऽविशिष्टफलत्वादिति। सूत्रस्यायमर्थः। सर्वब्रह्मविद्यानां विकल्प एव। न तासु कयोरपि समुच्चयः। ब्रह्मप्राप्तिरूपफलस्य सर्वत्र तुल्यत्वादिति। तस्मात्सर्वत्र फलस्यैकरूपत्वाद्विद्याविकल्प इति सिद्धम्। एवं च निर्गुणविद्याप्रतिपादिकाः श्रुतयो नैव सन्ति। सदेव सोम्येत्यादिश्रुतिष्वपि सविशेषमेव ब्रह्माभिधीयत इति प्रागेवोक्तम् (पृ. ५८ प. १७)।

—७ युक्तमिति। गुणयुक्तमेव ब्रह्म प्राप्यम्। तद्गुणकोपासनादित्यर्थः।

—८ सच्चित्तः। सद्विद्यानिष्ठः।

—८-१३ नन्वेवं मुक्तावभेदप्रतिपादिका ब्रह्म वेदेति श्रुतिर्विरुद्धेति चेत्तत्राह–ब्रह्मेति। नामरूपादिति। प्राकृतनामरूपहानिरनेन सूच्यते। निरञ्जन इति। अनेन साम्यं सूच्यते। परं ज्योतिः। परं ब्रह्म। स्वेनेत्यनेन साम्यस्य स्वाभाविकत्वं सूच्यते। ब्रह्मप्रकारता। ब्रह्मधर्मत्वम्।

—१३ ननु तर्हि ब्रह्म वेद ब्रह्मैव भवतीति श्रुतौ द्वितीयब्रह्मशब्दस्य ब्रह्मसदृशार्थकत्वेन गौणत्वं स्यादित्यत आह–प्रकारैक्य इति।

यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ (वि. पु. १।५।६४)

इत्यत्रेवेति भावः।

—१४-२१ विष्णुपुराण एव विभेदजनकेऽज्ञान इत्यस्मादव्यवहितपूर्वश्लोकत्रये भेदं दर्शयति–अत्रापीति। विज्ञानमिति। समाधिजन्यः स्वरूपसाक्षात्कारो विज्ञानम्। आत्मा शुद्धं स्वस्वरूपम्। यथा प्रक्षीणाशेषभावनं परब्रह्म प्राप्यं तथा प्रक्षीणाशेषभावन आत्मा शुद्धं स्वस्वरूपमपि प्राप्यमित्यर्थः। कर्मभावनेति। भावना नाम ज्ञानविशेषजा वासना। ' वयं कर्मैव कुर्मः ' इति कर्मभा-

वना । यथा देवमनुष्यादीनाम् । ' वयं ब्रह्मैव चिन्तयामः' इति ब्रह्मभावना । यथा सनन्दनादीनाम् । ' वयं पुनरुभयमिदमनुसंदधमः' इत्युभयभावना । यथा हिरण्यगर्भादीनामित्यात्मप्रकाशाभिधायां विष्णुपुराणसारविवृतौ स्पष्टम् । भावनात्रयरहित इति । ब्रह्मभावनापि साधकावस्थायामेव न सिद्धावस्थायामिति तद्रहितस्यैव प्रापणीयत्वं बोध्यम् । क्षेत्रज्ञ इति । यावत्क्षेत्रज्ञावस्थस्तावत्करणी उपासकः । तस्य करणीभूतं ज्ञानमुपासनादिरूपम् । तच्च मुक्तिरूपं कार्यं निष्पाद्य कृतकृत्यं यदा भवति तदैव निवर्तयेन्न तु मुक्तेः प्राक् । तावत्पर्यन्तमुपासनाया अवश्यानुष्ठेयत्वात् ।

८१-५ पूर्वोक्तार्थेति । मुक्तौ साम्यप्रतिपादकपूर्वोक्तश्रुतिविरोधाद्ब्रह्मण उभयलिङ्गत्वविरोधाद्वेत्यर्थः ।

—८ भेदो देवादिरूप इति । अयमेव भेदो ज्ञानेन निरसनीयः । घटस्य घटान्तरादिव मुक्तात्मनोऽपि ब्रह्मणः सकाशाद्भेदस्य प्रमाणसिद्धत्वात् ।

—११ अभेदीभवतीति । वस्तुतो भिन्नोऽपि ज्ञानाकारेणाभेदीभवति । जीवब्रह्मणोर्वस्तुतो भेदेऽपि ज्ञानाकारेण योऽभेदः स देहात्मैक्यभ्रमे न भासते । जीवात्मनां देवादिरूपेण भेदश्च देहात्मैक्यभ्रमे सत्येव । अतो ज्ञानाकारेण योऽभेदस्तद्विरुद्धो देवादिभेदः । तादृशदेवादिभेदमूलभूतदेहात्मैक्यप्रतीत्यभावे ज्ञानाकारेणाभेदो भासत इत्यर्थः ।

—१३ अनावरणः । कर्मावरणरहितः । नास्त्येवावरण इति पाठेऽप्ययमेवार्थः । अवरण इति पदच्छेदः । ज्ञानाकारेणैकस्वरूपाणामात्मनां मध्ये बुद्धिसुखादिभेदस्तु कर्ममूलकः । स च देवादिभेदनाशोत्तरं नास्ति । यतस्तदानीं स आत्मा कर्मावरणरहित इत्यर्थः । बाह्यकर्मवृतिप्रज इति पाठे कर्मरूपा या वृतिरावरणं तस्माज्जात इत्यर्थः ।

—१६ ब्रह्मण इति पञ्चमी । असन्तम् । अनित्यम् । देवादिरूपेण भेदो ह्यनित्यः । तेन स्वाभाविकनित्यभेदव्यावृत्तिः । नित्यभेदस्तु वर्तत एवेत्याशयः ।

—१९ चतुर्विधः । देवतिर्यङ्मनुष्यस्थावरभेदेन ।

८२-२ अज्ञानस्य कर्मरूपत्वे हेतुमाह—अविद्येति ।

—३ ननु क्षेत्रज्ञमित्यत्र जीवब्रह्मणोः सर्वथैक्यं भासत इति चेत्तत्राह—क्षेत्रज्ञमिति ।

—४ अन्यथा । क्षेत्रज्ञमित्यत्र सर्वथैक्यप्रतिपादने ।

—८ ईश्वर इति । न चात्र सर्वभूतानामित्युक्तत्वात्परमात्मनो भौतिकदेहान्तर्यामित्वेपि न जीवान्तर्यामित्वमिति वाच्यम् । भूतशब्दस्यात्मपर्यन्तदेहवाचित्वात् । अत एव भ्रामयन्सर्वभूतानीत्युत्तरार्धसंगतिः । न हिंस्याद्भूतानीति प्रयोगश्चोपपद्यते ।

८२—१३ तत एवेति। न त्वैक्यादित्यर्थः। न तदस्तीत्यत्राविनाभावप्रतिपादनात्। अविनाभावो हि संबन्धनियमः।

—१५ भगवद्विभूतीति। न तदस्तीत्यस्य सर्वनिषेधपूर्वकैक्यतात्पर्यकत्वे हि विभूत्युपसंहारत्वं न स्यात्। विभूत्युपसंहारे विभूतेर्निषेधायोगात्।

—१६-८ न तदस्तीत्यस्य विभूत्युपसंहारत्वं चोत्तरश्लोकेनावगम्यत इत्याह—तत इति। यद्यदिति। यद्यद्विभूतिमदीशितव्यसंपन्नं भूतजातं श्रीमत्कान्तिमद्धनधान्यसमृद्धं वोर्जितं कल्याणारम्भेषूद्युक्तं तत्तन्मम तेजोंशसंभवमित्यवगच्छ। तेजः पराभिभवसामर्थ्यं ममाचिन्त्यशक्तेर्नियमनशक्त्येकदेशसंभवमित्यर्थः।

८३-१ अथाविद्यां दूषयितुमारभते-यदपीति। निर्विशेषस्य कथं भ्रमसंभव इत्यत्राह-दोषेति।

—२-३ ब्रह्मव्यतिरिक्तस्य दोषस्य सत्त्वे द्वैतापत्तिरित्यत आह-दोषश्चेति। विक्षेपः। संसारः।

—४-५ अविद्यायां श्रुतिप्रमाणमाह-अनृतेनेति। अर्थापत्तिप्रमाणमाह-ब्रह्मण इति।

—६ भ्रान्तीति। भ्रान्तिबाधविषयत्वायोगादित्यर्थः। अविद्या हि ज्ञानिदृष्टया भ्रान्तिविषयत्वं बाधविषयत्वं च लभते।

—७ ख्यातीति। ख्यातिः प्रसिद्धिः। न ह्यसतः शशशृङ्गादेः प्रसिद्धिरस्ति। न वा बाधः। प्रतियोगिप्रसिद्धिं विना तदयोगात्।

—८ तदयुक्तमिति। आश्रयानुपपत्तिरोधानानुपपत्तिस्वरूपानुपपत्तिरनिर्वचनीयत्वानुपपत्तिप्रमाणानुपपत्तिनिवर्तकानुपपत्तिनिवृत्त्यनुपपत्तिरूपसप्तविधानुपपत्तिदोषसत्त्वादित्याशयः।

तत्रादावाश्रयानुपपत्तिमाह-सा हीति।

—९ न तावदिति। जीवे सिद्धेऽविद्यासिद्धिरविद्यासिद्धौ च जीवसिद्धिरित्यन्योन्याश्रयान्न तस्या जीव आश्रय इत्यर्थः।

—११ विरोधित्वमुपपादयति-सा हि ज्ञानेति। ब्रह्मविषयस्याज्ञानस्य तत्प्रकाशबाध्यत्वाद्विरोध इति भावः।

—१२-७ज्ञानाबाध्यत्वे दोषमाह-ज्ञानरूपमिति। मृषात्मकमत एव तन्निवर्त्यं ज्ञाननिवर्त्यत्वेनाभिमतं यदज्ञानं तस्य ज्ञानाबाध्यत्वेन ब्रह्माश्रितत्वे स्वीकृतेऽर्थादेव तेनाज्ञानेन ज्ञानरूपं स्वप्रकाशमपि परं ब्रह्म तिरस्कृतं स्यात्। ततश्चेदृशस्याज्ञानस्य निवर्तने कः प्रभुः समर्थः स्याच्च कोपीत्यर्थः। अज्ञानाश्रयब्रह्मनिष्ठस्याज्ञानविरोधिनः कस्याप्यभावात्। न हि शुक्तिरेव स्वाज्ञानं निवर्तयति

किं तु शुक्तिज्ञानम् । नन्वत्रापि ' ज्ञानस्वरूपं ब्रह्म ' इत्याकारकं यज्ज्ञानं तदेवाज्ञानस्य निवर्तकमस्त्विति चेन्न । यथा ब्रह्म नाज्ञानस्य निवर्तकं तथा तादृशब्रह्मस्वरूपानतिरिक्तस्य तत्प्रकाशस्याप्यज्ञाननिवर्तकत्वात् । किं च ' ज्ञानस्वरूपं ब्रह्म ' इत्याकारकं यदि ज्ञानमस्ति तर्हि तस्य प्रमेयत्वापरयाऽननुभूतित्वं प्रसज्येत । तथा च प्रयोगः । ब्रह्मानुभूतिभिन्नं प्रमेयत्वाद्घटवदिति ।

८३—१८ द्वितीयश्लोकार्थमाह–ज्ञानस्वरूपमिति । ब्रह्मस्वरूपभूतस्य ज्ञानस्याज्ञानाश्रयत्वेनाज्ञानबाधकत्वाभावेऽपि ' ज्ञानस्वरूपं ब्रह्म ' इत्याकारकज्ञानस्याज्ञानबाधकत्वस्वीकारे बाधकाभाव इत्याशयः ।

—२० विशेषानवगमादिति । ननु ब्रह्मणः स्वरूपभूतं ज्ञानं प्रथमम् । ज्ञानस्वरूपं ब्रह्मेत्याकारकं ज्ञानं द्वितीयम् । तत्राज्ञानबाधको यो ब्रह्मस्वभावः सत्यत्वज्ञानत्वादिः स द्वितीयज्ञानेनैव गृह्यत इति तदेवाज्ञानस्य बाधकं न प्रथममिति चेन्न । ब्रह्मणः स्वप्रकाशत्वेन तत्स्वरूपभूते प्रथमज्ञानेऽपि तादृशस्वभावस्य गृहीतत्वात् ।

८४–१ स्वयमेव प्रकाशत इति । विषयवैषम्येणैव हि ज्ञानयोः फले भेदः । ननु सोयं देवदत्त इति प्रत्यभिज्ञाया एव द्वित्वभ्रमविरोधित्वं न त्वयं देवदत्त इत्यभिज्ञाया इति कथं भेद इति चेन्न । एकस्य देशद्वयकालद्वयसंबन्धरूपो विषयः प्रत्यभिज्ञाया एव नाभिज्ञाया इति विषयवैषम्यात् ।

—९ अथोच्येतेति । उक्तरीत्या ब्रह्मविषयप्रमाणज्ञानस्य भ्रमनिवर्तकत्वासंभवेऽपि प्रपञ्चमिथ्यात्वविषयकं ज्ञानं भ्रमनिवर्तकमस्त्वित्याशयः ।

—१३ एकविषयत्वेन हीति । न हि रजतमिथ्यात्वविषयकं ज्ञानं घटयाथात्म्यज्ञानस्य निवर्तकं भवतीति भावः ।

—१५ शङ्कते–ब्रह्मस्वरूपाज्ञानं नामेति । एवं च प्रपञ्चमिथ्यात्वज्ञानेन ब्रह्मस्वरूपाज्ञानस्य निवृत्तिः फलिता भवतीति भावः ।

८५–१ अद्वितीयत्वं धर्म इति । तथा च ब्रह्मणः स्वानुभवसिद्धत्वेऽपि तद्धर्मस्याद्वितीयत्वस्य स्वानुभवसिद्धत्वाभावेन प्रपञ्चमिथ्यात्वज्ञानेनैव स धर्मः प्रतीयत इति ततः प्राक्सद्वितीयत्वरूपाज्ञानं तद्बाधश्च संभवतीत्याशयः ।

—४ अथ द्वितीयां तिरोधानानुपपत्तिमाह–किं चेति ।

—६ प्रकाशस्येति । नित्यस्य प्रकाशस्योत्पत्त्यभावेनोत्पत्तिप्रतिबन्धरूपस्यार्थस्य प्रकाशतिरोधानस्यासंभवेन विद्यमानप्रकाशविनाशरूपस्य द्वितीयस्यैव प्रकाशतिरोधानस्य स्वीकर्तव्यतया प्रकाशरूपब्रह्मणः स्वरूपनाश एवोक्तः स्यादित्यर्थः ।

—८ अथ तृतीयां स्वरूपानुपपत्तिमाह–अपि चेति । स्वाश्रयेति । स्वमाश्रयो यस्येति बहुव्रीहिः । स्वनिष्ठाविद्यारूपदोषवशादित्यर्थः । वस्तुतो निराश्र-

याप्यनुभूतिरविद्यारूपदोषेणानन्ताश्रयं स्वस्वरूपमनुभवति । तथा वस्तुतो निर्विषयाऽप्यनन्तविषयं स्वस्वरूपमनुभवतीत्यर्थः ।

८५—११ अनभ्युपगमादिति । परमार्थत्वस्वीकारे द्वैतापत्तेः ।

—१२ अभ्युपगमनीय इति । पूर्वपक्षिमतेनापरमार्थं हि सर्वं जगद्दृष्टा दृश्यं दृशिश्चेति त्रिविधमुपलभ्यते तथाऽयमनुभूतिनिष्ठो दोषोऽपरमार्थश्चेत्तेषु केनाऽपि रूपेणाभ्युपगमनीय एवेत्यर्थः ।

—१३ दृशिर्द्विविधा ' निरवच्छिन्ना सावच्छिन्ना ' च । तत्रादौ निरवच्छिन्नदृशित्वं निराकरोति–न तावदिति ।

दृशिस्वरूपेति । अनुभूतिः स्वयं दृशिस्वरूपा, तन्निष्ठदोषोऽपि दृशिस्वरूपश्चेद्दोषभूता दृशिराश्रयदृश्यपेक्षया भिन्नाऽभिन्ना वा । आद्ये दृशिद्वयापत्तेः । देवदत्तादिद्रष्टृभेदेन घटादिदृश्यभेदेन च दृशिभेदेऽपि निरवच्छिन्नदृशेरेकरूपत्वमेवेष्टमिति भावः । अन्त्ये दृशेः परमार्थत्वेन तत्स्वरूपदोषस्यापरमार्थत्वानापत्तिः । दृशेरप्यपरमार्थत्वे तु शून्यवादप्रसङ्गः ।

—१४ माध्यमिकाः । शून्यवादिनो बौद्धैकदेशिनः ।

—१६ अनवस्था स्यादिति । प्रपञ्चदर्शनमूलभूतस्याविद्यारूपदोषस्य द्रष्टृत्वादिरूपत्वस्वीकारे द्रष्टृत्वादीनां दृशावेव कल्पितत्वादपरमार्थत्वेन दोषजन्यत्वाद्दोषान्तरं कल्पनीयम् । तादृशदोषान्तरस्याप्यपरमार्थत्वे तत्साधनतया पुनरन्यद्दोषान्तरं कल्पनीयमित्यनवस्थेति भावः ।

—१७ अथाविद्योत्पादकदोषान्तरस्य परमार्थत्वमेवेति नानवस्थेति चेत्तस्य ब्रह्मणः सकाशाद्भिन्नत्वे द्वैतापत्तिः । अभिन्नत्व आह–ब्रह्मैवेति । यदि दोषान्तरं ब्रह्मस्वरूपमेव तर्हि तादृशदोषात्मकं ब्रह्म प्रपञ्चदर्शनस्यैव कारणं भवेन्न त्वविद्यायाः । ब्रह्मस्वरूपदोषान्तरं ह्यविद्यारूपदोषद्वारा प्रपञ्चदर्शनस्य मूलमित्येवं परंपरापेक्षया तादृशं ब्रह्म साक्षात्प्रपञ्चदर्शनस्यैव मूलं भवेत् । मध्ये गलुभूताया अविद्याया न किमपि प्रयोजनम् । मृषात्वेन दोषसापेक्षतया अविद्याया अपि प्रपञ्चतुल्यत्वात् ।

८६–४ अथ चतुर्थीमनिर्वचनीयत्वानुपपत्तिमाह–अनिर्वचनीयत्वमिति ।

—५ अनिर्वचनीयतैव स्यादिति । विद्वत्संनिधाववाच्यतैव स्यादित्यर्थः । ' अनिर्वचनीयतैव न स्यात्' इति पाठेऽनिर्वचनीयशब्दप्रतिपाद्यं न स्यादित्यर्थः । व्यवहारस्य प्रतीतिपूर्वकत्वात्सदसद्विलक्षणशब्देनानिर्वचनीयशब्देन चाज्ञानं न व्यवह्रियेत । प्रतीतिर्हि द्विविधैव । काचित्सदाकारा घटादिसद्वस्तुविषया । काचिदसदाकारा शशशृङ्गादितुच्छविषया । सदसद्विलक्षणत्वेन भवतोऽभिप्रेतमज्ञानं तूभयविधाया अपि प्रतीतेरविषयः । विरुद्धत्वात् । प्रतीतिविरुद्धस्यापि प्रती-

तिविषयत्वे तु सर्वं सर्वप्रतीतेर्विषयः स्यात् । सतोऽपि घटादेरसत्प्रतीतिविषयत्वं स्यात् । असतोऽपि शशशृङ्गादेः सत्प्रतीतिविषयत्वं स्यादिति भावः ।

८६—१० पूर्वपक्षमुद्घाटयति–अथ स्यादित्यादिना निरवद्यमिति (८८–८) इत्यन्तेन । अहंकाराध्यासो घटादिविषयकज्ञानाध्यासश्चान्तरः । ज्ञेयाध्यासो बाह्यः ।

—१३–४ तदुपहितेति । तेनाज्ञानेनोपहितं यद्ब्रह्म तदुपादानं कारणं यस्येत्यध्यासस्य विशेषणम् । अविकार इति । एतेनाज्ञानानुपहितस्य ब्रह्मणोऽध्यासकारणत्वं नास्तीति सूचितम् । ननु स्वप्रकाशस्य कथमध्यासंभव इत्यत्राह–तेनैवेति । अज्ञानेनैव तिरोहितस्वरूप इत्यर्थः ।

—१५ तस्यैवेति । तस्य दोषस्यैव कादाचित्कावस्थाविशेषेण व्यवहारदशायां रज्ज्वादौ सर्पाद्यध्यास आत्मनि तादृशसर्पादिज्ञानाध्यासश्च भवतीत्यर्थः । अध्यासरूपे । अध्यासशब्दः कर्मसाधनः । अध्यस्तरूप इत्यर्थः ।

—१७ तदुपादानत्वम् । अज्ञानोपादानकत्वम् ।

—१८ अज्ञाने प्रत्यक्षप्रमाणं दर्शयति–कारणेति । कारणशब्देन कार्यभूताऽज्ञानस्य निवृत्तिः । अहमज्ञ इत्यज्ञानस्वरूपकीर्तनम् । तस्य मामन्यं च न जानामीत्याच्छादनरूपकार्यकथनम् ।

—२० ननु ज्ञानप्रागभावेनैव सिद्धे किमर्थं भावरूपमज्ञानमन्यत्स्वीक्रियत इति चेत्तत्राह–अयं त्विति । अयमवभास इत्यर्थः ।

स हीति । ज्ञानप्रागभावो हि षष्ठेनानुपलब्धिप्रमाणेन गृह्यत इति भावः ।

—२१ अपरोक्षः । प्रत्यक्षः ।

—२२ अनुभववेलायामिति । ज्ञानाभावो यदानुभूयते तदानीं ज्ञानं विद्यते न वा । आद्ये ज्ञानाभावरूपविषयासत्त्वान्न तदनुभवः । अन्त्ये ज्ञानाभावस्यापि ज्ञानं न स्यात् ।

८७–३ विरोधादेवेति । प्रतियोग्यधिकरणयोर्यज्ज्ञानं तस्य सत्त्वे प्रतियोगिनः सत्त्वेन ज्ञानाभावस्य न सत्त्वम् । ज्ञानाभावस्य ज्ञानरूपप्रतियोगिना सह विरोधात् । अतस्तदनुभवो न संभवति ।

—४ धर्मीति । यथा भूतले घटाभावस्य ज्ञानं भूतलघटयोर्धर्मिप्रतियोगिनोर्ज्ञाने सत्येव जायते तद्वदिति भावः ।

—५–६ अभावस्य प्रमाणान्तरविषयत्वेप्युक्तं दूषणमतिदिशति–ज्ञानाभावस्येति । अभावाख्यप्रमाणम् । अनुपलब्धिप्रमाणम् । समानेति । तथा च नेदमज्ञानमभावरूपं किं तु भावरूपमेव स्वीकर्तव्यम् । भावरूपस्य चाज्ञानस्य ज्ञानेन सह विरोधाभावान्नोक्तदूषणावसरः । तदाह–अस्येति ।

८७—९-१० सिद्धान्ती चोदयति—**ननु चेति**। **साक्षिचैतन्येन**। साक्षिभूतेन ज्ञानेन। 'अहमज्ञः' इत्याकारकमज्ञानविषयकं यज्ज्ञानं तेनेति यावत्। **विरुध्यत इति**। भावरूपस्याऽज्ञानस्य वस्तुयाथात्म्यज्ञाननिवर्त्यत्वाङ्गीकाराद्विरोधः। सति च विरोधेऽज्ञानस्यावभासो न स्यादिति भावः।

—११ साक्षिचैतन्यस्याज्ञानविषयत्वमस्तु, ततः किमित्यत आह—**न हीति**।

—१२-३ सिद्धान्ती पुनश्चोदयति—**ननु चेदमिति**। अयं भावः—अहमज्ञ इत्यवभासेऽज्ञानावच्छेदकतयात्मनः स्फुरणं भवति। तथा चाज्ञानं नास्मदर्थस्यात्मन इत्यस्मदर्थव्यावृत्तमेव तदज्ञानम्। तस्य चास्मदर्थावच्छिन्नाज्ञानस्य साक्षिचैतन्यविषयत्वं वक्तव्यम्। तच्च न संभवति। अस्मदर्थस्यात्मनः साक्षिचैतन्यविषयत्वासंभवात्। यथा दण्डस्याप्रत्यक्षत्वे दण्डीति विशिष्टप्रत्यक्षं न संभवति तद्वदिति। **विषयविशेषः**। अवच्छेदकविशेषोऽस्मदर्थः।

—१४-५ **प्रमाणाधीनेति**। प्रमाणेन सिध्यत एव वस्तुनो विषयत्वादात्मनश्च प्रमातुः प्रमाणेन सिद्ध्यभावान्न तस्य विषयत्वमित्याशयः। प्रमाणानधीनसिद्धिरितिपाठे तु स आत्मरूपो विषयः प्रमाणानधीनसिद्धिरित्यर्थः। **अस्मदर्थव्यावृत्तम्**। अज्ञानव्यावर्तकास्मदर्थावच्छिन्नम्।

८८-२-४ **प्रमाणज्ञानमिति**। अयं पक्षनिर्देशः। ज्ञानमित्युक्ते ब्रह्मस्वरूपज्ञानस्य वस्त्वन्तरपूर्वकत्वाभावात्तद्व्यावृत्त्यर्थं प्रमाणज्ञानमित्युक्तम्। **स्वप्रागभावेति**। साध्यनिर्देशः। स्वप्रागभावव्यतिरिक्तं, स्वविषयावरणभूतं, स्वनिवर्त्यं, स्वदेशगतं यद्वस्त्वन्तरं तत्पूर्वकमित्यर्थः। स्वविषयावरणभूतम्। स्वस्य प्रमाणज्ञानस्य विषयभूतं यद्ब्रह्मादि तत्स्वरूपतिरस्कारकम्। स्वदेशगतम्। स्वस्य प्रमाणज्ञानस्य देश आश्रय आत्मा तन्निष्ठम्। स्वस्य प्रमाणज्ञानस्य यः प्रागभावस्तद्व्यावृत्त्यर्थं स्वप्रागभावव्यतिरिक्तेति। भयादिव्यावृत्त्यर्थं स्वविषयावरणेति। धर्माधर्मव्यावृत्त्यर्थं स्वनिवर्त्येति। तयोर्ज्ञानविषयावरणत्वं तु कुत्रचिद्योजनीयम्। वेद्यगतो यो वित्त्यभिव्यक्तिप्रागभावस्तद्व्यावृत्त्यर्थं स्वदेशगतेति। व्यवधानभूतभित्त्यादि तु न स्वनिवर्त्यं नापि स्वदेशगतम्। एतादृशं च भावरूपमज्ञानमेवेत्यर्थः। **अप्रकाशितेति**। हेतुनिर्देशः। प्रकाशकत्वादित्येतावन्मात्रोक्तौ धारावाहिकज्ञानस्थल उत्तरोत्तरज्ञानानां प्रकाशकत्वेऽपि साध्यधर्माभावाद्व्यभिचारः। अतोऽप्रकाशितार्थेति। प्रकाशकत्वं च साक्षात्परंपरया वा बोध्यम्। दृष्टान्ते दीपप्रभाया ज्ञानद्वारा वस्तुप्रकाशकत्वात्। द्वितीयदीपप्रभाया अप्रकाशितार्थप्रकाशकत्वाभावात्प्रथमोत्पन्नेत्युक्तम्। प्रथमोत्पन्नाया अपि दीपप्रभाया दिवाऽप्रकाशितार्थप्रकाशकत्वाभावादन्धकार इत्युक्तम्। अन्धकार एव तथाविधं वस्त्वन्तरमिति न दृष्टान्ते साध्यविकलता।

—५ अन्धकारस्य भावरूपत्वमसहमानो नैयायिकः शङ्कते—**आलोकेति**। आलोकाभाव एव तमः। न तु द्रव्यान्तरम्। नीलं तमश्चलतीति प्रत्ययस्तु भ्रम

एवेति तदाशयः। ननु तमस आलोकाभावस्वरूपत्वेऽन्धस्योलूकादीनां चालोकसत्त्व एव कथमन्धकारप्रतीतिरत आह–रूपेति। रूपदर्शनाभाव एव तम इत्यर्थः।

८८—७ बहुलत्वविरलत्वेति। अत्र गाढान्धकारोऽत्र विरल इत्याद्यवस्थायोगस्तमसोऽभावरूपत्वे न संभवतीत्यर्थः। तमः ससर्ज भगवान्, यस्य तमः शरीरमित्यादिश्रुतयोऽपि तमसो द्रव्यत्वे प्रमाणतयाऽनुसंधेयाः।

—९ अथ सिद्धान्तं वक्तुं पञ्चमीं प्रमाणानुपपत्तिं प्रदर्शयितुं चोपक्रमते–अत्रोच्यत इति।

—१२ तुल्यत्वमुपपादयति–विषयत्वेनेति। आत्मस्वरूपं यज्ज्ञानं स एवाज्ञानस्य विषयः। अज्ञानाश्रयश्चात्मैव। स एव चाज्ञानस्य व्यावर्तकः। तस्य ज्ञानस्वरूपस्यात्मनोऽहमज्ञ इत्याद्यज्ञानप्रतीतिकाले प्रतीतिरस्ति न वा। आद्येऽज्ञानव्यावर्तकात्मसत्त्वेनात्मस्वरूपज्ञाननिवर्त्यस्याज्ञानस्यासंभवः। द्वितीयेऽज्ञानविषयस्याज्ञानाश्रयस्य च ज्ञानाभावेनाज्ञानस्यापि प्रतीतिर्न स्यात्। व्यावर्तकस्यैवाज्ञानविषयत्वादज्ञानाश्रयत्वाच्च।

—१५ शङ्कते–अथेति। आत्मप्रतीतिर्हि द्विधा स्फुटाऽस्फुटा च। तत्र स्फुटाया एवाज्ञानव्यावर्तकत्वम्। अहमज्ञ इत्याद्यज्ञानप्रतीतिकाले त्वज्ञानस्य विषयतयाऽऽश्रयतया च याऽऽत्मप्रतीतिरस्ति सा न स्फुटेति नाज्ञानं व्यावर्तयतीति नोक्तदोष इत्याशयः।

—१९ अन्यत्राभिनिवेशादिति। अभिनिवेशं विनेत्यर्थः। अभिनिवेश आग्रहो भावरूपाज्ञानविषये पक्षपातः स एव विशेषो नान्य इत्याशयः।

–१९–२० नन्वात्मनोऽप्रतीतौ व्यावर्तकाश्रयविषयशून्यमज्ञानं कथमनुभूयेतेति यदुक्तं (श्रीभाष्य–पृ. ८८ प. १५) तन्न सम्यक्। यथा ज्ञानाभावस्य ज्ञानसापेक्षत्वं न तथा भावरूपस्याज्ञानस्येत्यात्मरूपज्ञानस्याप्रतीतावपि भावरूपमज्ञानमनुभूयेतैवेति चेत्तत्राह–भावरूपस्येति।

—२१–२ तदन्यः। ज्ञानादन्यः। तद्विरोधि। ज्ञानविरोधि।

८९–३ समानमिति। तथा चाज्ञानस्याभावरूपत्वमेवास्तु न तु भावरूपत्वमिति भावः।

–३–४ ननु समानत्वे ज्ञानाभावरूपत्वमेवाज्ञानस्येति कोऽभिनिवेश इत्यत्राह–ज्ञानप्रागभाव इति। भवतापि। अज्ञानस्य भावरूपत्वं वदतापि। तथा च लाघवात्स एवास्तु न तु तदतिरिक्तं भावस्वरूपमज्ञानमिति भावः।

—७ अथाज्ञानवादिनो मतं प्रतिकूलतर्कपराहतमित्याशयेनाह–नित्येति। नित्यमुक्तत्वं परमार्थदोषासंस्पृष्टत्वम्। अतः परमार्थदोषो न संभवति। स्वानुभवस्वरूपत्वाच्चापरमार्थपरानुभवो न संभवतीत्यर्थः।

८९-१३ स्वरूपनाश एवेति । अप्रकाशितस्वरूपत्वं नाम स्वरूपप्रकाशस्याभावः । नाश इति यावत् । तथा च प्रकाशनाशं वदता त्वया पर्यायेण स्वरूपनाश एवोक्तः स्यात् । प्रकाशश्च न ब्रह्मणो धर्मः किं तु ब्रह्मणः स्वरूपमेवेति त्वयैवोक्तत्वात् ।

—१५ अनुभूतं सदिति । न चाज्ञानं स्वरूपसदेव ब्रह्मस्वरूपतिरस्कारकमस्तु न तु ज्ञातमिति वाच्यम् । तथा सत्यज्ञानस्य परमार्थत्वापत्तेः । न ह्यपरमार्थस्य स्वरूपसत्त्वं वक्तुं शक्यते ।

—१६-७ अनुभूतमेवेति । एवकारेण 'तिरोहितस्वरूपस्य ब्रह्मणोऽज्ञानानुभवः' इति प्रागुक्तपक्षनिरासः ।

—१८ निष्प्रयोजनेति । तिरोधानकल्पना ह्यज्ञानानुभवार्थैवेति भावः ।

अज्ञानस्वरूपकल्पना चेति । निष्प्रयोजना स्यादिति संबध्यते । यथा स्वरूपतिरोधानं विनाऽपि ब्रह्मणोऽज्ञानानुभवस्तथाऽज्ञानं विनापि प्रपञ्चानुभवः स्यादित्याशयः ।

—२० अनुभवपूर्वकतिरस्कारपक्ष एव दूषणमाह-किं चेति । स्वतःपक्षे दूषणद्वयमनिर्मोक्षो ब्रह्मस्वरूपनिवृत्तिश्चेति ।

९०-५ तथा सतीति । तिरस्कारपूर्वकानुभवपक्षे ह्यज्ञानं स्वरूपसदेव ब्रह्मस्वरूपतिरस्कारकं न तु ज्ञातमित्युक्तं स्यात् । स्वरूपसतश्चाज्ञानस्यापरमार्थत्वाभावेन ज्ञानबाध्यत्वं न स्यादिति भावः । काचो नेत्ररोगविशेषः । स ह्यज्ञातोऽपि स्वरूपतः सन्नेव दृष्टिं तिरस्करोतीति बोध्यम् ।

—८ अथ तिरस्कारानुभवयोर्यौगपद्यं शङ्कते-अथेदमिति । स्वयमनादीति । अनेनानवस्था परिहृता ।

—११ साक्षित्वापादनायोगात् । अज्ञानानुभवायोगात् ।

—१२ अपास्तमिति । अन्येन हेतुना पूर्वं ब्रह्मस्वरूपे तिरोहिते पश्चादज्ञानमनुभूयत इत्युच्यमानेऽज्ञानस्यापरमार्थत्वेनानुभवात्पूर्वं स्वरूपेण सत्त्वं कथमपि वक्तुं न शक्यत इत्यनादित्वं दुर्वचम् ।

—१३ न स्यादिति । स्वरूपतिरस्कारं विनैव ब्रह्मणोऽज्ञानसाक्षित्वं चेत्तादृशसाक्षित्वस्य स्वरूपत एव वक्तव्यतया स्वानुभवैकतानता न संभवतीति भावः ।

—१८ निर्विशेष इति । एतेन 'ब्रह्मणः स्वतो निरंशत्वेऽपि तन्निष्ठः कश्चिद्विशेषः प्रकाशते कश्चिन्न' इति 'किंचित्प्रकाशते' इत्यस्य तात्पर्यमित्यपास्तम् । प्रकाशमात्रे । कस्याप्यविषयभूते ।

९०-२० शङ्कते-अथेति। अविशदमिवेत्यनेन तिरस्कारः सूचितः। आलक्ष्यत इत्यनेन प्रकाशश्च सूचितः। एवं च तिरस्कारप्रकाशयोर्युगपत्संभवोक्तीति भावः।

—२१ परिहरति-प्रकाशमात्रेति।

९१-१ यः सांश इति। सांशः सविशेषश्च यो घटादिः पदार्थः प्रकाशविषयो भवति तस्यांशविशेषसहितस्य योऽवभासः स विशदावभासः। कतिपयांशरहितस्य कतिपयविशेषरहितस्य वा योऽवभासः सोऽविशदावभास इत्येवंरीत्यैव सांशसविशेषपदार्थविषये विशदावभासाविशदावभासयोः संभवः। न त्ववभासस्य वैशद्यमवैशद्यं वा। अवभासो हि प्रकाशः। लोकेऽपि घटादिप्रकाशस्य नावैशद्यं संभवति। घटादिषु योंऽशोऽज्ञातस्तत्र प्रकाशस्यावैशद्यं वक्तव्यम्। तच्च व्याहतम्। अज्ञाते प्रकाशस्यासत्त्वात्। धर्मिणः प्रकाशस्यासत्त्वे तद्धर्मभूतमवैशद्यं दुर्वचमेव। एवं च प्रकाशमात्रस्वरूपे परमात्मनि न कथमप्यवैशद्यमिति तात्पर्यम्।

—४ प्रकाशेति। प्रकाशावैशद्यं न विद्यत इति पाठः।

—१३ न स्यातामिति। विशदस्वरूपस्याविद्याविरोधित्वादिति भावः।

—१४-५ अथाज्ञानविषये परोक्तस्य प्रत्यक्षप्रमाणस्य प्रतिकूलतर्कमाह-अस्येति। पूर्वमेवोक्त इति। तथा चाहमज्ञ इत्याकारकमज्ञानस्य प्रत्यक्षं न संभवतीत्यर्थः।

—१५ प्रतिकूलतर्कान्तरमाह—अपि चेति। निर्विशेषब्रह्मवादी पूर्वपक्षी निरधिष्ठानभ्रमासंभवं मन्यमानो भ्रमाधिष्ठानत्वेन ब्रह्मणः सिद्धिं प्रतिपादयति। परं तु तदनुपपादम्। यथा भ्रमस्य मूलभूतोऽज्ञानरूपो दोषोऽपरमार्थो यथा च तादृशदोषाश्रयत्वेनाभ्युपगतो जीवो जीवस्वरूपेणापरमार्थ इति तयोरपरमार्थत्वेऽपि भवता भ्रमोऽभ्युपगतस्तथैव भ्रमाधिष्ठानभूतस्य ब्रह्मणोऽपरमार्थत्वेऽपि भ्रमाभ्युपगमे बाधकाभावात्। ब्रह्मणश्चापरमार्थत्वे शून्यवादप्रसङ्गः। तथा चाश्रयाभावेन 'अहमज्ञः' इत्याकारकमज्ञानस्य प्रत्यक्षं न संभवतीत्याशयः।

९२-२ अनभिमतेति। यथाऽप्रकाशितार्थप्रकाशकत्वेन हेतुना प्रमाणज्ञानस्य वस्त्वन्तरपूर्वकत्वं साध्यते तथा तादृशवस्त्वन्तरस्याज्ञानस्याप्यप्रकाशितप्रपञ्चरूपार्थप्रकाशकत्वेन वस्त्वन्तरपूर्वकत्वापत्त्यावज्ञानान्तरं सिध्येत्। तच्च तवानभिमतमिति भावः।

—३ अनैकान्त्यम्। व्यभिचारः।

—४ तदज्ञानम्। प्रथमाज्ञानेन साधितं द्वितीयाज्ञानम्। अज्ञानसाक्षित्वम्। ब्रह्मणः प्रथमाज्ञानानुभवितृत्वम्। निवारयतीति। पूर्वपक्ष्युक्तानुमाने

साध्यकोटौ वस्त्वन्तरस्य स्वविषयावरणेति विशेषणोपादानात्। स्वं प्रथमाज्ञानम्। तद्विषयः प्रपञ्चः। स यदि द्वितीयाज्ञानेनावृतस्तर्ह्यर्थादेव ब्रह्मणा तादृशं प्रथमाज्ञानं नानुभूयेत। निर्विषयस्याज्ञानस्यानुभवायोगात्। अननुभूतेन च तेन ब्रह्मस्वरूपं नाच्छाद्येत। अपरमार्थस्याप्रतीयमानस्य कार्यकारित्वायोगात्। तथा च प्रथमाज्ञानकल्पना व्यर्था स्यादिति भावः।

· ९२-६ अप्रकाशितार्थप्रकाशकत्वाभावादिति। परंपरया प्रकाशकत्वे गृहीते तु परंपरया प्रकाशकेष्विन्द्रियेषु व्यभिचारः। तेषां स्वनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावात्।

—९ वस्तुतो दीपप्रभायाः परंपरयापि प्रकाशकत्वं नास्तीत्याह-प्रदीपप्रभायास्त्विति।

—१२ शङ्कते-नास्माभिरिति। स्वविषयावरणनिरासकत्वमेव प्रकाशकत्वमिति भावः।

—१३ अपि त्विति। ज्ञानस्येवेति पाठः। निरसनपूर्वकप्रकाशकत्वमिति। निरसनद्वारा प्रकाशकत्वमित्यर्थः।

९३-१-२ अथ विरुद्धानुमानान्याह-प्रतिप्रयोगाश्चेति। तत्रादावनुमानत्रयेऽज्ञानं पक्षः। ततोऽनुमानत्रये ब्रह्म पक्षः। पूर्वपक्ष्युक्तानुमाने साध्यकोटौ वस्त्वन्तरस्य 'स्वदेशगत' इति यद्विशेषणं तस्य प्रथमं चतुर्थं चानुमानं प्रतिकूलम्। द्वितीयं पञ्चमं च ' स्वविषयावरण' इति विशेषणस्य प्रतिकूलम्। तृतीयं षष्ठमष्टमं नवमं च ' स्वनिवर्त्य' इति विशेषणस्य प्रतिकूलम्। सप्तमं च ' स्वप्रागभावव्यतिरिक्त ' इति विशेषणस्य प्रतिकूलम्। ज्ञानमात्रब्रह्मेति। यद्यपि स्वमते ब्रह्मणो ज्ञानमात्रत्वं नास्ति तथापि पूर्वपक्षिमतं तन्मतेनैव दूषणीयमिति ज्ञानमात्रब्रह्मेत्युक्तम्। तत्। शुक्तिकाद्यज्ञानम्।

—३ न ज्ञानावरणमिति। यद्यपि पूर्वपक्षिणाऽज्ञानं ज्ञानविषयब्रह्मावरणमित्युक्तं तथापि तन्मते ब्रह्मणो ज्ञानस्वरूपत्वाज्ज्ञानविषयत्वाभावादज्ञानं ज्ञानावरणमेव भवति न तु ज्ञानविषयावरणमित्याशयः।

—७ ब्रह्म नाज्ञानावरणमिति। कर्मणि ल्युट्। अज्ञानेन ब्रह्म नावियत इत्यर्थः। ज्ञानाविषयत्वादिति। पूर्वपक्षिणा ब्रह्मणि ज्ञानाविषयत्वस्य स्वीकृतत्वात्।

—९ ज्ञाननिवर्त्याज्ञानमिति। ज्ञानेन निवर्त्यमज्ञानं यस्येति बहुव्रीहिः। विषयत्वं षष्ठ्यर्थः।

—१२ भवदभिमतेति। भवता भावरूपमज्ञानं येनानुमानरूपप्रमाणज्ञानेन साध्यते तस्य स्वप्रागभावातिरिक्ताज्ञानपूर्वकत्वाभावात्। नन्तु तस्यापि

तथाविधाज्ञानपूर्वकत्वं कल्प्यत इति चेत्तत्र प्रमाणमस्ति न वा। अन्त्ये भवदुक्तासिद्धिः। आद्ये कल्पितस्य प्रमाणज्ञानस्यापि तथाविधाज्ञानपूर्वकत्वं कल्प्यमित्यनवस्थेति भावः।

वस्तुनः। भावरूपस्याज्ञानस्य। भावरूपस्य वस्तुनो विनाशकं हि द्विधा। विशेषसामर्थ्ययुक्तं ज्ञानं, ज्ञानभिन्नं च। आद्यमीश्वरादीनाम्। तेन हि प्रलये सर्वनाशो भवति। द्वितीयं दण्डादि। तेन हि घटादिनाशो भवति।

९३-१९ **क्षणिकत्वेनेति**। भयादेश्चिरोपलम्भस्तु कारणानुवृत्त्या बोध्यः।

९४-२ **अनेकभयोपलब्धीति**। स्थायिनां घटादीनां यदा प्रतिक्षणमुत्पत्तिर्भवति तदा ते बहवो युगपदुपलभ्यन्ते तद्वत्।

—३ **व्यर्थेति**। भाववाचिवस्तुशब्देनैव सिद्धौ 'स्वप्रागभावातिरिक्त, अन्तर' एतच्छब्दवैयर्थ्यमित्याशयः।

—७ **न विलक्षणत्वादिति**। यथा माक्षिकादेः सकाशात्तद्विलक्षणस्य कृम्यादेरुत्पत्तिस्तथा ब्रह्मणः सकाशादचेतनत्वादिविशिष्टस्य विलक्षणस्यापि जगत उत्पत्तिर्भवितुमर्हतीति तदधिकरणतात्पर्यम्।

—९ **प्रतीतिभ्रान्तीति**। प्रतीतिश्च भ्रान्त्यभ्रान्तिसाधारणरूपा। भ्रान्तिस्तु विद्यमानभेदाग्रहणपूर्वकसाधारणाकारग्रहणजन्या स्वविषयान्यथात्वविशेषिता प्रवृत्त्यादिहेतुभूता। बाधस्त्वारोपितविरुद्धाधिष्ठानाकारावगाहिनी बुद्धिः। तत्र जगत्स्वरूपं यद्भावरूपाज्ञानं तस्य प्रतीतिः सर्वेषां प्राणिनां प्रायोस्त्येव। भ्रान्तिश्च तत्राज्ञानिनां भवत्येव। बाधोऽपि तस्य तत्त्वदृष्ट्याऽस्त्येव। यदि तद्भावरूपाज्ञानं वस्तुतः सत्स्यात्तर्हि तस्य बाधो न स्यात्। यद्यसत्स्यात्तर्हि तस्य प्रतीतिर्भ्रान्तिश्च न स्यात्। सत एव रजतस्यान्यत्र भ्रमदर्शनात्। अतस्तद्भावरूपाज्ञानं न सन्नाप्यसदिति तस्यानिर्वचनीयत्वसिद्धिरिति पूर्वपक्ष्याशयः। **तथा**। अनिर्वचनीयत्वेन।

—१० **प्रतीयमानमेव हीति**। यदि भावरूपाज्ञानस्य प्रतीत्यादिविषयत्वं तर्हि तस्य प्रतीयमानत्वमेव स्यान्न त्वनिर्वचनीयत्वम्। अथ यद्यनिर्वचनीयत्वं तर्हि तस्य केनापि प्रमाणेनोपलम्भाभावेन प्रतीत्यादिविषयत्वं न स्यादित्यर्थः।

—१३ **शङ्कते-शुक्त्यादिष्विति**। भ्रान्तदृष्ट्या रजतं प्रतीयत इति न तदसत्। तदानीमेवेतरदृष्ट्या बाध्यत इति न सत्। अरजतं रजतरूपेण प्रकाशत इत्यपि न वक्तुं शक्यम्। अन्यस्यान्यरूपेणावभासायोगात्। तदुक्तम्—

परस्मिन्भासमाने तु न परं भासते यतः।
तेनान्यस्यान्यथा भानं प्रतीत्यैव पराहतम्॥

इति । अतोऽगत्याऽनिर्वचनीयमेव रजतं तत्र कल्पनीयम् । तद्वदेव भावरूपाज्ञानविषयेऽपीति शङ्काशयः ।

९४-१५ तत्कल्पनायामपीति । अनिर्वचनीयकल्पनायामपि तस्यानिर्वचनीयस्य निर्वचनीयत्वेनावभासोऽवश्याश्रयणीय एव । इतरथा हि कथमपि तस्य निर्वक्तुमशक्यत्वेन प्रतीतिविषयत्वं, प्रवृत्तिविषयत्वं बाधविषयत्वं भ्रमविषयत्वं च तस्य न स्यात् ।

—१७ नन्वत्र प्रतीत्यादयः कारणं विनैव कल्प्यन्तामिति चेत्तत्राह-अत्यन्तेति ।

—१८ उक्तमेव विशदयति-कल्प्यमानं हीति ।

९५-२ तस्यापरिहार्यत्वाच्चेति । अन्यत्रान्यावभासस्यावश्यकत्वाच्चेत्यर्थः ।

— ४ ख्यात्यन्तरेति । तत्र सत्ख्यातिः सर्वैरङ्गीकृतैव । सर्वैरपि स्वस्वमतानुसारेण यत्सद्वस्तु स्वीक्रियते तदुपलम्भरूपत्वात्तस्याः । सतः ख्यातिः प्रतीतिरित्यर्थः । असद्विषये तु चत्वारः पक्षाः । अन्यथाख्यातिः, असत्ख्यातिः, आत्मख्यातिः, अख्यातिश्चेति । अन्यस्यान्यरूपेण या प्रतीतिः सान्यथाख्यातिः । सा च नैयायिकैः स्वीकृता । तत्रान्यथावभासो वर्तत एव । ख्यात्यन्तरेष्वप्ययं तुल्यः । तत्रासत्ख्यातिः शून्यवादिभिर्बौद्धैर्मायावेदान्तिभिर्माध्वैश्चाङ्गीकृता । असतः ख्यातिः प्रतीतिरित्यर्थः । तत्रासतो या प्रतीतिः साऽसत्त्वेन भवति सत्त्वेन वा । असत्त्वेन चेत्तत्र भ्रमः प्रवृत्तिश्च न संभवति । सत्त्वेन चेदन्यथाऽवभास एव । आत्मख्यातिस्तु विज्ञानवादिभिर्योगाचारैरङ्गीकृता । आत्मनो विज्ञानस्य ख्यातिः प्रतीतिरित्यर्थः । तत्र विज्ञानस्य या प्रतीतिः सा विज्ञानत्वेन भवत्यर्थत्वेन वा । विज्ञानत्वेन चेद्भ्रमादि न संभवति । अर्थत्वेन चेदन्यथाऽवभास एव । अख्यातिस्तु मीमांसकैरङ्गीकृता । न ख्यातिरख्यातिरप्रतीतिरित्यर्थः । इदं रजतमित्यत्रेदमंश एव चक्षुषा प्रतीयते । रजतमिति तु सत्यरजतस्यैव स्मृत्याकारदर्शनम् । तत्तु केवलं स्मर्यत इति तन्मतम् । तत्रेदं रजतमिति वस्तुत एकं ज्ञानं ज्ञानद्वयं वा । एकज्ञानपक्षेऽविशेषणमपि रजतमिदमंशविशेषणत्वेन प्रतीयत इत्यन्यथावभासः । ज्ञानद्वयपक्षे तज्ज्ञानद्वयं ज्ञानद्वयत्वेन प्रतीयत एकज्ञानत्वेन वा । आद्ये भ्रमप्रवृत्त्यादि न संभवति । अन्त्येऽन्यथावभासः ।

—७ विषयेति । अविद्यमान एव विषयो भासत इति मतेऽप्यविद्यमानस्य विद्यमानत्वेन भासनादन्यथावभासो वर्तत एवेत्यर्थः ।

—९ तस्याः । प्रत्यक्षप्रतीतेः । तद्विषयत्वेन । विद्यमानविषयजन्यत्वेन ।

—१० महतामिति । परिहासोक्तिः ।

—११ दोष इति । अनिर्वचनीयरजतकारणमिति संबध्यते ।

९५-१२अर्थगतकार्यस्य। शुक्तावनिर्वचनीयरजतस्य। अथ विषयगतो दोषः कारणमिति चेत्स दोषः किं विषयमात्रनिष्ठो विषयपुरुषोभयनिष्ठो वा। आद्ये पुरुषस्य सर्वथा निर्दोषत्वेन भ्रमासंभवः। अन्त्य उभयनिष्ठदोषस्य केवलविषये कार्योत्पादकत्वं न संभवतीति बोध्यम्।

—१७ न घटादीति। शुक्तिरजतस्थले रजतस्यानिर्वचनीयत्वे तत्रेदं रजतमित्येव बुद्धिर्न त्वयं घट इत्येवं नियमो न संभवति। तथा तत्र रजतशब्देनैव व्यवहारो न घटशब्देनेति च नियमो न संभवतीति भावः।

—१८ शङ्कते-रजतादिसादृश्यादिति।

—१९ पुनः शङ्कते-रजतादिजातीति। सा किमिति। परमार्थापरमार्थैतदुभयविधरजतनिष्ठा जातिः स्वयं किं परमार्थभूतोतापरमार्थभूतेत्यर्थः।

—२० अपरमार्थेति। अपरमार्थभूतव्यक्त्या सह संबन्धासंभवादित्यर्थः।

९६-१ निर्वाहकत्वायोगात्। प्रयोजकत्वायोगात्। न ह्यपरमार्थं परमार्थस्य कारणं भवति।

—३-५ अथ सर्वत्र सत्ख्यातिरेवेति स्वसिद्धान्तं दर्शयति-अथ वेति। वेदविदाम्। वृत्तिकारादीनाम्। सर्वस्येति। सर्वस्य पृथिव्यादेः सर्वात्मत्वं पृथिव्यादित्वं त्रिवृत्करणेन बोध्यम्। त्रिवृत्करणं च पृथिव्यादित्रयाणां परस्परं मिश्रणम्।

—६-७ सृष्ट्यादीति। आदिशब्देन स्थितिप्रलययोर्नामरूपव्याकरणस्य च संग्रहः। सृष्ट्यादिरूपक्रमो यस्य प्रकरणस्य तस्मिन्नित्यर्थः। तासाम्। पृथिव्यप्तेजोदेवतानाम्।

—९-११ यदग्नेरिति। अग्नेर्यद्रोहितं रूपं तत्तेजसः। अग्नेर्यच्छुक्लं रूपं तदपाम्। तथाग्नेर्यत्कृष्णं रूपं तत्पृथिव्याः। संगता इति। तथा चास्य प्रमाणसिद्धस्य रूपस्यापरमार्थता वक्तुमशक्येति भावः।

—१३ ते। आकाशादयः। अयं पञ्चीकरणप्रकारः।

—१५-६ परस्परेति। सर्वेषां सर्वत्र मिश्रणेपि घटादिषु पृथिव्यंशस्याधिक्यात्तत्र पृथिव्याश्रयः। इतर आश्रिताः। आधिक्यादेव च पृथिवीशब्देन व्यवहारः। एवमन्येष्वपि। विशेषान्ता इति। शान्तत्वं घोरत्वं मूढत्वं च विशेषः। अण्डमिति। उत्पादयन्तीति संबन्धः।

—१८ त्र्यात्मकत्वादिति। केवलाभिरग्निर्मं देहारम्भः। अपां त्र्यात्मकत्वात्। पृथिव्यप्तेजःस्वरूपत्वात्। 'आपः पुरुषवचसः' (छा. ५। ३। ३) इति श्रुतावपामेव श्रवणं तु भूयस्त्वात्तदंशबाहुल्यादिति सूत्रार्थः। अभिधाभिदा। नामभेदः। पृथिव्यादिनामभेदस्तत्तदंशबाहुल्यादित्यर्थः। नन्वेवमाका-

शादीनां सत्त्वेन तत्र सत्ख्यातिसिद्धावपि शुक्तिरजतादेरसत्त्वेन तत्र कथं सत्ख्यातिरिति चेन्न। शुक्तावपि रजतांशस्य सत्त्वेन तस्य तत्रासत्त्वाबोधात्। स्वसदृशे वस्तुनि स्वांशस्य सत्त्वात्।

९६-१९ एतदेव दृष्टान्तेन विशदयति-सोमाभाव इति। पूतीकग्रहणम्। वल्लीविशेषग्रहणम्।

—२३ श्रुत्यैवेति। सोमाद्यभावे तत्सदृशवस्तुग्रहणं बोधयन्ती श्रुतिरेव सदृशयोर्वस्तुनोः परस्परांशसत्त्वं बोधयतीत्यर्थः। यद्वा त्रिवृत्करणश्रुतिरेव शुक्तिकादौ तेजसो रूप्यस्यांशतः सत्त्वं बोधयतीत्यर्थः।

९७-१ ननु शुक्तिरूप्ययोः प्रत्येकं 'शुक्ति रूप्य' एतच्छब्दद्वयव्यवहारः स्यादित्यत आह-रूप्येति।

—८ ननु शुक्तिज्ञानेन रजतज्ञानस्य बाधो न स्यादित्यत आह-बाध्येति। ज्ञानस्य मिथ्यार्थविषयत्वं न बाध्यत्वे प्रयोजकम्। किं तु भूयस्त्ववैकल्येन ग्रह एव। तथा सत्यार्थविषयत्वं न बाधकत्वे प्रयोजकम्। किं तु भूयस्त्वसाकल्येन ग्रह इति भावः।

—१२-३ अथ स्वप्ने सत्ख्यातिसिद्धये स्वाप्नपदार्थानां सत्यत्वमुपपादयति-स्वप्ने चेति। तत्तत्पुरुषेति। अत एवान्येषां पुरुषाणां तत्पदार्थानुपलब्धिः। तत्तत्कालेति। अत एव सदा नोपलब्धिः।

—१४-८ रथयोगाः। रथे युज्यन्त इति रथयोगा अश्वाः। आनन्दा इति। साधारणभोग्यदर्शनजा प्रीतिर्मुत्। असाधारणभोग्यदर्शनजा प्रीतिः प्रमुत्। विनियोगजा प्रीतिरानन्दः। अथ वा स्वकीयत्वबुद्धिजा प्रीतिर्मुत्। विनियोगजा प्रीतिः प्रमुत्। अनुकूलदर्शनजा प्रीतिरानन्दः। आनन्दादिशब्दैः स्वविषया लक्ष्यन्ते। वेशान्ता गृहा अल्पसरांसि वा। पुष्करिण्यस्तडागाः। स्रवन्त्यो नद्यः।

९८-१-२ स्वप्नार्थसृष्टेरीश्वरकर्तृकत्वस्फुटीकरणार्थं श्रुत्यन्तरमाह-य एष इति। सुप्तेषु। प्राणेषु सुप्तेषु सत्सु। शुक्रम्। शुद्धम्।

—४-७ संध्य इति। संध्ये स्वप्ने सृष्टिर्जीवेनैव क्रियते। हि यतः 'स हि कर्ता' (बृ. ४। ३। १०) इति श्रुतिस्तथैवाह। तत्र हि जीव एव प्रतीयत इति सूत्रार्थः। निर्मातारमिति। किं चैनं जीवं स्वप्ने कामानां निर्मातारमेके शाखिनोऽधीयते 'य एष सुप्तेषु' (का. ५। ८) इति। एतच्छ्रुतिप्रामाण्यादेव जीवस्य स्वाभाविकगुणाविर्भावेण सृष्टिसामर्थ्यं कल्पनीयम्। एतत्सूत्रद्वयं पूर्वपक्षिणः। मायामात्रमिति। एतत्सिद्धान्तसूत्रम्। तुशब्दः पूर्वपक्षं व्यावर्तयति। स्वप्नसृष्टिर्मायामात्रमाश्रर्यमात्रं परमपुरुषसङ्कल्पमिति यावत्। एवं-

विधाश्रर्यभूतसृष्टेर्जीवकर्तृकत्वं न संभवति । जीवस्य संसारदशायां कार्त्स्न्येन साकल्येनाभिव्यक्तस्वरूपत्वाभावादिति सूत्रार्थः । उक्तश्रुत्योस्तु तच्छब्देन य एष इत्यनेन च परमात्मैव ग्राह्यः । प्रकरणात् । एवं श्रुतेरुपपत्तौ जीवस्य स्वाभाविकगुणाविर्भावकल्पनमप्रामाणिकमिति भावः । इत्यादिनेति । अस्य परिहरतीत्यत्रान्वयः ।

९८–१३–४ ननु गृहे शयानः स्वप्ने यदन्यत्र गच्छति तत्र कथं परमार्थत्वमित्यत्राह–अपवरकादिष्विति । गृहादिष्वित्यर्थः । शयानेति । शयानो यो देहस्तेन सरूपं संस्थानं यस्य तादृशस्य देहान्तरस्य सृष्टेत्यर्थः । संस्थानमवयवरचना । स्वाप्नरथादिवत्स्वाप्नदेहोप्यन्य एवेश्वरेण क्रियते । तत्र शयानदेहव्यवहारस्तु सादृश्यादौध्यः ।

—१६ अथ पीतशङ्खादौ सत्ख्यातिं दर्शयति–पीतेति । संभिन्नाः । मिश्रिताः ।

९९–२ ननु दूरस्थशङ्खस्यातिसामीप्याभावात्तत्रस्थं पित्तद्रव्यं पित्तोपहतेनापि पुरुषेण न गृह्येतेत्यत आह–तद्ग्रहणेति । पित्तोपहतेन पुरुषेण स्वनयननिष्क्रान्तपित्तद्रव्यज्ञानजनितसंस्कारसहायेन शङ्खस्थं पित्तद्रव्यं दूरस्थमपि स्वचाक्षुषरश्मिभिर्ज्ञायते । यथाकाशेऽतिदूरगतः पक्षी न द्रष्टुं शक्यते । परं तु स्वसमीपदेशोत्पतनकालादारभ्य सततं दृश्यमानस्तत्संस्कारसहायेन चक्षुषा दूरगतोऽपि ज्ञायते तद्वदिति भावः ।

—७–८ मरीचिका । मृगतृष्णा । तेज इति । त्रिवृत्करणेन तेजसि पृथिव्यां च जलांशस्य विद्यमानत्वादित्यर्थः । अदृष्टवशादिति । ख्यात्यन्तरवादिभिरपि कदाचिदेव क्वचिदेव च भ्रमस्य स्वीकृततया तन्नियामकत्वमदृष्टस्याङ्गीकर्तव्यमेव ।

—९ अलातेति । अलातमुल्मुकम् । तद्यदा चक्रवद्भ्राम्यते तदा वस्तुतस्तत्प्रतिक्षणमेकैकदिक्संयुक्तमपि सर्वदिक्संयुक्तमिव वर्तुलाकारं दृश्यते । तत्र पूर्वोत्तरकालभाविनोस्तत्तत्प्रदेशविशेषालातसंयोगयोरन्तरालं क्रमस्तदग्रहणाच्चक्रवत्प्रतीतिर्भवतीत्यर्थः ।

—१० चक्रप्रतीतावपि । वस्तुतश्चक्रप्रतीतावपि । वास्तविकचक्रेऽपि या वर्तुलाकारा प्रतीतिर्भवति साऽन्तरालाग्रहणादेव । इयांस्तु विशेषः–वास्तविकचक्रे चक्रस्य वस्तुतः सर्वदिक्संयुक्तत्वेनान्तरालाभावादेव तदग्रहणम् । अलातचक्रे त्वन्तरालसत्त्वेऽपि शैघ्र्यात्तदग्रहणमिति ।

—१५ तथा प्रतीतिरिति । दर्पणमुखयोर्यदन्तरालं तदग्रहणात्स्वमुखस्यैवाभिमुख्येन प्रतीतिरित्यर्थः ।

९९–१६–७ अस्यां दिशीति । पूर्वदिशः पश्चिमदिक्त्वेन ज्ञानमपि यथार्थमेव । पूर्वदिशि पश्चिमदिगंशस्य वस्तुतः सत्त्वात् । वस्तुतो दिश एकत्वात् । दिग्भेदस्यौपाधिकत्वात् । यो ग्रामस्तत्पश्चिमदिक्स्थैः पूर्वदिक्स्थ इति व्यवह्रियते स एव तत्पूर्वदिक्स्थैः पश्चिमदिक्स्थ इति व्यवह्रियते । एवं सर्वदिक्षु बोध्यम् । गृह्यत इति । अत्र पूर्वदिशः पश्चिमदिगुपाधिदूरत्वाज्ञानं कारणं बोध्यम् ।

—१९ अङ्गुल्यवष्टम्भः । अङ्गुल्या नेत्रनिरोधः । तिमिरः । नेत्ररोगः । तेजोगतीति । तेजोगतिरेव चन्द्रग्रहणसामग्री । सा च द्विधा । एका स्वाभाविकी ऋजुः । द्वितीया त्वङ्गुलीनिरोधादिमूलिका वक्रभूता ।

१००–३–४ ननु तथापि कथं चन्द्रद्वयप्रतीतिरत आह–अत इति । ग्रहणभेदेन ग्राह्याकारभेदात् । ज्ञानभेदेन ज्ञेयाकारभेदात् ।

—५–६ देशान्तरस्थेति । यत्र देशे चन्द्रस्तिष्ठति स प्रथमः । तत्समीपो देशो द्वितीयः । तत्र द्वितीयस्य यद्यपि चन्द्राधिकरणतया चन्द्रविशेषणत्वं न युज्यते तथापि तयोर्देशयोरन्तराग्रहणेन तत्सुलभम् । विशेषणत्वं हि निरन्तरभातत्वमेव । देशान्तरस्य । द्वितीयदेशस्य । अगृहीतस्वदेशचन्द्रस्य । चन्द्राधिकरणत्वेनाज्ञातस्य प्रथमदेशस्य । द्वितीयसामग्र्या चन्द्रस्य प्रथमदेशस्थत्वेनाग्रहणात् । अत एव तया द्वितीयसामग्र्या चन्द्रस्य द्वितीयदेशस्थत्वेन ग्रहणम् ।

—८ ग्राह्याकारद्वित्वम् । निरन्तरभातदेशद्वित्वम् ।

—९ तत्र विशेषणेति । 'यद्देशद्वयसंबन्धिचन्द्रज्ञानद्वयं तदेकचन्द्रज्ञानमेव' इति निश्चयः केवलचक्षुषा कर्तुं न शक्यते किं त्वङ्गुलीनिरोधादिरहितेनैव । यथा 'सोऽयं देवदत्तः' इति प्रत्यभिज्ञा केवलचक्षुषा न जायते किं तु पूर्वानुभवजन्यसंस्कारसहितेनैव तद्वदिति भावः ।

—११ नन्वेकसामग्रीभूतयोश्चक्षुषोः कथं द्विसामग्रीत्वमित्यत आह–द्वयोरिति । स्वतो निर्दोषस्येन्द्रियस्य यथा कार्यानुरोधेन सदोषत्वं कल्प्यते तथा तदनुरोधेन सामग्रीद्वित्वमपि कल्प्यत इति भावः ।

१०१–२–४ क्षेत्रज्ञेति । क्षेत्रज्ञो जीवस्तस्य पुण्यपापयोरनुरूपमित्यर्थः । अखिलमिति । तथा च श्रुतिः 'इदं सर्वमसृजत, यदिदं किं च' (तै. २।६।१) इति । सुखेति । सुखदुःखोपेक्षारूपफलत्रयस्य योऽनुभवस्तद्विषया इत्यर्थः । केचनेति । उत्तरान्वयि । स्वप्नस्थाः पदार्था इत्यर्थः । क्वचित्केचन क्वचनेति पाठः । तत्राद्यं पूर्वान्वयि ।

—६ सर्वेति । सर्वानुभवविषयभूतं बाधकं तद्रहितत्वाच्छुक्तिरजतादि स्वप्नस्थरथादि च बाध्यम् । न ह्येकपुरुषानुभवविषयत्वेन तत्तत्कालावसायित्वेन वा

वस्तु मिथ्या भवति। तत्तत्पुरुषानुभाव्यानां सुखादीनां विद्युत्पातादीनां क्षणिकानां च मिथ्यात्वादर्शनादिति भावः।

१०१—११ **कर्मवाचि**। पुण्यकर्मवाचि। ऋतं पिबन्ताविति श्रुतौ सुकृतस्य लोक इत्युक्तत्वात्। न तु सत्यवाचि।

—१२ **परमेति**। परमपुरुषाराधनमेव वेषः स्वरूपं यस्येत्यर्थः। परमपुरुषाराधनविषयमिति वा पाठः।

—१५ **नासदिति**। तदानीं प्रलयकाले सच्चिद्यष्टिर्नासीत्। तथाऽसदचिद्यष्टिर्नासीत्किं तु तत्सर्वं तमस्यचित्समष्टौ लीनमित्यर्थः। 'सच्च त्यच्चाभवत्' (तै. २।६।१) इत्युत्पत्तिप्रतिपादकवाक्ये सच्छब्देन चिद्यष्टेस्त्यच्छब्देन चाचिद्यष्टेरुत्पत्तिप्रतिपादनादत्र तस्यैव लयो बोध्यत इति नात्र सदसदनिर्वचनीयमज्ञानं प्रतीयत इति भावः।

—२० **सदसतोरिति**। नासदासीदिति श्रुत्या प्रलयकाले सदसतोरसद्भाव एवोच्यत इत्यर्थः।

—२३ शङ्कते—**सत्यमिति**।

१०२—३ पुनः शङ्कते—**मायाशब्दस्य मिथ्येति**। ऐन्द्रजालिकादिषु मायाविशब्दप्रयोगदर्शनान्मायामिथ्याशब्दयोः पर्यायत्वादनिर्वाच्यस्य मिथ्यात्वाच्च मायाशब्दवाच्यत्वमित्यभिप्रायः।

—४ **सर्वत्र**। क्वापि।

—६ **तेनेति**। बालस्य प्रह्लादस्य देहं रक्षताशुगामिना तेन विष्णुचक्रेण शम्बरस्य प्रह्लादनाशार्थं हिरण्यकशिपुप्रेषितस्य शम्बरनामकदैत्यस्य तन्मायासहस्रमेकैकांशेन स्वीयैकैकावयवेन सूदितं नाशितमित्यर्थः। अत्र न मायाशब्दस्यानिर्वचनीयार्थकत्वम्। तस्य ज्ञानबाध्यस्य शस्त्रच्छेद्यत्वासंभवात्। न हि रज्जुसर्पः शस्त्रच्छेद्यः।

—११ **अस्मात्**। प्रकृताक्षरात्। **मायी**। ईश्वरः। **अन्यः**। जीवः।

—१३ ननूक्तश्रुतौ 'मायी' इति शब्देन भगवतोऽपि मायावश्यत्वं प्राप्तमिति चेत्तत्राह—**परमपुरुषस्य चेति**। **तद्वत्तामात्रेण**। केवलेन मायासंबन्धेन। न तु मायया तिरोभाव्यत्वेन।

—१८ **अभिधीयन्त इति**। मायाभिरिति बहुवचनं चास्मिन्नर्थे स्वरसतः संगच्छते।

१०३—१ अथानिर्वचनीयाज्ञानसाधकार्थापत्तिप्रमाणं दूषयति—**नापीति**। जीवपरयोर्वस्तुतो भेदे तत्त्वमसीति तयोरैक्योपदेशो न संभवतीत्यतो भेदस्य काल्पनिकत्वमेव वाच्यम्। तदन्यथानुपपत्त्या तादृशभेदज्ञानजनकत्वेनानिर्वच-

नीयाज्ञानं सिध्यतीति पूर्वपक्ष्याशयः । ऐक्योपदेशानुपपत्त्याप्यनिर्वचनीयाज्ञानं न सिध्यतीत्यर्थः ।

१०३—५ उपपन्नतरः । युक्ततरः ।

—७ परमात्मपर्यन्तस्यैवेति । न तु परमात्मसंबन्धरहितस्येत्यर्थः ।

—१०-२२ ज्योतींषि विष्णुरिति ।

ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।

नद्यः समुद्राश्च स एव सर्वो यदस्ति यन्नास्ति च विप्रवर्य ॥

यदस्ति यन्नास्ति, भावरूपेणाभावरूपेण च यत्प्रतीतमित्यर्थः । ज्ञानैकेति । ज्ञानैकस्वरूपस्य ब्रह्मणो यदज्ञानं तद्विजृम्भितत्वमित्यर्थः । ज्ञानस्वरूप इति श्लोके विज्ञानशब्दः करणसाधनः । विविधं विपरीतं वा ज्ञायतेऽनेनेति विज्ञानमविद्येत्यर्थः । वस्त्वस्ति किमिति ।

वस्त्वस्ति किं कुत्रचिदादिमध्यपर्यन्तहीनं सततैकरूपम् ।

यच्चान्यथात्वं द्विज याति भूयो न तत्तथा कुत्र कुतो हि तत्त्वम् ॥

अनेन श्लोकेनार्थस्वभाव उक्तः ।

मही घटत्वं घटतः कपालिका कपालिकाचूर्णरजस्ततोऽणवः ।

जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥

अनेन श्लोकेन पूर्वश्लोकोक्तस्वभावस्योदाहरणं दर्शितम् । अवशिष्टाः श्लोकाः प्राक् (श्रीभाष्य-पृ. १६) द्रष्टव्याः । तस्मान्न विज्ञानमिति श्लोके पूर्वार्धेन विजातीयभेदाभाव उत्तरार्धेन च सजातीयभेदाभावः सूचितः । ज्ञानं विशुद्धमिति श्लोके पूर्वार्धेन स्वगतभेदाभावः सूचितः । उत्तरार्धेन च त्रिविधभेदाभावोनूद्यते ।

१०४-५-६ अत्र । विष्णुपुराणे द्वितीयांशे । विस्तीर्णमिति । उत्तरत्र मिथ्यात्वं विवक्षितं चेत्पूर्वं विस्तरेण कथनं नोपपद्यते । न हि पूर्वमेव भ्रान्तस्य भ्रमान्तरापादनं कर्तुं युज्यते । स्वरूपम् । स्थूलं परस्परसंसृष्टं च । रूपान्तरम् । सूक्ष्मं परस्परवियुक्तं च ।

—९ परिणामभेद इति । परिणामित्वमेव नास्तिशब्दवाच्यम् । असत्यादिशब्दानामप्ययमेवार्थो न तु ज्ञानबाध्य इति ।

—१० उभयमिति । चिद्रूपमचिद्रूपं च स्थूलं सूक्ष्मं च परस्परसंसृष्टमसंसृष्टं चेत्यर्थः । असंसृष्टस्यापि भगवच्छरीरत्वेन मुक्तावस्थायामपि जीवस्य भगवच्छरीरत्वसिद्धिः ।

—१२-७ यदिति । विष्णोर्यज्जलरूपं शरीरं तस्मात्सर्वा पृथ्वी समुत्पन्नेत्यर्थः । तथा च प्रकृतिभूतजलस्य विष्णुशरीरत्वे तद्विकारभूतपृथिव्या अपि विष्णुशरीरत्वमेवोचितं न तु तत्स्वरूपैक्यम् । न हि बाल्ये चेतनशरीरभूतस्य

वस्तुनोऽवस्थान्तरे चेतनेन स्वरूपैक्यं भवतीति भावः। उपबृंहणरूपस्येति। उपबृंहणं नाम सर्वश्रुतिषु प्रतिपादितस्य तादात्म्यस्य शरीरशरीरिभाव एव तात्पर्यमिति ज्ञापनम्। ज्योतींषि विष्णुरिति। अयं श्लोकः प्राक् (विवृति–पृ. ९१) दृश्यः। अत्र पादत्रयेण व्यष्टयवस्थयोः परस्परसंसृष्टयोश्चिदचितोर्भगवदात्मकत्वमुक्तम्। चतुर्थपादेन तु परस्परासंसृष्टयोरपि तयोस्तदात्मकत्वमुक्तम्। तदात्मकत्वं तु तच्छरीरत्वेनैव। यदस्तु वैष्णवः काय इत्युक्तत्वात्।

१०५–६ ज्ञानस्वरूप इति। अयं श्लोकः प्राक् (श्रीभाष्य–पृ. १६. प. १३) दृश्यः।

—७ अशेषक्षेत्रज्ञेति। श्लोकेऽशेषशब्देन चिदंशो जीव एव गृह्यते न त्वचिदंशः। अशेषमूर्तिर्ज्ञानस्वरूप इत्युक्तत्वात्। अचिदंशस्य ज्ञानस्वरूपत्वाभावात्। न चाशेषशब्देन जीवस्य विवक्षितत्वेऽप्यशेषमूर्तिरिति बहुव्रीह्यर्थस्य चिदचिदुभयशरीरकस्य ज्ञानस्वरूपत्वाभावः। चिदंशस्य तथात्वेऽप्यचिदंशस्यातथात्वादिति वाच्यम्। ज्ञानस्वरूपत्वस्य जीवविशिष्टे विशेष्येऽसंभवेन विशेषणीभूते जीव एव पर्यवसानात्। ' विधिप्रतिषेधौ विशेषणे पर्यवस्यतः सति विशेष्ये बाधे ' इति न्यायात्। लोहितोष्णीषा ऋत्विजः प्रचरन्तीतिवत्।

—८ न तु वस्तुभूत इत्यस्यार्थमाह–न देवेति।

—१४ यदा त्विति। अयं श्लोकः प्राक् (श्रीभाष्य–पृ. १६ प. १५) दृश्यः।

—१६–७ निर्दोषम्। शरीरसंबन्धरहितम्। परिशुद्धम्। तत्कृतरागद्वेषसुखदुःखादिरहितम्। निजरूपि। आविर्भूतस्वरूपम्। संकल्पतरोरिति व्याचष्टे–देवादीति। एकीकृत्य कल्पनं हि संकल्पः। समित्यस्यैकीकरणमर्थः। देवाद्याकारेण। अचिदंशेन।

१०६–६ वस्त्वस्ति किमिति। अयं श्लोकः प्राक् (विवृति–पृ. ९१) दृश्यः।

—९ तथाभूतम्। नास्तिबुद्ध्यनर्हम्। श्लोकस्थस्य कुत्र कुतो हि तत्त्वमित्यस्य 'अचिद्रूपे कस्मिन्वस्तुनि कस्मात्पूर्वावस्था दृश्यते, किं तु क्वापि नास्ति' इत्यर्थः।

—१४ मही घटत्वमिति। अयं श्लोकः प्राक् (विवृति–पृ. ९१) दृश्यः।

—१५ देवमनुष्यादिभावेन। देवादिदेहसंसर्गेण।

—१९–२० यस्मादेवं तस्मादिति। परिणामित्वादेव न तु ज्ञानबाध्यत्वादित्यर्थः। केवलेति। अचिद्वस्तुनि योऽस्तिशब्दः स सोपाधिकः। इदानीमस्मिन्देशे घटोऽस्तीत्यादि। निरुपाधिकास्तिशब्दस्तु भगवत्येवेत्यर्थः। तस्मादेति। अयं श्लोकः प्राक् (श्रीभाष्य–पृ. १६ प. १८) दृश्यः।

–२१–१०७–१ श्लोकस्यैकशब्दं व्याचष्टे–ज्ञानैकेति। एको व्रीहिः सुनिष्पन्नः सुपुष्टं कुरुते जनमितिवदेकशब्द आकारैक्यपरः। बहुधाभ्युपेतमिति प्रकारार्थधाप्रत्ययान्तबहुधाशब्दोपादानेन वस्तुत एकाकारत्वस्यैव प्रतीतेः। स चाकारोत्र ज्ञानमेव। भेदेति। एकस्वरूपत्वाद्भेदप्रत्यनीकत्वम्।

१०७–५ ज्ञानं विशुद्धमिति प्रागुक्त–(श्रीभाष्य–पृ. १६ प. २०) श्लोकं व्याचष्टे–आत्मस्वरूपमिति।

विमलपदार्थमाह–मलरूपेति। मलरूपो यः प्रकृतिस्पर्शस्तद्रहितमित्यर्थः।

—६ उपचयेति। उपचयो वृद्धिः। अपचयः क्षयः। तदनर्हत्वं च निरवयवत्वात्। निरवयवत्वमेव चैकत्वमित्याशयः। एषु ज्ञानस्वरूपमित्यादिषट्श्लोकेष्वाद्यं श्लोकद्वयं चिदचित्साधारणम्। वस्त्वित्यादि सार्धश्लोकद्वयमचिदसाधारणम्। विज्ञानमित्यादिसार्धश्लोकश्चिदसाधारण इति बोध्यम्।

—१० सद्भाव इति प्रागुक्त–(श्रीभाष्य–पृ. १७ प. १) श्लोकं व्याचष्टे–चिदंश इति। श्लोकस्थयथाशब्दस्य येन प्रकारेण परिणामित्वापरिणामित्वरूपेणेत्यर्थः। न तु ज्ञानबाध्यत्वाबाध्यत्वरूपेणेति।

—१५–६ ज्ञानैकाकारतया सममिति। प्रत्यस्तमितभेदमित्युक्तत्वात्। अशब्दगोचरस्वरूपभेदमिति। वचसामगोचरमित्युक्तत्वात्। एवशब्दो विरोधद्योतकः। वस्तुत एवंरूपमपि कर्मणा विपरीतं भवतीत्यर्थः। भुवनाश्रितम्। अण्डान्तर्गतम्। भोगस्थानगतमित्यर्थः।

—१९ यज्ञः पशुरिति।

यज्ञः पशुर्वह्निरशेषऋत्विक्संवत्सराः स्वर्गमयश्च कामः।
इत्यादिकर्माश्रितमार्गदृष्टं भूरादिभोगाश्च फलानि तेषाम्॥

स्वर्गमयः कामः। स्वर्गविषयकेच्छा। आश्रितमार्गदृष्टम्। तैस्तैराश्रिता मार्गा वर्णाश्रमास्तेषु दृष्टमिति कर्मविशेषणम्।

—२० जगदिति। मोक्षोपायविषयको यत्न एव जगद्याथार्थ्यज्ञानस्य प्रयोजनमित्यर्थः। यश्चैतदिति।

यश्चैतद्भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि कर्मवश्य एकः।
ज्ञात्वैकं ध्रुवमचलं सदैकरूपं तत्कुर्याद्विशति हि येन वासुदेवम्॥

सदैकरूपम्। स्वरूपतो गुणतो रूपतश्चैकरूपम्।

१०८–१ अथैषां श्लोकानां परोक्तार्थाननुगुणत्वमुपपादयति–अत्रेति। तदाश्रय इति। बहुव्रीहिः।

—३ नन्वस्तिनास्त्यादिशब्दाः सामानाधिकरण्यं चानुगुणमिति चेत्तत्राह–अस्तिनास्तिशब्देति।

१०८-६-८ अस्तिनास्तिसत्येति । प्रथमश्चशब्दो हेतौ । द्वितीयः समुच्चये । अस्तिसत्यशब्दयोरुपादानं दृष्टान्तार्थम् । यथास्तिसत्यशब्दौ न सद्विलक्षणपरौ तथा नास्त्यसत्यशब्दावपि नासद्विलक्षणपरावित्यर्थः ।

—१३ ननु विनाशित्वमेव मिथ्यात्वमिति चेत्तत्राह—एकेनेति ।

—१९ अतो नेति । घटादेः प्रमाणसंबन्धार्हत्वेन तुच्छत्वाभावादस्तीत्युपलब्धिविषयस्य च तस्य घटादेस्तद्देशतत्कालसंबन्धित्वेन नास्तीत्युपलब्धेरभावाच्च न मिथ्यात्वमिति भावः ।

एतदुक्तमिति । सदैकरूपत्वमस्तिशब्दप्रवृत्तिनिमित्तम् । अस्तिशब्दो ह्यवधारणगर्भः । अब्भक्ष इतिवत् । विनाशगर्भत्वं च नास्तिशब्दप्रवृत्तिनिमित्तम् । घटावस्थायां पिण्डो नास्ति कपालावस्थायां घटो नास्ति चूर्णावस्थायां न कपालस्य घटस्य च सत्तेति सदा नाशगर्भत्वम् ।

१०९-७ तत्त्विति । समिदाज्यकुशादिभिर्विनाशिद्रव्यैरुपपादितं तत्स्वर्गादिकं विनाश्येव, तत्र न संदेह इत्यर्थः ।

—९-१० कर्मविशेषेति । पालनादिकर्मकृद्राजास्तीति व्यवह्रियते । स एव तेन कर्मणा रहितो नास्तीति व्यवह्रियत इत्याशयः । केवलास्तिबुद्धिः । देशकालाद्युपाधिरहितास्तिबुद्धिः ।

—१४-६ परमार्थश्चेति । प्रधानत इति सार्वविभक्तिकस्तसिः । प्रधानमित्यर्थः । ज्ञानमेव प्रधानमिति परमार्थो मम प्रोक्त इत्यर्थः । ज्ञानस्य कर्मनिमित्तकत्वाभावेन स्वाभाविकस्वरूपत्वात्प्राधान्यम् । अनुभाषणम् । अनुवादः ।

११०-१ अथ पूर्वोक्तसप्तविधानुपपत्तिमध्ये षष्ठीं निवर्तकानुपपत्तिं प्रदर्शयति—यदुक्तमिति ।

—२-६ ज्ञानस्य निर्विशेषविषयत्वं खण्डयितुं सविशेषवाक्यानि दर्शयति—वेदाहमिति । एवम् । उक्तगुणविशिष्टम् । सर्व इति । निमेषः सूक्ष्मकालः । विद्युतो विद्युद्वर्णात्पुरुषात्सर्वे निमेषा अधिजज्ञिरे समुत्पन्ना इत्यर्थः । न तस्येति । कश्चन पुरुषस्तस्य परमात्मनो नेशे नियन्तुं न समर्थः । अत एव तस्य परमात्मनो महद्यश इति नाम संपन्नम् । अत्यन्तस्वतन्त्रत्वेन तदीययशसोऽभ्यधिकत्वादित्यर्थः ।

—८ सर्वाण्यपि । सदेव सोम्य, एकमेवाद्वितीयमित्यादीनि कारणवाक्यानि ।

—९ शोधकेति । यत्तदद्देश्यं, तस्मिन्यदन्तस्तदन्वेष्टव्यमित्यादीनि ।

—९-१० ननु तत्त्वमसीति वाक्यप्रतिपादितसामानाधिकरण्यान्यथानुपपत्त्या निर्विशेषवस्तुसिद्धिरिति चेत्तत्राह—तत्त्वमसीति ।

११०—१३ ननु सर्वज्ञत्वाज्ञत्वादिविरोधात्तत्त्वंपदयोः स्वरूपमात्रपरत्वमिति चेत्तत्राह–तत्समानेति । सद्वारकत्वादविरोध इति भावः ।

—१५ प्रकारद्वयावस्थितेति । यथा नीलो घट इति । अत्र ह्येकमेव घटरूपं वस्तु नीलगुणविशिष्टत्वेन घटत्वजातिविशिष्टत्वेन चावस्थितम् ।

—१७ लक्षणा चेति । सर्वज्ञत्वादिविशिष्टार्थवाचकतत्पदस्य किंचिज्ज्ञत्वादिविशिष्टार्थवाचकत्वंपदस्य च केवलचिद्रूपेर्थे लक्षणेति परैरुक्तत्वात्तेषां लक्षणारूपो दोषो नास्माकमित्याशयः ।

ननु सोऽयं देवदत्त इत्यादिप्रत्यभिज्ञावाक्ये लक्षणा स्वीकृतैवेति चेत्तत्राह–सोऽयमिति ।

—१८ भूतेति । यथा शूरोऽस्माकं राजेत्यादौ राज्ञेव शूरत्वं प्रतीयते न तद्विशेषणीभूतास्मदादिष्विति केवलराज्ञ एव शूर इति विशेषणं न विशेषणविशिष्टस्य तथात्र न वर्तमानकालविशिष्टे देवदत्ते भूतकालविशिष्टत्वविशेषणं किं तु केवले देवदत्त एवेति न विरोध इति भावः ।

दशभेदेति । न हि किंचित्कालविशिष्टे भिन्नदेशद्वयान्वयः । येनैकस्यैकदा भिन्नदेशद्वयासंभवेन विरोधः स्यात् । किं तु केवले देवदत्त एव । तथा च कालभेदेन भिन्नदेशसंबन्धः संभवत्येवेति देशभेदविरोधः परिहृत इत्याशयः ।

—१९ तदैक्षतेति । अस्मिन्नुपक्रमवाक्ये (छा. ६।२।३) बहु स्यामिति सर्वज्ञत्वसर्वशक्तित्वादिप्रकारनानात्वं प्रतिपाद्यते । तथा च 'तत्त्वमसि' (छा. ६।८।७) इति वाक्यस्य निर्विशेषवस्त्वैक्यप्रतिपादकत्व उपक्रमविरोधः स्पष्ट एव ।

—२०–१ न घटत इति । सूक्ष्मावस्थचिदचिद्विशिष्टं कारणं तदेव स्थूलावस्थचिदचिद्विशिष्टं कार्यमिति कारणज्ञानेन कार्यज्ञानात्प्रतिज्ञा सिध्यति । मृषावादिनस्तु सर्वस्य जगतो मिथ्यात्वेन ज्ञानविषयत्वायोगात्प्रतिज्ञा न सिध्यतीत्याशयः ।

—२१ श्रुत्यन्तरविरोधमाह–ज्ञानस्वरूपस्येति ।

१११–१–२ ननु यथा रज्जुः सर्प इत्यत्र सर्पत्वस्य बाधार्थं तयोः सामानाधिकरण्यं तथा तत्त्वमसीत्यत्रापि जीवत्वस्य बाधार्थमेव सामानाधिकरण्यमिति चेत्तत्राह–बाधार्थत्वे चेति । बाधार्थत्वे हि तत्पदस्याधिष्ठानमात्रे लक्षणा त्वंपदस्य च जीवत्वनिवृत्तौ लक्षणा कल्पनीया स्यादिति भावः । लक्षणादय इति । आदिशब्देन प्रागुक्तसामानाधिकरण्यस्वरूपस्य त्यागो बहु स्यामित्युपक्रमविरोध इत्यादिप्रागुक्तदूषणसंग्रहः ।

—२–४ अथ तत्त्वमसीति सामानाधिकरण्यस्य रज्जुः सर्प इत्यत्रेव बाधार्थत्वे

रज्जुः सर्प इत्यपेक्षयाऽधिकं दोषान्तरमाह–इयानिति । शुक्तिरजतस्थले नेदं रजतमिति बाधस्य प्रमाणान्तरेण ज्ञातत्वाद्बाधकल्पनम् । तत्त्वमसीत्यत्र तु नायं जीव इति बाधस्य प्रमाणान्तरेणाज्ञातत्वेऽपि स्वमतसिद्धये तत्कल्पनमित्येको दोषः । किं च यथा शुक्तिरजतस्थले रजतत्वबाधप्रयोजकीभूतस्य रजतत्वविरुद्धस्य शुक्तित्वधर्मस्य शुक्तिशब्दादुपस्थितिस्तथा तत्त्वमसीत्यत्र तच्छब्दस्य केवलाधिष्ठानमात्रलक्षकत्वेन ततो जीवत्वविरुद्धस्य कस्यापि धर्मस्य नोपस्थितिरिति जीवत्वस्य बाधो न स्यादित्यपरो दोषः ।

१११–५ शङ्कते–अधिष्ठानं त्विति । अतिरोहितस्वरूपम् । अनाच्छादितस्वरूपम् । एतदेव जीवत्वविरुद्धं जीवत्वबाधस्य प्रयोजकमित्याशयः ।

—७ पुनः शङ्कते—भ्रमाश्रयमिति ।

—८ भ्रमविरोधीति । तस्य भ्रमविरोधित्वे तु कदापि भ्रमोच्छेदो न स्यात् ।

—९ पारमार्थिकधर्मेति । यथा रज्जुत्वरूपेण पारमार्थिकेन धर्मेण सर्पबाधः । तादृशधर्मस्य तिरोधाने सर्पभ्रान्तिः । पारमार्थिकधर्मश्च पारमार्थिकत्वेन ज्ञातो धर्मः । कदाचिदपारमार्थिकेनापि पारमार्थिकतया ज्ञातेन भूदलनादिना सर्पबाधदर्शनात् । न चैवं ब्रह्मण्यपि पारमार्थिकतया ज्ञातेन केनचिदपारमार्थिकेन कल्पितेन धर्मेण प्रपञ्चबाधः स्यादिति वाच्यम् । तादृशकल्पितधर्मस्य बाधार्थमन्यस्य कल्पनायामनवस्थानात् । बाधकधर्मस्य पारमार्थिकत्वे तु ब्रह्मणः सविशेषत्वं दुर्वारम् ।

—१० दुरुपपादाविति । पारमार्थिको धर्म एव प्रकाशितः सन्बाधं प्रयोजयत्प्रकाशितश्च भ्रान्तिं प्रयोजयतीति भावः ।

एतदेव दृष्टान्तेन विशदयति–अधिष्ठाने हीति ।

—१५ अथ स्वपक्ष इमानि दूषणानि न सन्तीत्याह–जीवशरीरकेति ।

—२३ श्रुत्यन्तराविरोध इति । निर्विशेषब्रह्मवादिनस्तु स्यादेव विरोध इत्याशयः ।

११२–१ ननु सिद्धान्ते तत्त्वमसीत्यत्रोद्देश्यविधेयभावो न संभवति । तथा हि । तत्पदं नोद्देश्यार्थप्रतिपादकम् । तच्छब्दस्य सर्वज्ञत्वादिगुणविशिष्टब्रह्मवाचकत्वेन तादृशब्रह्मणः प्रत्यक्षत्वाभावात् । एवं त्वंपदमपि नोद्देश्यार्थप्रतिपादकम् । तदर्थस्याप्यचिद्विशिष्टजीवशरीरकब्रह्मणः प्रत्यक्षत्वाभावात् । मिथ्यावादिनो मम मते तु प्रत्यक्षसिद्धं जीवमात्रं त्वंशब्देनोद्दिश्य तत्पदेन तस्य ब्रह्मभावो विधीयत इत्युद्देश्यविधेयभावः संभवति । तथा चागत्या निर्विशेषवस्तु स्वीकार्यमेवेत्याशयेनाशङ्कते–तत्त्वमसीति । उपादेयं विधेयम् ।

११२-२ **ऐतदात्म्यम्** । एतद्ब्रह्मात्मा शरीरी यस्य तदेतदात्म तदेवैतदात्म्यम् । स्वार्थे ष्यञ् ।

—४ **सजीवमिति** । सर्वशब्दश्चिदचित्परः । विना प्रमाणं संकोचे मानाभावात्सर्वाः प्रजा इति पूर्ववाक्यानुगुण्याच्च ।

—६ **सन्मूला इति** । अनेन सर्वप्रजानां ब्रह्मजत्वमुक्तम् । **सदायतना इति** । अनेनाधाराधेयभाव उक्तः । तेन शरीरशरीरिभावः सिद्धः । एतेनैतदात्म्यमित्यस्य मृदात्मको घट इतिवत्तात्पर्यमित्यपास्तम् । **सत्प्रतिष्ठा इति** । अनेन सर्वप्रजानां ब्रह्मण्येव लय इत्युक्तम् ।

—७ **तज्जलानिति** । तस्माद्ब्रह्मणो जायते तत्रैव लीयते तत्रैवानिति चेष्टते चेत्यर्थः । अत्रानितीत्यनेन सदायतनत्वं फलितम् ।

—१०-१६ **अन्तः प्रविष्ट इति** । अनेन शरीरशरीरिभावः फलितः । अन्तः प्रविश्य नियाम्यत्वमेव हि शरीरत्वम् । **य आत्मनीति** । अनेन परिशुद्धात्मनो भगवच्छरीरत्वमुच्यते । अचित्संसृष्टजीवस्य भगवच्छरीरत्वं तु य आदित्ये तिष्ठन्नित्यादिश्रुतित एव सिध्यति । **मृत्युः** । तमःशब्दवाच्या प्रकृतिः । एवं श्रुत्यन्तरानुरोधेनैतदात्म्यशब्दार्थो निश्चितः ।

—१८-२० छान्दोग्य एव पूर्वश्रुत्यनुसारेणायमर्थो निश्चीयत इत्याह- **अत्रापीति** । **जीवेनात्मना** । जीवशरीरकेण मया । **ब्रह्मात्मकेति** । ब्रह्मात्मान्तर्यामी यस्य तादृशजीवानुप्रवेशेनेत्यर्थः । नामरूपे इति पदं व्याचष्टे- **वस्तुत्वं शब्दवाच्यत्वं चेति** । तत्तद्देवादिवस्तुत्वं देवादिशब्दवाच्यत्वं चेत्यर्थः । देवादिशब्दानां देवादिशरीरकब्रह्मवाचकत्वात् । एतेन नामरूपयोर्निर्वहितेति श्रुतिप्रतिपादितं ब्रह्मणो नामनिर्वाहकत्वं व्याख्यातम् ।

११३-२ **तत्पर्यन्तमेवेति** । यथा गुणवाचकोऽपि शुक्लादिशब्दो गुणिपर्यन्तमर्थमभिदधाति तथेत्यर्थः ।

—५ **उपसंहार इति** । तथा च तत्त्वमसीत्यत्र न किंचिदुद्दिश्य किमपि विधीयते । किं त्वैतदात्म्यमिति श्रुतौ वैयधिकरण्येन प्राक्प्रतिपादितस्य जगद्ब्रह्मणोः शरीरशरीरिभावस्य सामानाधिकरण्यप्रतिपादनद्वारोपसंहारः क्रियते । आत्मोपदेशो हि द्विधा । क्वचिद्वैयधिकरण्येन । यथा-अस्यैष आत्मा, ऐतदात्म्यमिदं सर्वमित्यादि । क्वचित्सामानाधिकरण्येन । यथेदं सर्वं यदयमात्मा, तत्त्वमसीत्यादि । द्विविधोऽप्ययमुपदेशः शरीरशरीरिभावे स्वीकृते संगच्छते । लोके तथाविधस्थले देवदत्तो गौरो देवदत्तस्य शरीरमिति द्विविधव्यवहारस्य दृष्टत्वात् ।

—६ **भेदाभेदवादिनः** । औपाधिको भेदो वास्तविकस्त्वभेद इतिवादिनो भेदश्चाभेदश्चेति द्वयमपि वास्तविकमेवेतिवादिनश्चेत्यर्थः ।

११३-९ तत्रादौ निर्विशेषवस्त्वैक्यवादिनः सर्वमिथ्यात्ववादिनो मत उपदेशासंगतिं दर्शयति-एकस्मिन्निति।

—९-१० शङ्कते-तस्यैवेति। स्ववाक्येन। सत्यं ज्ञानमित्यादिना स्वरूपप्रतिपादकवाक्येन। तत्त्वमसीत्याद्युपदेशेन स्वरूपवाक्यादधिकं किंचिदुच्यते न वा। आद्ये वस्तुनः सविशेषत्वापत्तिः। अन्त्य उपदेशवैयर्थ्यमित्याशयः।

—११ पुनः शङ्कते-कल्पितेति। तत्तु नेति। सामानाधिकरण्येन तादात्म्योपदेशावसेयं नेत्यर्थः। सामानाधिकरण्यस्य प्रकारद्वयोपस्थापकत्वादिति भावः।

—१२ प्रत्युतानिष्टमाह-सामानाधिकरण्यमिति।

—१३ अथौपाधिकभेदाभेदवादिनो मत उपदेशासंगतिं दर्शयति-भेदाभेदेति। सर्वज्ञत्वादिगुणविशिष्टस्येश्वरस्य तद्विरुद्धजीवतादात्म्यं न संभवति। अथ कथंचित्तत्स्वीकारे तु ब्रह्मणः सदोषत्वमापद्येतेत्याशयः।

—१७ गुणवदिति। यथा ब्रह्मण ईश्वरांशेन सर्वज्ञत्वादिगुणाः स्वाभाविकास्तथा जीवांशेन दोषा अपि स्वाभाविकाः स्युरित्याशयः।

—२१-११४-१ अथ स्वमत उपदेशसंगतिं दर्शयति-निखिलेति। सम्यक्। मुख्यत्वेन। यथा गो इति जातिशब्दस्य जातिविशिष्टव्यक्तिपर्यन्तमपि शक्तिसत्त्वान्मत्वर्थीयप्रत्ययं विनाप्ययं गौरिति सामानाधिकरण्यं, यथा वा शुक्ल इति गुणशब्दस्य गुणविशिष्टव्यक्तिपर्यन्तमपि शक्तिसत्त्वादयं शुक्ल इति सामानाधिकरण्यं तथा सर्वं खल्विदं ब्रह्मेत्यादौ जगद्वाचिसर्वादिशब्दानां शरीरभूतजगद्विशिष्टब्रह्मपर्यन्तमपि शक्तिसत्त्वादेव सामानाधिकरण्यम्। एवं च यथा गोशुक्लादिशब्दाज्जातिगुणयोर्विशेषणत्वेनैव बोधस्तथा द्रव्यादिवाचकेभ्यो घटपटादिसर्वशब्देभ्यस्तत्तद्द्रव्यादेर्विशेषणतयैव बोधो विशेष्यतया स्वात्मन एवेति बोध्यम्।

११४-४ द्रव्यप्रकारत्वमेवेति। द्रव्यनिरूपितविशेषणत्वमेव। विशेषणत्वमेव तादृशसामानाधिकरण्यस्य बीजं न तु जात्यादि।

—६ प्रकारतयैव पदार्थत्वादिति। यथा गोत्वजातेर्गोपदवाच्यत्वं व्यक्तिविशेषणतयैव तथेत्यर्थः।

—९ परस्परव्यावृत्ता इति। जातेः सामानाधिकरण्यप्रयोजकत्वेऽयं शुक्ल इत्यादौ सामानाधिकरण्यं न स्यात्। गुणस्य तथात्वेऽयं गौरित्यादौ सामानाधिकरण्यं न स्यादित्याशयः।

ननु प्रकारभूतद्रव्यवाचकशब्दानां मत्वर्थीयप्रत्ययनिरपेक्षविशेष्यपर्यन्ताभिधायित्वं न स्वीकर्तुं शक्यम्। दण्डी पुरुष इत्यादौ मत्वर्थीयप्रत्ययं विना सामानाधिकरण्यस्यादृष्टत्वादिति चेत्तत्राह-स्वनिष्ठानामेवेति। न तु प्रकारतयैव

पदार्थभूतानाम् । तथा चापृथक्सिद्धप्रकारवाचकत्वमेव मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्ये प्रयोजकमिति सिद्धम् ।

११४-१३ शङ्कते-यदीति ।

—१८ पश्यन्तीति । तथा च घटादिशब्दा नापृथक्सिद्धप्रकारवाचकाः सहोपलम्भप्रयोजकत्वाभावादिति तेषां केवलद्रव्यादिवाचकत्वमेव नात्मपर्यन्तार्थवाचकत्वमिति सर्वं खल्विदमिति सामानाधिकरण्यं सिद्धान्तिनोऽपि न मुख्यं संभवतीत्याशयः ।

—२१ जात्यादितुल्यमिति । तथा च जात्यादिवच्छरीराण्यप्यात्मनोऽपृथक्सिद्धप्रकारभूतान्येवेति बोध्यम् ।

११५-७ ननु तर्ह्यात्मशरीरयोर्जातिव्यक्त्योरिव कुतो न सहोपलम्भ इत्याशङ्क्य जातिव्यक्तिवैलक्षण्यं दर्शयति-जातिव्यक्त्योरिति । चाक्षुषत्वादिति प्रदर्शनार्थमुक्तम् । एकसामग्रीवेद्यत्वादित्यर्थः ।

—८-९ शङ्कते-पृथग्ग्रहणेति । जातेर्व्यक्त्या सहैव ग्रहणेन तस्या व्यक्तिविशेषणत्वैकस्वरूपतास्तु शरीरस्य तु पृथग्ग्रहणयोग्यस्यात्मना सहैव ग्रहणाभावेन कथमात्मविशेषणत्वैकस्वरूपतेत्याशयः । मा वोच इति । विशेषणतैकस्वभावत्वे न पृथग्ग्रहणायोग्यत्वं प्रयोजकमिति भावः ।

—१० किं तर्हि तत्प्रयोजकमित्याह-तदेकाश्रयत्वेति ।

—११ ननु यदि तदेकाश्रयत्वाद्येवापृथक्विशेषणत्वे प्रयोजकं तर्हि कथं जात्यादावेव सहोपलम्भनियमो न शरीरादाविति चेत्तत्राह-सहोपलम्भेति ।

—१२ यथेति । न ह्यचाक्षुषस्यापि गन्धस्य पृथिवीप्रकारतैकस्वभावत्वं हीयत इति भावः ।

—१८ यद्यपि शरीरग्रहणवेलायां नात्मनश्चक्षुषा ग्रहणमसामर्थ्यात्तथापि शब्दप्रमाणेनोभयोर्युगपद्ग्रहणं भवत्येवेत्याशयेनाह-आत्मप्रकारतयेति । शब्दः । देवमनुष्यादिशब्दः ।

—२० नात्मपर्यन्तता । नात्मपर्यन्तार्थवाचकत्वम् । यथा श्रुतौ यस्य पृथिवी शरीरमित्यादि । लोके च देवदत्तस्येदं शरीरमित्यादि । तथा च शरीरशब्दाच्छरीरस्यात्मप्रकारत्वेन बोधो न भवतीति शरीरस्य प्रकारतैकस्वभावत्वं न सिध्यतीति शङ्कताशयः ।

—२१ पदार्थविवेकेति । यथा व्यक्तेः सकाशाज्जातेः पृथक्त्वेन निरूपणप्रसङ्गे निरूपकैः पुरुषैर्गोत्वादिशब्दैः सा व्यवहियते तथात्मनः सकाशाच्छरीरस्य पृथक्त्वेन निरूपणप्रसङ्गे शरीरशब्देन व्यवहार इति नैतावता शरीरस्य प्रकारतैकस्वभावत्वहानिरिति भावः ।

११६-६ प्रयोग इति। एवं च तत्त्वमसीत्यत्र चिदचिच्छरीरकस्य कारणावस्थस्य तत्पदवाच्यस्य ब्रह्मणः कार्यावस्थस्य च चिदचिच्छरीरकस्य त्वंपदवाच्यस्य ब्रह्मण एकत्वं प्रतिपादितं भवतीति बोध्यम्।

—६-७ पूर्वपक्षिणा स्वमतसाधकत्वेन प्राग्दर्शितं (श्रीभाष्य-पृ. १८ प. १) सूत्रं वाक्यकारवचनं च स्वमतानुगुण्येन योजयति-इदमेवेति। न तु निर्विशेषवस्त्वैक्यरूपम्। प्रागुक्तश्रुतियुक्त्यादिविरोधादिति भावः। आत्मेति त्विति। तुशब्दोऽवधारणे। उपासकेन ब्रह्मात्मत्वेनैवोपास्यं नान्यत्वेन। यतः पूर्वे उपासकास्तथैवाभ्युपगच्छन्ति। तथा च श्रुतिः 'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि' (ऐ. आ. २।२।४।६) इति। किं च 'य आत्मनि तिष्ठन्' इत्यादिशास्त्राणीममर्थमुपासकानविरुद्धत्वेन ग्राहयन्तीति सूत्रार्थः।

—१०-११७-१० अचिदिति। अचिद्वस्तुनो घटादेर्भोग्यत्वेन चिद्वस्तुनो जीवस्य तद्भोक्तृत्वेन परस्य ब्रह्मणश्च तयोरीशितृत्वेन तेषां स्वरूपतो भेदमाहुरित्यर्थः। क्षरमिति। क्षरं विनाशि प्रधानं त्रिगुणात्मकमचिद्रूपं भोग्यम्। हरो जीवात्माऽमृताक्षरस्वरूपो भोक्ता तौ क्षरात्मानावेको देवः परमेश्वर ईशते नियच्छतीत्यर्थः। स इति। आभिः श्रुतिभिरीशत्वेशितव्यत्वपतित्वशेषत्वज्ञत्वाज्ञत्वकर्मवश्यत्वाकर्मवश्यत्वादिभिर्भेदः प्रदर्श्यते। स परमेश्वरः सर्वस्य कारणं करणानामिन्द्रियाणामधिपस्य जीवस्याधिप इत्यर्थः। प्रधानेति। प्रधानक्षेत्रज्ञयोर्भोग्यभोक्त्रोः पतिरित्यर्थः। ज्ञाज्ञाविति। ज्ञ ईश्वरः। अज्ञो जीवः। ईशो नियन्ता। तद्बद्धोऽनीशः। भोक्तेति। जीवो भोक्ताऽचिद्वस्तु भोग्यमिति मत्वा तथा तयोः प्रेरितारं परमेश्वरं च मत्वेत्यर्थः। पृथगिति। अनेन भेदज्ञानस्य मोक्षहेतुत्वं सूचितम्। पृथगात्मानं प्रेरितारं च मत्वेत्यस्य 'भ्राम्यते ब्रह्मचक्रे' इत्यनेन पूर्वेणान्वय इति परेषां व्याख्यानमस्वरसप्रस्तम्। अजाम्। मूलप्रकृतिम्। लोहितशुक्लकृष्णाम्। त्रिगुणात्मिकाम्। अत्र श्रुतौ मुक्तावपि जीवेश्वरयोर्भेदः सूच्यते। वृक्षे। शरीरे। असामर्थ्येन मुह्यमानो जीवः शोचति। यदा सोऽन्यमीशं पश्यत्यस्येशस्य महिमानं च पश्यति तदा वीतशोको भवतीत्यर्थः। अनेन जीवेश्वरयोः स्वतो भेदः सिध्यति।

११७-१३ अहंकार इति। भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव चेति पूर्वार्धोपात्तसप्तकमहंकारश्चेत्यष्टधा प्रकृतिरित्यर्थः। अनेन श्लोकेन 'सर्वभूतानि' इत्युत्तरश्लोकैश्च कारणावस्थायामपि भेदः सिद्धो भवति। मयाध्यक्षेणेत्यनेन स्वभावासंकरश्च सूच्यते।

११८-३ भूतसूक्ष्मम्। कारणावस्थम्।

—७ नन्वेवमस्मान्मायीत्यादिभिर्भेदश्रुतिभिश्चिदचिदीश्वराणां भेदश्चेत्कथमैक्यमिति शङ्कायां घटकश्रुतीः प्रदर्शयति-एवमिति। सर्वावस्थावस्थितयोः। स्थूलसूक्ष्मरूपसर्वावस्थावस्थितयोः।

११८-१९ **इति वचनादिति**। अत्राक्षरस्य तमसि सूक्ष्मावस्थाचिद्वस्तुनि लयबोधनेन तमसोऽक्षरात्परत्वं प्रतीयते। तदनुरोधेन योऽक्षरमन्तर इत्यक्षरात्परत्र यो मृत्युमन्तर इति श्रुतौ तम एव प्रत्येतव्यमिति तम एव मृत्युशब्देनाभिधीयत इति बोध्यम्।

११९-१ एवं भेदश्रुतीर्घटयन्श्रुतीश्च प्रदर्श्य तदविरोधेनैक्यश्रुत्यर्थमाह-**एवं सर्वेति**।

—११-३ **अत्रापीति**। छान्दोग्ये तैत्तिरीयके चेत्यर्थः। **तिस्रो देवताः**। पृथिव्यग्नेजोरूपाः।

—१५ **सच्च त्यच्चेति**। मूर्तं चामूर्तं चेत्यर्थः। **विज्ञानं चाविज्ञानं चेति**। चिद्रूपमचिद्रूपं चेत्यर्थः। अत्र परमात्मैवानुप्रवेशेन चिदचिद्रूपोऽभवदित्युक्त्या परमात्मनश्चिदचिद्रूपं शरीरमिति प्रतीयते। यद्यपि 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति पूर्वोक्तच्छान्दोग्यश्रुतौ चिदचिद्रूपशरीरस्यानुल्लेखस्तथापि तैत्तिरीयकश्रुत्यनुरोधात्तत्र तत्स्वीकार्यम्। अतस्तत्र जीवेनात्मनेति पदद्वयप्रतिपादितं जीवस्य ब्रह्मात्मकत्वं शरीरशरीरिभावमूलकमेव न तु सर्वथैक्यमूलकमिति बोध्यम्।

—१६ तदेवाह-**अनेन जीवेनेति**।

—१९ **एवंभूतमेव**। अनुप्रवेशपूर्वकमेव। बृहदारण्यके सामान्येनोक्तमपि नामरूपव्याकरणमुक्तश्रुत्यनुरोधादनुप्रवेशपूर्वकमेव स्वीकार्यमिति भावः। एतेन जीवानामुत्पत्तिर्न स्वरूपनिष्पत्तिः किं तु नामरूपव्याकरणमेव। तथा जीवानां प्रलयो न स्वरूपनाशः किं तु नामरूपव्याकरणाभाव इति ध्वनितम्।

—२२ अथ सर्वश्रुतीनामस्मिन्नर्थे मुख्यत्वं दर्शयन्नेकविज्ञानेन सर्वविज्ञानप्रतिज्ञामुपपादयति-**अत इति**। विशिष्टं ब्रह्म ह्युभयावस्थमिति भावः।

१२०-२-७ तत्त्वमसीत्यादिसामानाधिकरण्यमुपपादयति-**हन्ताहमिति**। **स्वात्मकेति**। स्वमात्मा यस्येति बहुव्रीहिः। स्वशरीरभूतजीवानुप्रवेशेनेत्यर्थः। **सर्वे वाचका इति**। अचिद्वस्तुवाचका घटादयः शब्दा अचिद्वस्तुविशिष्टपरमात्मवाचकाः। चिद्वस्तुवाचका जीवादयः शब्दाश्चिद्वस्तुविशिष्टपरमात्मवाचकाः। अत एव श्रुतौ नामरूपव्याकरणात्पूर्वमनुप्रवेशकथनम्। घटादिशब्दानां परमात्मपर्यन्तार्थवाचकत्वाभावे तु नामरूपव्याकरणहेतुत्वेन परमात्मानुप्रवेशकथनमसंगतं स्यादिति बोध्यम्। **मुख्यवृत्तमिति**। तथा च निर्विशेषवस्त्वैक्यं न कार्यकारणयोरैक्यप्रतिपादनेन सिध्यति, न चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञया, नापि सामानाधिकरण्येन। ऐक्यप्रतिज्ञासामानाधिकरण्यानामन्यथोपपत्तेः। एवं च कार्यकारणैक्यपराणां श्रुतीनां तयोरेकद्रव्यत्वमेव प्रतिपाद्यं न तु विशिष्टत्वनिषेध इति बोध्यम्।

१२०-९-१० उपादानत्वेऽपि स्वभावासंकरमाह-सूक्ष्मेति । संघातस्य । सूक्ष्मचिद्वस्तुसूक्ष्माचिद्वस्तुब्रह्मौतन्त्रितयसंघातस्य ।

—११ एतदेव दृष्टान्तेन विशदयति-यथा शुक्लेति । ननु संघातस्य कारणत्वे यथा पटादेः कारणप्रदर्शनवेलायां पुरुषात्पृथक्तन्त्वादीनामुल्लेखस्तथा जगतः कारणप्रदर्शनवेलायां सूक्ष्मचिदचितोः कुतो नोल्लेख इति चेन्न । चिदचितोः पुरुषात्पृथक्स्थितियोग्यत्वाभावेन तदुल्लेखस्यानावश्यकत्वात् ।

—१४ तदाह-तन्तूनामिति ।

—१७ तत्प्रकारतयैव । परमात्मविशेषणतयैव । यथा गोत्वजातेर्गोपदवाच्यत्वं व्यक्तिविशेषणतयैव तथेत्यर्थः ।

१२१-२ कार्यतेति । कार्यावस्थचिदचिन्नियमनरूपावस्थान्तरापत्तिरेव ब्रह्मणः कार्यत्वमिति कार्यत्ववादिनीनां श्रुतीनामर्थो बोध्यः ।

—४ अविजिघत्सः । अशनेच्छारहितः ।

—९-१० ज्ञानैकेति । यथा गन्धवत्याः पृथिव्या गन्धेन निरूपणं भवति तथा ज्ञातुरात्मनो ज्ञानेनैव निरूपणं भवतीत्यर्थः । उपपन्नतर इति । यद्यपि ज्ञानमात्रस्वरूपब्रह्मवादिनः परस्याप्ययं वाद उपपन्नस्तथापि तस्य ज्ञातृत्वप्रतिपादकश्रुतिविरोधः । अस्माकं तु ज्ञातृत्वप्रतिपादिकाभिर्ज्ञानस्वरूपताप्रतिपादिकाभिश्च श्रुतिभिरविरोध इत्युपपन्नतर इत्युक्तम् ।

ता उभयविधाः श्रुतीर्दर्शयति-यः सर्वज्ञ इति ।

—१६ ज्ञानस्वरूपतामिति । आवेदयन्तीति संबन्धः ।

—१८-२१ अथ भेदनिषेधप्रतिपादकश्रुत्युपपत्तिं दर्शयति-सोऽकामयतेति । तत्प्रत्यनीकेति । तादृशब्रह्मविरुद्धेत्यर्थः । यत्रान्तर्यामित्वेन ब्रह्मणः संबन्धो नास्ति तादृशं ब्रह्मभिन्नं वस्तु नास्त्येव । अतत्त्वमेव तदिति तदेव श्रुतिषु प्रतिषिध्यते । ऐक्यश्रुतीनां प्रकार्यैक्यपरत्वादैक्यश्रुतिशेषभूतभेदनिषेधोऽपि तदैक्यानुरोधेन प्रकारिभेदनिषेध एव भवितुमर्हतीति भावः ।

१२२-६-९ उक्तमर्थमुपक्रमेणैवोपपादयति-यत्र त्वस्येति । अत्र सर्वशब्देन ऋग्वेदादिशब्देन च प्रकारभेदस्य स्पष्टमेव प्रतिपादनात्प्रकारिभेदविषयक एव निषेध इत्यवश्यं स्वीकार्यम् । सर्वं तमिति । यो ब्रह्मभिन्नं वस्तु ब्रह्मसंबन्धरहितं यथा स्यात्तथा वेत्ति तं पुरुषं तत्सर्वं पराकुर्यादित्यर्थः ।

—११-६ एवमिति । स्वभावभेदं वदन्तीनां श्रुतीनां कार्यकारणभावं वदन्तीभिः श्रुतिभिः सह यो विरोधो भासते, यश्च स्वरूपभेदं वदन्तीनां कार्यकारणयोरनन्यत्वं वदन्तीभिः सह विरोधो भासते स वस्तुतो नास्तीति श्रुतिभिरेव ज्ञायत इत्यर्थः ।

१२२-२१-१२३-१६ षड्यागानिति। आग्नेय एकोऽग्नीषोमीयोपांशुयाजौ द्वावैन्द्रौ द्वावैन्द्राग्न एकश्चेति षड्यागाः। उत्पत्तिवाक्यैः। अज्ञातार्थबोधकैर्विधिवाक्यैः। उत्पन्नान्। प्रतिपादितान्। वाक्यद्वयेन। य एवं विद्वान्पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजत इत्यनेन। अधिकारवाक्यम्। उक्तदर्शपूर्णमासनामकयागाधिकारः स्वर्गकामस्य मनुष्यस्येत्यधिकारबोधकवाक्यम्। कामिनः। स्वर्गकामिनः। पृथक्प्रतिपन्नमिति। पृथक्प्रतिपन्नं यद्वस्तुत्रयं तत्परमात्मैक एवेति सदेवेत्यादिवाक्यं सद्ब्रह्मात्मादिशब्दैः प्रतिपादयतीत्यर्थः।

१२३-२० अथ सप्तमीं निवृत्त्यनुपपत्तिं दर्शयति-यत्पुनरिति।

—२२ कर्मनिमित्तेति। तथा च सुखदुःखानुभवहेतुभूतस्य पुण्यपापरूपस्य कर्मणः सत्यत्वमेवेष्टव्यम्। असत्यस्य निमित्तत्वं न संभवतीति प्राक् (श्रीभाष्य-पृ. ५३ प. ३) उपपादितत्वात्। ततश्च बन्धस्य पारमार्थिकत्वं सिध्यतीति भावः।

—२३ एवंरूपेति। परमार्थस्य ज्ञाननिवर्त्यत्वं दृष्टद्वारा नोपपद्यते, अपि त्वदृष्टद्वारा। यथा सत्यसर्पदृष्टविषस्योपासनप्रीतगरुडप्रसादान्निवृत्तिर्न तु मिथ्येति ज्ञानात्तथेत्यर्थः।

१२४-२ यथावस्थितेति। यथावस्थितं परमात्मनः सकाशाद्भिन्नत्वेनानुभूयमानं चिदचिद्रूपं वस्तु तद्विपरीतविषयकस्याद्वैतज्ञानस्यानुभवविरुद्धत्वेन मिथ्यारूपत्वात्तेन ज्ञानेन बन्धस्य वृद्धिरेव स्यान्न तु निवृत्तिरिति भावः।

—४ अद्वैतस्य मिथ्यात्वे प्रमाणमाह-मिथ्यैतदिति। प्राक् (विवृति-पृ. ७२ प. १३) व्याख्यातम्।

—५-७ अथ भेदज्ञानस्यैव मोक्षसाधनत्वमाह-उत्तम इति। अस्याः स्मृतेः श्रुत्यपेक्षया प्रागुक्तिस्तु मिथ्यैतदिति स्मृतिप्रसङ्गेन कृता पुरुषान्यत्वस्य स्पष्टतयोक्त्या वा। जीवात्मविसजातीयस्य। न तु जीवात्मरूपस्य।

—९ अथाविद्यानिवृत्तिस्तर्कविरुद्धेत्याह-अपि चेति। मिथ्यारूपत्वादिति। ऐक्यज्ञानस्य यथावस्थितवस्तुविपरीतविषयत्वेन मिथ्यारूपत्वमनुपदमेवोक्तम्। अथ वैक्यविषयकज्ञानं ह्यविद्यानिवर्तकत्वेन तवाभिमतम्। तस्य च मिथ्यात्वं निर्विषयकज्ञानसत्यत्ववादिनस्तव गले पतितमित्याशयः।

—१० शङ्कते-निवर्तकज्ञानमिति। यथा विषनाशकं विषं स्वयमेव नश्यति तथेत्यर्थः।

—१२ निवर्तकज्ञानस्वरूपं तस्योत्पत्तिर्विनाशश्चासद्रूपः सद्रूपो वा। आद्य आह-तत्स्वरूपेति। एषां काल्पनिकत्वं स्वाम्रपदार्थवत्। विनाशेति। विनाशस्य या कल्पना विनाशविषयकभ्रमबुद्धिस्तत्कल्पकाविद्याया इत्यर्थः।

१२४-१३ अन्त्य आह-तद्विनाश इति।

—१५ तिष्ठतीति। निवर्तकज्ञानविनाशस्वरूपे ब्रह्मणि तिष्ठति सति निवर्तकज्ञानस्योत्पत्तिरेव न स्यादित्यर्थः।

—१६-७ अथ निवर्तकज्ञानस्यानुपपत्तिं ज्ञात्रभावेन दर्शयति-अपि चेति। निषेधविषयेति। निर्विषयस्य स्वरूपभूतज्ञानस्य ज्ञात्रपेक्षाऽभावादिदमुक्तम्। कोऽयमिति। प्रमाणजन्यज्ञानस्य ज्ञातृसापेक्षत्वादित्याशयः।

—१७ ज्ञाता चायं ब्रह्मणोऽन्योनन्यो वा। आद्य आह-अध्यासेति। कर्मणि घञ्। अध्यस्तरूप इत्यर्थः।

—१८ अन्त्य आह-ब्रह्मेति।

—१९ स्वरूपम्। स्वाभाविकम्।

—२१ तिष्ठत्येवेति। निवर्तकज्ञानकर्तृत्वस्य ब्रह्मण्यध्यस्तत्वे तादृशाध्यासस्य तदध्यासप्रयोजकीभूताविद्यान्तरस्य च तेनैव निवर्तकज्ञानेन निवृत्यसंभवादिति भावः।

—२२ ब्रह्मस्वरूपस्यैव ज्ञातृत्वे। ज्ञातृत्वस्य ब्रह्मणि स्वाभाविकत्वे।

—२३ निवर्तकेति। 'निवर्तकज्ञानस्य तज्ज्ञातुश्च तेनैव निवर्तकज्ञानेन निवृत्तिस्तयोर्ब्रह्मव्यतिरिक्तत्वात्' इति तु व्याहतमित्याशयः।

१२५-४ अध्यस्त इति। ज्ञातुरपि निवर्तकज्ञानेन निवृत्तौ स्वीकृतायां तस्य निवर्तकज्ञानार्थं श्रवणादौ प्रवृत्तिर्न स्यात्।

—७ दिष्टेति। दैवेनैवादौ यो हतस्तस्य पुनर्मुद्गरेणाभिहननं व्यर्थमेवेति भावः।

—८ एवं मृषावादिमते निराकृते बन्धस्य सत्यत्वं सिध्यतीति तादृशबन्धनिवृत्तिः कर्मसापेक्षोपासनात्मकज्ञानादेवेत्यतः कर्मविचारस्य ब्रह्मजिज्ञासापेक्षया पूर्ववृत्तत्वं युक्तमित्याशयेनोपसंहरति—तस्मादिति। कर्मप्रवाहरूपाज्ञानेति। न त्वज्ञानमनिर्वचनीयस्वरूपमित्याशयः। उक्तलक्षणज्ञानात्। उपासनात्मकज्ञानात्।

—९ आराधनवेषेति। आराधनस्वरूपमित्यर्थः।

—१३-४ केवलाकारेति। केवलाकार आत्मयाथात्म्यबुद्धिसंस्कारशून्यः फलाभिसंधिसहित आकारः। तादृशकर्मणः परित्यागोऽहरहरित्याद्युक्तविशेषणविशिष्टस्य फलाभिसंधिरहितस्य कर्मणः स्वीकारश्च कर्मस्वरूपज्ञानं विना न संभवतीत्यर्थः।

—१७ अस्मिन्नधिकरणे श्रीशंकराचार्यैः प्रपञ्चस्य सत्यत्वेन ज्ञाननिवर्त्यत्वाभावाज्ज्ञानाय ब्रह्मविचारो नारम्भणीय इति पूर्वपक्षं कृत्वा प्रपञ्चस्य मिथ्यात्वेन

ज्ञाननिवर्त्यत्वाज्ज्ञानाय स आरम्भणीय इति सिद्धान्तितम् । तच्छुत्यादिविरुद्धमिति न सूत्रकृतोऽभिप्रेतम् । अतः सूत्रकृदभिप्रेतमेतत्सूत्रनिरसनीयं पूर्वपक्षं प्रदर्शयति–अत्रेति । वृद्धव्यवहारेति । प्रयोजकवृद्धस्य वाचिको व्यवहारः । प्रयोज्यवृद्धस्य कायिकः । वृद्धव्यवहारं विना प्रथमतः शक्तिग्रहो न भवत्येव । न हि प्रथमत एव ' अस्य शब्दस्यायमर्थः' इत्युक्ते ' अस्य शब्दस्यायमर्थः' इत्येतद्वाक्यस्थपदानामप्यर्थो ज्ञायते । अत एव वृद्धव्यवहारस्य शक्तिग्राहकशिरोमणित्वमुक्तमभियुक्तैः । तादृशव्यवहारेण च शब्दस्य कार्यरूपार्थे एव शक्तिः । गामानयेत्यादिप्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा तादृशप्रवृत्तेः कार्यबुद्धिपूर्वकत्वं जानन्व्युत्पित्सुर्बालः ' अयं शब्दः कार्यरूपार्थबोधकः' इति निश्चिनोति । तथा च शब्दस्य कार्यरूपार्थ एव शक्तत्वेन परब्रह्मरूपसिद्धवस्तुप्रतिपादनपराणां शब्दसमुदायात्मकवेदान्तवाक्यानां प्रामाण्यं न संभवतीति भावः । ननु भाट्टेन सिद्धवाक्यादपि शक्तिग्रहः प्रतिपादितः । तथा हि । पुत्रस्ते जात इति सिद्धवस्तुप्रतिपादकं देवदत्तोच्चारितं वाक्यं श्रुत्वा यज्ञदत्तस्य मुखं प्रसन्नं भवति । तेन च लिङ्गेन पुत्रस्ते जात इति वाक्यस्यार्थं पुत्रजन्मरूपं चैत्रो निश्चिनोतीति चेन्न । मुखप्रसादस्य द्रव्यप्राप्त्यादेरपि संभवेन तेन लिङ्गेन पुत्रजन्मन एव निश्चयासंभवात् । न चासन्नप्रसवां यज्ञदत्तभार्यां ज्ञातवतश्चैत्रस्य तथा निश्चयः स्यादेवेति वाच्यम् । तावतापि पुत्रजन्मनिश्चयासंभवात् । कन्यायामपि जातायां सुलग्नप्रसवसुखप्रसवादेरपि मुखप्रसाददर्शनात् ।

१२५–२१ तदेवाह–न चेति । मुखविकाशादिलिङ्गेनार्थनिश्चयो न भवति । हर्षहेतूनामानन्त्यादर्थान्तरोपनिपातसंभावनया चेत्यर्थः ।

१२६–३ ननु नैयायिकैः सिद्धवाक्यादपि शक्तिग्रहः प्रतिपादितः । यथा पिकः कूजतीति वाक्यं श्रुत्वा कूजतिशब्दार्थज्ञानवतः पुरुषस्य पिकपदार्थनिश्चयो भवति । यथा वा तृतीयायाः करणरूपमर्थं ज्ञातवतः पुरुषस्य काष्ठैः पचतीति वाक्यं श्रुत्वा काष्ठशब्दार्थनिश्चयो भवतीति चेत्तत्राह–नापीति । व्युत्पन्नेति । व्युत्पन्नो ज्ञात इतरपदस्य विभक्तेश्चार्थो येन तस्येत्यर्थः ।

—५–६ ज्ञातेति । इदानीं श्रुतेऽस्मिन्वाक्ये पूर्वं कार्यपरतया व्युत्पन्नवाक्यस्थकतिपयपददर्शनादयमपि पदसमुदायः कार्याभिधायीति ज्ञायत इति भावः । तदंशविशेषः । कार्यांशविशेषः ।

—६ मृषावादुक्तं निरस्यति–न चेति । सर्पाङ्गीतस्य यज्ञदत्तस्य नायं सर्प इति देवदत्तवाक्यश्रवणेन भयनिवृत्तिं दृष्ट्वा नायं सर्प इतिवाक्यार्थं सर्पाभावरूपं चैत्रो निश्चिनोतीत्यर्थः ।

—९ इत्यादीति । आदिनायं डुण्डुभइति । डुण्डुभो हि सर्पाकारा निर्विषजातिः । तज्ज्ञानेनापि भयनिवृत्तिर्दृश्यते । ननु गामानयेत्यादावानयेत्यादीनां

पदानां कार्यरूपार्थे शक्तत्वेपि गामित्यादीनां पदानां कथं कार्यार्थबोधकत्वमिति चेन्न । तेषामप्यन्विताभिधानवादिनये कार्यान्वितस्वार्थबोधकत्वात् । युक्तं चैतत् । प्रवृत्तिर्हि न केवलमानयेति पदात् । किं तु पदसमुदायात् । अतः सर्वेषां पदानां प्रवर्तकार्थावबोधित्वमवगम्यते । प्रवृत्तिश्च कार्यबुद्धिं विना न संभवतीति सर्वत्र कार्यबुद्धिरेष्टव्या ।

१२६–१० तदेवाह–कार्येति । यत्र प्रवृत्तिस्तत्र कार्यबुद्धिरिति व्याप्तिः । व्याप्तिबलेनेति । अस्य 'सर्वपदानां कार्यपरत्वेन' इत्यत्रान्वयः। एतेन कार्यरूप एव कारकान्वित एव वार्थश्चेत्कारकपदेष्वननुगमः । कार्यान्वित एवार्थश्चेत्कार्यपदेष्वननुगमः । अत इतरान्वितमात्रे शक्तिरितीतरान्वितस्य सिद्धस्यापि पदवाच्यत्वमिति सिद्धब्रह्मपराणां वेदान्तवाक्यानां प्रामाण्यमिति वाचस्पत्युक्तमपास्तम् । उक्तरीत्या सर्वेषां पदानां कार्यपरत्वात् ।

—१३ नन्विष्टसाधनताबुद्धेरेव प्रवृत्तिप्रयोजकत्वं न तु कार्यबुद्धेरिति चेत्तत्राह–इष्टेति ।

—१४ वर्तमानेति । वर्तमानकालिकेऽपि वृक्षाग्रस्थफलादावशक्तस्य प्रवृत्त्यदर्शनात् । तथा च कार्यबुद्धिरेव प्रवृत्तिप्रयोजिका । कार्यबुद्धिर्हीदं मयाद्य साधयितुं शक्यमिति बुद्धिः ।

—१८ परिनिष्पन्नम् । सिद्धम् । आपाताप्रतिपत्तेरिति । 'अधीतास्वाध्यायाद्ब्रह्मप्राप्तिलक्षणानन्तस्थिरफलस्यापाततः प्रतीतिर्भवतीति तन्निर्णयाय ब्रह्मविचारारम्भः' इति हि प्रागुक्तम् (श्रीभाष्य–पृ. ३ प. २२)। परं तु ब्रह्मणः सिद्धरूपत्वेन तत्र चोक्तरीत्या शब्दस्य शक्त्यभावेन स्वाध्यायादापाततोऽपि तत्प्रतीतिर्नैव भवतीति ब्रह्ममीमांसारम्भो न युक्त इति भावः ।

१२७–४ अलौकिकैकार्थः । कार्यरूपः ।

—६–११ व्युत्पित्सोर्बालस्य व्युत्पत्तिर्द्विधा भवति । बुद्धिपूर्विका याहच्छिकी च । तत्रान्त्यायां शब्दस्य कार्यरूपार्थकत्वं पूर्वपक्षिणा प्रदर्शितम् । परं त्वाद्यायां सिद्धवस्तुपरत्वमेवेत्याशयेनाह–अम्बेति । अम्बादिशब्दाः ससंबन्धिकार्थप्रतिपादकाः । शश्यादिशब्दाः केवलार्थप्रतिपादकाः । मात्रादिर्हि पुरोवर्तिनं पशुं निर्दिश्य 'अयं गौः' इति वाक्यं प्रयुङ्क्ते । एवं बहुशः शिक्षितो व्युत्पित्सुर्बालो यदा गोशब्दं शृणोति तदा स गोशब्द एव स्वस्वरूपेण श्रोतुस्तस्य तादृशपशुबुद्धिमुत्पादयति । ततोऽस्य पशोर्गोशब्दस्य च कश्चन संबन्धोऽस्तीति सोवधारयति । तत्र च जन्यजनकभावादीनामितरसंबन्धानामसंभवात्स्वाभाविको बोध्यबोधकभाव एव संबन्ध इति शब्दार्थसंबन्धग्रहणप्रकारो लोकप्रसिद्धः । ननु न गोशब्दस्तादृशपशुरूपार्थस्य बोधकः । किं तु तत्र तस्य केवलं संकेत इति चेत् । अयं संकेतः केन कृतः । किं मात्रादिनैवाधुना कृतः किंवा पूर्वमेव

केनापि कृतः । नाद्यः । सर्वेषामेव तादृशपशुरूपार्थे गोशब्दप्रयोगदर्शनात् । नान्त्यः । संकेतयितुः पुरुषस्याज्ञानेन तस्य वक्तुमशक्यत्वादित्युक्तरीतिरेव साधीयसी । किं च वृद्धव्यवहारेण बोधकत्वशक्त्यवधारणं ससंबन्धिकाम्बादिशब्देषु दुर्वचम् । प्रयोजकवृद्धेन यज्ञदत्तं प्रति 'अम्बां वन्दस्व' इत्युक्ते तेन कृतं स्वमातृवन्दनं दृष्ट्वा व्युत्पित्सोरपि स्वमातृरूपार्थेऽम्बाशब्दस्य बोधकत्वशक्त्यवधारणासंभवादिति बोध्यम् ।

१२७-१२ बुद्धिपूर्वकव्युत्पत्तावेव प्रकारान्तरेण सिद्धवस्तुपरत्वं दर्शयति-पुनश्चेति । वाक्ये श्रुते तद्घटकस्य कस्यचित्पदस्यार्थाज्ञानेऽस्यायमर्थ इति वृद्धास्तं शिक्षयन्तीति प्रसिद्धम् । तथा च बुद्धिपूर्वकव्युत्पत्तौ शब्दस्य सिद्धवस्तुपरत्वं सिद्ध्यतीति भावः ।

—१५ अथ यादृच्छिकव्युत्पत्तावपि शब्दस्य सिद्धवस्तुपरत्वं दर्शयति-प्रकारान्तरेणेति । यादृच्छिकव्युत्पत्तिजनकेन वृद्धव्यवहाररूपप्रकारेणापीत्यर्थः ।

केन चिदिति । अत्र प्रयोजकवृद्धस्य कायिको व्यवहारः प्रयोज्यवृद्धस्य वाचिक इति पूर्वपक्ष्यभिमतवृद्धव्यवहारोदाहरणाद्विशेषः ।

—१८-१२८-१ मूकवदिति । अनेन चेष्टाज्ञानस्य शब्दानपेक्षत्वं सूचितम् । अनुगतः । तज्ज्ञापने प्रवृत्तं पुरुषमनुगतः । इमं शब्दम् । 'पिता ते सुखमास्ते' इमं शब्दम् । अयं हि शब्दो न कार्यार्थप्रतिपादकः । किं तु सिद्धार्थप्रतिपादकः । निर्बन्धः । आग्रहः । निर्निबन्धनः । निर्मूलः ।

१२८-४ अथ तुष्यतु दुर्जनन्यायेन शब्दस्य कार्यार्थपरत्वं स्वीकृत्यापि ब्रह्मविचारस्य कर्तव्यतां प्रतिपादयति-कार्यार्थत्वेऽपीति ।

—५-१४ आत्मा वार इति । यद्यपि ब्रह्म सिद्धरूपं तथाप्युपासनायाः कार्यत्वेन तस्याश्चात्मा वार इत्यादिवेदान्तवाक्येषु प्रतिपादितत्वेन तेषां प्रामाण्यमक्षतमेव । तादृशोपासनायाश्च ब्रह्मप्राप्तिफलकत्वेन ब्रह्मप्राप्तिकाम एवाधिकारीत्युपासनारूपकार्यार्थ एव ब्रह्मविचारः कर्तव्यः । दहर इति । अस्याः श्रुतेरर्थो मूल एव (श्रीभाष्य-पृ. २९८ प. ६) स्पष्टः । प्रतिपन्नेति । उक्तश्रुतिभिः प्रतिपन्नं ज्ञातं यदुपासनं तद्विषयकार्थं तदवच्छिन्नकृतिसाध्यमपूर्वं तन्नाधिकृतस्य फलत्वेन ब्रह्मप्राप्तिः श्रूयत इत्यर्थः । ब्रह्मेति । ब्रह्मणः स्वरूपस्य, तस्य ब्रह्मणो विशेषणानां गुणानां विभूतीनां चेत्यर्थः । ननूक्तरीत्यात्मा वार इत्यादिवाक्यानामुपासनारूपकार्यार्थबोधकतया प्रामाण्येन ब्रह्मविचारस्य कर्तव्यत्वे प्राप्तेऽपि ब्रह्मणः सिद्धत्वेन तत्स्वरूपप्रतिपादकानामिदं सर्वं यदयमात्मेत्यादिवाक्यानामप्रामाण्यमेवेति कथं तादृशवाक्यैर्ब्रह्मविचारः कर्तव्य इति चेन्मैवम् । आत्मा वार इत्यादिविधिवाक्यानां ब्रह्मप्राप्तिरूपफलपर्यन्तं तात्पर्यसत्त्वात्फलबोधकत्वेन विध्यङ्गभूतानामिदं सर्वं यदयमात्मेत्यादिवाक्यानामपि प्रामाण्यसत्त्वेनादोषात् ।

न चैवमपि ब्रह्मणो विशेषणीभूता ये सत्यत्वज्ञानत्वादयो गुणास्तत्प्रतिपादकानां सत्यं ज्ञानमित्यादिवाक्यानामप्रामाण्यमेवेति वाच्यम् । फलविशेषणपर्यन्तमपि विधिवाक्यतात्पर्यसत्त्वात् । यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिवाक्यस्य यस्मिन्नोष्णं न शीतं नार्तिरिति श्रुत्युक्तस्वर्गविशेषणपर्यन्तमपि तात्पर्यं कल्प्यते तद्वत् । न च ज्योतिष्टोमेनेति विधौ स्वर्गरूपफलस्य निर्देशात्तद्विशेषणपर्यन्तं तात्पर्यकल्पनेऽपि ' आत्मा वारे ' इत्यादिविधौ फलस्यानिर्देशात्फलपर्यन्तमपि तात्पर्यं नास्ति किमुत तद्विशेषणपर्यन्तमपीति वाच्यम् । विधिवाक्ये फलस्यानिर्देशेऽपि तावत्पर्यन्तं तात्पर्यसत्त्वात् । यथा रात्रिसत्रे रात्रीरुपेयादिति विधौ प्रतिष्ठारूपफलस्यानिर्देशेऽपि ' प्रतितिष्ठन्तीह वा एते य एता रात्रीरुपयन्ति ' इत्यर्थवादोक्तप्रतिष्ठारूपफलपर्यन्तं तात्पर्यं कल्प्यते तद्वत् । न च तथाप्युपासनाविरुद्धसंसाररूपफलपर्यन्तमात्मा वार इत्यादिविधिवाक्यानां तात्पर्याभावेन तद्बोधकानां ' यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः । न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥' (का. ३ । ७) इत्यादिश्रुतीनामप्रामाण्यं स्यादिति वाच्यम् । यत्र विरुद्धमपि फलं विधेयोपकारकं भवति तत्र तत्फलपर्यन्तमपि विधिवाक्यतात्पर्यसत्त्वात् । यथा ' ब्राह्मणाय नापगुरेत ' (तै. सं. २ । ६ । १० । २) इत्यपगोरणनिषेधविधायकवाक्यस्य ' योऽपगुरते शतेन यातयात् ' इत्यपगोरणनिषेधविरुद्धशतयातनारूपफलपर्यन्तमपि तात्पर्यम् । अपगोरणं ताडनोद्योग इति सायणाचार्याः । स च शस्त्रोद्यमनरूपः । एतच्च शतयातनारूपं फलमपगोरणनिषेधविरुद्धमपि निषेधविधेरुपकारकम् । मनुष्यो हि शतयातनासंभावनयाऽपगोरणान्निवर्तते । तद्वदत्रोपासनाविरुद्धमपि संसाररूपं फलमुपासनामुपकरोति । उपासनाया अभावे संसारप्रवृत्तिं दृष्ट्वोपासनायां मनुष्यस्य प्रवृत्तेरित्यवधेयम् ।

१२८-१५ अथ पूर्वपक्ष्यभिमतवृद्धव्यवहारेणापि न कार्यार्थ एव व्युत्पत्तिरित्याह-**गामानयेति** । **कार्यार्थे** । भवदभिमतकार्यरूपेऽर्थे ।

—१६ **कृतीति** । कृतिश्चान्तरः प्रयत्नः । तज्ज्ञानानन्तरभावीत्यर्थः । तावन्मात्रोक्तौ स्वेदश्रमादेरपि कार्यत्वापत्तिरतः कृत्युद्देश्यमिति कृत्युद्देश्यमिति वदतः पूर्वपक्षिणोऽभिप्रायः । परं त्वेतादृशं कार्यं निरूपयितुमशक्यम् । कार्ये कृत्युद्देश्यत्वस्यासंभवात् । कृत्युद्देश्यत्वं हीष्टतमत्वरूपम् । तच्च सुखादौ फल एव संभवति न तु कार्यभूते शब्दार्थे ।

—१७-८ **कर्तुरीप्सिततमं कर्म** (पा. सू. १ । ४ । ४९) इति पाणिनिसूत्रानुसारेण कर्मत्वं दर्शयति-**कृतिकर्मत्वं चेति** । **कृत्या प्राप्तुम्** । क्रियाजन्यफलेन संबन्धुम् । ननु कृतिकर्मत्वं न कृत्या प्राप्तुमिष्टतमत्वम् । किं तु प्रवर्तकत्वम् । तच्च कार्यभूते शब्दार्थे संभवति । शब्दार्थं बुद्ध्वैव प्रवृत्तेरिति चेन्न ।

एतादृशकृतिकर्मत्वस्य कृतिसाध्येच्छाविषयत्वस्वरूपत्वात् । कृत्यधीनसिद्धित्वमिष्टत्वं चानालोच्य प्रवृत्त्यदर्शनात् । तथा च कृतिसाध्यत्वेच्छाविषयत्वव्यतिरिक्तकृत्युद्देश्यत्ववादिनस्तवैव विरोधः ।

१२८-१९ तदेवाह-तत्रेष्टेति ।

—२२ नन्विष्टवस्तुन एवेच्छाविषयत्वं प्रेरकत्वं चेति रूपद्वयम् । तत्र प्रेरकत्वमेव कृतिकर्मत्वं न त्विच्छाविषयत्वमिति चेत्तत्राह-इच्छाविषयस्येति ।

१२९-१ न चेति । यतः सुखमेव पुरुषानुकूलमतः पुरुषानुकूलत्वं कृत्युद्देश्यत्वं नेत्यर्थः ।

—२ न च दुःखेति । यद्यपि दुःखनिवृत्तेः पुरुषानुकूलत्वेऽपि पूर्वपक्षिणो न किंचिद्सिध्यति तथापि वस्तुस्थितिकथनमेतत् ।

—६ क्रियादेरिति । तथा च गामानयेत्यादौ धातुवाच्यक्रियादेः कृत्युद्देश्यत्वाभावेन कार्यत्वाभावादशब्दार्थत्वप्रसङ्ग इत्याशयः ।

—७ दुःखात्मकत्वादिति । दुःखं हि नात्मनः स्वतन्त्रो गुणः । किं तु प्रतिकूलतया भासमानं वस्त्वेव दुःखमिति मत इदम् । स्वतन्त्रगुणपक्षेऽपि क्रियादेः श्रमजनकत्वेन प्रतिकूलतया भासमानत्वादनुकूलत्वं नास्त्येवेति बोध्यम् ।

—८ इच्छामात्रमेव । न त्वनुकूलवेदनीयत्वम् ।

—९ शेषित्वमिति । प्रधानत्वमित्यर्थः । तथा च कृतिसाध्यस्यानयनादेः कृतिनिरूपितप्रधानत्वेन तत्र कृत्युद्देश्यत्वरूपकार्यत्वसत्त्वात्तस्य शब्दार्थत्वमक्षतमिति शङ्काशयः ।

उत्तरयति-भवदिति ।

—१०-११ परोद्देशेति । परस्यानयनादेरुद्देशेन प्रवृत्तोत्पन्ना या कृतिस्तत्संबन्धयोग्यत्वं शेषत्वमित्यर्थः । तत्प्रतिसंबन्धी । तस्य शेषस्य प्रतिसंबन्धी परपदग्राह्य आनयनादिः ।

—११-१२ अशेषत्वेनेति । कृतिसंबन्धयोग्यत्वस्य कृतावभावात् । तथा च कृतिसाध्यस्यानयनादेः कृतिनिरूपितप्रधानत्वाभाव इति भावः । तत्साध्यत्वस्येति । तत्साध्यत्वस्य शेषित्वरूपत्वाभावादित्यर्थः । तत्साध्यस्येति पाठस्तु सुगम एव ।

—१२ न च परेति । परस्यानयनादेरुद्देशेन या प्रवृत्तिरुत्पत्तिस्तदर्हत्वं कृतेरिति तस्याः शेषत्वम् । तन्निरूपितशेषित्वं च परपदग्राह्यस्यानयनादेरित्याशयः ।

—१३ उद्देश्यत्वस्यैवेति । तथा चोद्देश्यनिरूपणस्योद्देश्यसापेक्षत्वादात्माश्रयः ।

१२९-१४ **दर्शनाच्चेति**। तथा च परोद्देशप्रवृत्यर्हत्वरूपलक्षणेऽतिव्याप्तिः। परोद्देशमात्रप्रवृत्यर्हत्वं शेषत्वमित्युक्तौ तु भृत्येऽव्याप्तिः।

—१६ **कार्यस्वरूपस्यैवेति**। कार्यत्वं कृत्युद्देश्यत्वम्, उद्देश्यत्वं शेषित्वम्, शेषित्वं शेषप्रतिसंबन्धित्वम्, शेषत्वं च कार्यप्रतिसंबन्धित्वमित्यात्माश्रय इति भावः।

१८ **पुरुषस्येति**। कृतिमत्पुरुषप्रयोजनमेव कृतिप्रयोजनमित्यर्थः।

१३०-२-३ **कृतिसाध्यतेति**। कृतिसाध्यत्वकृतिप्रधानत्वरूपकार्यमित्यर्थः। आत्मन्यतिव्याप्तिवारणाय कृतिसाध्यत्वेति। स्वेदादावतिव्याप्तिवारणाय कृतिप्रधानत्वमिति। **दुर्निरूपमिति**। विशेष्यस्य कार्यत्वस्योक्तरीत्या दुर्निरूपत्वाद्विशेषणविशिष्टस्यापि दुर्निरूपत्वं बोध्यम्।

—४ **नन्वपूर्वरूपं कार्यमेव शब्दार्थः**। तस्य चेच्छाविषयत्वं स्वत एव न तु स्वर्गादिसाधनत्वेनेति तत्र कृतिप्रयोजनत्वरूपं कृत्युद्देश्यत्वं वर्तत एवेति चेत्तत्राह-**नियोगस्येति**। अपूर्वरूपकार्यस्येत्यर्थः। तस्य न स्वत एवेच्छाविषयत्वं किं तु सुखसाधनत्वेन दुःखनिवृत्तिसाधनत्वेन वेति तस्येच्छाविषयत्वाभावान्न कृतिप्रयोजनत्वमिति भावः।

—५ **अत एव**। कार्यस्य सुखादिसाधनत्वेनैवेच्छाविषयत्वादेव। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादौ लिङ्वाच्यं कार्यं किं क्रियारूपं क्रियासाध्यापूर्वरूपं वा। आद्ये स्वर्गकामपदानन्वयः। क्रियायाः क्षणभङ्गित्वेन तस्याः स्वर्गसाधनत्वायोगात्। अतः स्थाय्यपूर्वमेव कार्यं स्वीकृतम्। तस्यापूर्वस्यापि यदि सुखादिसाधनत्वेन प्रतीतिर्न स्याच्चेत्तादृशापूर्वकल्पने मानाभावेन क्रियैव कार्यं स्यादिति भावः।

—९ **अपूर्वव्युत्पत्तिः**। अपूर्वं पुण्यविशेषः। तत्र व्युत्पत्तिर्नाम तस्यापूर्वरूपार्थस्य लिङादिवाच्यत्वम्।

—९-११ **प्रथममिति**। पूर्वपक्षिणोऽयमभिप्रायः। स्वर्गकामपदान्वयात्पूर्वं लिङादिवाच्यकार्यस्य प्राधान्येनैव प्रतिपत्तिः। प्राधान्यं चानन्यार्थत्वम्। न हि तदानीमिदं कार्यं स्वर्गाद्यर्थमिति प्रतीयते। तादृशप्राधान्यं च स्वर्गकामपदान्वयोत्तरमपि रक्षणीयमेवेति तदानीमपि न तस्य स्वर्गादिसाधनत्वेन प्रतीतिः। किं तु तदपूर्वं स्वप्राधान्यसंरक्षणाय स्वयमेव यागकर्तुः स्वर्गं ददातीति तस्यापूर्वस्य स्वत एवेष्टत्वं न तु सुखसाधनत्वेनेति। परं त्वेतदुपहास्यम्। स्वर्गसाधनतोल्लेखेनैव ह्यपूर्वस्वीकारात्।

—११ **स्वर्गकामेति**। अन्विताभिधानवादिमतेनेदम्।

—१२ **ननु व्युत्पत्तिदशायामपूर्वस्य साधनतया व्युत्पत्तिः**। अभिधानदशायां त्वनन्यार्थं स्थायिकार्यमित्येव प्रतीयत इत्युच्यत इति चेत्तत्राह-**सुखदुः-**

खेति। यद्यत्साध्यं तत्तत्सुख-दुःखनिवृत्ति–तत्साधनान्यतममेव। निर्विशेषं न सामान्यमिति न्यायादिति भावः।

१३०–१४ नियोगस्य। अपूर्वरूपकार्यस्य।

शङ्कते–सुखवदिति।

—१५ किं नियोग इति। सुखव्यतिरिक्तस्यानुकूलत्वं न संभवतीत्याशयः।

—१६ पुनः शङ्कते–सुखविशेषवदिति। यथा स्वर्गादिसुखमितरसुखाद्विलक्षणं तथैवेदमपि नियोगपदवाच्यं सुखमितरसुखाद्विलक्षणमित्याशयः।

१३१–१ विषयविशेषः। चन्दनस्पर्शादिः।

—२ शङ्कते–शास्त्रेणेति। पश्चादिति। यद्यपीदानीं नानुभवस्तथापि मरणानन्तरमस्त्येवेत्यर्थः।

—४ लौकिकं वाक्यम्। आप्तोक्तं यागं कुर्वित्यादि।

—५ कृतिसाध्यतामात्रेति। न तु नियोगस्य सुखरूपत्वं प्रतिपाद्यत इति भावः।

—६ वैदिकम्। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि।

—७ नित्येति। अहरहः संध्यामुपासीतेत्यादि नित्यम्। प्रायश्चित्तबोधकं वाक्यं नैमित्तिकम्।

—९ नियतेति। पचनरूपस्य कर्मणोऽन्नरूपं फलं नियतम्। इह लोक एवोपभोगार्हं च। एवमेवौषधसेवनरूपकर्मणो नीरोगत्वं फलं बोध्यम्।

—१२ अर्थवादेति। अर्थवादवाक्ये यथा स्वर्गादिसुखप्रकाराः कथ्यन्ते तथाऽपूर्वरूपसुखप्रकारा न कथ्यन्ते। तथा चापूर्वस्य सुखस्वरूपत्वे प्रमाणाभावात्तस्य प्रयोजनत्वं न संभवतीति स्थितम्।

१३२–५ इति स्थितमिति। अस्मिन्नधिकरणे ब्रह्ममीमांसा १ विषयः। सा किमारम्भणीया न वेति २ संशयः। सिद्धवस्तुनि शब्दव्युत्पत्तिर्नास्तीति ३ पूर्वपक्षः। अस्तीति ४ सिद्धान्तः। ब्रह्ममीमांसारम्भः ५ फलम्। एवमग्रेऽप्यङ्गपञ्चकं यथायथमूहनीयम्॥ १॥

—६ जिज्ञास्यम्। विचार्यम्।

—८ जन्मादीतीति। जन्म सृष्टिः। आदिशब्देनाद्यावयवमुच्यते। जन्मादि यस्येति बहुव्रीहिः। इतिशब्द एकवचनतात्पर्यद्योतनाय। सूत्रे जन्मादीत्येकवचनं समुदायस्य लक्षणत्वद्योतनाय। सृष्टिस्थितिप्रलयमिति। समाहारद्वंद्वः।

१३२-८ तद्गुणेति। तेषां गुणानां बहुव्रीहिघटकपदार्थानां कार्यान्वयितया संविज्ञानं यत्रेत्यर्थः। यथा लम्बकर्णमानयेति। अत्र लम्बकर्णयोरप्यानयनक्रियासंबन्धः। अथ वा तच्छब्देन विशेष्यमुच्यते। गुणशब्देन च विशेषणमुच्यते। समित्यस्यैकीकरणमर्थः। तथा च विशेष्यं विशेषणं चैककार्यान्वितत्वेन यो बहुव्रीहिर्ज्ञापयति स तद्गुणसंविज्ञानः। लम्बकर्णौ विशेषणम्। तद्विशिष्टः पशुर्विशेष्यः। चित्रगुमानयेत्यत्र तु चित्राणां गवामानयनक्रियया सहासंबन्धान्न तद्गुणसंविज्ञानो बहुव्रीहिरिति बोध्यम्।

—९-११ अचिन्त्येति। अचिन्त्या जीवकर्तृकत्वाभावेन चिन्तयितुमशक्याकाशवाय्वादिभेदेन विविधा तत्तदवान्तरभेदेन विचित्रा च रचना संस्थानं यस्येत्यर्थः। अनेनाचिदंशवैचित्र्यमुक्तम्। चिदंशवैचित्र्यमाह-नियतेति। अस्मिन्देशेऽस्मिन्काल इदं फलमनेन भोक्तव्यमिति नियमो हिरण्यगर्भादारभ्य पिपीलिकापर्यन्तं सर्वजीवेषु साधारण एवेत्यर्थः। निखिलेति। निखिला ये हेयास्त्याज्याश्चिद्गताः क्लेशादयोऽचिद्गताः षड्भावविकाराश्च तत्प्रत्यनीकं स्वरूपं यस्य तस्मादित्यर्थः। ज्ञानानन्देति। भावप्रधानो निर्देशः। ज्ञानत्वमानन्दत्वं चेत्यर्थः। आनन्दत्वं स्वानुकूलत्वम्। आदिशब्देन सत्यत्वादिसंग्रहः। अनन्तत्वं देशतः कालतश्चापरिच्छिन्नत्वम्। कल्याणत्वमन्येषामनुभवितृणामप्यनुकूलत्वम्।

—१४-६ वारुणिः। वरुणपुत्रः। भगवः। हे भगवन्। प्रयन्ति। प्रगच्छन्ति। प्रलयावस्थास्थानीत्यर्थः।

—१९ जन्मादीनां ब्रह्मलक्षणत्वं किं विशेषणत्वेनोपलक्षणत्वेन वा, प्रथमेऽपि किं प्रत्येकं विशेषणत्वेन संभूय विशेषणत्वेन वेति विकल्प्य प्रत्येकपक्षे दूषणमाह-न तावदिति। विशेषणत्वेनेति। ज्ञाप्यान्तर्भूतो ज्ञाप्यप्रतीत्युपायो विशेषणम्। ज्ञाप्यबहिर्भूतो ज्ञाप्यप्रतीत्युपाय उपलक्षणमिति विशेषणोपलक्षणयोर्भेदः।

—२० प्रसक्तेरिति। यथा नीलं शुक्लं पीतं वस्त्रमित्यत्र वस्त्रानेकत्वं प्रतीयते यथा वाऽजो गजो महिषः प्राणीत्यत्र प्राण्यनेकत्वं प्रतीयते तद्वदेवात्र जगज्जन्मसाधनं ब्रह्म भिन्नं स्थितिसाधनं भिन्नं प्रलयसाधनं च भिन्नमिति प्रतीतिः स्यात्। जगज्जन्मकृद्ब्रह्मेत्युक्ते विशेषणस्य व्यावर्तकत्वेन तन्न स्थितिकृल्लयकृच्चेति प्रतीतेः। विरुद्धधर्म एव व्यावर्त्यत इति सिद्धान्तिहृदयं पूर्वपक्षी न जानाति।

—२१ व्यावर्तकत्वमिति। विशेष्यत इतरस्माद्विद्यतेऽनेनेति विशेषणशब्दस्य निरुक्तेः।

१३३-१-२ प्रमाणान्तरेणेति। देवदत्ते युवत्वस्य प्रमाणान्तरसिद्धत्वेन न तस्य श्याम इति विशेषणेन बाधः। किं तु नीलत्वादेरेवेति भावः। उपसंहारः। पर्यवसानम्।

१३३-४ अनवगतमिति। सत्यं ज्ञानमित्यत्राप्येवमेव ब्रह्मबहुत्वप्रतीतेः। एकमेवाद्वितीयमित्यत्रैकशब्दस्तु ब्रह्मबहुत्वेऽप्येको व्रीहिरितिवदुपपद्यत इत्याशयः।

—५ शङ्कते—ब्रह्मशब्देति।

—८ बह्वयः स्युरिति। विशेष्यैकवचनेन विशेषणभेदमूलकविशेष्यभेदप्रतीतेर्न बाधः। ब्रह्मेत्येकवचनं तु व्रहं संमार्ष्टीतिवज्जातिपक्षाश्रयेणोपपादनीयम्।

संभूयेति पक्षे दूषणमाह—अत एवेति। असति प्रत्यक्षविरोधे विशेषणभेदस्य विशेष्यभेदापादकत्वस्वभावादेवेत्यर्थः।

—१० उपलक्षणपक्षं दूषयति—नापीति।

—१२ यत्रायमिति। अत्र सारससंबन्ध उपलक्षणम्। देवदत्तसंबन्धिरत्वमुपलक्ष्यम्। केदारत्वं च पूर्वप्रतिपन्नाकारः। तथात्र पूर्वप्रतिपन्नाकाराभावेनोपलक्षणं न संभवतीत्यर्थः।

—१९ आकारान्तरेति। अन्तरशब्दो विशेषवाची। तेन व्यतिरिक्तशब्देन न पौनरुक्त्यम्। ब्रह्मणः पूर्वप्रतिपन्नाकाराभावादप्रतिपत्तिरिति न वक्तुं शक्यत इत्यर्थः।

तत्र पूर्वप्रतिपन्नाकारमुपलक्ष्याकारादुपलक्षणाकाराच्च पृथक्त्वेन दर्शयितुं प्रथममुपलक्ष्याकारं दर्शयति—उपलक्ष्यमिति।

१३४-२ पूर्वप्रतिपन्नाकारं दर्शयितुमाह—यत इति। यतो वेत्यत्र यत इति निर्देशः। येन जातानीत्यत्र येनेति निर्देशः। यत्प्रयन्तीत्यत्र यदिति निर्देशः।

—६ तदपीति। निमित्तोपादानत्वरूपकारणत्वमपीत्यर्थः।

—१२ प्रतिपन्नं ब्रह्मेति। तथा च सामान्यतो बृहत्त्वं पूर्वप्रतिपन्नाकारः। गुणतो विभूतितश्चानवधिकं यद्बृहत्त्वं तद्रूपो बृहत्त्वविशेषस्तूपलक्ष्याकार इति बोध्यम्। इति चेति। अतश्चेत्यर्थः।

—१४ अथ विशेषणतया लक्षणत्वमुपपादयति—जगदिति।

—१५ लक्षणभूतान्यपि। व्यावर्तकस्वरूपाण्यपि। स्वविरोधिव्यावृत्तमिति। न तु स्वेतरयावद्धर्मव्यावृत्तमित्यर्थः। यथा नीलं वस्त्रमित्युक्ते नीलपदेन स्वविरोधिशुक्लत्वादेरेव व्यावृत्तिः। न तु स्वाविरोधिमार्दवादेरिति भावः।

१३५-३ अथ सत्यज्ञानादीनां लक्षणत्वमुपपादयति—यतो वेति। यतो वेति लक्षणवाक्येन कारणत्वमेव लक्षणत्वेनोच्यत इत्यस्य कारणवाक्यत्वम्।

—६ निरुपाधिकसत्ता। निर्विकारत्वम्। विकारात्मना परिणामविशेषेण तत्तदवस्थस्य या सत्ता तस्याः सोपाधिकसत्तात्वात्। ब्रह्मेति। निरुपपदस्य

सत्यशब्दस्य शक्तिसंकोचे प्रमाणाभावेन स्वरूपतो धर्मतश्चैकरूपत्वमेव सत्यत्वमित्यर्थः। स्वरूपत इत्यनेनाचेतनव्यावृत्तिः। धर्मत इत्यनेन जीवव्यावृत्तिः।

१३५-७ नामान्तरभजनार्हम्। नामान्तरप्राप्तयर्हम्।

—१० देशकालेति। इह ब्रह्म नान्यत्रेत्याकारकपरिच्छेदशून्यत्वं देशपरिच्छेदरहितत्वम्। न तु देशाभावः। तथेदानीं ब्रह्म नान्यदेत्याकारकपरिच्छेदशून्यत्वं कालपरिच्छेदरहितत्वम्। न तु कालाभावः। तथेदं वस्तु ब्रह्म न भवतीत्याकारकपरिच्छेदशून्यत्वं सर्ववस्तुसामानाधिकरण्यार्हत्वं वा वस्तुपरिच्छेदरहितत्वम्। न तु वस्तुनोऽभावः। ब्रह्मव्यतिरिक्तयोश्चिदचितोः सत्त्वेऽपि तयोर्ब्रह्मशरीरत्वेन ब्रह्मसामानाधिकरण्येन प्रतीयमानत्वात् 'इदं वस्तु ब्रह्म न भवति' इत्याकारकवस्तुपरिच्छेदो न जायते।

—११-२ पूर्वपदद्वयम्। सत्यं ज्ञानमिति पदद्वयम्। सातिशयेति। नित्यानां जीवानां स्वरूपमणुत्वात्परमात्मस्वरूपापेक्षया सातिशयम्। तथा नित्यानां जीवानां ज्ञानव्यतिरिक्ता य ऐश्वर्यादयो गुणास्तेषां जगद्व्यापारानर्हत्वात्परमात्मगुणापेक्षया सातिशयत्वम्।

—१९ ये तु। मायावादिनस्तु।

—२१ इति निर्वचनादिति। न तु निर्विशेषं ब्रह्मेति निर्वचनं कृतमित्याशयः।

इति वचनाच्चेति। न तु 'जगतोऽध्यासो यतः' इति सूत्रितमित्याशयः।

१३६-१ ईक्षणेति। 'ईक्षतेर्नाशब्दम्' (ब्र. सू. १।१।५) इत्यत्र ब्रह्मणीक्षणसंबन्धो दर्शितः। ब्रह्मणो निर्विशेषत्वे तु स न संभवतीत्यर्थः।

—३ तर्कश्च। अनुमानं च। साध्येति। साध्यभूतो यो धर्मस्तदव्यभिचारी तदनधिकरणावृत्तिर्यः साधनभूतो धर्मस्तेन युक्तमेव वस्त्वनुमानस्य विषयो न तु निर्विशेषमिति भावः।

—५ स्वोत्प्रेक्षापक्षेपि। जन्मादिसूत्रस्य स्वोत्प्रेक्षितार्थाङ्गीकारेऽपि। किं चायं मायावाद्यभिमतो विवर्तवादो न श्रुत्यारूढः। यतो यथा सोम्येति श्रुतौ परिणामिघटादिरेव दृष्टान्तत्वेनोक्तो न तु रज्जुसर्पादिः। तथाग्रे सूत्रकृतापि 'आत्मकृतेः परिणामात्' (ब्र. सू. १।४।२६) इत्युक्तं न तु विवर्तादित्यवधेयम्॥ २॥

—११ सिद्धेरिति। अप्राप्ते हि शास्त्रमर्थवदिति न्यायेन प्रत्यक्षादिप्रमाणान्तराविषयवस्तुप्रतिपादकत्व एव शास्त्रस्य प्रमाणत्वात्प्रमाणभूतवाक्यप्रतिपाद्यत्वं ब्रह्मणो न संभवतीत्याशयः।

—१३ शास्त्रं यस्येति। यथाऽब्भक्ष इत्यत्राप एव भक्षयतीत्यर्थो गम्यते तथाऽत्र शास्त्रमेव यस्य योनिरित्यर्थो बोध्यः। कारणम्। ज्ञप्तिकारणम्। न तूत्पत्तिकारणम्।

१३६-१५ अत्यन्तेति। स्वरूपस्य लिङ्गस्य चेन्द्रियसंबन्धाभावोऽत्यन्तातीन्द्रियत्वम्।

—१९ अस्मिन्नधिकरणे मुख्यपूर्वपक्षमुत्थापयति-नन्विति।

१३७-१ सिद्धान्त्येकदेशी मीमांसकः शङ्कते-किं तर्हीति।

—३-४ विद्यमानेति। विद्यमानो यः संनिकर्षो देशतः कालतश्च विषयेन्द्रिययोः संबन्धस्तद्योग्यो यः स्वविषयस्तद्बोधजनकानीत्यर्थः। योग्यपदेन धर्माधर्मादिव्यावृत्तिः। सर्वार्थेति। सर्वार्थसाक्षात्कारः सर्वपदार्थप्रत्यक्षज्ञानं तन्निर्माणं सर्वपदार्थोत्पत्तिस्तदुभयसमर्थो यः परमपुरुषरूपो विशेषविषयस्तद्बोधजनकानि न भवन्तीत्यर्थः।

—५ नाप्यान्तरमिति। मनोऽपि न परमपुरुषबोधजनकमित्यर्थः।

—६ सुखादीति। आन्तरसुखदुःखादीति पाठ आन्तरमित्यस्य विवरणं सुखदुःखादीति बोध्यम्।

—७ योगजन्यमित्यत्र योगिप्रत्यक्षं किं पूर्वानुभूतापेक्षयाधिकविषयमस्ति न वा। अन्त्य आह-भावनेति। संकुचितं स्वधर्मभूतज्ञानं विकाशदशापन्नतया भाव्यत उत्पद्यतेनयेति भावना। तस्याः प्रकर्षः सकलसंकोचापायः। भावनाप्रकर्षपर्यन्तं जन्म यस्येत्यर्थः। अनुभूतानतिरिक्तविषयस्येति यावत्। तथा च यावदेव भावना तावदेव योगिप्रत्यक्षमुत्पद्यते। भावना चानुभूतसंबन्धिन्येवेति। अनधिकविषयस्य योगिप्रत्यक्षस्य भावनाजन्यत्वेन स्मृतिरूपत्वान्न प्रमाणत्वमिति प्रमाणविशेषप्रत्यक्षत्वं दूरोत्सारितं स्यात्।

—९ आद्य आह-तदतिरिक्तेति। इन्द्रियसंबन्धरूपकारणाभावान्नाधिकविषयस्य योगिप्रत्यक्षस्य प्रामाण्यम्।

तथा सतीति। कारणाभावेऽप्यतिरिक्तविषयत्वाङ्गीकारे सति तस्य दोषमूलकत्वेन भ्रान्तितैवेत्यर्थः।

—१० विशेषतो दृष्टम्। कार्यकारणभावरूपविशेषसंबन्धमूलकम्। यथा कार्येण धूमेन कारणस्य वह्नेरनुमानम्। यथा च कारणेन मेघागमनेन कार्यस्य वृष्ट्यादेरनुमानम्। सामान्यतो दृष्टम्। कार्यकारणभावसंबन्धराहित्येऽपि सामान्यतः सहचारदर्शनजन्यम्। यथा गन्धेन पृथिवीत्वानुमानम्।

—११ संबन्धावधारणविरहात्। कार्यकारणभावसंबन्धज्ञानाभावात्।

—१२ नियतम्। व्याप्तम्।

—१३-४ अथ पूर्वपक्ष्येकदेशी परमात्मन्यनुमानं दर्शयति-ननु चेति। तदुपादानेति। उपादानं समवायिकारणम्। उपकरणं निमित्तकारणम्।

संप्रदानं क्रियोद्देश्यं भोक्ता । प्रयोजनं विनियोगः । एतदभिज्ञः कर्ता यस्य तत्त्वमित्यर्थः । यत्र यत्र कार्यत्वं तत्र तत्रैतादृशकर्तृकत्वमिति व्याप्त्या कर्ता सिध्यति । स चार्थात्परमात्मैवेत्याशयः ।

१३७–१५ एककर्तृकत्वसिद्ध्यर्थमनुमानान्तरमाह–**अचेतनेति** ।

उक्तानुमानद्वये क्रमेण दृष्टान्तमाह–**सर्वं हीत्यादिना** ।

—१७ **एकचेतनाधीनं चेति** । दृष्टमित्यनुषज्यते ।

उक्तानुमानस्य कार्यत्वसिद्ध्यधीनत्वात्कार्यत्वं जगतः साधयति–**सावयवत्वेनेति** ।

—१९ सिद्धान्त्येकदेशी दूषयति–**उच्यत इति** ।

आदौ द्वितीयमनुमानं संनिहितत्वादूषयति–**किमिदमिति** ।

न तावदिति। तदायत्तोत्पत्तिस्थितित्वं हि तदिच्छाधीनोत्पत्तिस्थितित्वम् । तच्च दृष्टान्ते शरीरे न संभवति । शरीरस्योत्पत्तेः स्थितेर्वा जीवेच्छाधीनत्वाभावात् ।

१३८–१ ननु तददृष्टाधीनोत्पत्तिस्थितित्वमेव तदायत्तोत्पत्तिस्थितित्वमिति चेत्तत्राप्याह–**दृष्टान्तो हीति** ।

—४ **अवयवसंश्लेषविशेषः** । अवयवानां सम्यक्संबन्धः । स एवावयविनः स्थितौ प्रयोजको न तु जीव इत्यर्थः ।

—६ **पक्षेति** । सर्वं जगत्पक्षः । शरीरं सपक्षः ।

—७ **तदायत्तेति** । एकचेतनाधीनप्रवृत्तिकत्वमेवैकचेतनाधीनत्वम् । अस्ति चेदं सपक्षे शरीरे । शरीरप्रवृत्तेर्जीवाधीनत्वात् ।

—९ साध्यकोटावेकत्वस्याविवक्षायां दोषमाह–**चेतनमात्रेति** ।

—१० आद्यमनुमानं दूषयति–**किं चेति** ।

—१३ **यथेदानीमिति** । एवमेव पूर्वकालेपीति भावः ।

—१४ ननु तथापि धर्माधर्मयोः साक्षात्कारासंभवाज्जीवस्य कर्तृत्वं न संभवतीति चेत्तत्राह–**उपकरणेति** । उपकरणीभूतयागादिजन्या स्वात्मातिशयरूपा या शक्तिस्तद्रूपमपूर्वादिपदवाच्यं यददृष्टं तस्य साक्षात्काराभावेपीत्यर्थः ।

—१६ **शक्तिमत्** । शक्तिविशिष्टं दण्डादि, शक्तिजनकं यागादि च । तस्य साक्षात्कारः शक्तिमत्त्वेनैव रूपेणेति नाग्रहः ।

—१९ **मणिकः** । कमण्डलुः ।

—२२ अथ कार्यत्वसाधकस्य सावयवत्वहेतोः सोपाधिकत्वं दर्शयति–**किं चेति** । शक्या क्रिया यस्य कार्यस्य तच्छक्यक्रियम् । शक्यमुपादानादिवि-

ज्ञानं यस्य कार्यस्य तच्छक्योपादानादिविज्ञानम् । शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चेत्युपाधिद्वयम् । यत्र कार्यत्वं तत्र शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चेति घटादौ साध्यव्यापकत्वम् । यत्र सावयवत्वं तत्र शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं च नियमेन नास्ति । महीधरादौ व्यभिचारादिति साधनाव्यापकत्वम् । अनया रीत्याभिज्ञचेतनकर्तृकत्वसाधकस्य कार्यत्वहेतोरपि सोपाधिकत्वं बोध्यम् ।

१३९-५-७ अथ कार्यत्वहेतुः परमात्मनि विरुद्धधर्मसाधक इत्याह-किं चेति । अनीश्वरेण । कर्मवश्येन । परिग्रहवता । दण्डचक्रादिसाधनसहितेन । चेतनं कर्तारम् । परमात्मानम् ।

—९ उच्छेदप्रसङ्ग इति । पर्वतो वह्निमानित्यत्रापि वह्नौ सपक्षमहानसदृष्टान्तेन गृहावयवसंबन्धित्वचुल्लीस्थत्वपाकसाधनत्वादिधर्मप्रसङ्गादित्याशयः ।

लिङ्गिनि । साध्ये ।

—११-२ अन्वयेति । अन्वयव्यतिरेकाभ्यामवगतोऽविनाभावनियमो व्याप्तिनियमो येषां तथाभूता इत्यर्थः ।

—१३ सिद्धान्त्येकदेशिमतमुपसंहरति-अत इति ।

—१५ अथ मुख्यपूर्वपक्षमुपपादयति-अत्राहुरिति ।

आदौ कार्यत्वहेतुं स्वरूपासिद्धिनिरसनेन द्रढयति-सावयवत्वादेवेति ।

—१८ महत्त्वे सतीति । अनेन परमाणुव्यावृत्तिः । क्रियावत्त्वादिति । अनेनाकाशव्यावृत्तिः ।

—१९ तनुः । शरीरम् । यद्यप्यस्मदादिशरीरे कार्यत्वं सिद्धमेव तथापीश्वरशरीरे कार्यत्वज्ञापनार्थं तनूपन्यासः । मूर्तत्वात् । अपकृष्टपरिमाणवत्त्वात् । अनेनाकाशव्यावृत्तिः ।

१४०-१ शङ्कते-कार्यत्वेति ।

—३-४ कार्यत्वेनेति । अयं भावः-त्वदभिमतकार्ये घटादावपि शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं च न प्रत्यक्षेणोपलभ्यते । तयोः पुरुषतन्त्रत्वात् । किं तूत्पन्नं घटादिरूपं कार्यं दृष्ट्वा कार्यत्वहेतुकानुमानेनैव तद्धर्मद्वयमनुमीयत इति त्वयाप्यास्थेयम् । तच्चानुमानं महीधरादावपि तुल्यमिति । ज्ञानशक्ती । ज्ञानं कर्तुस्तत्कार्योपादानादिविज्ञानम् । शक्तिश्च कर्तुस्तत्कार्यकरणसामर्थ्यम् । अन्यत्रापि । महीधरादावपि । ते । ज्ञानशक्ती । प्रतिपन्ने । ज्ञाते ।

१४०–११–१ परमात्मन्यनुमानान्तरं दर्शयति–किं चेति । तयोः । धर्माधर्मयोः । आस्थेय इति । तथा च प्रयोगः–धर्माधर्मौ स्वसाक्षात्कारिचेतनाधिष्ठितावेव कार्यकरावचेतनत्वाद्वासिवदिति ।

—१३–४ वर्धकिना । तक्ष्णा । वास्यादेरिति । वासिरलक्षणसाधनं 'वाकस' इति प्रसिद्धम् । अनेकपरिकरसंनिधानेऽपि । अनेकसाधनसंनिधानेऽपि । यूपः । यज्ञस्तम्भः ।

—१५–६ ननु कथं चेतनानधिष्ठितमपि बीजमङ्कुरमुत्पादयतीति चेत्तत्राह–बीजाङ्कुरादेरिति । तत्राप्युक्तदृष्टान्तेन चेतनाधिष्ठितत्वमनुमेयमेवेति भावः । श्रोत्रियवेतालानामिति । परिहासोक्तिः ।

—१७ तथैवेति । सुखादिकमपि चेतनाधिष्ठितमेव पुलकाद्युत्पादयतीत्यर्थः । अथ वा चेतनाधिष्ठितमेव मनः सुखाद्युत्पादकमित्यर्थः ।

—१८ क्षेत्रज्ञानामेवेति । जीवा एव धर्माधर्माद्यधिष्ठाय सुखाद्युपभोगं जनयन्तीत्याशयः ।

—१९ सूक्ष्मेति । सूक्ष्मं परमाण्वादि जीवेन न दृश्यते । स्थूलमपि भित्त्याद्यन्तरितं वस्तु न दृश्यते । स्थूलमनन्तरितमपि दूरं पर्वतादिस्थं वस्तु न दृश्यते । तथा च जीवस्यात्यल्पशक्तित्वेन धर्माधर्मदर्शनायोगात्तद्द्रष्टृत्वेन परमात्मैवास्थेयो न तु लाघवादशक्तस्य जीवस्य कार्यकरत्वकल्पनं युक्तम् । अन्यथैकेन्द्रियवादप्रसङ्गः स्यादिति भावः ।

१४१–२ अत इति । अनुमानादिप्रमाणान्तरेण परमात्मा सिध्यत्येवेत्यर्थः ।

समर्थेति । यत्र यत्र कार्यत्वं तत्र तत्र समर्थकर्तृपूर्वकत्वमस्त्येवेति व्याप्तिः । तथा च कार्यत्वेन हेतुना सिध्यन्परमात्मरूपः कर्ता सर्वकार्यकरणसमर्थ एव सिध्यतीति न जीववत्परमात्मनो ज्ञानशक्ती संकुचिते इति भावः ।

—५ अथ कार्यत्वहेतोर्विरुद्धधर्मसाधकत्वं प्रागुक्तं (श्रीभाष्य–पृ. १३९प.५) निरस्यति–यत्त्विति ।

—७ लिङ्गिनि । साध्ये । महानसे सपक्षे दृष्टानामपि गृहावयवसंबन्धित्वादिधर्माणां पर्वतो वह्निमानित्यत्र वह्नावप्राप्तेः । न च वह्नेः प्रमाणान्तरप्रतिपन्नत्वान्न तद्धर्मप्राप्तिरिति सिद्धान्त्येकदेशयुक्तं युक्तमिति वाच्यम् । धर्मिप्राप्तौ प्रमाणान्तरप्रतिपन्नत्वस्याप्रयोजकत्वात् । किं तु धूमरूपकार्यस्य वह्निरेव हेतुर्न तु तत्र गृहावयवसंबन्धित्वादिधर्माः । अतो धूमः स्वहेतुभूतं वह्निमेवानुमापयति नान्यधर्मान्तरम् । एवमत्रापि कार्यं स्वहेतुभूतं परमात्मानं तत्र स्वनिर्माणसामर्थ्यं स्वकारणज्ञानं चानुमापयति । कार्यनिर्माणसामर्थ्यं कार्यकरण-

ज्ञानं चान्तरेण कार्योत्पत्त्यदर्शनात्। न तु कार्यं स्वाहेतुभूताननीश्वरत्वार्थान्तराज्ञानादिधर्मान्परमात्मन्यनुमापयति। अनीश्वरत्वस्यार्थान्तराज्ञानस्याम्येषां चैवंविधानां धर्माणामन्वयव्यतिरेकाभ्यां कार्यनिरूपितकारणत्वासंभवात्। न हि घटः कुलालं इतरकार्यकरणासामर्थ्यमपेक्षते। न वा स्वव्यतिरिक्तपटादिपदार्थज्ञानं तत्रापेक्षते।

१४१-१२ अथापेक्षत इति वैयात्येन ब्रूषे चेत्तत्राह-किं चेति।

—१६ सर्वेषु कर्तृष्विति। घटव्यतिरिक्तं कतिपयं वस्तु पटो वा भित्तिर्वा गौर्वा कुसूलं वा यद्गृह्यते तदज्ञानमेव तत्करणासामर्थ्यमेव च घटकर्तुः कुलालस्य वर्तत इति नियमे मानाभावात्, तज्ज्ञानवतोऽपि तत्करणसमर्थस्यापि च कुलालस्य घटहेतुत्वदर्शनाद्व्यभिचार इति भावः।

—१९ शङ्कते-कुलालादीनामिति।

१४२-२ भूतेति। भूतवेतालानामपगमो गरलस्य विषस्य विनाश इत्यन्वयः।

—३ पुनः शङ्कते-कथमिति।

—५ कार्यत्वेनेति। यथा कार्यत्वेन हेतुनोपादानज्ञानं कार्यकरणसामर्थ्यं चेश्वरस्यास्तीत्युक्तं तथा तेनैव हेतुनेश्वरस्य मनोऽप्यस्ति। अङ्गीकृतश्च नैयायिकैकदेशिभिः परमात्मन्यपि मनःसंबन्ध इति बोध्यम्।

—६ पुनः शङ्कते-मानस इति।

—८ अनैकान्तिकत्वात्। यत्र मनस्तत्र सशरीरत्वमस्त्येवेति नियमस्य व्यभिचरितत्वात्।

—१० क्षेत्रज्ञो न प्रभवति। जीवः समर्थो न भवति।

—१५-७ ननूक्तरीत्या परमात्मनोऽनुमानगम्यत्वेऽप्यनुमानागम्यकतिपयार्थबोधकत्वेन ब्रह्मप्रतिपादकस्य शास्त्रस्य प्रामाण्यमस्त्येव। ब्रह्मैकमेव जगतो निमित्तकारणमुपादानकारणं चेत्यनुमानेन न ज्ञायते। लोके तयोरैक्यस्यादर्शनात्। तथाकाशाद्युत्पादकं ब्रह्मेति शास्त्रेण न ज्ञायते। लोके निरवयवपदार्थस्योत्पत्तेरदर्शनादिति चेत्तत्राह—किं चेति। नैकमेवेति। एकमेव ब्रह्माकाशादेः कृत्स्नस्य जगतो निमित्तकारणमुपादानकारणं च तदेवेत्याकारकं लोकविरुद्धमर्थं प्रतिपादयितुं शास्त्रमपि न शक्नोतीत्यर्थः।

—१८ अथ मुख्यसिद्धान्तं दर्शयति-एवमिति।

१४३-४ प्रमाणाभावादिति। यद्यपि कार्यत्वहेतुकानुमानेन जगतः कर्ता सिध्यति तथापि स एक एवैकदैव च तेनेदं सर्वं निर्मितमिति न सिध्यति। एवं च जगतोऽनेकजीवकर्तृकत्वे स्वीकृतेप्यनुमानं न विरुद्धमिति नानुमानेनेश्वरसिद्धिरिति भावः।

१४३-७-८ विचित्रेति । मह्यादिजगतोऽस्मदादिजीवैः कर्तुमशक्यत्वेनातिविपुलत्वेनातिसूक्ष्मत्वेन च विचित्रत्वं बोध्यम्। तदतिरिक्तेति । जीवातिरिक्तैकेश्वरकल्पनायामनेककल्पनारूपदोषाभावादित्यर्थः । अर्हतीति । इति न वाच्यमित्यर्थः ।

—९ तत्र हेतुमाह-क्षेत्रज्ञानामिति । शक्तिवैचित्र्येति । योगिनां हि योगबलेन सूक्ष्ममपि दूरस्थमपि वस्तु दृश्यते। इन्द्रादीनां चास्मदाद्यपेक्षयाऽधिकसामर्थ्यं प्रसिद्धमेव ।

—११ तदतिरिक्तेति । सिद्धेष्वेव जीवेष्वदृष्टातिशयकल्पने लाघवम्। अत्यन्तादृष्टस्य पुरुषस्यैव कल्पनं तु गौरवग्रस्तत्वान्नोपपद्यते । धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायादिति भावः ।

—११-२ न चेति । सर्वस्य जगतो युगपन्नाशो युगपदुत्पत्तिश्च न प्रमाणसिद्धेत्यर्थः। यदि स्यात्तर्हि तन्नाशायाशरीर ईश्वरः कल्प्यः स्यात् । जीवस्य शरीरसापेक्षकर्तृत्वेन युगपत्सर्वनाशस्य जीवकर्तृकत्वासंभवात्। शरीरस्य सर्वान्तर्गतत्वात् । एवं युगपत्सर्वोत्पत्तावपि ।

—१४ विरोधाभावाच्चेति । जगतः क्रमिकोत्पत्तौ क्रमिकनाशे च कल्प्यमाने कश्चन विरोधो नास्तीत्यर्थः ।

—१६-७ अथ फलितं दूषणं दर्शयति-अत इति । अनैकान्त्यम्। व्यभिचारः। अनेककर्तृकप्रासादादिषु बुद्धिमदेककर्तृकत्वाभावेपि कार्यत्वदर्शनेन कार्यत्वहेतोर्व्यभिचरितत्वान्न तेन बुद्धिमदेककर्तृकत्वं सिध्यतीत्यर्थः । ननु बुद्धिमदेककर्तृकत्वं नाम सर्वज्ञः सर्वशक्तिश्च यः परमात्मा तदेककर्तृकत्वम्। तच्च प्रासादादिष्वप्यन्ततोऽस्तीत्यनुमेयमेवेति न व्यभिचार इति चेत्तत्राह-पक्षस्येति । महानसादौ प्रसिद्धस्य वह्निमत्त्वस्य पर्वतो वह्निमानित्यत्र पर्वतविशेषणत्वं युक्तम्। जगत्सर्वज्ञसर्वशक्त्येकपरमात्मकर्तृकमिति त्वदुक्तानुमाने तु सर्वज्ञसर्वशक्त्येकपरमात्मकर्तृकत्वस्यान्यत्राप्रसिद्धस्य जगद्विशेषणत्वं न संभवति । सर्वज्ञसर्वशक्त्येकपरमात्मकर्तृकत्वस्याप्रसिद्धत्वादेव च घटादिदृष्टान्तस्य साध्यरहितत्वमिति भावः ।

तदेवोपपादयति-सर्वनिर्माणेति ।

—१८ सकर्तृकत्वमात्रं साध्यमिति पक्षे दूषणमाह-बुद्धिमदिति । सिद्धसाध्यतेति । वेदान्तिभिरस्माभिरपि जगतो बुद्धिमत्कर्तृकत्वस्याङ्गीकारात् ।

—१९-१४४-१ सार्वज्ञ्येति । यथा घटरूपविशेषकार्यनिष्ठकार्यत्वेन कर्तृविशेषः कुलालः साध्यते न तु सामान्यतः कार्यत्वेन, तथा सर्वज्ञसर्वशक्तियुक्तपरमात्मनः कर्तृविशेषस्य साधकमिदं कार्यत्वं किंचिद्विशेषकार्यनिष्ठमित्यवश्यं

धाव्यम् । तत्किं युगपदुत्पद्यमानसर्ववस्तुगतमुत क्रमेणोत्पद्यमानसर्ववस्तुगतम् । नाद्यः । सर्वस्य युगपदुत्पत्तेरसंभवेन तन्निष्ठकार्यत्वस्यासिद्धत्वात् । नान्त्यः । क्रमेणोत्पद्यमानघटपटरथादिसर्ववस्तूनामेकस्मादुत्पत्तेर्लोकेऽदर्शनेन तादृशसर्ववस्तुनिष्ठकार्यत्वस्य त्वदुक्तसाध्यविरुद्धत्वात् ।

१४४–२ अत्रापीति । क्रमेणोत्पद्यमानघटपटरथादिसर्ववस्तूनामेकस्मादेवोत्पत्तिरित्यङ्गीकारे तेषां कुम्भकारकुविन्दरथकाराद्यनेककर्तृकत्वं प्रत्यक्षत उपलभ्यमानं विरुद्धं स्यात् । कार्यमनेककर्तृकं विचित्रत्वादित्याद्यनुमानानि च विरुद्धानि स्युः ।

—२ कुम्भकार इति । कुम्भरथयोरेककर्तृकत्वे कुम्भकाररथकारयोरुत्पत्तेः पृथग्वक्तुमशक्यत्वात् ।

—५–६ प्रकारान्तरेण विरोधं दर्शयति–अपि चेति । सत्त्वादीति । आदिना रजस्तमसोः संग्रहः । सत्त्वादिगुणानां कार्यं यत्सुखादि तत्संबन्धः शरीरादिषु सर्वत्र दृश्यते । सुखादीत्यादिशब्देन दुःखमोहग्रहणम् । यथैकस्मिन्नेव कान्ताशरीरे सुखदुःखमोहसंबन्धः । तत्पत्युस्तच्छरीरात्सुखोत्पत्तेः । तां चिन्तयतस्तामप्राप्तवतश्च दुःखोत्पत्तेः । तामचिन्तयतोऽन्यस्य मोहोत्पत्तेश्च । मोह औदासीन्यम् । एवं सर्वत्र गुणत्रयसंबन्धो बोध्यः । सत्त्वादिमूलत्वम् । सत्त्वादिगुणविशिष्टद्रव्यकारणकत्वम् ।

—७ ननु सत्त्वादिगुणविशिष्टद्रव्यस्य शरीरं प्रति कारणत्वेपि तत्रत्यानां गुणानां कथं कारणत्वम् । न हि तन्तुरूपं पटं प्रति कारणं भवतीति चेत्तत्राह–तेषामिति । शरीरादीनामित्यर्थः । शरीरसंसृष्टमनसि विकारोत्पादकत्वेन गुणानां शरीरकारणत्वमुपचर्यत इत्याशयः ।

—९ तद्योगः । शरीरयोगः । ज्ञानशक्तिवदिति । यथा पूर्वपक्षिणा कर्तृसाधकेन कार्यत्वेन हेतुना कर्तुः कार्योपादानज्ञानं कार्यकरणसामर्थ्यं चानुमीयते तथा तेनैव हेतुना कर्तरि कर्मसंबन्धोऽवश्यमनुमेयः । अन्तरेण कर्म ज्ञानशक्तिवैचित्र्यासंभवात् । तथा चानुमानेन सिध्यन्कर्ता कर्मवश्य एवेति जीव एव स भवितुमर्हति । अतो नानुमानेनेश्वरसिद्धिरित्याशयः ।

—११ नन्वीश्वर इच्छामात्रादेव जगत्सृजतीति तत्र कर्ममूलकस्य ज्ञानशक्तिवैचित्र्यस्यानपेक्षितत्वान्न तस्य कर्मवश्यत्वमिति चेत्तत्राह–इच्छाया इति ।

—१४ प्रतिकूलानुमानानि दर्शयति–भवन्ति चेति ।

—१६ तद्वदेव । मुक्तवदेव ।

—१७ न चेति । जीवस्य स्वशरीरकर्तृत्वावस्थायामकर्तृत्वाभावेप्यशरीरत्वस्य सत्त्वेनाशरीरत्वहेतुर्व्यभिचरित इत्याशयः ।

१४५-१ सद्भावादिति। यथा बालशरीरविशिष्टो जीवो युवशरीरं परिगृह्णाति तद्वदेवेदं बोध्यम्।

प्रतिकूलानुमानान्तरमाह-विमतीति। न लोकशून्य इति। तथा च जीवविशिष्टलोकस्य सर्वदा सद्भावेन जगन्निष्ठकार्यत्वस्य जीवैरेव सिद्धत्वेन नेश्वरानुमानावसर इति भावः।

—३ पूर्वपक्ष्युक्तानुमानं प्रकारान्तरेण दूषयति-अपि चेति।

—५ नित्यत्वेपीति। अपिशब्देन स्वमते मनसो नित्यत्वानभ्युपगमं सूचयति।

—७ सावयवस्येति। ईश्वरशरीरस्य सावयवस्यापि सतो नित्यत्वेऽङ्गीक्रियमाणे सावयवस्य जगतोऽपि नित्यत्वप्रसङ्गः। नित्यत्वे च तस्य जगज्जन्मादिकर्तृत्वाभावेनेश्वरत्वं न सिध्यतीत्यर्थः।

—९ तद्व्यतिरिक्तस्येति। शरीरस्यानित्यत्वे तदुत्पत्तिवेलायां तच्छरीरहेतुभूतस्य तच्छरीरव्यतिरिक्तस्यान्यस्य शरीरस्याभावादनित्यत्वपक्षो न संभवतीत्यर्थः।

स्वयमेव। केवलपरमात्मैव।

—११ अनवस्थानादिति। यदि बीजाङ्कुरन्यायेन नानवस्थादोष इत्युच्यते तदापि सशरीरत्वेनेश्वरस्य कर्मवश्यत्वं स्यादेवेति दोषो बोध्यः।

—१२ पुनः प्रकारान्तरेण पूर्वपक्ष्युक्तानुमानं दूषयति-स किमिति। स ईश्वरः।

—१४-५ इच्छामात्रेति। मात्रशब्देन सत्त्वादिगुणसंबन्धस्य तन्मूलकर्मसंबन्धस्य च व्यावृत्तिः। अप्रसिद्धविशेषणत्वम्। अप्रसिद्धसाध्यकत्वम्। साध्यहीनतेति। घटादौ दृष्टान्ते निर्व्यापारकर्तृकत्वस्यादर्शनात्।

—१६ शास्त्रैकप्रमाणक इति। नन्वेवमप्यव्यापारस्याशरीरस्य च परमात्मनो जगत्कर्तृत्वासंभवस्तदवस्थ एव। लोके तथाऽदर्शनादिति चेन्न। शब्दानपेक्षतया केवलानुमानेनेश्वरं साधयतस्तवैव दृष्टान्तापेक्षा न तु ममेति भावः।

—१७ तदेव ध्वनयन्नाह-शास्त्रं त्विति।

१४६-४-६ प्रकृतिश्चेति। प्रकृतिरुपादानकारणम्। ईश्वरो न केवलं जगतो निमित्तकारणं किं तूपादानकारणमपि। यतस्तथा सत्येव श्रुत्युक्तौ प्रतिज्ञादृष्टान्तौ नोपरुध्येते। 'येनाश्रुतं श्रुतं भवति' (छा. ६।१।३) इति प्रतिज्ञा। 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' (छा ६।१।४) इति दृष्टान्तः। न वियदिति। वियन्नोत्पद्यते श्रुतौ तदुत्पत्तेरप्रतिपाद-

नादिति पूर्वपक्षं कृत्वा सूत्रकारैरग्रे ' आत्मन आकाशः संभूतः' (तै. २।१।१) इति श्रुतेराकाशोत्पत्तिः साधितेति बोध्यम् ॥ ३ ॥

१४६–१० न शास्त्रमिति । सिद्धब्रह्मप्रतिपादकत्वे स्वीकृते तु शास्त्रं न कस्यचित्प्रवर्तकं निवर्तकं वा स्यात् । तथात्वे तु तस्य सुखपर्यवसायित्वं दुःखनिवृत्तिपर्यवसायित्वं वा नास्तीति शास्त्रमपि ब्रह्मण्यप्रमाणं स्यादित्याशयः ।

—१४ अभिधेयतया । वाच्यतया । ब्रह्मणि शास्त्रस्य वाचकत्वेन संबन्धाद्ब्रह्मणः शास्त्रप्रमाणकत्वं भवत्येवेति फलितोऽर्थः ।

१४७–५ व्युत्पत्तिसिद्धेति । ब्रह्मणि समन्वितानां श्रुतीनां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहेणान्यपरत्वमप्रमाणत्वरूपं कर्तुंस्तावकत्वादिरूपं वा न कल्पयितुं शक्यम् । सिद्धे वस्तुन्यपि शब्दानां व्युत्पत्तेरुपपादनादिति भावः ।

—८ ननु प्रवृत्तिनिवृत्यन्यतरप्रयोजनविरहे कथं प्रामाण्यमित्यत्राह–स्वविषयेति । प्रमाणानां विषयावबोधे तात्पर्यं न तु प्रयोजनपर्यन्तम् । अत एव निष्प्रयोजनस्यापि लोष्टादिप्रत्यक्षस्य प्रामाण्यमङ्गीकृतमभियुक्तैः ।

—९ तदेवाह–न च प्रयोजनेति ।

—१० अथ ब्रह्मप्रतिपादकश्रुतीनां प्रवृत्तिनिवृत्यन्यतरप्रयोजनविरहेऽपि तद्व्यतिरिक्तं प्रयोजनमप्यस्तीत्याह–न च प्रवृत्तीति ।

—११ स्वरूपपरेषु । सिद्धार्थप्रतिपादकेषु । पुत्रस्ते जात इत्यस्य हर्षः प्रयोजनम् । नायं सर्प इत्यत्र भयनिवृत्तिः प्रयोजनमिति बोध्यम् ।

—१४ अथास्मिन्नधिकरणे पूर्वपक्षं विस्तरेण प्रतिपादयति–अत्राहेत्यादिना न संभवतीति प्राप्तम् (श्रीभाष्य–पृ. १६८–प. ३) इत्यन्तेन । मीमांसकमतमेतत् ।

—१४–५ प्रवृत्तीति । अत एवोक्तं वार्तिककृता–

यावत्खलु प्रमातृणां प्रवर्तननिवर्तने ।
शब्दा न कुर्वते तावन्न निराकाङ्क्षबोधनम् ॥

इति । शास्त्रस्येति । शासनाद्धि शास्त्रम् । शासनं च प्रवर्तननिवर्तनात्मकमेवेत्याशयः ।

—१७ प्रयोजनरहितस्येति । अत एव पुनरुक्तेर्दोषत्वमुक्तं साहित्यशास्त्रे । तत्र हि दोषत्वबीजं प्रयोजनशून्यत्वमेव ।

२०–१ अर्थार्थी । द्रव्यार्थी । मन्दाग्निः । मन्दो जाठराग्निर्यस्य । अम्बु । उदकम् ।

१४८–४ अर्थपरत्वाभावेनेति । यद्यपि वेदान्तशास्त्रं मोक्षरूपप्रयोजनपर्यवसायि तथापि स मोक्षो ब्रह्मज्ञानादेव न तु ब्रह्मस्वरूपादित्यतो मोक्षे

ब्रह्मस्वरूपस्यानुपयोगेन शास्त्रस्य ब्रह्मस्वरूपसिद्धवस्तुप्रतिपादकत्वतात्पर्याभावेन न शास्त्रं ब्रह्मसद्भावे प्रमाणमित्याशयः।

१४८-१० निष्प्रपञ्चमिति। तथा च सिद्धस्यापि ब्रह्मणः प्रपञ्चराहित्यस्वरूपेणाकारान्तरेण साध्यत्वमिति भावः।

—१२ कोसाविति। कतिपयनाशेप्यशक्तस्य सकलप्रपञ्चनाशनविधिरशक्य इत्याशयः।

—१४ न दृष्टेरिति। प्रपञ्चस्याविद्यापरिणामरूपत्वाद्बुद्धिनिवृत्तिमात्ररूपः प्रपञ्चलयः शक्य एवेत्याशयः।

—१५ दृशिमात्रमिति। मात्रशब्देनाविद्यानिवृत्तिः।

—१८ मीमांसकः पूर्वपक्ष्येतद्दूषयति-तदयुक्तमिति।

—१८-९ नियोगेति। नियोगो विधिः। स एव वाक्यार्थ इति वादिनेत्यर्थः। नियोज्येति। नियोज्यस्य नियोक्तुं शक्यस्य विशेषणम्। यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र नियोक्तुं शक्यस्य कर्तुर्विशेषणं स्वर्गकाम इति। विषयः। विधिविषयो विधेय इति यावत्। स च यागादिः क्रियारूपः। करणम्। यागादिरेव भावनारूपकार्यनिष्पत्तौ करणं साधनम्। वक्तव्या इति। न दृष्टेरिति निष्प्रपञ्चीकरणविधाविति शेषः।

—२० आदौ नियोज्यविशेषणं दूषयति-तत्रेति। अनुपादेयम्। विधेयभिन्नम्। अथवात्र वक्तुमशक्यमित्यर्थः।

निमित्तमिति। यथा यावज्जीवमग्निहोत्रं जुहुयादित्यत्र नियोज्यस्य कर्तुर्जीवनं विशेषणम्। यथा वा मलिनवपुः स्नायादित्यत्र नियोज्यस्य स्नानकर्तुर्मलिनवपुष्ट्वं विशेषणं निमित्तभूतम्। तस्य सिद्धत्वात्। फलमिति। यथा स्वर्गकामो यजेतेत्यत्र स्वर्गरूपं विशेषणं फलभूतम्। तस्यासिद्धत्वात्।

१४९-१ ब्रह्मस्वरूपयाथात्म्यानुभव इति। तथा चैतादृशानुभवावान्निष्प्रपञ्चीकरणविधौ नियोज्य इत्यर्थः।

—३ नित्यत्वेन। कदाप्यविनाशित्वेन। सिद्धत्वेनेति यावत्। अस्य निमित्तत्व इत्यत्रान्वयः। अपिरेवार्थे। शरीरेन्द्रियाभावेऽपि विषयानुष्ठानयोग्यता तु निमित्तत्वाङ्गीकारबलात्स्वीकर्तव्या स्यात्।

—४ नैयोगिकम्। विधिसंबन्धि।

—५ विषयं दूषयति-कथ्येति।

—६ अभव्यरूपत्वात्। असाध्यरूपत्वात्। अभावार्थत्वात्। क्रियारूपत्वाभावात्।

१४९-६ शङ्कते-निष्प्रपञ्चमिति । तथा च ब्रह्मणो निष्प्रपञ्चत्वस्वरूपेण साध्यत्वमित्याशयः ।

—७ साध्यत्वेऽपीति । त्वदुक्तरीत्या ब्रह्मणः साध्यत्वेऽपि फलत्वं स्यान्न तु विधिविषयत्वम् । क्रियारूपत्वाभावात् । विषयस्य फलव्यतिरिक्तत्वनियमाच्चेति भावः ।

—१० न तर्हीति । तथा च ब्रह्मणः साध्यत्वाभावहेतुकोऽपि विधिविषयत्वाभावः सिद्ध इत्यर्थः ।

शङ्कते-प्रपञ्चेति ।

—१२ स च फलमिति । तथा च मोक्षरूपायाः प्रपञ्चनिवृत्तेः फलत्वात्फलभूतायास्तस्या न विषयत्वमित्यर्थः ।

अस्य चेति । प्रपञ्चनिवृत्तेर्विधिविषयत्वेन प्रपञ्चनिवृत्त्या विधिसिद्धिः । प्रपञ्चनिवृत्तेः फलत्वेन च विधिसिद्ध्युत्तरं प्रपञ्चनिवृत्तिसिद्धिरित्यन्योन्याश्रय इति भावः । एतेन निष्प्रपञ्चीकरणनियोगो दूषित इति बोध्यम् ।

—१५ अथ निष्प्रपञ्चीकरणविधिं प्रकारान्तरेण दूषयति-अपि चेति ।

—१६ न किंचिदिति । रज्जुज्ञानेनैव सर्पनिवृत्तिसिद्धौ सर्पनिवृत्तिविधिरप्रयोजक इति भावः ।

—१७ शङ्कते-नियोगस्त्विति ।

—१८ स्ववाक्यात् । प्रपञ्चमिथ्यात्वब्रह्मनिर्विशेषत्वप्रतिपादकवाक्यात् ।

१५०-१ ननु प्रपञ्चस्य सत्यत्वमेवेति द्वितीयपक्ष एवाश्रीयते । तथा च तस्य ज्ञाननिवर्त्यत्वाभावेन तदर्थं विधिरावश्यक इति चेत्तत्राह-प्रपञ्चस्येति ।

—२ नित्यतया । प्रपञ्चनिवर्तकस्य ब्रह्मस्वरूपस्य नित्यतया ।

—४-६ ब्रह्मस्वरूपव्यतिरिक्तः । कृत्स्नप्रपञ्चनिवृत्तिविषयको विधिर्ब्रह्मस्वरूपव्यतिरिक्तश्चेदित्यर्थः । आश्रयाभावादिति । एतेन वक्तव्यतया प्राक् (श्रीभाष्य-पृ. १४८-प. १८) निर्दिष्टेषु नियोगादिषु मध्ये प्रयोक्ता दूषितो भवति ।

—९ अथ करणमितिकर्तव्यतां च दूषयति-किं चेति । प्रपञ्चनिवृत्तिरूपं यद्भावनाकरणं तत्किंचित्कृत्स्नैव भावनां जनयेत् । अन्यथा करणत्वायोगात् । करणस्य व्यापारवत्त्वनियमात् । तथा च करणस्येतिकर्तव्यताऽवश्यं वाच्या । सा चात्र करणस्य प्रपञ्चनिवृत्तिरूपत्वेन न संभवतीत्यर्थः ।

—११ अस्य । प्रपञ्चनिवृत्तिरूपस्य करणस्य ।

—१२ कार्यभेदभिन्नेति । भावरूपेतिकर्तव्यता च क्वचित्करणशरीरं निष्पादयति । यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र यागीययेतिकर्तव्यतया यागस्वरूपं निष्पाद्यते । क्वचिच्च करणात्कार्यनिष्पत्तिवेलायां प्राक्सिद्धस्वरूप एव

करणेऽनुग्रहं करोति । यथा चक्षुषा पश्यतीत्यत्र विषयेन्द्रियसंबन्धरूपा चक्षुष इतिकर्तव्यता दर्शनवेलायां चक्षुष्यनुग्रहं करोति । एवं कार्यभेदेन द्विविधापि भावरूपेतिकर्तव्यताऽत्र न संभवतीत्यर्थः ।

१५०-१४ दृष्टार्थेति । कृत्स्नप्रपञ्चनिवृत्तिरूपकरणशरीरस्य निष्पादिका भावरूपेतिकर्तव्यता दृष्टार्था नैवोपलभ्यत इत्यर्थः ।

—१६ अनुग्राहकांशेति । अनुग्राहकं यत्तत्कृत्स्नप्रपञ्चान्तर्गतमेवेत्यनुग्राहकांशसत्त्वे कृत्स्नप्रपञ्चनिवृत्तेर्वक्तुमशक्यत्वात् ।

—१७ शङ्कते-ब्रह्मण इति ।

—१९ अथाभावरूपेतिकर्तव्यतां दूषयति-अभावरूपत्व इति । अभावत्वात् । अप्रामाणिकत्वात् । अभावादिति पाठेप्ययमेवार्थः । एवं निष्प्रपञ्चीकरणविधिवादिनो मृषावादिनो मतं निरस्तम् ।

१५१-३ अथ ध्यानविधिवादिनो मृषावादिनो मतं खण्डयितुमादौ तद्दर्शयति-अन्योप्याहेत्यादिना प्रामाण्यमुपपन्नमिति (श्रीभाष्य-पृ. १६७ प. २) इत्यन्तेन ।

—९ नियोगः । विधिः ।

—१५ ध्यानशरीरेति । ध्यानस्य हि सशरीरत्वं ध्यानविषयद्वारैव । विषयीभूतं ब्रह्म च श्रुतावद्वितीयत्वेनोक्तम् । अद्वितीयत्वमेव च भेदमिथ्यात्वम् । अतो ध्यानशरीरानुप्रविष्टभेदनिषेधपर्यन्तं ध्यानविधेस्तात्पर्यमित्याशयः ।

—१९ प्रत्यक्षादिभिरिति । अस्य यद्यपीत्यादिः ।

—२० भेदाभेदयोरिति । अस्य तथापीत्यादिः । भेदप्रतीतेर्न सत्यत्वम् । अन्यथापि तस्याः सिद्धत्वात् । अतोऽनन्यथासिद्धशास्त्रावगतोऽभेद एव परमार्थ इति भावः ।

—२२ तत्साक्षात्कारफलेनेति । ब्रह्मध्यानविधिर्हि स्वफलीभूतब्रह्मज्ञानद्वाराऽविद्यानिवृत्तिं जनयति । तथा च ध्यानविधिवादिनो मते नियोगो ध्यानविधिः, नियोज्यस्याधिकारिणो विशेषणमविद्यानिवृत्तिरूपं फलम्, विषयो ध्यानमेव, तदेव कार्यनिष्पत्तौ करणम्, इतिकर्तव्यता शमादिः, प्रयोक्ता च ध्यातेति सर्वे नियोगादयो वक्तुं शक्यन्त इति भावः ।

१५२-२ अनुपलब्धेरिति । एतेन वाक्यार्थज्ञानमात्रान्मोक्ष इति परास्तम् ।

—४ अथ शाङ्करमतमाशङ्कते-अथोच्येतेत्यादिना समुदायेन सिध्यतीति (श्रीभाष्य. पृ. १५५ प. १५) इत्यन्तेन ।

—८-१० विपरीतफलदत्वमाह-किं चेति । अवर्जनीयमिति । ध्यानस्य धर्मरूपत्वादिति भावः ।

१५२-१२ अपहृतिः । संबन्धाभावः ।

—१४ न च नियोगेति । यथा प्रायश्चित्तविधेः पापनिवृत्तिरूपं फलं तथा ब्रह्मध्यानविधेः शरीरनिवृत्तिरूपं फलमित्याशयः ।

१५३-१ अन्यत्र धर्मादिति । कृताकृतं प्रारब्धापरिसमाप्तं वर्तमानमित्यर्थः । अत्र पुरुषार्थस्य धर्माधर्मसंबन्धराहित्यमुक्तम् । संबन्धश्च साध्यसाधनभाव इति मोक्षस्य तदसाध्यत्वं सिद्धमिति भावः ।

—४ आत्मस्वरूपस्य मोक्षस्य विधिसाध्यत्वं प्रकारान्तरेण दूषयति-अपि चेति ।

—१० अथ क्रियाविषयत्वाभावात्संस्कारविषयत्वाभाव इति दर्शयति-नित्यनिर्विकारेति । यत्क्रियाविषयं तत्सविकारमिति व्याप्तेर्निर्विकारत्वेन क्रियाऽविषयत्वम् । यदा दर्पणो हस्ततलादिषु निर्घृष्यते तदा दर्पणाश्रया क्रिया । यदा दर्पणे हस्ततलं निर्घृष्यते तदा हस्ततलाश्रया क्रियेति स्वाश्रयपराश्रयक्रिययोर्दर्पण उदाहरणम् ।

—१२ नन्वात्मनोऽविकारत्वेपि देहगतस्नानक्रियया तस्य संस्कारो दृश्यत इति चेत्तत्राह-न चेति ।

—१३ अविद्यागृहीतः । अविद्यया कल्पितः । तत्संगतः । देहसंगतः ।

—१४ नन्वात्मनः फलभोक्तृत्वात्स एव संस्कार्य इति चेत्तत्राह-तत्फलेति । तस्यैव । अविद्यागृहीतस्यैव ।

तत्साक्षित्वात् । अहंकारसाक्षित्वात् । न हि यो यस्य साक्षी स तद्रूपो भवति ।

—१८ आत्मेन्द्रियेति । आत्मा शरीरम् ।

—२० साक्षी । अहंकारे व्याप्रियमाणे स्वयं साक्षिमात्रतयावस्थानान्न भोक्तेति भावः । केवलः । फलसंबन्धरहितः । निर्गुणः । अगुणवश्यः । अत एव न तस्य भोक्तृत्वमित्याशयः ।

—२२ पर्यगात् । अमन्यत । शुक्रम् । अविद्यारहितम् । अकायम् । अशरीरम् । अस्नाविरम् । स्नावा शिरा यस्मिन्न विद्यत इत्यस्नाविरम् ।

१५४-७ मृदितकषायाय । नष्टरागद्वेषादिदोषाय ।

—१० ननु प्रतिबन्धनिवृत्तेः साध्यत्वे तस्या उत्पन्नत्वेन कदाचिन्नाशः स्यादित्यत आह-तन्निवृत्तिरिति । नाशस्योत्पत्तिव्यापकत्वं भावविषयकमेवेत्याशयः ।

—१३ प्रतिरुणद्धीति । श्रुतिस्वारस्येन बिलम्बासहत्वाद्ब्रह्मज्ञानसमकालमेव मोक्षो न तु ज्ञानानन्तरभाविध्यानोत्तरमिति भावः ।

१५४-१३ ननु विधिशेषतया ब्रह्मणः सिद्धिरिति विधेरावश्यकत्वमिति चेत्तत्राह-न च विदीति। वेदनं सामान्यज्ञानम्। ध्यानं तु ज्ञानविशेषः।

—१५ अन्यदेव तद्विदितादिति। विदितात्। ज्ञेयात्। अविदितात्। ज्ञातुः। अनेन तत्केन विजानीयादित्यनेन च विदिक्रियाकर्मत्वं निषिद्धम्।

—१६ नेदं यदिदमुपासत इति। अनेन ध्यानक्रियाकर्मत्वं निषिद्धम्।

१५५-५ न शरीरपातादूर्ध्वमेवेति। किं तु जीवतोऽपि ज्ञानसमकालमेव मुक्तिः। यथा दग्धः पटः पटत्वेनावभासमानोपि निवृत्त एव तद्वदेवायं बन्ध इत्याशयः।

—१४ तत्परेण। सिद्धरूपाद्वितीयब्रह्मपरेण।

—१६ अथैतच्छांकरमतं ध्यानविधिवादी दूषयति-तदयुक्तमिति।

—१७ अपरोक्षत्वात्। प्रत्यक्षत्वात्।

—२१ वस्तुयाथात्म्येति। वस्तुयाथात्म्यस्य यथार्थवस्तुनो यदपरोक्षं प्रत्यक्षज्ञानं तज्जनकीभूता या प्रवृत्तिः सासोपदेशाद्भवति। भयनिवृत्तिस्तु प्रत्यक्षज्ञानादेवेत्याशयः।

१५६-३ अनिन्द्रियत्वात्। इन्द्रियभिन्नत्वात्। अनिन्द्रियस्याप्यालोकस्य प्रत्यक्षज्ञानजनकत्वं त्विन्द्रियानुग्रहद्वारैवेति भावः।

—४ अनभिसंहितेति। फलानिच्छया कृतेन कर्मणा नष्टा रागादिदोषा यस्य तस्येत्यर्थः। यथाऽव्यवहितवस्तुग्राहकमपीन्द्रियं योगबलेन व्यवहितस्यापि वस्तुनो ग्राहकं तथा प्रत्यक्षज्ञानाजनकमपि वाक्यमुक्तविशेषणविशिष्टपुरुषस्य प्रत्यक्षज्ञानजनकं भवतीति न मन्तव्यमित्यर्थः।

—६-८ तत्र हेतुमाह-निवृत्तेति। स्वविषयेति। स्वसाध्यज्ञानानतिक्रमदर्शनेनेत्यर्थः। शब्दसाध्यं ज्ञानमप्रत्यक्षमेवेति शब्दः स्वसाध्यमप्रत्यक्षज्ञानं नातिक्रामतीति फलितम्। तदयोगात्। वाक्यस्य प्रत्यक्षज्ञानजनकत्वायोगात्।

—९ अथ 'वाक्यार्थावगतिहेतुत्वात्तेषाम्' इति प्रागुक्तं (श्रीभाष्य-पृ. १५५ प. २) खण्डयति-न च ध्यानस्येति।

—११ भिन्नविषयत्वमिति। वाक्यार्थज्ञानं हि द्विविधम्। ध्यानात्पूर्वभावि, ध्यानानन्तरभावि च। तयोश्च नैकविषयत्वम्। ध्यानस्य प्राथमिकज्ञानस्य चैकविषयत्वम्। तथा च ध्यानजन्यस्य द्वितीयज्ञानस्य न ध्यानकरणत्वमिति नान्योन्याश्रय इत्याशयः।

तथा सतीति। भिन्नविषयत्वे हि ध्यानानन्तरभाविवाक्यार्थज्ञाननिरूपितकारणत्वं ध्यानस्य न स्यादिति भावः।

—१३ ननु ध्यानस्य वाक्यार्थज्ञानहेतुत्वेऽपि न वाक्यार्थज्ञानजन्यत्वमिति वाक्यार्थज्ञानानपेक्षणान्नान्योन्याश्रय इति चेत्तत्राह-ज्ञातार्थेति।

१५६—१४ हेत्वन्तरेति । ब्रह्मणः प्रत्यक्षाद्यगोचरत्वादित्याशयः ।

—१५ न चेति । ध्यानात्पूर्वभावि ज्ञानं भेदस्यानिवर्तकं सत्यज्ञानादिवाक्यजन्यम्, ध्यानानन्तरभावि ज्ञानं तु भेदनिवर्तकं तत्त्वमस्यादिवाक्यजन्यमिति नान्योन्याश्रय इति न युक्तमित्यर्थः ।

—१८ तदेवेति । उभयोर्ज्ञानयोरेकविषयत्वे तयोरेकस्य भेदनिवर्तकत्वमपरस्य नेति वक्तुमशक्यमिति बोध्यम् ।

१५७-२ ध्यात्रादीति । आदिना शमादिसंग्रहः ।

—५ अथ 'न शरीरपातात्' इत्यादिना प्रागुक्तां (श्रीभाष्य-पृ. १५५ प.५) जीवन्मुक्तिं खण्डयति—यत इति ।

—९ अथेति । सशरीरत्वप्रतिभासनिवृत्तिर्जीवन्मुक्तिरित्याशयः । सशरीरत्वं सशरीरत्वप्रतिभासः ।

—१४ अथेति । शरीरसत्यत्वप्रतिभासनिवृत्तिर्जीवन्मुक्तिरित्याशयः । द्विचन्द्रज्ञानवदिति । यथा द्विचन्द्रज्ञानबाधक एकश्चन्द्र इति सत्यज्ञाने सत्यपि द्विचन्द्रज्ञानं चक्षुर्दोषसंबन्धाद्भवति तथा सशरीरत्वज्ञानबाधकेऽशरीर आत्मेति सत्यज्ञाने सत्यप्यविद्याकर्मादिदोषसंबन्धात्सशरीरत्वप्रतिभासो यस्य भवति स जीवन्मुक्तः । स प्रतिभासोऽपि न यस्य भवति स विदेहमुक्त इत्याशयः ।

—१५ सकलेति । सशरीरत्वप्रतिभासस्तत्कारणीभूतोऽविद्याकर्मादिदोषश्च सकलवस्त्वन्तर्गत एवेति तस्याप्यात्मैक्यज्ञानेन बाधितत्वात्तदनुवृत्तिर्न युज्यत इति भावः ।

—१६ कर्मादीति । आदिशब्देन वासनासंग्रहः । तेनैव । बाधकीभूतेनात्मैक्यज्ञानेनैव ।

१५८-४-७ वेदानिति । वेदबोधितत्रिवर्गसाधनीभूतकर्माणि । इमं लोकममुं च लोकं परित्यज्यात्मानमन्विच्छेदुपासीत । 'आत्मनि बुद्धे ज्ञाते सति तदेव ज्ञानं क्षेमं मोक्षं प्रापयति' इति यदौडुलोमिनोक्तं तच्छास्त्रैर्विप्रतिषिद्धं विशेषतः प्रतिषिद्धम् । शास्त्रेषु हि वाक्यार्थज्ञानोत्तरं ध्यानविधिर्बोध्यते । यावदायुषमिति मरणपर्यन्तं ध्यानानुवृत्तिश्च प्रतिपाद्यते । यावन्न विमोक्ष्य इति शरीरपातावधिश्च मोक्षस्य क्रियते । तयोर्ध्वमायन्नमृतत्वमेतीति नाडीविशेषनिष्क्रमणं च मोक्षाङ्गत्वेन कथ्यते । अर्चिरादिमार्गेण गतिश्च मोक्षात्पूर्वं श्रूयते । औडुलोमिमते दोषान्तरमाह—बुद्धे चेदिति । न दुःखमिति । न हि ज्ञानिनां मूर्धाभिषिक्तोऽपि क्षुधादुःखमेव तावत्क्षणमात्रं सोढुं प्रभवतीत्याशयः । तथा च प्रत्यक्षविरोधः । एतेन परमौडुलोम्युक्तमन्यदपि व्याख्यातं निरस्तमित्यर्थः ।

१५८-१० तस्मादिति । ब्रह्मणो यत्प्रत्यक्षज्ञानं तदेव फलं यस्य तादृशेन ध्यानविधिनैव बन्धो निवर्तत इत्यर्थः ।

—११ प्रतिबन्धेति । ज्ञानान्मोक्ष इति वदतस्तवापि मोक्षस्य नित्यत्वमिष्टमेवेति यथा प्रतिबन्धनिवृतिरेव ज्ञानसाध्या तथैव ममापि प्रतिबन्धनिवृत्तिरेव ध्यानसाध्येति भावः ।

—१५ कथं वेति । प्रतिबन्धा परिहारोऽयम् ।

—१६ शङ्कते-मन इति ।

—१७ पुनः शङ्कते-मम त्विति ।

—१९ केनावगम्यत इति । कथमेतज्ज्ञायत इत्यर्थः ।

१५९-१ पुनः शङ्कते-विविदिषन्तीति ।

—१० पुनः शङ्कते-नेदमिति ।

—११ अत्र । नेदं यदिदमिति श्रुतौ ।

—१३ वाचानभ्युदितम् । वागविषयम् । अभ्युद्यते । प्रयुज्यते ।

—१८ भेदाभेदवादिभास्करमतं दर्शयति-यदपीति ।

—२१ भास्करमतमुपपादयति-अथोच्येतेत्यादिनोत्पद्यन्त इति (श्रीभाष्य-पृ. १६३ प.१६) इत्यन्तेन ।

—२२ कारणात्मनेति । यथा मृद्रूपेणाभेदो घटादिरूपेण भेदः । यथा च घटघटत्वयोर्व्यक्तिजात्योर्मध्ये जातिरूपेणाभेदो व्यक्तिरूपेण भेद इति भेदाभेदावुभावपि प्रतीयेते इत्यर्थः । भेदाभेदयोर्विरोधस्तु न । यथा छायातपयोर्न युगपदेकत्र स्थितिस्तथात्र भेदाभेदयोर्युगपदेकत्र न स्थितिरिति वक्तुमशक्यत्वात् ।

१६०-२-३ अविरोधेनोपलब्धिमाह-प्रत्युतेति । द्विरूपम् । कारणरूपं कार्यरूपं च । तथा जातिरूपं व्यक्तिरूपं च । खण्डादयो गोव्यक्तिविशेषाः ।

—४ भेदाभेदयोर्मध्ये नाश्यनाशकरूपो वस्तुविरोधोऽपि नास्तीत्याह-न च तृणादेरिति । यथाग्निना तृणस्य नाशो भवति तथात्राभेदेन यदि भेदस्य नाशः स्यात्तर्हि वस्तुविरोधः स्यात् । तथा चात्र भेदस्य नाशादर्शनेन न वस्तुविरोध इति भावः ।

—५ मृत्सुवर्णेति । यदा वस्तु घटरूपेणावस्थितं तदापि तन्मृद्रूपेणावस्थितमेव । एवमेव च यदा वस्तु मुकुटरूपेणावस्थितं तदा तत्सुवर्णरूपेणावस्थितमेवेति न भेदोपमर्द इत्याशयः ।

१६०-७-८ **अभिन्नस्य**। जातेः। **भिन्नस्य**। व्यक्तेः। जातेरभेद एवाकारो व्यक्तेश्च भेद एवाकारः। तथा च जातिव्यक्तयोरभेदो न संभवतीति सर्वत्र भेदाभेदो दुर्घच इति शङ्काशयः। ईश्वराश्चेति। तथा च तयोर्जातिव्यक्त्योः स्वदुक्तैकैकाकारत्वे प्रमाणं नास्तीति भावः।

—८-९ शङ्कते-**प्रतीतत्वादिति**। द्वैरूप्यमपि। तवानिष्टं द्वैरूप्यमपि।

—११ **विवेक्तुम्**। भेदेन प्रतिपत्तुम्।

—१२ **अपि त्विति**। एकमेव वस्तु जात्यात्मनाऽभिन्नं व्यक्त्यात्मना च भिन्नं प्रतीयत इत्यर्थः।

शङ्कते-**अनुवृत्तीति**। अनुवृत्तिव्यावृत्तिभ्यां कारणकार्ययोर्जातिव्यक्त्योश्च भेद इत्याशयः।

—१४ **विविक्ताकारः**। भिन्नाकारः।

—१६ **आकारभेदः**। अंशभेदः।

—१६-१६१-१ **यथेति**। कार्ये विशेषे चेति पाठः। विशेषो व्यक्तिः। संप्रतिपन्नं ज्ञातमैक्यं यस्यैवंभूते कार्यं एवंभूतायां व्यक्तौ चैकत्वबुद्धिर्यथा भवति तथैव कारणविशिष्टेपि कार्ये जातिविशिष्टायामपि व्यक्तावेकत्वबुद्धिर्भवतीत्यर्थः। **अविशिष्टा**। तुल्या।

१६१-५-६ शङ्कते-**अथेति**। **आत्मशरीरयोरिति**। आत्मशरीरयोः सद्द्रव्यात्मनैकत्वेऽप्यात्मरूपेण शरीररूपेण वा तयोरैक्यस्याप्रामाणिकत्वात्तयोर्भिन्नाभिन्नत्वं नेष्टमित्याशयः।

—१४ **अत एव**। भेदाभेदयोरविरुद्धत्वादेव।

—१६ **तत्रेति**। जीवब्रह्मणोर्भेदाभेदौ स्वाभाविकाविति यादवमतमनेन निरस्तम्। अचिद्ब्रह्मणोर्भेदाभेदौ स्वाभाविकाविति तु भास्करयादवयोरुभयोरपि संमतम्।

—१७ **तत्त्वमसीति**। तत्त्वमसीत्यादिश्रुतिभिर्ब्रह्म दाशा इत्यादिब्रह्मसूक्तेऽभेदश्रवणाच्च नित्य इत्यादिश्रुतिभिर्भेदश्रवणाच्च जीवब्रह्मणोर्भेदाभेदावव-श्याश्रयणीयावित्यन्वयः।

—२० **ब्रह्मेति**। दाशाः कैवर्ताः। दासा भृत्याः। कितवा द्यूतकृतः। एते सर्वे ब्रह्मैवेत्यर्थः।

१६२-२ **क्रियेति**। क्रियागुणाः संसारहेतुभूता गुणाः। आत्मगुणा मोक्षहेतुभूता गुणाः।

—१५ **तदानीम्**। मुक्तिदशायाम्।

—१७ **सह ब्रह्मणेति**। सहशब्दो भोक्तृसाहित्यं दर्शयतीति शङ्काभिप्रायः।

१६२-१९-२० **जगदिति**। मुक्तस्यैश्वर्यं जगत्सृष्ट्यादिव्यापारवर्जम्। परमात्मप्रकरणे 'यतो वा' (ते. ३।१।१) इत्यादिश्रुतौ जगद्व्यापारप्रतिपादनात्। यदि स व्यापारो मुक्तस्यापि स्यात्तर्हि प्रकरणविरोधः। ब्रह्मलक्षणस्य मुक्तेऽतिव्याप्तिश्च। किं च जगद्व्यापारप्रसङ्गे मुक्तस्य संनिधानमपि नास्तीति सूत्रार्थः। **भोगेति**। 'सोऽश्नुते' (तै. २।१। १) इति श्रुतौ ब्रह्मयाथात्म्यानुभवरूपभोगमात्रेण मुक्तस्य ब्रह्मसाम्यप्रतिपादनाल्लिङ्गान्मुक्तस्यैश्वर्यं जगद्व्यापारवर्जमेवेति सूत्रार्थः।

—२३ **सह ब्रह्मेति**। सहशब्दो भोग्यसाहित्यं दर्शयति न तु भोक्तृसाहित्यमिति भावः।

—२४ **अन्यथा**। ब्रह्मणा सह जीवः सर्वान्कामानश्नुत इति व्याख्याने। भोग्यसाहित्यं गृहीत्वा सर्वैः कामैः सह ब्रह्माश्नुत इति व्याख्याने ब्रह्मणः प्राधान्यमेव। ब्रह्मणा सह सर्वान्कामानिति व्याख्याने यद्यप्यप्राधान्यं ब्रह्मणस्तथापि तस्य भोग्यभूतस्वगुणापेक्षत्वेन तादृशाप्राधान्यं न दोषायेति बोध्यम्।

१६३- १ जगद्व्यापारमिति सूत्रस्य स्वाभिमतमर्थमाह—**जगदिति**। 'जीवेश्वरयोर्भेदे मुक्तस्यैश्वर्यं जगद्व्यापारवर्जं स्यात्प्रकरणादसंनिहितत्वाच्च। अतस्तयोरभेद एव स्वीकार्यः' इति सूत्रार्थ इति भावः।

—२ **संपद्येति**। अयं प्रत्यगात्मार्चिरादिमार्गेण परं ज्योतिरुपसंपद्य यं दशाविशेषमापद्यते स स्वरूपाविर्भावरूपो नापूर्वाकारोत्पत्तिरूपः। स्वेनशब्दात्। 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छा. ८।३।४) इति श्रुतौ स्वेन रूपेणेति विशेषणोपादानात्। आगन्तुकदेहपरिग्रहे हि स्वेन रूपेणेति विशेषणमनर्थकं स्यादिति सूत्रार्थः। जीवब्रह्मणोर्भेदे ह्येतत्सूत्रविरोधः स्पष्ट एव।

—५ **परस्परं च**। जीवानां परस्परभेदश्च।

—१० **स्वसंबद्ध इति**। कर्मसंबद्धे जीवे बुद्ध्याद्युपाधिरुत्पद्यते। तादृशोपाधियुक्ताज्जीवात्कर्मोत्पद्यत इत्यर्थः।

—१३ **एतद्भास्करमतस्य मायावादिमतापेक्षया विशेषमाह—उपाधीनामिति**।

—१५ **अनवस्थानादिति**। उपाधिभूतेऽचिदंशे भेदस्यौपाधिकत्वे उपाधेरुपाधिः कल्पनीयः। पुनस्तस्याप्यपर इत्यनवस्था स्फुटैव। अतोऽचिदंशे भेदाभेदौ द्वावपि स्वाभाविकावेवाश्रयणीयौ।

—१७ **एतद्भेदाभेदवादिभास्करमतं ध्याननियोगवादी दूषयति—अत्रोच्यत इति**।

१६४-१ विलक्षणत्वम्। अन्यत्वम्।

—२-३ तथाभावेति। तथा च प्रसिद्धयोर्भेदाभेदयोरेकत्र विरोध एवेति सर्वत्र भेदाभेदयोः संभवं वदन्नुन्मत्त एवेत्यर्थः।

—४ शङ्कते-कारणात्मनेति।

—६ एकस्मिन्नाकारे। एकस्मिन्पदार्थे।

—८ पूर्वस्मिन्कल्प इति। तत्रापि किं जातिव्यक्त्योर्भेद उताभेदोथ वोभयम्। प्रथम आह-व्यक्तिगत इति। नैकस्येति। एकस्य पदार्थस्य भेदाभेदरूपता नेत्यर्थः।

—९-१० द्वितीयं शङ्कते-जातिरिति। आकारभेदात्। वस्तुभेदात्।

—१०-११ तृतीय आह-एकस्मिन्निति। विलक्षणत्वम्। अन्यत्वम्। तद्विपर्ययः। अनन्यत्वम्।

—११ द्वितीये त्विति। आकारद्वयविशिष्टैकवस्तुनिष्ठौ भेदाभेदाविति पक्षेन्योन्यभिन्नं जातिव्यक्तिरूपमाकारद्वयं तस्माद्भिन्नत्वेनानुपलब्धं तदाश्रयभूतं च तृतीयं वस्त्वेतद्वस्तुन्नितयाभ्युपगमेऽपि भेद एवोपपादितः स्यान्नाभेदः। अप्रतिपन्नमित्यनेन तृतीयस्य वस्तुनोऽनुपलब्धिरिति दोषः सूचितः।

—१४-५ शङ्कते-आकारेति। भिन्नाभिन्नत्वम्। भेदाभेदौ। यद्यप्येकस्मिन्वस्तुनि भेदाभेदौ विरुद्धौ तथापि तादृशवस्तुनिष्ठाकारद्वयेन तयोरविरोध उपपादनीय इत्यर्थः।

—१५-६ तत्राकारद्वयमाश्रयापेक्षया भिन्नमभिन्नं भिन्नाभिन्नं वेति विकल्प्याद्य आह-स्वस्मादिति। स्वशब्दत्रयमाश्रयभूतवस्तुप्रतिपादकम्। कथं भवेदिति। न ह्यन्यपेक्षया भिन्नमग्निनिष्ठं पैङ्गल्यमौज्वल्यं चेत्याकारद्वयमग्नौ शीतोष्णत्वरूपविरुद्धधर्मोपपादकं दृश्यत इति भावः।

—१६ द्वितीय आह-अविलक्षणमिति। आश्रयाद्भिन्नमप्याकारद्वयमाश्रयगतभेदाभेदरूपविरुद्धधर्मद्वयोपपादकं न भवति, किमुताश्रयादभिन्नम्। एकस्मादाश्रयादभिन्न आकारे द्वित्वस्यैव वक्तुमशक्यत्वादिति भावः।

—१७ तृतीय आह-आकारद्वयेति। आकारद्वयं तदाश्रयश्चेत्यनयोर्मध्ये यदि भेदाभेदौ तदा तयोर्विरुद्धयोरेकत्रासंभवात्तदुपपादकमन्यदाकारद्वयं वाच्यम्। तस्याप्युक्तरीत्या स्वाश्रयाद्भेदाभेदाविति तादृशभेदाभेदोपपादकमपराकारद्वयमित्यनवस्थेति भावः।

—१८ ननु विरुद्धावपि भेदाभेदावुपपादकाभावेप्येकत्र स्वीकार्यौ। जातिव्यक्त्योरैक्यस्य दृष्टत्वात्। न हि दृष्टेऽनुपपन्नं नामेति न्यायादिति चेत्तत्राह-न चेति। संप्रतिपन्नं ज्ञातमैक्यं यस्या एवंभूताया व्यक्तेः प्रतीतिर्यथैकाकारा भवति तथा जातिविशिष्टव्यक्तेर्न भवतीत्याशयः।

१६५-१ अत एव । विरुद्धयोर्भेदाभेदयोरेकत्रासंभवादेव ।

—४ एवम् । जीवब्रह्मणोः स्वाभाविकाभेदस्वीकारे ।

—८ उपाधिब्रह्मव्यतिरिक्तम् । चिदचिद्विशिष्टब्रह्मव्यतिरिक्तम् ।

—११-२ छित्त्वा । खण्डयित्वा । भित्त्वा । प्रदेशभेदेन ।

—१४ सः । जीवः ।

—१६ अनादिरिति । अनादित्वानङ्गीकारे ह्युपाधिसंबन्धाज्जीवत्वं जीवत्वाच्चोपाधिसंबन्ध इत्यन्योन्याश्रयः स्यात् ।

—१८ दूषयति-इहायमिति ।

१६६-२ उतोपाधिसंयुक्तमिति । न चास्मिंस्तृतीये पक्षे चतुर्थपञ्चमयोश्च जीवस्याणुत्वाभावात्कथमेषां पक्षाणामुत्थानम् । शङ्काकृता 'स चाणुपरिमाणः' इत्युक्तत्वादिति वाच्यम् । अणुपरिमाण इत्यस्य सूक्ष्म इत्यर्थाभिप्रायेणैतत्पक्षोत्थानात् ।

—८ प्रदेशविशेषभेदादिति । यथा घटे चलति तत्स्थाकाशो न चलति किं तु प्रतिक्षणमन्य एवाकाशस्तत्र प्रविशति तद्वत् ।

—९-११ शङ्कते-निरंशस्येति । पूर्वोक्त एव दोषः । क्षणे क्षणे बन्धमोक्षरूपः ।

—१६ एक एव जीवः स्यादिति । तथा च देवदत्तेन कृतस्य कर्मणोनुसंधानं यज्ञदत्तस्य स्यात् ।

—१६-७ तुरीये । चतुर्थे । परित्यक्तं स्यादिति । तथा चोपाध्युपहितं ब्रह्म जीव इति स्वोक्तिविरोधः ।

—१८ चरमे । पञ्चमे पक्षे । चार्वाकपक्षः । जडस्यात्मत्वमिति तत्पक्षः ।

१६७-३ एतद्ध्याननियोगवादिमतं मीमांसकः पूर्वपक्षी दूषयति-तदपीति ।

ध्यानेति । अपिर्निष्प्रपञ्चीकरणविधिशेषत्वसमुच्चायकः । अर्थसत्यत्व इति । तथा च प्रतिपाद्यार्थस्य सिद्धत्वेनापूर्वार्थबोधकत्वाभावात्प्रामाण्यं न स्यादित्याशयः ।

—५ एकवाक्यताम् । महावाक्यैकत्वम् ।

—८ अनवबोधकत्वमेवेति । दुःखसाध्ये श्रवणादौ हि प्रवृत्तिरनेन भाव्या । तदप्रयोजकत्वादनवबोधकत्वमेवेत्याशयः ।

—१२ स्वरूपेति । ब्रह्मस्वरूपतद्विशेषप्रतिपादकानीदं सर्वमित्यादिवाक्यानि ध्यानविधिनैकवाक्यतामापन्नानि ध्यानविषयीभूतब्रह्मरूपार्थसद्भावे प्रमाणमिति न वाच्यमिति संबन्धः ।

१६७–१५ असत्येनापीति। तथा च ध्यानविषयीभूतार्थप्रतिपादकवाक्यानां ध्यानविधिना सहैकवाक्यत्वेऽपि नावश्यं सत्यार्थबोधकत्वमिति न प्रामाण्यम्। फलीभूतार्थप्रतिपादकवाक्यानां तु विध्येकवाक्यत्वेन प्रामाण्यमेव। फलस्यासत्यत्वे विधेरसंभवात्। तथा च प्रथमसूत्रे (विवृति–पृ. १०७ प. ३२) इदं सर्वमित्यादिवाक्यानां फलबोधकत्वेन प्रामाण्यमुक्तम्।

—१७–८ विधुरत्वात्। रहितत्वात्। स्वरूपसमर्पणमात्रेति। मात्रशब्देन स्वरूपसत्यत्वव्यावृत्तिः। बालातुराद्युपच्छन्दनेति। उपच्छन्दनं सान्त्वनम्। यथा बालस्य केनचिदपराधे कृते येनापराधः कृतस्तस्य गृहमातपे बध्नामीत्युक्त्या बालः संतोषितो भवति न तु तदर्थसत्यत्वमपेक्षते तद्वदिति भावः।

१६८–४ सिद्धान्ती परिहरति–तत्रेति।

—५ परमेति। परमात्मन आनन्दस्वरूपत्वेन पुरुषैरर्थ्यमानत्वात्पुरुषार्थत्वम्। अनवधिकातिशयत्वाच्च तस्य परमत्वमित्याशयः।

—१० कौलेयकः। श्वा तदुपजीवी वा।

—१५ स्वस्य चेति। ब्रह्म स्वेन परेण वाप्यनुभूयमानं निरतिशयानन्दस्वरूपमेवेति तत्प्रतिपादनपरवाक्यस्यैव साक्षात्पुरुषार्थान्वयः। प्रवृत्तिनिवृत्तिपरवाक्यस्य तु तत्साध्यफलसंबन्धात्पुरुषार्थान्वय इति भावः।

१६९–६ वात्सल्येति। दोषेपि गुणत्वबुद्धिर्वात्सल्यम्। यथा मातुर्बालकविषये। सौशील्यं सुस्वभावत्वम्। स्वगृह इव सङ्ग्रामे प्रवेशनसामर्थ्यं शौर्यम्। अभीरुत्वमिति यावत्। वीर्यमश्रान्तिः॥ ४॥

१७०–८ समस्तेति। समस्ताः सकला हेयास्त्याज्या ये जरामरणादयो धर्मास्तत्प्रत्यनीकास्तद्विरुद्धा येऽपहतपाप्मत्वादयः कल्याणकारका गुणास्तदाश्रयभूतम्।

—१० आनुमानिकेति। विचित्रसंनिवेशं सुखदुःखमोहरूपं त्रिगुणात्मकं जगत्स्वसदृशकारणविशेषारब्धं कार्यत्वाद्घटवदित्यनुमानसिद्धं त्रिगुणात्मकं प्रधानं जगत्कारणप्रतिपादकसदेवेत्यादिवाक्यप्रतिपाद्यं न भवतीत्यर्थः। अस्मिन्नधिकरणे जगत्कारणप्रतिपादकसदेवेत्यादिवाक्यप्रतिपाद्यं विषयः। तत्किं प्रधानं ब्रह्म वेति संशयः। प्रधानमिति पूर्वपक्षः। ब्रह्मेति सिद्धान्तः।

—१८ इदंशब्दवाच्यस्येति। इदंशब्दस्य हि परागर्थ एव स्वरसतः प्रवृत्तिर्न तु प्रत्यग्रूपे चेतने। परस्मै भासमानत्वं पराक्त्वम्। स्वस्मै भासमानत्वं प्रत्यक्त्वम्। चेतनभोग्यभूतस्येति। सदेव सोम्येति श्रुताविदंशब्देन कार्यभूतं वस्तूद्दिश्य तस्य कारणावस्था प्रतिपाद्यते। कार्यत्वं च भोग्यस्यैवाचेतनस्य न तु भोक्तुश्चेतनस्य। तस्य नित्यत्वात्।

१७१-३ गुणसाम्यावस्थमिति । न च कार्ये जगति गुणवैषम्यदर्शनात्कारणेपि गुणवैषम्यं स्यादिति वाच्यम् । यद्यद्विषमावस्थं तत्तत्कार्यमिति नियमदर्शनेन जगत्कारणस्य विषमावस्थत्वे तस्य कार्यत्वप्रसङ्गेन तस्य कारणान्तरापेक्षयाऽनवस्थानात्प्रधाने गुणसाम्यस्यैवाभ्युपेयत्वात् । एकमेवाद्वितीयमिति श्रुतावद्वितीयशब्देन गुणवैषम्यव्यावृत्तिः । एकमेवेत्यनेन नामरूपविभागव्यावृत्तिरिति पूर्वपक्षी मन्यते ।

—५ तत एवेति । अचेतनस्य प्रधानस्य जगत्कारणत्वादेवेत्यर्थः । चेतनस्य तथात्वे तु चेतनाचेतनयोः कारणकार्ययोर्विजातीयत्वेनानन्यत्वं न स्यात् ।

—६ तथा सति । कार्यकारणयोरनन्यत्वे सति ।

—८ वैरूप्यमिति । चेतनस्य कारणत्वे दृष्टान्ते कारणस्याचेतनत्वं दार्ष्टान्तिके तु चेतनत्वमिति वैरूप्यम् । यद्वा दृष्टान्ते कार्यकारणयोः सालक्षण्यं दार्ष्टान्तिके तु वैलक्षण्यमिति वैरूप्यम् ।

—१० अनुमानवेषम् । अनुमानाकारम् । तथा च प्रयोगः । इदं जगत्स्वकारणैकज्ञानेन ज्ञातं भवितुमर्हति । कार्यत्वात् । एकमृत्पिण्डाद्यारब्धघटादिवदिति । यद्यपि श्रुतौ कार्यत्वहेतुर्नोक्तस्तथाप्याक्षेपाल्लभ्यत इत्याशयः ।

—१३-४ सच्छब्देति । सच्छब्दवाच्यं यज्जगत्कारणं तत्संबन्धी य ईक्षणरूपो व्यापारविशेषस्तत्प्रतिपादकस्येत्यर्थः ।

१७२-१० अत्र सृष्टीति । अनेन ग्रन्थेनेक्षत्यधिकरणस्य नविलक्षणत्वादित्यधिकरणाङ्गेदः प्रदर्श्यते । अत्र केवलमीक्षत्यादिहेतुभिर्वाक्यार्थनिश्चयः क्रियते । कारणस्य स्वविलक्षणकार्योत्पादनसामर्थ्यं नास्तीत्येवंरूपो यो वस्तुविरोधस्तत्परिहारस्तत्र क्रियत इति भावः । वस्तुविरोधोऽर्थसामर्थ्यविरोधः ।

—१३ हेत्वनुपादानादिति । हेतुराक्षेपलब्ध इत्युक्तिस्तु न युक्तिसहा । अवयववाक्यमध्ये हेतुवाक्यस्य मुख्यत्वात् । अमुख्येन निराकाङ्क्षेण मुख्याक्षेपस्यासंभवात् । यथा राजा गच्छतीत्युक्ते सपरिकर इति लभ्यते । न तु भृत्यो गच्छतीत्युक्ते सराजक इति तद्वत् ।

—१३-५ येनाश्रुतमिति । अनन्यथासिद्धेन हि स्वोपपादकमन्यदाक्षिप्यते । यथा धूमेन वह्निः । न तु वह्निना धूमः । वह्नेर्धूमं विनापि सिद्धत्वेनान्यथासिद्धत्वात् । अत्र च दृष्टान्तवाक्यमन्यथासिद्धमिति न तेन हेतुवाक्यमाक्षिप्यते । न हि व्याप्तिप्रदर्शनायैव दृष्टान्तोपन्यास इत्यस्ति नियमः । हेतुवाक्यं विनापि संभवप्रदर्शनार्थत्वेन दृष्टान्तवाक्योपादानस्योचितत्वात् । सर्वात्मना । सर्वप्रकारेण । यथैकस्मिन्गवि ज्ञाते तदितरेषां गवां ज्ञानं सर्वेषां गवामाकारस्यैक्यान्नोत्वरूपधर्मस्यैकस्य सर्वत्र सत्त्वाच्च गवितरभेदस्य सर्वत्र

सत्त्वाच्च भवति तद्वदत्र केनापि प्रकारेण वक्तुं न शक्यते। सर्वेषां घटपटादीनामाकारैक्यस्याभावादेकधर्मान्वयस्याभावाद्घटेतरभेदादेरेकैकस्य सर्वत्रासत्त्वाच्च ॥ ५ ॥

१७२-१७ चेतनगतम्। चेतनानुगुणम्।

—१७-८ प्रधानगतम्। अचेतनप्रधानानुगुणम्। गौणमीक्षणमिति। तदैक्षतेति श्रुतेस्तत्प्रधानं सृष्टिनियतपूर्वावस्थायुक्तं बभूवेत्यर्थ इत्याशयः।

१७३-१ वर्षेणेति। वृष्ट्या बीजमानन्दितं बभूवेत्यर्थः। कार्योन्मुखं बभूवेति तात्पर्यम्।

—८ चेतनाचेतनेति। ऐतदात्म्यमिति श्रुतौ सर्वशब्दार्थस्य विना प्रमाणं संकोचे मानाभावेन सर्वशब्देन चेतनाचेतनात्मकं सर्वं जगदुद्दिश्य तस्यैतदात्म्यमित्यनेन सदात्मकत्वं विधीयते। यदि सच्छब्देन प्रधानं गृह्येत तदा चेतनस्य जीववर्गस्य सदात्मकत्वं न संभवति।

—१०-११ अतस्तेज इति। अनेन तत्तेज ऐक्षतेत्यादिगौणेक्षणसाहचर्यात्प्रधानगतं गौणमीक्षणमिति शङ्कानिरासः। सूत्रस्थात्मशब्दादित्यनेनैतदपि सूचितं यदैतदात्म्यमिति श्रुत्या तेजआदीनामपि सदात्मकत्वेन तेजआदिशब्दानां तदन्तर्यामी परमात्मेत्यर्थान्मुख्यमेवेक्षणमिति। परमात्मन एवेति। इदं प्रागुक्तम् (श्रीभाष्य-पृ. ११३ प. २) ॥ ६ ॥

—२१ तन्निष्ठस्य। सदात्मकतया प्रत्यगात्मानुसंधानं कुर्वतः। एतादृशस्य शरीरमेव मोक्षप्रतिबन्धकम्। तत्पाते तु सद्य एव मोक्ष इति तस्य तावदेवेति श्रुतेरर्थः।

१७४-३ यथाक्रतुः। यथाकामः। उपासनानुरूपं फलमिति भावः।

—६ प्रधानेति। तथा च प्रधानकारणवादिमतेऽप्यचित्संपत्तेस्तापत्रयाभिहतिहेतुत्वात्प्रधानस्य ज्ञानमात्रं व्याधेरिव विवक्षितं न तूपासनमिति बोध्यम्॥७॥८॥

—१५ प्रतिज्ञाविरोधात्। पूर्वपक्षिणा हि प्रतिज्ञावाक्यं स्वसाधकत्वेन प्रागुपन्यस्तम् (श्रीभाष्य-पृ. १७१ प. ६)। तथा च यत्पूर्वपक्षिणोनुकूलत्वेनाभिमतं तदेव तस्य वस्तुतः प्रतिकूलमित्येतत्सूत्रस्वरसः।

—१८ तत्कार्यभूतेति। सूक्ष्मचिदचिच्छरीरकस्य परमात्मनः कारणत्वं तस्यैव च स्थूलचिदचिच्छरीरकस्य कार्यत्वमिति चेतनाचेतनप्रपञ्चस्य तत्कार्यभूतत्वोक्तिः ॥ ९ ॥

१७५-४ स्वाप्ययादिति। स्वकारणेऽप्ययो लयः स्वाप्ययः। स च सता सोम्येति श्रुतौ प्रतिपादितः प्रधानकारणवादे न संगच्छते। जीवं प्रति प्रधानस्याकारणत्वात्। तथा च स्वाप्ययान्न सच्छब्दवाच्यं प्रधानमिति सूत्रार्थः।

१७५-११ चिद्वस्तुशरीरकमिति। स्वमपीत इत्यत्र स्वशब्देन जीवशरीरकः परमात्मोच्यते। न तु केवलः। तस्योपादानत्वाभावेन प्रलयस्थानत्वासंभवात्। तत्राप्ययो जीवस्य नाम न शुक्तौ रजतस्येव लयः। जीवस्य स्वरूपनिवृत्तिप्रसङ्गात्। नापि महाकाशे घटाकाशस्येव लयः। देहाद्युपाधेरवस्थितत्वात्। अत एव च नापि क्षितितले घटस्येव लयः। जीवनित्यत्वश्रुतिविरोधाच्च। किं तु प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति सुषुप्तौ सर्वज्ञत्वाज्ञत्वाभ्यां भेदव्यपदेशाज्जीवत्वे स्थित एवायमप्ययः स्वात्मन्यवस्थानं बहिर्मुखज्ञानप्रसरराहित्यमिति यावत्। तथा च जीवो नाम मनुष्यादिनामरूपरागलोभाद्यनुगुणबहिर्मुखज्ञानप्रसरवज्जागरितावस्थजीवविशिष्टः परमात्मा। स च सुषुप्तौ देवमनुष्यादिनामरूपरागद्वेषलोभमोहाद्यौपाधिकबाह्याभ्यन्तराकाराभिमानकालुष्यविरहितजीवशरीरकः सन्नात्मन्यन्तर्भूतो भवतीति स्वमपीत इति श्रुतेरर्थः।

—१८ प्राज्ञेनात्मनेति। तथा चैतच्छ्रुत्यनुरोधेन सता सोम्येति श्रुतौ सच्छब्दवाच्यः परमात्मैव प्राह्यः।

१७६-१० संपत्त्यसंपत्तिभ्यामिति। सूत्रे स्वाप्ययशब्देन संपत्त्यसंपत्तिद्वयमप्यभिप्रेतमिति वृत्तिकाराशयः। तत्र संपत्तिः सुषुप्तौ। सा च सति संपद्य न विदुः सति संपद्यामह इत्युक्ता। असंपत्तिश्च जागृतौ। सा च सत आगम्य न विदुः सत आगच्छामह इत्युक्ता। आभ्यां संपत्त्यसंपत्तिभ्यामेतत्परब्रह्मणो जगत्कारणत्वमध्यवसीयत इत्यर्थः॥ १० ॥

—१९ प्रवृत्तिः। बोधनव्यापारः॥ ११ ॥

१७७-७-१२ अनेन जीवेनेति। अत्र श्रुतावात्मत्वेन नामरूपव्याकर्तृत्वमुच्यते। सन्मूला इत्यनेन सर्वज्ञत्वं सर्वशक्तित्वं च सूच्यते। सदायतना इत्यनेन सर्वाधारत्वमुच्यते। तच्च सर्वाधारत्वं न केवलं कारणत्वेन किंत्वात्मत्वेनेत्यैतदात्म्यमित्यादिना प्रतिपाद्यते। एष आत्मेत्यनेनापहतपाप्मत्वादिकं चोच्यते।

१७८-७ गुणगणौघमहार्णव इति। ओघशब्देन गुणानामन्यत्रापर्यवसायित्वं महार्णवशब्देन गुणेभ्योपि तदाश्रयस्य महत्त्वं च दर्शितम्।

—११ पारमार्थिकेति। निर्विशेषब्रह्मवादे हीक्षणरूपविशेषोप्यपारमार्थिक इति ब्रह्मप्रधानयोरुभयोरपि गौणमेवेक्षणमिति सांख्यमतनिरासो न स्यात्।

—१२ साक्षित्वमपीति। तदैक्षतेति श्रुत्या ब्रह्मणि न कश्चिद्विशेषः प्रतिपाद्यते किं तु साक्षित्वमात्रम्। तेनैव च प्रधानव्यावृत्तिरित्याशङ्कानेन ग्रन्थेन निरस्ता।

—१३ जिज्ञास्यतयेति। ब्रह्मण आरोपिताकारत्वे तस्य तत्त्वावेदकप्रमाणविषयत्वं न संभवतीति जिज्ञास्यत्वं नोपपद्यते।

१७९-२ तदुभयरूपत्वाभावात् । स्वव्यवहारहेतुत्वपरव्यवहारहेतुत्वाभावात् ।

—१२ प्रत्यक्षानुमानेति । निर्विशेषब्रह्मणि स्वानुभव एव प्रमाणमिति परैरुक्तत्वेनात्र प्रत्यक्षान्तर्भूतस्यापि स्वानुभवस्य पृथङ्निर्देशः ॥ १२ ॥ (५)

—१७ अशुद्धाच्छुद्धाच्चेति । बद्धो जीवोऽशुद्धः । मुक्तो जीवः शुद्धः ।

—२० आनन्दमयोभ्यासात् । आनन्दमयः परमात्मा। आनन्दस्य शतगुणितोत्तरक्रमेण गुणितत्वादिति सूत्रार्थः । अस्मिन्नधिकरण आनन्दमयशब्दार्थो विषयः । स किं प्रत्यगात्मा परमात्मा वेति संशयः । प्रत्यगात्मेति पूर्वपक्षः । परमात्मेति सिद्धान्तः ।

१८०-८ सुखप्रतिपत्त्यर्थम् । अनायासेन बोधार्थम् ।

—११ सत्यमित्यर्धाङ्गीकारे । अङ्गीकारश्चायं चैतन्यांश एव न तु सर्वज्ञत्वसर्वेश्वरत्वांशे । पूर्वपक्षिणा जीवस्यैव जगत्कारणत्वाभ्युपगमात् ।

तत्तु जीवादिति । पूर्वपक्षिणोऽत्र जीवब्रह्मैक्यवादोभिप्रेतः । शुद्धावस्थजीवस्वरूपमेव ब्रह्मेत्याशयः । ईक्षणेन हेतुना साध्यमानं जगत्कारणं जीव एव न तु तदतिरिक्तम् । तथा चानन्दमयस्य जीवत्वे कथ्यमाने न किंचिद्बाधकमित्याशयः ।

—१६ ईक्षापूर्विकेति । पूर्वाधिकरणे प्रधानस्य जगत्कारणत्वे विरुद्धत्वेन प्रदर्शिता तदैक्षतेति श्रुतिर्जीवस्य जगत्कारणत्वेङ्गीक्रियमाणे न विरुध्यत इति भावः ।

—१७ अतो ब्रह्मेति । उपक्रमे ब्रह्मविदाप्नोति परमित्यत्र प्राप्यतया ब्रह्मणः प्रतिपादनात्तदेवानन्दमयशब्दवाच्यं न तु जीव इत्याशङ्कानेन ग्रन्थेन निरस्यते । उपक्रमेपि जीवस्वरूपमेव प्राप्यतयोपदिश्यते । यद्यपि जीवस्य स्वस्वरूपं प्राप्तमेव तथाप्यचित्संसर्गवियुक्तं प्राप्यमेव । तदेव ब्रह्मशब्देनाभिधीयत इत्याशयः ।

—१९ सत्यं ज्ञानमिति । उपक्रमानन्तरं कथ्यमानं सत्यं ज्ञानमिति लक्षणमप्यचित्संसर्गवियुक्तजीवस्यैव ।

१८१-४-७ शाखाचन्द्रेति । अभ्रादिना विस्पष्टमदृश्यमानश्चन्द्रो यदा केनचिद्बालादीन्प्रति प्रदर्श्यते तदा पूर्वं पुरःस्थितां शाखां प्रदर्श्य ततस्तदन्तस्थितश्चन्द्रः प्रदर्श्यते । तदा च प्रथमं शाखायां बुद्धिरवतरति पश्चात्तदन्तस्थे चन्द्र इति चन्द्रः सुगृहीतो भवति । अयं शाखाचन्द्रन्यायः । बुद्धिमिति । विज्ञानमय इत्यत्र विज्ञानशब्दस्य बुद्धिरूपोर्थः । विज्ञायतेनेनेति व्युत्पत्तेः । मयट्प्रत्ययस्तु स्वार्थिकः प्राणमयादिवत् ।

—१३ ननु च ब्रह्मेति। आनन्दमयस्येदं शिरोयं दक्षिणः पक्षोयमुत्तरः पक्ष इदं पुच्छमित्युक्तत्वात्पुच्छस्य च ब्रह्म पुच्छमिति ब्रह्मत्वाभिधानात्तादृशं ब्रह्मरूपं पुच्छं यस्य स आनन्दमयोर्थादेव ब्रह्मणोन्य इति प्रतीयते ।

१८१-१४ पुरुषविधत्वरूपितम्। पुरुषरूपेण प्रकल्पितम्।

—१५ यथान्नमय इति। अस्मिन्प्रकरणे रीतिरेवेयं यत्स्वस्मादनतिरिक्तैरेव स्वावयवैः पुच्छप्रतिष्ठात्वरूपणम्। तथा च पुच्छरूपं ब्रह्माप्यानन्दमयादनतिरिक्तमेवेत्यर्थः।

१८२-४ न चैवमिति। श्रुतौ ह्यन्नमयादारभ्य ततोन्तरस्ततोन्तर इत्येवमानन्दमयपर्यन्तमेव कथितं न तदुत्तरं किंचित्।

—१३ ननु च ब्रह्मेति। यदि पुच्छरूपस्य ब्रह्मण आनन्दमयादनतिरिक्तत्वं तर्ह्यानन्दमयस्यैव प्रधानत्वेनासन्नेवेत्यग्रिमश्लोक आनन्दमयपरामर्शिनस्तच्छब्दस्यैव निर्देश उचितो न तु ब्रह्मशब्दस्य। अन्नमयादिषु तच्छब्देनैव निर्देशदर्शनात्। आनन्दमयस्यैव पार्यन्तिकात्मत्वादात्मशब्देन वा निर्देश उचितः। तथाऽकृत्वा ब्रह्मशब्देन निर्देशकरणादानन्दमयादन्यद्ब्रह्मेति श्रुत्याशयो गम्यते।

—२० नैवमिति। ब्रह्मात्मानन्दमयशब्दानामेकार्थत्वेन तेषु केनापि शब्देन निर्देशो न बाधक इति गूढाशयः।

१८३-८ शङ्कते-शिरःप्रभृतीति। ब्रह्मणः शिरःप्रभृत्यवयवा न सन्ति। आनन्दमयस्य त्वत्र शिरःप्रभृत्यवयवाः प्रियमोदादयः कथिताः। अतो नानन्दमयं ब्रह्मेति भावः।

—११-२ रूपणमात्रमिति। कल्पनामात्रं न तु वास्तविकम्। असुखादिति। असुखव्यावृत्तिविशेषाः शिरःप्रभृतित्वेन कल्पिता इत्यर्थः।

—१३ सत्यं ज्ञानमिति। यथा ब्रह्मणो विकारास्पदाद्यावृत्तिः सत्यशब्देनोक्ता ज्ञानशब्देन जडाद्यावृत्तिरनन्तशब्देन च परिच्छिन्नात्तथानन्दमयशब्देनासुखाद्यावृतिरुच्यत इत्याशयः।

—१६ स्वार्थिक इति। विकारार्थत्वे त्वानन्दमयस्य ब्रह्मत्वं न स्यात्। ब्रह्मणः कस्यचिद्विकारत्वाभावात्।

१८४-१० विज्ञानमयो हीति। हीति प्रसिद्धौ। योयं विज्ञानमयः प्राणेष्वित्यादिश्रुतिषु जीवस्यैव विज्ञानमयशब्दार्थत्वात्।

—१४ ज्ञातैवेति। जीवो विज्ञानस्वरूपो न तु विज्ञानवान्। तथा च तद्वतो जीवस्य संभवादित्युक्तिर्न संभवतीत्याशङ्कानिरसनार्थमेतदुक्तम्।

प्राणमयादौ त्विति। तुशब्दो भिन्नक्रमः। मयडर्थस्य विकारार्थस्यासंभवस्वनन्तरं (श्रीभाष्य-पृ. २०४ प. १) वक्ष्यत इत्यर्थः। अथ वा मयडर्थसंभव इति पाठः। तुशब्दश्चार्थे। मयडर्थस्य प्राचुर्यस्य संभवः। पूर्वं प्राणमयादौ स्वार्थिकत्वमङ्गीकृतम्। इदानीं तत्रापि स्वार्थिकत्वं नास्तीत्यनन्तरं (श्रीभाष्य-पृ. २०४ प. ४) वक्ष्यत इत्यर्थः।

१८४-१६ कथं तर्हीति । यदि विज्ञानमयशब्दे मयण्न स्वार्थिकस्तर्हि तत्संबन्धिनि विज्ञानं यज्ञमिति श्लोकेपि विज्ञानमयशब्दनिर्देशोपेक्षितः। न हि विज्ञानमयस्य जीवस्य विज्ञानत्वम्। तस्य विज्ञानाश्रयत्वात्।

—१७ ज्ञातुरेवेति । ज्ञातृस्वरूपमेव स्वप्रकाशतया विज्ञानशब्देनोच्यते।

१८५-१ स्वरूपनिरूपणधर्मशब्दः। अयुतसिद्धगोत्वादिधर्मवाचिगवादिशब्दः।

—४ कर्तरीति। विजानातीति विज्ञानम्। विज्ञातेत्यर्थः।

नन्द्यादित्वमिति। यथा नन्दयतीति नन्दन इत्यत्र नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा. सू. ३।१।१३४) इति पाणिनिसूत्रेण कर्तरि ल्युप्रत्ययस्तद्वत्।

—५ अत एव। कर्तरि प्रत्ययं स्वीकृत्य विज्ञानशब्दस्य चेतनपरत्वाङ्गीकारादेव। मयट्प्रत्ययस्य स्वार्थिकत्वं मन्यमानस्यापीयमनुपपत्तिः समानैव।

—९ न चेतनेति । यदि तत्र कर्तृत्वं श्रूयेत तर्हि तस्यौपचारिकत्वावश्यंभावेन तदनुरोधेन विज्ञानस्य बुद्धेर्यज्ञकर्तृत्वमौपचारिकमिति कदाचिद्वक्तुं शक्येत।

चेतनमचेतनं चेति । विश्वनिलयनत्वस्यान्तःकरणेऽसंभवेन नायमन्तःकरणानन्तःकरणविभागः । किं तु चेतनाचेतनविभाग एवेति विज्ञानशब्दस्य चेतनार्थकत्वमवश्यं स्वीकार्यम्।

—१२ तद्गुणम्। विज्ञानगुणकम्। विज्ञानशब्दस्य चेतनपरत्वे प्रयोगान्तरदर्शनमेतत्।

—१६ विज्ञानमिति चेति। विज्ञानशब्दस्य चेतनार्थकत्वे नपुंसकलिङ्गानुपपत्तिस्तु न। विजानातीति विज्ञानं विज्ञातृवस्तु। तच्चार्थाज्जीव एव। अयं पदार्थ इयं व्यक्तिरिदं वस्त्विति सर्वस्यैव लिङ्गत्रयवैशिष्ट्येन प्रतिपादनसंभवान्न काचिदनुपपत्तिः।

—१७ यद्यपीति। ज्ञानं विना ज्ञानाश्रयस्य यज्ञकर्तृत्वासंभवादाश्रयनिष्ठं कर्तृत्वं ज्ञान आरोप्य विज्ञानं यज्ञमिति श्लोके विज्ञानशब्दस्य कदाचिज्ज्ञानमात्रपरत्वेङ्गीकृतेपि विज्ञानमयशब्दस्य जीव एवार्थो ग्राह्य इति भावः।

१८६-३ एतत्सर्वमिति। तस्माद्वा एतस्माद्विज्ञानमयादिति वाक्यं जीवपरयोर्भेदप्रतिपादकमिति वदतः सूत्रकारस्यैतत्सर्वमभिप्रेतमित्यर्थः।

—१३ जगदिति। अनयोः सूत्रयोरर्थः प्रागुक्तः (विवृति-पृ. ७२ प. २२)।

—२० नानाविधेति । नानाविधान्यनन्तान्यमर्यादितानि यानि दुःखानि तेषामाकरः कर्माधीना चिन्ततनिमिषितादिसकलप्रवृत्तिर्यस्यैवंभूतो यो जीवस्त-

स्वरूपत्वम् । तथा चात्यन्तविरुद्धयोस्तत्त्वंपदार्थयोर्ब्रह्मजीवयोरैक्यं न संभवतीति भावः ।

१८६-२१ अन्यतरस्य । तत्र तत्पदार्थस्य ब्रह्मणो हेयप्रत्यनीककल्याणैकतानस्वभावत्यागे तस्य जीववैलक्षण्याभावाज्जीवेन सहैक्यं संभवेत् । अथ वा त्वंपदार्थस्य जीवस्य दुःखादिहेयसंबन्धत्यागे तस्य ब्रह्मवैलक्षण्याभावाद्ब्रह्मणा सहैक्यं संभवेदित्यर्थः ।

१८७-२ शङ्कते-हेयेति ।

—७ पुनः शङ्कते—तथापि तस्येति । अविद्याश्रयत्वरूपहेयसंबन्धस्येत्यर्थः ।

—८ दूषयति—मिथ्याभूतमपीति । मिथ्याभूतमप्यपुरुषार्थ एवेति यत्स्वमेव बूषेऽतो विरोधो दुर्वार इति भावः । मिथ्यात्वं किमत्यन्ताभाव उत ज्ञानबाध्यत्वम् । प्रथमे निरसनीयाभावात्तन्निरासाय शास्त्रारम्भो न स्यात् । द्वितीये मिथ्याभूतस्यापुरुषार्थत्वमस्ति वा न वा । अस्ति चेद्धेयप्रत्यनीकत्वव्याघातः । नास्ति चेच्छास्त्रारम्भवैयर्थ्यम् (श्रु.) ।

—११ शङ्कते-किं कुर्म इति ।

—१९ परिहरति-श्रुतोपपत्तय इति । तत्त्वमसीति श्रुतस्य जीवब्रह्मैक्यस्योपपत्तयेऽप्यनुकूलतर्करहितं प्रमाणविरुद्धं च न कल्पनीयम् । यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र पीनत्वोपपत्तये केवलमन्नास्वादनं न कल्प्यते तद्वत् । अत्र हेयसंबन्धस्यापहतपाप्मा विशोकोऽविजिघत्सोऽपिपास इत्यादिश्रुतिविरुद्धत्वं बोध्यम् ।

शङ्कते-अथ हेयेति ।

—२१ परिहरति-हन्तैवमिति । तथा च शास्त्रस्याप्रामाण्यं प्रसज्येत ।

१८८-३ शङ्कते-अथैतदिति । अयमेव पूर्वपक्षिणः सिद्धान्तः ।

—९ तदन्तर्गतं चेति । सर्वं जगत्परमार्थमिति शेषः । यदि जगतो मिथ्यात्वं सत्यत्वेपि परमात्मानन्तर्गतत्वं वा तदा प्रतिज्ञाविरोध इति जगतः सत्यत्वं परमात्मान्तर्गतत्वं चावश्यमङ्गीकार्यमेव ।

—१३ न तर्हीति । एवमाकारा श्रुतिर्न स्यात् । किं तु सर्वं मिथ्यात्वेन ज्ञातं भवतीत्येवमाकारा स्यात् । यतश्चैदृशाकारा नास्त्यतो जगत्सत्यमेवेति भावः ।

—१५ दूषणान्तरमाह-कारणतयेति ।

१८९-१ ज्ञातता निदर्शितेति । न तु मृत्पिण्डज्ञानेन घटादिनिवृत्तिर्निदर्शिता ।

शङ्कते-तत्रापीति ।

१८९—२ असिद्धमितीति । इतिर्हेतौ । स च न युज्यत इत्यत्रान्वेति ।

—४ न च तत्त्वमिति । मृद्विकारस्यासत्यत्वमनुमानेन प्रसिद्धमिति चेत्तदनुमानं प्रमाणं तर्कानुगृहीतं नास्त्येव परं तु तर्कानुगृहीतमपि नास्तीत्यर्थः ।

—८–१९०–१ ब्रह्मणः सविशेषत्वे श्रुतीर्दर्शयति–तथा सदेवेति । किं च 'ब्रह्मणो निर्विशेषत्वमिति धर्मोस्ति वा न वा । द्विधापि सविशेषत्वं तद्योगतदयोगजम्' (न्या. सि.) इति सविशेषत्वं दुर्वारमेवेति बोध्यम् । स्थिरत्रसरूपेण । स्थिरचररूपेण । शास्त्रैकेति । एतेन निर्गुणस्यापि ब्रह्मणो गुणानुकीर्तनं निषेधायेति परास्तम् । न ह्यन्यतोऽसिद्धं किंचिद्वस्तु तन्निषेधाय क्वचिदपि विधीयते ।

१९०–१३–५ शङ्कते–अथोच्येतेत्यादिना न कश्चिद्दोष इति (पृ. १९१ प. ९) इत्यन्तेन । तात्पर्यासंभवादिति । अन्यथा विशेषणभेदादेकार्थत्वासिद्धेः । न लक्षणेति । अवाच्यार्थस्याप्रतिपादनादिति भावः ।

—२० अन्योन्यसमवायेति । उत्पलत्वविशिष्टे नीलत्वविशिष्टैक्यविवक्षया यथोत्पलं द्रव्यं नीलत्वविशिष्टं तथोत्पलत्वजातिरपीति नीलत्वगुण उत्पलत्वरूपजातिसमवेतः स्यात् । नीलत्वविशिष्ट उत्पलत्वविशिष्टैक्यविवक्षया च यथा नीलं द्रव्यमुत्पलत्वविशिष्टं तथा नीलत्वगुणोपीत्युत्पलत्वजातिर्नीलत्वगुणसमवेता स्यात् ।

१९१–७ न लक्षणेति । यथा किंचिदवयवविकलेपि पुरुषे प्रवृत्तः पुरुषादिशब्दो न लाक्षणिकस्तद्वत् ।

—११ संसर्गविशेषमात्रमिति । न तु लक्षणां विना व्युत्पत्तिसिद्धार्थे किंचित्क्वचिदपि परित्यज्यते ।

—१७ न च विशेषणेति । अनेनान्योन्यसमवायप्रसङ्गरूपो दोषः परिहृतः ।

—१९ स्वरूपमेव विशेष्यम् । न तु विशेषणान्तरविशिष्टं विशेष्यम् ।

भिन्नप्रवृत्तीति । एतदेव सामानाधिकरण्यं न तु विशेषणान्तरविशिष्टाकारे विशेषणान्तरान्वयप्रतिपादनम् ।

—२०–१ अन्वयेन निवृत्त्या वेति । यद्वस्तु केनचित्पदेनान्वयेन व्यतिरेकेण वा यदाकारविशिष्टं प्रतिपादितं तदेव वस्तु पदान्तरेणान्वयेन व्यतिरेकेण वाऽऽकारान्तरविशिष्टं प्रतिपाद्यते । न तु विशेषणविशिष्टयोरैक्यं प्रतिपाद्यते । श्यामो युवा लोहिताक्ष इत्यन्वयोदाहरणम् । अदीनोऽकृपणोऽनवद्य इति व्यतिरेकोदाहरणम् ।

१९२-६ अन्वयाविरोधादिति । यद्यपि किंचिद्विशेषणविशिष्टे विशेषणान्तरविशिष्टस्यैक्यं न संभवति तथापि केवले विशेष्ये विशेषणद्वयान्वयसंभवान्न विरोध इति भावः ।

—७ विशेषणभेदेन विशेष्यभेदं शङ्कते-अथेति । एकविशेषणेति । एकविशेषणविशिष्टतया निरूप्यमाणं वस्तु विशेषणान्तरविशिष्टत्वाद्भेतोस्तस्माद्विशेषणान्तरविशेष्यात्पदार्थाद्विलक्षणमित्यर्थः ।

—११ परिहरति-स्यादेतदेवमिति । विशेषणद्वयविशिष्टत्वमात्रं नैकत्वप्रतिबन्धकं किं त्वेकस्मिन्धर्मिण्युपसंहर्तुमयोग्यधर्मद्वयविशिष्टत्वमेवेत्यर्थः ।

—१६ न केवलमिति । नीलमुत्पलमित्यत्र विशेषणांशयोर्विरोधास्त्याग इति पूर्वपक्षिमतम् । तत्र तयोर्विरोधाभाव उक्तः । न चाविरोधेप्यविवक्षया विशेषणांशयोस्त्याग इति वाच्यम् । सामानाधिकरण्यानुरोधेन विशेषणांशयोरवश्यं विवक्षणीयत्वात् । तथा च धर्मद्वयविशिष्टता कथमपि त्यक्तु न शक्यत इति भावः ।

—१८-९ अन्यथा । विशेषणयोरविवक्षया धर्मद्वयविशिष्टत्वाभावे । न स्यादिति । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे प्रवृत्तिरेव सामानाधिकरण्यमित्याशयः ।

१९३-१ स्वसंबन्धानादरेण । स्वसंबन्धे तात्पर्याभावेन ।

—६ अत एव । कालद्वयसंबन्धाविरोधादेव । क्षणिकवादनिरासकस्य स्वयं कालद्वयसंबन्धविरोधाभ्युपगमो विरुद्ध इत्यर्थः ।

—९ परिहियत इति । इदं प्रागुक्तम् (श्रीभाष्य-पृ. ११० प. १९)

—१०-१२ यत इति । विशिष्टवाचकशब्दानां विशेषणांशत्यागेन विशेष्यवस्तुमात्रवाचकत्वेऽरुणाधिकरणविरोधोऽनेन ग्रन्थेन प्रतिपाद्यते । एकहायन्या । एकं हायनं वर्षं यस्यास्तया । अनेन वाक्येनोक्तगुणविशिष्टया गवा सोमक्रयो विधीयते ।

—१३ अर्थैकत्व इति । यस्मिन्वाक्ये द्रव्यगुणयोरेकक्रियान्वयित्वरूपार्थैकत्वं संभवति तत्र तयोः श्रूयमाणयोर्द्रव्यगुणयोः परिच्छेद्यपरिच्छेदकभावनियमः स्यात् । कुतः । ऐककर्म्यात् । एकार्थप्रतिपादकत्वरूपैकवाक्यतासत्त्वादिति सूत्रार्थः ।

—१५ तत्र । तस्मिन्नधिकरणे । अत्रायं पूर्वपक्षाशयः—यद्यप्यरुणापदमारुण्यगुणविशिष्टद्रव्यवाचकं तथापि तद्द्रव्यमेकहायनीरूपमेवेत्येवमन्वयनियमो न संभवति । एकस्मिन्वाक्य एकमेव विधानमित्यतोऽत्रैकहायनीकरणककयविधाने जाते तस्यां चैकहायन्यामरुणगुणेन भवितव्यमित्यस्य विधानान्तरस्यासंभ-

वात् । अथ क्रीणातीत्यस्यावृत्त्यारुणया क्रीणात्येकहायन्या क्रीणातीति वाक्यभेदे त्वरुणयेत्यत्रारुण्यविशिष्टं द्रव्यमेकहायनीरूपमेव ग्राह्यमिति नियमो न संभवति । किं तु प्रकरणानुरोधेनैकहायनीवत्कदाचिद्वासोयजमानाद्यपि गृह्येत । अरुणयेति स्त्रीलिङ्गनिर्देशस्य चोपलक्षणार्थतयाप्युपपत्तिर्भविष्यतीति ।

१९४-७ अरुणयेति । अयं सिद्धान्ताशयः—क्रयान्वयबोधकमेवैतद्वाक्यम् । आरुण्यगुणान्वयस्य तु प्रातिपदिकसिद्धत्वान्न वाक्यविधेयत्वमिति न वाक्यभेदापेक्षा । अत्र द्रव्यगुणयोर्विशेषणविशेष्यभावः प्रातिपदिकावसेयः । विशेष्यैक्यं सामानाधिकरण्यावसेयम् । क्रयान्वयो वाक्यावसेय इति ।

—१४ एकहायनीत्वमात्रम् । अरुणिमविशिष्टद्रव्यस्यैकहायनीत्वाश्रयत्वं विशेष्यैक्यमित्यर्थः (श्रु.) ।

—१५ विशिष्टद्रव्यैक्यम् । विशिष्टैक्यमित्युक्ते विशेषणांशस्यैक्यं माभूदिति विशिष्टद्रव्यैक्यमित्युक्तम् । द्रव्यशब्देन विशेष्यांशो विवक्षितः ।

१९५-८ अध्वन इति । पन्थानं करोत्यपथात्पन्थानं नयतीति पथिकृत् । एतादृशायाध्वन इत्यर्थः ।

—१५ खादिरैरिति । अत्र खादिरत्वशुष्कत्वविशिष्टकाष्ठानां करणतया पचनक्रियान्वयः । समपरिमाणत्वविशिष्टभाण्डस्याधिकरणत्वेन । पायसत्वविशिष्टशाल्योदनस्य कर्मत्वेन । समर्थत्वविशिष्टपाचकस्य कर्तृत्वेनेति बोध्यम् ।

—१७ उपात्तद्रव्यकेति । उपात्तं शब्देन निर्दिष्टं द्रव्यं यस्मिन्नेतादृशे वाक्ये विद्यमानो गुणवाचकः शब्दः केवलं गुणमेवाभिधत्ते न गुणिनम् । यथा पटस्य शुक्ल इत्यत्र पटपदेन द्रव्यस्याभिधानाच्छुक्लशब्दस्य शुक्लगुण एवार्थः । कृष्णो गच्छति श्वेतमालभेतेत्यादौ पदान्तरेण द्रव्यस्याभिधानाभावाद्गुणविशिष्टार्थप्रतिपादकत्वम् । प्रकृते त्वेकहायन्येति पदेन द्रव्योपादानमित्यरुणापदस्यारुण्यगुण एवार्थ इत्याशयः ।

१९६-२ पटः शुक्ल इति । यद्युक्तनियमस्य सामानाधिकरण्यमपवाद इति पटः शुक्ल इत्यत्र द्रव्योपादानेपि शुक्लशब्दस्य गुणविशिष्टार्थप्रतिपादकत्वमुच्यते तर्हि प्रकृतेप्यरुणयेत्यत्र तथैव स्यात् ।

—७-९ यत्पुनरिति । क्रीणातीत्यत्र करणाकाङ्क्षाया एकहायनीसंबन्धेन निवृत्तत्वेन क्रयस्य निराकाङ्क्षत्वात्तत्रारुण्यान्वयो न संभवतीत्यर्थः । तदपीति । नीलं शुक्लं कृष्णमित्यादिव्यावृत्त्यर्थं विरोधिगुणरहितेति । तदाश्रयेति । तद्द्रव्यमाश्रयो यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । गुणविशिष्टगुण्यभिधानेनेति यावत् । तथा च गुणविशिष्टमेकं करणमिति क्रीणातीत्यत्र प्रथमतः करणाकाङ्क्षायां तदानीमेवारुण्यस्य द्रव्यद्वारा क्रयान्वय इति पुनराकाङ्क्षाया अभावेपि न कश्चिद्दोष इत्यरुणाधिकरणे तथा पूर्वपक्षो न युक्त इति भावः ।

१९६-१० अथ तत्रत्यसिद्धान्तमपि दूषयति-राद्धान्ते चेति। अरुणयेत्यस्य केवलगुणवाचकत्वेपि गुणद्रव्ययोः परस्पराकाङ्क्षासत्त्वेन नष्टाश्वदग्धरथन्यायेन गुणस्य द्रव्य आर्थिकोन्वय इति तदधिकरणे परैः सिद्धान्तः कृतः। स तु न युक्तः। पूर्वोक्तरीत्यारुणयेत्यस्य गुणविशिष्टगुणिवाचकत्वेन शाब्दान्वयसिद्धेः। अत एव चारुणयेति स्त्रीलिङ्गनिर्देश उपपद्यते। गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीत्युक्तत्वात्।

—१२ तस्मात्। सामानाधिकरण्यस्यानेकविशेषणविशिष्टैकार्थपरत्वस्य लोकवेदसिद्धत्वात्। परपक्षे त्वीदृशं सामानाधिकरण्यं न संभवति। पदद्वयावगतगुणहानात् (श्रु.)।

—१७ शङ्कते-अभ्युपगच्छतोपीति।

१९७-३-६ सच्छब्देति। जीववाचकत्वेन प्रसिद्धस्य त्वंपदस्य तदन्तर्यामिपरत्वे लक्षणैव स्यादित्याशङ्कानेन ग्रन्थेन निरस्यते। बहु स्यामिति। बहुनामरूपभाग्भवेयमित्यर्थः।

—११ जीवेनात्मनेति। अस्यैव व्याख्यानं जीवेन मयेति। आत्मशब्दस्यास्मद्वाचित्वात्।

—१३ जीवान्तरात्मतयेति। ब्रह्मणो जीवान्तर्यामितया जीवस्य ब्रह्मात्मकत्वं न तु तयोः स्वरूपैक्यम्।

१९८-२ अत इति। तथा च सर्वशब्दानां परमात्मपर्यन्तार्थवाचकत्वेनुप्रवेशपूर्वकं नामरूपव्याकरणं कारणमिति सिद्धम्।

—४ सर्वशब्दानां परमात्मपर्यन्तार्थकत्वे कारणान्तरं दर्शयति—किं चेति। शरीरवाचकपदानां शरीरिपर्यन्ताभिधायित्वदर्शनादपि सर्वशब्दानां परमात्मपर्यन्तार्थवाचकत्वं सिद्ध्यतीत्यर्थः।

१९९-३ शरीरिपर्यन्तार्थकत्वे वैदिकप्रयोगं दर्शयति-स्वर्गं इति। अत्र देवत्वं गच्छन्तीत्यत्र देवशब्दस्य शरीरमात्रवाचकत्वे शरीरत्वं गच्छन्तीत्युक्ते शरीरस्वरूपा भवन्तीति पर्यवसानेन देहात्मनोरैक्यं प्रसज्येत। अतो देवशब्दस्य शरीरिवाचकत्वं स्वीकार्यम्।

—७ तस्येति। प्रकारस्य प्रकार्यापेक्षस्थितिकत्वेन प्रकारस्य यथावस्थितस्वरूपप्रतीतेः प्रकारिसापेक्षत्वात्तादृशप्रतीतेः प्रकारिण्येव पर्यवसानं युक्तमिति प्रकारस्य प्रतिपादकोपि शब्दः प्रकारिण्येव पर्यवस्यतीत्यर्थः।

—११ पर्यवस्यन्त इति। पर्यवसानं चेह न सर्वथा व्यापारोपरमः। तथा सति पुनर्व्यापारेण परमात्मप्रतिपादनासंभवात्। किं तु पूर्वं क्वचित् (आकाररूपेर्थे) व्यापृतस्य तन्नानुपरम्य तदन्वयिन्यन्यत्र (पिण्डरूपेर्थे) व्यापारः पर्यवसानम्। सर्वथा व्यापारोपरम इत्यर्थे त्वपर्यवस्यन्त इति पदच्छेदः।

१९९–१७ **यथा दण्डीति** । तथा तत्त्वमसीत्यत्र जीवरूपद्रव्यवाचकत्वंपदे मत्वर्थीयः प्रत्यय आवश्यकः । तदभावात्सामानाधिकरण्यं न संभवतीति शङ्काशयः ।

—१८ **एकमेवेति** । यदि जातेरेव सामानाधिकरण्यप्रयोजकत्वं तर्हि शुक्लो घट इत्यत्र गुणवाचकशुक्लशब्दस्यापि घटेन सह सामानाधिकरण्यदर्शनात्तत्र व्यभिचारः । शरीररूपद्रव्यवाचकशब्दानां च जीवेन सह सामानाधिकरण्यदर्शनात्तत्रापि व्यभिचारः । एवमेव गुणस्य प्रयोजकत्वे बोध्यम् ।

—१९–२००–३ अथ स्वाभिमतं सामानाधिकरण्यप्रयोजकं दर्शयति— **यस्येति** । यस्य गोत्वादेः खण्डादिद्रव्यप्रकारतयैव सद्भावस्तस्य गोत्वादेस्तादृशखण्डादिद्रव्यापेक्षया पृथक्सिद्धेः पृथक्स्थितेः पृथक्प्रतीतेश्चाभावेन तादृशगोत्वादिवाचकगवादिशब्दानां स्ववाच्यगोत्वादिविशिष्टद्रव्यवाचकत्वात्खण्डत्वादिधर्मान्तरविशिष्टतद्द्रव्यवाचिना खण्डादिशब्देन सामानाधिकरण्यं युक्तमेवेत्यर्थः ।

२००–४ **स्वनिष्ठस्यैव** । न तु किंचिन्निरूपितप्रकारतयैव पदार्थभूतस्य । ईदृशस्य पृथक्सिद्धस्य दण्डादिद्रव्यस्य यदि मनुष्यादिद्रव्यान्तरप्रकारत्वं तदा तत्र मत्वर्थीयप्रत्ययावश्यकत्वम् । दण्डी मनुष्य इति यथा । प्रागप्येतत्प्रतिपादितम् (श्रीभाष्य–पृ. ११४) ।

—६ **परमात्मन इति** । जीवस्य परमात्मशरीरत्वेन परमात्मप्रकारत्वादित्यर्थः ।

—१०–११ **यथेति** । जीवसंबन्धिशरीरगता बाल्यादयो धर्मा यथा शरीरिणं जीवं न स्पृशन्ति तथा जीवरूपशरीरगता अविद्यादयो हेया धर्माः शरीरिणं परमात्मानं न स्पृशन्तीत्यर्थः ।

—१४–५ **सशरीरेति** । शरीरसहितो यो जीवस्तद्रूपं शरीरं यस्यैतादृशपरमात्मानमाचष्ट इत्यर्थः । **प्रकरणाविरोधः** । तदैक्षतैतदात्म्यमिदं सर्वमनुप्रविश्य नामरूपे व्याकरवाणीत्यादिवाक्याविरोधः । तत्त्वंपदयोर्निर्विशेषार्थकत्वं स्वीकृत्य सामानाधिकरण्योपपादने तु सविशेषत्वप्रतिपादकश्रुतिविरोधः प्रागुक्तः (श्रीभाष्य–पृ. १८९) । **सर्वश्रुत्यविरोधः** । भेदप्रतिपादकसर्वश्रुत्यविरोधः ।

२०१–९ **आकाशादीति** । यतश्चायमात्माकाशादीनां परमकारणीभूतोतस्तेनैव हेतुना प्रतिज्ञातो जीवव्यतिरेको यस्यैतादृशस्य परस्यात्मन इत्यर्थः । आत्मन आकाशः संभूत इत्यत्रात्मशब्देन न जीवात्मनो ग्रहणम् । आकाशाद्युत्पत्तिकाले जीवात्मनः सशरीरत्वाभावेन कार्योत्पादनासामर्थ्यात् । आत्मशब्दस्य च पुत्रादिशब्दवत्ससंबन्धिकार्थप्रतिपादकत्वेन कस्यात्मेत्याकाङ्क्षायामर्थात्तव्यतिरिक्तानामाकाशादीनामात्मेति गम्यत इत्याकाशादीनामात्मशरीरत्वं सिध्यतीति परमात्मन एव शारीरत्वम् ।

२०१-१९ श्रुत्यन्तरसिद्धः। यस्य पृथिवी शरीरमित्यादिश्रुत्यन्तरसिद्धः। इदमुपलक्षणम्। एतत्प्रकरण एवात्मन आकाश इति ससंबन्धिकात्मशब्देन निर्देशात्परमात्मनः शारीरत्वस्य सिद्धत्वात्।

२०२-३ अनन्यात्मकत्वमिति। यद्यपि यः पूर्वस्य विज्ञानमयस्य शारीर आत्मा स एवानन्दमयस्येत्युक्ते सत्यानन्दमयशारीरात्मनोरापाततो भेदो भासते तथाप्यन्नमयादिषु शारीरात्मनः पूर्वोक्तरीत्या परमात्मत्वादानन्दमयस्यापि च निरतिशयानन्दवर्णनेन परमात्मत्वात्स्वस्य स्वयमेवात्मेत्युक्तं भवतीत्यनन्यात्मकत्वं सिध्यतीत्याशयः।

—६ अभ्यासेति। अभ्यासेनानन्दस्य शतगुणितोत्तरक्रमेण गुणनेनावगतः परमात्मभावो यस्येत्यर्थः।

—८ निरुपाधिक इति। जीवात्मनो हि क्वचित्कदाचित्किंचित्प्रति कर्मानुगुणं शारीरत्वमिति तत्सोपाधिकम्। परमात्मनस्तु सर्वेषां सर्वदा सर्वत्राकर्मवश्यं शारीरत्वमिति तन्निरुपाधिकम्।

—९ अभियुक्तैः। वृत्तिकारादिभिः। संहितमेतच्छारीरकं जैमिनीयेनेति तैरुक्तम्॥ १३॥

—११ विकारशब्दस्य। विकारार्थकशब्दस्य।

—१२-४ मयड्द्वैतयोरिति। एतयोरित्यस्य विकारावयवयोरर्थयोरित्यर्थः। अनेन सूत्रेण विकारावयवयोर्द्वयोरर्थयोर्मयट्प्रत्ययो विकल्पेन विधीयते। तदुत्तरं तदपवादभूतं नित्यं वृद्ध इति सूत्रम्। तेन च वृद्धसंज्ञकेभ्यः शरादिगणपठितेभ्यश्च शब्देभ्यस्तयोरेवार्थयोर्नित्यं मयड्विधीयते। यस्मिञ्छब्दे प्राथमिकः स्वर आकार ऐकार औकारो वास्ति स शब्दो वृद्धसंज्ञकः। यथान्नमयमित्यत्रान्नशब्दः। तथानन्दशब्दोपि वृद्धसंज्ञक इत्यानन्दमयशब्दे विकारार्थकस्य मयट्प्रत्ययस्य संभवः।

—१५ तत्प्रकृतेति। प्राचुर्येण प्रस्तुतं प्रकृतम्। तस्मिन्नर्थे मयट्प्रत्ययोनेन सूत्रेण विधीयते।

—१८ जीवादन्यत्वम्। आनन्दमयस्य जीवादन्यत्वम्।

२०३-२ आनन्दस्येति। अस्मिन्प्रयोगे प्राचुर्यं कर्तृ। अल्पत्वं कर्म। आनन्दस्य प्राचुर्यमित्युक्ते कस्मात्प्राचुर्यमित्यपेक्षायामानन्दविरोधित्वेन प्रसिद्धादुःखादेवेति गम्यत इति भावः।

—३ अत इति। यद्यानन्दमयशब्देन परमात्मनो ग्रहणं संभवेत्तदा तत्सिद्धय औचित्यप्राप्तस्यापि विकारार्थत्वस्य परित्यागः स्यात्। परं तु विकारार्थत्वं परित्यज्य प्राचुर्यार्थकत्वाङ्गीकारेपि परमात्मनो ग्रहणासंभवेन न विकारार्थत्वस्यौचित्यप्राप्तस्य परित्यागो युक्त इति भावः।

२०३–८ तद्विकार इति । घटादिवज्जीवः परिणामभूत इत्यभिमानः शङ्काकृतः ।

—१६ औचित्यादिति । औचित्यात्प्रयोगप्रसिद्धया च यन्मयट्प्रत्ययस्य विकारार्थकत्वं शङ्काकृता प्रदर्शितं तन्न संभवति । अर्थविरोधात् । आनन्दमये जीवत्वविकारत्वयोरसंभवादित्यर्थः ।

२०४–१ विकारार्थत्वासंभवादिति । वायोः प्राणविकारत्वाभावादिति भावः ।

—२ पञ्चवृत्तेः । प्राणापानादिव्यापारपञ्चकविशिष्टस्य ।

—३–४ न चेति । प्राचुर्यार्थे मयट्प्रत्ययस्य प्रसिद्धिर्नास्तीति नेत्यर्थः ।

—७ तच्चेतरस्येति । आनन्दप्रचुर इत्युक्ते तत्रानन्देतरस्य दुःखस्य सत्ता न बोध्यते । किं तु केवलमानन्दस्याल्पत्वं निवर्त्यते । यद्यप्यानन्दप्राचुर्यमित्युक्ते कस्मादित्यपेक्षायामर्थादुःखादेवेति गम्यते तथापि तद्दुःखमानन्दाश्रयाश्रितमेवेति न सिध्यति । न च प्रमाणान्तरेणानन्दाश्रये दुःखसद्भावोवगम्यत इति वाच्यम् । तथाविधप्रमाणाभावात् । प्रत्युत तत्र दुःखाभावस्यैव प्रमाणान्तरसिद्धत्वात् ।

—११ अन्यानन्दस्य स्वल्पत्वमिति । यद्यप्यानन्दस्य प्राचुर्यमित्युक्ते कस्मादित्यपेक्षा नियमेन जायते तथापि सा स्वव्यधिकरणेनापि स्वसजातीयेनैव निवर्त्यते । न तु स्वसमानाधिकरणेनापि विजातीयेन । यथा तेजःप्रचुरः सूर्य इत्युक्ते तत्तेजःप्राचुर्यं चन्द्रादिगततेजोपेक्षयेति गम्यते । न तु सूर्यगतान्धकारापेक्षया । तथानन्दप्रचुरः परमात्मेत्युक्ते तदानन्दस्य प्राचुर्यं मनुष्यादिगतानन्दापेक्षयेति गम्यते न तु परमात्मगतदुःखापेक्षयेति बोध्यम् ।

—१५ आनन्दैकस्वरूपस्येति । तथा चानन्दस्वरूपस्यानन्दविकारत्वं न संभवति । न च जीवस्यानन्दस्वरूपत्वे संसारदशायां तथोपलब्धिः कुतो नेति वाच्यम् । कर्मणा तत्संकोचात् ॥ १४ ॥

२०५–५ अन्यात्कः प्राण्यात् । सांसारिकमापवर्गिकं च सुखं प्राप्तुं कः शक्नुयात् (वि. दी.) ।

—८ अयमन्य इति । कर्मकर्त्रोरैक्यस्यासंभवादिति भावः ।

—९ आनन्दमय एवेति । यदेष आकाश इति श्रुतावानन्दशब्दसद्भावेन तस्यानन्दशब्दस्य परमात्मवाचकत्वेप्यानन्दमयशब्देन कथं परमात्मनो ग्रहणमित्याशङ्कानेन ग्रन्थेन निरस्यते ॥ १५ ॥

—१४ गीयत इति । मन्त्रब्राह्मणयोरेकार्थत्वादिति भावः ।

२०६–१ वैशद्यमिति । यद्यपि संक्षिप्तार्थबोधको मन्त्रस्तदर्थवैशद्यं च ब्राह्मणेन क्रियत इति ब्राह्मणानुरोधेन मन्त्रार्थनिश्चयो युक्तो न तु मन्त्रानुरोधेन

ब्राह्मणार्थनिश्चयस्तथापि विस्तरेण ब्राह्मणोक्तस्यार्थस्य मन्त्रेण संक्षेपेण कथनमपि प्रतिपत्तिसौकर्याय भवतीत्येतादृशं वैशद्यं मन्त्रेण क्रियत इति मन्त्रानुरोधेन ब्राह्मणवाक्यार्थनिश्चयोपि नायुक्त इति बोध्यम् ॥ १६ ॥

२०६-६ अत्राहेति । निर्विशेषब्रह्मवादिनश्चोद्यमेतत् ।

—८ शुद्धस्वरूपमिति । कर्मतत्फलसंबन्धरहितमित्यर्थः । उपासकप्राप्य-भेदस्त्ववस्थाभेदादप्युपपद्यत इत्याशयः ।

—१४ नेतर इति । इदं सूत्रं मान्त्रवर्णिकसूत्रोक्तो हेतुर्न संभवतीत्येवं समागतायाः शङ्कायाः निवर्तकं पूर्वसूत्रशेषभूतम् । न त्वानन्दमयस्य जीवादन्यत्वे स्वतन्त्रो हेतुरनेन प्रतिपाद्यते । अतोस्मिन्सूत्रे सूत्रकारेण चशब्दो न प्रयुक्तः ।

—१७ निरुपाधिकमिति । कर्मविशेषेन्द्रियानपेक्षत्वं निरुपाधिकत्वम् । केवलो विपश्चिच्छब्दो निरुपाधिकमेव विपश्चित्वमाह ।

—१९ विविधं पश्यच्चित्वम् । विविधार्थद्रष्टृत्वे सति चेतनत्वम् ।

—२० पृषोदरादीति । पृषोदरादीनि यथोपदिष्टम् (पा. सू. ६।३।१०९) इति पाणिनिसूत्रम् । पृषोदरादीनि शब्दस्वरूपाणि यथोच्चारितानि तथैव साधू-नीति तदर्थः । यथा पृषत उदरमिति षष्ठीतत्पुरुषे पृषच्छब्दान्तस्य तकारस्य लोपे पृषोदरशब्दः सिद्धस्तथैव यच्छब्दस्य लोपेन विपश्चिच्छब्दः सिध्यति ।

२०७-६ यतो वाच इति श्रुतेर्निर्विशेषपरत्वं खण्डयति—यत इति । वाङ्मनसे आनन्दस्येयत्तालक्षणं पारं गन्तुं प्रवृत्ते तमप्राप्यैव निवृत्ते भवतः । तथा च तादृशानन्दगुणकब्रह्मोपासनेन सर्वक्लेशभयादत्यन्तनिवृत्तिर्भवतीत्यस्याः श्रुतेः रर्थः (वि. दी.)। अस्याः श्रुतेर्यदि ब्रह्मणः सकाशाद्वाङ्मनसयोः सर्वथा निवृत्तिरित्यर्थस्तर्हि ब्रह्मरूपवस्तुनो निर्विशेषत्वं न सिध्यति । यत्र वस्तुनि वाङ्मनसनिवृत्तिस्तत्र निर्विशेषत्वमित्यत्र दृष्टान्ताभावेन तथाविधनियमे प्रमाणाभावात् । न केवलमिष्टं निर्विशेषत्वं न सिध्यति । प्रत्युत तुच्छत्वमनिष्टं सिध्येत् । यत्र वाङ्मनसनिवृत्तिस्तत्र तुच्छत्वमिति नियमस्य खपुष्पादिदृष्टान्तेन सिद्धत्वात् । न च तुच्छत्व इष्टापत्तिः । ब्रह्मविदाप्नोतीत्याद्यनेकश्रुतिविरोधात् । न हि तुच्छे विप-श्चित्त्वादिधर्माणां प्रतिपादनं श्रुतिभिः कर्तुं युक्तम् । विपश्चित्त्वादयो धर्माश्च ब्रह्मणा विपश्चिता । आकाशः संभूतः । रसो वै सः । एष ह्येवानन्दयाति । सोकामयत बहु स्यां प्रजायेय । तदनु प्रविश्य । अथ सोऽभयं गतो भवति । भीषास्माद्वातः पवते । स एको मानुष आनन्द इत्यादिश्रुतिभिः प्रतिपादिताः ।

—१३-४ शतगुणितेति । शतगुणितोत्तरक्रमेण निर्विशेषत्वमेव विवक्षित-मिति तु न युक्तम् । तथा सत्यानन्दस्यापकर्ष एवोक्तः स्यान्न तु प्रकर्षः । प्रत्यु-तानन्दप्रकर्षमुक्त्वा तदुत्तरं वाङ्मनसनिवृत्त्यभिधानेनानन्दस्येयत्ताराहित्यमेव विवक्षितं भवति । इयत्तारहितस्य वस्तुनो वाचा मनसा वैतावदित्यवगन्तुमशक्य-

त्वात् । अन्यच्च । य एषोन्तरादित्य इत्यादिश्रुतिप्रतिपादितमादित्यमण्डलान्तर्गतत्वादिकम् ।

२०७–१५ यत इति । ब्रह्मणो वाग्विषयत्वाभावे यच्छब्देनानन्दनिर्देश आनन्दशब्देन प्रतिनिर्देशो ब्रह्मसंबन्धित्वनिर्देशश्च न संभवति । तथा ब्रह्मणो मनोविषयत्वाभावे विद्वानिति तद्वेदनाभिधानं न संभवति । तथा चैतच्छ्रुतिवाक्यमनर्थकं स्यात् । समुद्रस्वनादिवद्वाक्यमेव वा न स्यात् । यथा जरद्गवो यथेच्छं किमपि रोरवीति । तत्र नार्थवत्त्वं नापि वाक्यत्वं तद्वत् । तत्र यतो वाच इत्यस्य वाक्यत्वाङ्गीकारेनर्थकत्वं दोषः । तदनङ्गीकारे वाक्यत्वाभाव एव दोषः ।

२०८–८ सुस्पष्टमेवेति । मुक्तस्याप्यात्मनः सर्वशक्तित्वाभावादिति भावः ॥ १७ ॥

—९ उभयावस्थादिति । शुद्धाशुद्धोभयावस्थाजीवादानन्दमयो भिन्न इत्यर्थः ।

—१५ अन्य एवेति । शुद्धाशुद्धोभयावस्थाजीवात्तादृशावस्थाद्वयान्तर्गतैकावस्थाविशिष्टस्य भेदो न संभवतीत्यानन्दमयशब्दवाच्यं ब्रह्म न तु शुद्धावस्थजीवस्वरूपमित्यर्थः । विज्ञानमयशब्देन बुद्धेस्तु न ग्रहणम् । मयट्प्रत्ययेन व्यतिरेकप्रतीतेः ॥ १८ ॥

—१८ अवर्जनीयेति । अचिद्वस्तुसंसर्गापेक्षाऽवश्याश्रयणीयेत्यर्थः । कस्यापि जीवस्य देहाद्यचिद्वस्तुसंबन्धं विना कार्योत्पादनासामर्थ्यात् ॥ १९ ॥

२०९–६ अस्मिन्निति । रसो वै स इत्यादिशास्त्रमस्मिन्रसशब्दनिर्दिष्टानन्दमयविषयेऽस्यायंशब्दनिर्दिष्टस्य जीवस्यानन्दमयलाभादानन्दयोगं शास्तीत्यर्थः ।

—१४ यथा विज्ञानशब्देनेति । इदं प्रागुक्तम् (श्रीभाष्य–पृ.१८४प.१७)।

—१५ अत एवेति । आनन्दशब्देन क्वचिद्धर्मिग्रहणेपि गुणरूपानन्दस्य ब्रह्मव्यतिरिक्तत्वादेवेत्यर्थः ।

२१०–५ अतः प्रधानेति । पूर्वस्मिन्नीक्षत्यधिकरणेऽचेतनात्प्रधानात्परस्य ब्रह्मणोऽर्थान्तरत्वं सिद्धम् । अस्मिन्नधिकरणे तु चेतनाजीवादर्थान्तरत्वं सिद्धमिति भावः ॥ २० ॥ (६)

—८–९ कामादिति । सोकामयत (तै. २।६) इति श्रुतौ कामाज्जगत्सृष्टिरुच्यते । स एको ब्रह्मण आनन्दः (तै. २।८।१) इति श्रुतावतिशयितानन्दयोगः प्रतिपाद्यते । एतस्मिन्...प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । (तै. २।७।१) इति श्रुतौ भयाभयहेतुत्वमुच्यते ।

२१०–१२ अन्तरिति। उत्तरसूत्रादन्यशब्दोपकृष्यते। सूर्यमध्ये नेत्रमध्ये च श्रूयमाणः पुरुषो जीवादन्यः परं ब्रह्मैव। तदसाधारणापहतपाप्मत्वादिधर्मोपदेशादिति सूत्रार्थः।

—१३–२० य एष इति। हिरण्मय इति हिरण्यरूपसादृश्यान्निर्देशः। कपिना सूर्येणास्यते विकास्यत इति कप्यासम्। पुण्डरीकं रक्ताम्भोजम्। पाप्मा पातकम्। गेष्णो गानविशेषः। श्रुत्यर्थस्तु य एष सूर्यमण्डलस्य मध्य उज्ज्वलो रमणीयश्मश्रुकेशो रमणीयसर्वावयवः पुरुषो दृश्यते तस्य सूर्यविकासिकमलवन्नेत्रे। तस्य पुरुषस्योदिति नाम। यतः स पुरुषः सर्वपातकेभ्य उद्गतः। एतादृशं तं पुरुषं यो वेत्ति सोपि पातकादुद्गच्छति। ऋक्सामैतद्रूपं तद्गानरूपम्। इति देवतासंबन्धेनोपदिष्टम्। अथाध्यात्मसंबन्धेनोपदिश्यते। य एष नेत्रमध्ये पुरुषो दृश्यते स एवर्ग्यजुःसामात्मोक्थादिशब्दात्मा ब्रह्म च। सूर्यमण्डलमध्यस्थपुरुषस्य यद्रूपं यन्नाम यच्च गानं तदेव सर्वमस्य नेत्रमध्यस्थपुरुषस्येति। अत्रोक्थस्वर्गादित्रय्यपेक्षया पृथक्परिगणनं गोबलीवर्दन्यायेन (वि. दी.)।

२११–२ पुण्योपचयेति। पुण्याधिक्येन प्राप्तमैश्वर्यं यस्य तादृश इत्यर्थः।

—४ सशरीरत्वेति। हिरण्यश्मश्रुरित्यादिश्रुत्या तस्य पुरुषस्य सशरीरत्वं बोध्यते।

—६ अत एवेति। शरीरसंबन्धस्य कर्ममूलप्रियाप्रिययोगार्थत्वादेव हि कर्मसंबन्धरहितो मोक्षोऽशरीरतया प्राप्य इत्युच्यत इत्यर्थः।

—१० लोककामेशत्वादीति। स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च (छा. १।६।८) इति श्रुतौ सूर्यमण्डलोर्ध्ववर्तिलोकानां देवभोग्यभोगोपकरणभोगस्थानानां च नियन्तृत्वं सूर्यमण्डलमध्यस्थपुरुषस्योक्तम्। तथा स एष एवंतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च (छा. १।७।६) इति श्रुतावक्षिस्थानादधोवर्तिनां लोकानां मनुष्यभोग्यादीनां च नियन्तृत्वमक्षिमण्डलमध्यस्थपुरुषस्योक्तम्।

—१७ न जीवातिरिक्त इति। अपहतपाप्मत्वादिश्रुतयश्च नाकर्मवश्यतां वदन्ति किं तु केवलपुण्यहेतुकशरीरवतः पापराहित्यं वदन्तीति पूर्वपक्ष्याशयः।

२१२–८ अपहतपाप्मत्वमिति। यद्यपि पाप्मशब्दः पातकपरस्तथाप्यत्र पुण्यपापरूपोभयविधकर्मपरः। न सुकृतं न दुष्कृतं सर्वे पाप्मानोतो निवर्तन्ते (छा. ८।४।१) इति श्रुत्यन्तरानुरोधात्। किं च लौकिकत्वे सत्यनिष्टफलसाधनत्वं पाप्मशब्दस्य प्रवृत्तिनिमित्तम्। तच्च पुण्येष्यस्ति। पुण्यफलस्य स्वर्गादेरपि मुमुक्षुद्वेष्याऽनिष्टत्वात्।

—११ स्वरूपोपाधिकम्। स्वाभाविकम्।

२१३–८ **स तु स्वाभिमत इति** । यथा परस्य ब्रह्मणो धर्मिस्वरूपं स्वाभाविका गुणाश्च प्रामाणिकत्वादङ्गीक्रियन्ते तथा विलक्षणशरीरमप्यभ्युपगन्तव्यम् ।

—१४ **यौवनादीति** । आदिशब्देन पराक्रमादयो विवक्षिताः ।

—१६ **तत्तत्प्रतिपत्तीति** । तेषामुपासकानां प्रतिपत्तिर्ज्ञानं यथा स्यात्तथा तदनुरूपं संस्थानमाकारो यस्य तादृशं शरीरं करोतीत्यर्थः ।

—१६–७ **अपारकारुण्येति** । कारुण्यं परदुःखासहिष्णुत्वम् । महतो मन्दैः सह नीरन्ध्रेण संश्लेषस्वभावत्व सौशील्यम् । दोषेपि गुणत्वबुद्धिर्वात्सल्यं दोषादर्शित्वं वा । यथा मातुः पुत्रे । दातृप्रतिग्रहीतृविभागबुद्धिरहितं दातृत्वमौदार्यं प्रभूतं दत्वाप्यतृप्तत्वं वा । एते गुणा उपासकानुग्रहोपयुक्ताः ।

२१४–२१ **विद्युतः** । विद्युद्वर्णात् ।

२१५–३ **अजायमान इति** । अनेन कर्महेतुकसुखाद्यर्थप्राकृतदेहसंगतिरूपजन्मनो निषेधः क्रियते । विजायत इत्यनेन चेच्छाहेतुको जगद्रक्षणार्थो योऽप्राकृतदेहस्तदधिष्ठानरूपजन्मनो विधिः प्रतिपाद्यते । अजोपीति स्मृतावप्यज इत्यस्य संभवामीत्यस्य चैतदेव तात्पर्यम् ।

—९ **आनुषङ्गिक इति** । उद्देश्यान्तरप्रवृत्तस्य प्रसङ्गात्प्राप्तस्तदितरः कार्यविशेषः । यथा भो बटो भिक्षामट यदि गां पश्येस्तां चानयेति । अत्र भिक्षार्थं प्रवृत्तस्य दैवाद्गोदर्शनात्तस्या आनयनमानुषङ्गिकम् । अत्र च साधुपरित्राणोद्देशेन संभूतस्य प्रसङ्गात्प्राप्तो दुष्कृतां विनाश आनुषङ्गिकः ।

—१३ **मायेति** । अत्र मायाशब्दस्य वयुनशब्दस्य च ज्ञानार्थकत्वं प्रतिपाद्यते ॥ २१ ॥

२१६–९–१२ **य आत्मनीति** । बृहदारण्यके माध्यंदिनशाखास्थोयं पाठः । काण्वशाखायां तु यो विज्ञाने तिष्ठन्निति पाठः । तत्र विज्ञानशब्दो जीवात्मपरः । समानप्रकरणे शाखान्तरे विज्ञानशब्दस्थान आत्मशब्देन निर्देशदर्शनात् । **यस्याक्षरमिति** । अनेन कारणावस्थायामपि भेदो बोध्यते । अक्षरमचित्समष्टिसंसृष्टा पुरुषसंसृष्टिः । मृत्युश्चित्समष्टिसंसृष्टाऽचित्समष्टिः (श्रु.) ॥ २२ ॥ (७)

२१७–४ **इदानीमिति** । पूर्वं सद्ब्रह्मात्मादिसाधारणशब्दानां परमात्मार्थकत्वं प्रदर्श्य संशयनिरासः कृतः । इदानीमाकाशादिशब्दानां भूताकाशाद्यर्थकतयाऽसाधारणत्वेन प्रसिद्धानां परमात्मार्थकत्वं प्रदर्श्य विपर्ययनिरासः क्रियत इति भावः ।

—१० **अस्य लोकस्येति** । अस्य पृथिवीलोकस्य का गतिरिति शालावत्पुत्रेण शिलकेन पृष्टो जिवलपुत्रः प्रवाहण आकाश इत्युक्तवान् । सर्वाणि भूता-

न्याकाशादेवोत्पद्यन्ते तत्रैव लीयन्ते। एभ्यो भूतेभ्यः सकाशादाकाशो ज्यायान्। ज्यायस्त्वं नाम सर्वैः कल्याणगुणैः सर्वेभ्यो निरतिशयनिरुपाधिकोत्कर्षः। तथैतेषामाकाश एव परायणं परमगतिः परमप्राप्य इति श्रुत्यर्थः।

२१७-१३ **संदेह इति**। आकाशशब्दस्य भूताकाशरूपेर्थे प्रसिद्ध्यतिशयार्किं भूताकाशोर्थ उत परायणत्वादिधर्मोपदेशात्परमात्मार्थ इति संदेहबीजम्।

—१६ **व्युत्पत्तिसिद्ध इति**। यद्यप्याकाशत आसमन्तात्प्रकाशत इत्याकाशयति परान्प्रकाशयतीति वा व्युत्पत्तिराकाशशब्दस्य परमात्मन्यपि संभवति तथापि योगादूढिर्बलीयसीति न्यायादूढ्यर्थो भूताकाश एव ग्राह्य इत्याशयः।

२१८-५ **साधारणाकाराः**। साधारणरूपाः। अनिश्चितार्थविशेषाः।

—७ **तस्यापीति**। आत्मशब्दस्य चेतनमात्रार्थकत्वं न संभवति। अचेतनमृदादिष्वात्मशब्दप्रयोगदर्शनात्।

—८ **आप्नोतीति**। व्याप्नोतीत्यर्थः। सर्वमिदं जगदाकाशेन व्याप्तं दृश्यते। तथा चावयवशक्त्याप्यात्मशब्दस्याकाशार्थकत्वं सिद्धमिति भावः।

—१० **गौणा इति**। गौणत्वं च प्रागुक्तम् (श्रीभाष्य- पृ. १७२ प. १८)।

—११ **साधारणशब्दैरेवेति**। न त्वसाधारणैर्निश्चितार्थविशेषैराकाशादिशब्दैः। यदि परमात्मभूताकाशैतदुभयार्थवाचकैः सदादिभिश्चेतनाचेतनसाधारणशब्दैरेव जगत्कारणं प्रतिपादितं स्यात्तदेक्षणं किं चेतननिष्ठतया मुख्यमुताचेतननिष्ठतया गौणमित्याशङ्का युक्ता। मुख्यार्थपरिग्रहेण समाधानं च युक्तं स्यात्। परं त्वचेतनमात्रार्थकतया प्रसिद्धैरसाधारणैराकाशादिशब्दैरपि जगत्कारणस्य प्रतिपादनात्तत्र च मुख्येक्षणस्यासंभवाद्गौणस्यैव ग्राह्यत्वावश्यंभावाच्छङ्कैव नोदेतीति भावः।

—१३ **अर्थस्वाभाव्यात्**। ईक्षणरूपार्थस्य स्वभावतश्चेतननिष्ठत्वाज्जगत्कारणं चेतनः परमात्मैवेति यो निश्चयः कृतः स न युक्तः। आकाशशब्देनाचेतनरूपविशेषार्थस्य निश्चयादित्यर्थः।

—१५ **कार्यत्वमिति**। तथा च कार्यभूतस्य परमकारणत्वं न युक्तमित्यर्थः।

२१९-६ **उपपन्नतर इति**। परमात्मन आकाशादनतिरिक्तत्वेन तस्याकाशशब्देन निर्देशो युक्त एवेत्यर्थः।

—८ **आकाश इति**। आकाशशब्दनिर्दिष्टः परमात्मैव। सर्वाणि ह वेत्यादिश्रुतौ प्रसिद्धवन्निर्दिश्यमानाज्जगत्कारणत्वादिलिङ्गादिति सूत्रार्थः।

—१४ **हेयस्येति**। भूताकाशस्याचेतनत्वेन स्वरूपानन्तभूतत्वाद्धेयत्वम्। तथा भूताकाशस्य बन्धहेतुत्वेन सकलपुरुषार्थविरोधित्वम्। सकलानां जीवानां यः पुरुषार्थो मोक्षस्तद्विरोधित्वमित्यर्थः।

२१९–२० **प्रसिद्धवन्निर्देशो हीति** । इह सूत्रे तद्धर्मोपदेशादित्यनुक्त्वा तल्लिङ्गादित्युक्तवतः सूत्रकारस्यात्र प्रसिद्धवन्निर्देशो हेतुतया विवक्षित इति गम्यते। प्रसिद्धवन्निर्देशश्च वाक्यान्तरप्रसिद्धार्थस्यानूद्य निर्देशः । अनुवादस्य च प्रमाणान्तरप्राप्त्यपेक्षेति पुरोवादसापेक्षत्वेन पुरोवादानुसारेणार्थनिश्चयो युक्तो न त्वनुवादनिरपेक्षस्य पुरोवादस्यानुवादानुसारेण । तथा चाकाशशब्दस्य भूताकाशरूपप्रसिद्धार्थवत्त्वेपि तस्यानुवादवाक्यगतत्वेन न तदनुसारेण पुरोवादस्थानां सद्ब्रह्मात्मादिशब्दानामचेतनार्थकत्वनिश्चयः पूर्वपक्षिकृतो युक्तः । किं त्वनुवादवाक्यमलक्ष्यीकृत्य पुरोवादस्थसदादिशब्दानामर्थस्वाभाव्येन निश्चितं चेतनार्थकत्वमेव युक्तम् । अनुवादस्य पुरोवादवाक्याविरुद्धार्थप्रतिपादनमेव च युक्तमिति बोध्यम् ।

२२०–६–११ **चेतनांशं प्रतीति** । चेतनांशो जीवः । तन्निरूपितकारणत्वमचेतनविशेषस्य भूताकाशस्य न संभवतीत्यर्थः । एकपदश्रवणवेलायां विशेषसमर्पणक्षमेणापि परामर्शदशायामयोग्यतया निश्चितोर्थो न प्रतिपादयितुं शक्यत इत्यभिप्रायः (श्रु.) । **तदैक्षतेति** । सद्विद्यावाक्यशेषः । **सोकामयतेति** । ब्रह्मविदाप्नोतीत्यनुवाकवाक्यशेषः । अपूर्वार्थप्रतिपादनसमर्थं वाक्यं सदेव सोम्येत्यादि पुरोवादरूपम् । असंभावितार्थकेनानुवादरूपवाक्येन संभावितार्थकवाक्यानामन्यथाकरणं न युक्तमिति भावः ।

—१२ **गतिसामान्यम्** । अनेकवाक्यानां सामान्यतः प्रवृत्तिः । एकेन वाक्येनानेकवाक्यानि बाधितुं न शक्यन्ते ।

—२० **अर्थान्तरेति** । यथा गङ्गायां घोष इत्यत्र गङ्गाशब्दात्तीररूपार्थान्तरप्रतीतिर्घोषाधिकरणत्वेन कृतं तन्निर्देशमपेक्षते तद्वत् ॥ २३ ॥ (८)

२२१–९ **अत एवेति** । अत एव प्रसिद्धवन्निर्देशादेव प्राणशब्दनिर्दिष्टः परमात्मैव न तु प्रसिद्धप्राण इति सूत्रार्थः ।

—१०–१४ **प्रस्तोतरिति** । प्रस्तोता नामोद्गातुरङ्गभूतः सामवेत्ता ऋत्विग्विशेषः । स कस्यचिद्राज्ञो यज्ञे चक्रपुत्रेणोपस्तिनाम्नैवमुक्तः–हे प्रस्तोतस्त्वत्कृतं प्रस्तावं या देवतानुगता । प्रस्तावभक्तावध्यस्य या देवतोपास्येति यावत् । तामविदित्वा यदि विदुषो मम समीपे प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति । ततो भीतेन प्रस्तोत्रा स उपस्तिरेवं पृष्टः–यद्देवतासंबन्धेन त्वयैवमुक्तं तां देवतां त्वमेव ब्रूहीति । ततस्तेनोषस्तिना प्राण इत्युक्त्वेमानि भूतानि प्राण एव लीयन्ते प्राणादेव चोद्गच्छन्ति । सैषा प्राणस्वरूपा देवता प्रस्तावमनुगता । इमामजानानस्त्वं यदि स्वीयं कर्माकरिष्यस्ततस्ते मूर्धपातोभविष्यदित्युक्तम् । साम्नः प्रथमो भागः प्रस्तावः ।

१७–८ **अधिकाशङ्का त्विति** । अधिकाशङ्कापरिहार एवातिदेशसूत्रकरणस्य प्रयोजनम् । अधिकाशङ्काया अभावे त्वतिदेशसूत्रं विनाप्याकाशशब्दस्येव प्राण-

शब्दस्यापि परमात्मैवार्थ इति निश्चयसंभवात् । **प्रवृत्त्यादीति** । आदिशब्देन निवृत्तिरुच्यते ।

२२१-१९-२० **शिलाकाष्ठादिष्विति** । आदिशब्देनाकाशादिसंग्रहः । **तदभावात्** । प्राणाधीनस्थित्याद्यभावात् ॥ २४ ॥ (९)

२२२-६ **जगदिति** । यतो जगत्कारणत्वस्य व्याप्यभूतेन येन केनापि धर्मेण युक्तमतोर्थान्तरवाचकतया प्रसिद्धैर्ज्योतिरादिशब्दैरभिधीयमानमपि परं ब्रह्मैवेत्यर्थः । अत्रायमेव गुणः कारणत्वाक्षेपक इति नियमो नास्तीति येन केनापीत्यनेन सूच्यते न तु लिङ्गाल्पत्वम् (श्रु.) ।

—९ **ज्योतिरिति** । ज्योतिःशब्दनिर्दिष्टः परमात्मैव । अस्य ज्योतिषः पूर्ववाक्ये सर्वभूतचरणत्वाभिधानादिति सूत्रार्थः ।

१०-२ **अथ यदत इति** । विश्वशब्दो व्यष्टिपरः । सर्वशब्दः समष्टिपरः । अनुत्तमेषु । नोत्तमो यस्मात्तथाविधेषु । दिवोऽप्राकृतस्थानविशेषस्योपरिष्टात्समष्टिव्यष्टिबहिर्भूतेषु स्वाधिकोत्तमरहितेषूत्तमस्थानविशेषेषु यज्ज्योतिर्दीप्यते तदिदमेव यत्पुरुषस्यान्तर्जाठराग्निरूपं दीप्यत इति श्रुत्यर्थः ।

—१७-२२३-१ **परमात्मव्याप्तेति** । न ह्यत्र वाक्ये परमात्मत्वव्याप्यं सर्वजगत्कारणत्वादि किंचिच्चिह्नं दृश्यते । **कौक्षेयज्योतिषा** । जाठराग्निना । अन्तः पुरुषे ज्योतिरित्यत्रायमेक्योपदेशः कृतः । **प्रसिद्धमेवेति** । न त्वादित्यादिप्रसिद्धज्योतिरपेक्षथा जगत्कारणं ब्रह्म भिन्नमस्तीति पूर्वपक्ष्याशयः ।

२२३-३ **द्युसंबन्धितयेति** । श्रुतौ दिवः पर इत्युक्तत्वादस्य ज्योतिषो द्युसंबन्धितया निर्देशो बोध्यः ।

—५ **पादोस्येति** । सर्वा इति प्रथमाबहुवचनम् । छान्दसो विभक्तिलुक् । सर्वाणीत्यर्थः । सर्वाणि भूतानि कार्यजगदन्तर्गताचित्संसृष्टाश्चेतना अस्य परमात्मन एकः पादः । दिवि समष्टिव्यष्टितत्त्वबहिर्भूताप्राकृतस्थानविशेषेस्य परमात्मनोमृतं पादत्रयमित्यर्थः (वि. दी.) । अस्यां श्रुतौ दिवीत्यनेनैतदुत्तरश्रुतौ चाथ यदत इत्यत्र दिव इत्यनेन वाक्यद्वये द्युसंबन्धस्य प्रतिपाद्यमानत्वादुभयत्राप्येकमेव निर्दिष्टमिति प्रत्यभिज्ञायते । पादोस्येत्यत्र प्रतिपादितस्य सर्वभूतपादत्वस्य परमात्मन्येव संभवेन तत्र परमात्मैव निर्दिष्ट इति निश्चयादुत्तरत्र ज्योतिःशब्दघटितश्रुतावपि परमात्मैवेति निश्चयो भवतीति भावः ।

—११ **तदात्मकत्वेति** । तद्ब्रह्मात्मा यस्य कौक्षेयज्योतिष इति बहुव्रीहेस्त्वप्रत्ययः । ब्रह्मशरीरभूतस्य कौक्षेयज्योतिषो जाठराग्नेर्ब्रह्मात्मकत्वानुसंधानं कर्तव्यम् । तत्पूर्विका तस्योपासना च द्विविधा दर्शनं श्रवणं च । दर्शनं साक्षात्कारः । यदस्मिन्छरीरे हस्तस्पर्शेनोष्णिमा ज्ञायते स एव साक्षात्कारः । तथा

कर्णावङ्गुलिभ्यां पिधाय यच्छब्दज्ञानं भवति तदेव श्रवणम्। द्विविधोपासनायाः फलं चोपासकस्य क्रमेण चक्षुष्यत्वं श्रुतत्वं च । तत्र चक्षुष्यत्वमाभिरूप्यम्। श्रुतत्वं कीर्तिमत्त्वम्। तथा च यदस्मिन्नन्तः पुरुषे ज्योतिस्तदिदमेवेत्यत्रेदमेवेत्यनेन न कौक्षेयज्योतिषो जाठराग्नेर्ब्रह्मणा सह सर्वथैक्यं बोध्यते। किं तु ब्रह्मात्मकत्वम्। ब्रह्मशरीरत्वमिति यावदिति न कश्चिद्विरोधः ॥ २५ ॥

२२३–१५ **छन्द इति** । पादोस्येति पूर्वश्रुतौ न ब्रह्मणोभिधानम्। कुतः। गायत्री वा इदं सर्वमिति गायत्र्याख्यच्छन्दसः प्रकृतत्वेन तत्र गायत्रीछन्दस एवाभिधानादिति चेन्न। तथा चेतोर्पणनिगमात्। ब्रह्म यथा गायत्रीसादृश्याद्गायत्रीरूपतया दृश्येत तथा ब्रह्मणि चेतसोनुसंधानोपदेशात्। अन्यत्राप्येवं दर्शनं भवति यच्छन्दोवाचकस्य शब्दस्य सादृश्यादर्थान्तरे प्रयोग इति सूत्रार्थः।

२२४–१ **तावानस्येति** । अस्या एवर्चं उत्तरार्धं पादोस्येति। तथा च पादोस्येत्यत्र न ब्रह्मणोभिधानमित्याशयः।

—४ **छन्दोमात्रस्येति** । गायत्री वा इदं सर्वमिति प्रतिपादितं यद्गायत्र्या एतत्सर्वात्मकत्वं तद्गायत्रीछन्दसो नोपपद्यत इत्यर्थः।

—६ **फलायेति** । पूर्णामप्रवर्तिनीं श्रियं लभते य एवं वेद (छा. ३।१२।९) इति श्रुतौ ब्रह्मणि गायत्रीसादृश्यानुसंधानं कुर्वतो मोक्षरूपं फलं प्रतिपाद्यते। पूर्णाम् । अनन्ताम्। अप्रवर्तिनीम्। स्थिराम्। अनन्तस्थिरा श्रीर्मुक्तैश्वर्यमेवेति भावः।

—९ **क्वचिदिति** । गायत्रीछन्दसः प्रायः पादत्रयात्मकत्वेन क्वचिदित्युक्तम्।

—१०–१ **इन्द्र इति** । इन्द्रः शचीपतिरित्येकः पादः । बलेन पीडित इति द्वितीयः । दुश्च्यवनो वृषेति तृतीयः । समित्सु सासहिरिति चतुर्थः।

—१३ **ते वा एत इति** । वाय्वग्निसूर्यचन्द्रोदकरूपा आधिदैविकाः पञ्च पदार्थाः । तथा प्राणवाक्चक्षुःश्रोत्रमनोरूपा आध्यात्मिकाः पञ्च पदार्थाः। मिलित्वा दश संपद्यन्ते। विराट्छन्दसश्च प्रतिपादं दशाक्षराणीति दशसंख्यासाम्याद्वाय्वादिषु दशसु च्छन्दोवाचकस्य विराट्शब्दस्य प्रयोग इति भावः ॥ २६ ॥

—१७ **भूतादीति** । भूतपृथिवीशरीरहृदयानि निर्दिश्य सैषा चतुष्पदा (छा. ३।१२।५) इति भूतादीनां पादत्वव्यपदेशो ब्रह्मण्येवोपपद्यत इति च ब्रह्मैव गायत्रीशब्दनिर्दिष्टमिति गम्यत इति सूत्रार्थः (वे. दी.)। तत्र भूतमात्मवर्गः । पृथिव्ययं लोकः कर्मार्जनभोगस्थानरूपः। शरीरं भोगोपकरणम्। हृदयमात्मनः स्थित्यनुगुणः प्रदेशविशेषः (श्रु.) ॥ २७ ॥

२२५–७–८ **अर्थस्वभावैक्येन** । उपरिस्थितिरूपार्थैक्येन।

२२५-१२-८ परमात्मन एव ज्योतिःशब्दाभिधेयत्वे हेत्वन्तरमाह-**तावानस्येति**। अथ यदतः परो दिवो ज्योतिः (छा. ३।१३।७) इति श्रुतौ ज्योतिःशब्दाभिधेयस्याप्राकृतं तेजः प्रतिपाद्यते। तच्चैतावानस्येति श्रुतिप्रतिपादितस्य ब्रह्मण एव संभवति। वेदाहमेतम् (तै. आ. ३।११) इति श्रुतौ ब्रह्मणोप्राकृतरूपाभिधानात्। यस्य रूपमप्राकृतं तस्य तेजसाप्यप्राकृतेनैव भवितव्यमिति ॥ २८ ॥

(१०)

—२१ **इदानीमिति**। इन्द्रादिशब्दैः प्रतिपादितोपि परमात्मैव। जगत्कारणत्वस्य व्याप्यभूतं यदमृतत्वं तत्प्राप्तिसाधनीभूतोपासनाकर्मत्वेन श्रुतत्वात्। न हि परमात्मनोन्यस्योपासनयामृतत्वं प्राप्यते।

२२६-३ **प्राण इति**। तथेति शब्दः प्रकारवचनः। उपास्यतयोपदिष्टं प्राणशब्दाभिधेयं परं ब्रह्म। परब्रह्मप्रकारभूतेष्वानन्दादिष्वस्य प्राणशब्दाभिधेयस्यानुगमनादिति सूत्रार्थः। अनुगमः पूर्ववाक्यप्रतीतस्योत्तरवाक्यसंबन्धः। दृश्यते चास्योत्तरत्रानन्दादिशब्दैः सामानाधिकरण्यम्। प्राकरणिकस्य प्राणशब्दाभिधेयस्यैव चेन्द्रशब्दाभिधेयत्वादिन्द्रशब्दाभिधेयमपि परं ब्रह्मैवेत्यर्थात्सिध्यतीति सूत्रकाराशयः।

—४-८ **प्रतर्दन इति**। युद्धेनेति पौरुषेणेति चोपलक्षणे तृतीया। युद्धं युद्धसाधनबलम्। पौरुषं शौर्यम्। ताभ्यां युक्तो दिवोदासपुत्रः प्रतर्दननामेन्द्रस्य प्रियं धाम स्वर्गरूपं स्थानमुपगतः। ततो वरं वृणीष्वेतीन्द्रेणोक्तः प्रतर्दनः स्वयमज्ञत्वाद्धिततमं वरमजानानः सन्निन्द्रं प्रत्युवाच। हे इन्द्र सर्वज्ञस्त्वं मनुष्याय मादृशाय हिततमं यं वरं मन्यसे तादृशं वरं त्वमेव वृणीष्वेति। वृणीष्वेत्यस्य देहीत्यर्थः। तत इन्द्र उवाच। प्रज्ञात्मा जीवो जीवशरीरकोहं प्राणोस्मि प्राणशरीरकोस्मि तादृशं मामायुरमृतमिति प्रकारद्वयेन त्वमुपास्स्वेति श्रुत्यर्थः।

—१० **इन्द्रप्राणेति**। इन्द्रस्य प्रियं धामेत्युपक्रम इन्द्रशब्दनिर्दिष्टत्वादग्रे च प्राणोस्मि प्रज्ञात्मेत्यादौ प्राणशब्दनिर्दिष्टत्वाच्चेन्द्रप्राणशब्दनिर्दिष्ट इत्युक्तम्।

१६-७ **जगत्कारणोपासनस्यैवेति**। यत्र मुमुक्षूपास्यत्वं तत्र जगत्कारणत्वमिति व्याप्तेरिति भावः। **तस्य तावदेवेति**। जगत्कारणोपासकस्य शरीरपातमात्रमपेक्षते मोक्ष इति श्रुत्यर्थः ॥ २९ ॥

२२७-६ **न वक्तुरिति**। अध्यात्ममिति विभक्त्यर्थेव्ययीभावः। आत्मनीत्यर्थः। न प्राणशब्दनिर्दिष्टः परमात्मा। मामेव विजानीहि (कौ. ३।२) इत्यत्र प्रज्ञातजीवभावस्येन्द्रस्य वक्तुः स्वात्मन उपास्यत्वोपदेशादिति चेन्न। यतोस्मिन्प्रकरणे परमात्मनि संबध्यमानवस्तूनां बहुत्वमुपलभ्यते। अथ वा परमात्मासाधारणधर्मसंबन्धबहुत्वमुपलभ्यत इति सूत्रार्थः।

२२७–१०–२ **वक्ता हीन्द्र इति** । अयं हि पूर्वपक्षिसंमतः श्रुत्यभिप्रायः । **त्रिशीर्षाणमिति** । अहमिन्द्रस्त्रिशीर्षाणं त्रिशिरस्कं त्वाष्ट्रं वृत्रासुरं हतवानस्मीति श्रुत्यर्थः । **त्वाष्ट्रवधादिभिरिति** । अत्रादिशब्देन शालावृकयतिप्रदानादिसंग्रहः । त्वाष्ट्रमहनमित्युत्तरमरुन्मुखान्यतीञ्छालावृकेभ्यः प्रायच्छम् (कौ. ३।१) इति श्रुतिः । रौतीति रुद्रेदः । स मुखे न विद्यते येषां तेऽरुन्मुखा वेदबाह्याः । तादृशान्यतीञ्छालावृकेभ्यो भक्षणाय प्रायच्छं दत्तवानस्मीति तदर्थः ।

—१९–२१ **रथस्येति** । यथा रथस्य नाभौ रथचक्रमध्यवर्तिसरन्ध्रकाष्ठविशेषेऽरशब्दिताः काष्ठविशेषाः परितोर्पिताः । तत्र च नेमिशब्दितं वलयाकारं काष्ठं यथार्पितमेवं प्राणशब्दितपरमात्मनि प्रज्ञामात्राशब्दनिर्दिष्टाश्चेतना अर्पिताः । तेषु च भूतमात्राशब्दितग्राह्यग्राहकजातं सर्वं समर्पितमित्यर्थः (वि. दी.) । नन्वत्र प्रज्ञामात्राशब्देन जीवग्रहणं न युक्तम् । यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युः (कौ. ३।८) इति पूर्ववाक्ये प्रज्ञामात्राशब्देन वागादीनां ग्रहणेनात्रापि तथैवौचित्यादिति चेन्न । जीवस्य प्रज्ञाशब्दमुख्यार्थत्वात् । यो वै प्राणः सा प्रज्ञा (कौ. ३।३) इति पूर्वतरवाक्ये प्रज्ञाशब्देन जीवस्य निर्दिष्टत्वाच्च । यद्धि भूतमात्रा (कौ. ३।८) इत्यत्र भूतमात्राप्रज्ञामात्राणामन्योन्याधाराधेयभावप्रतिपादनेन जीवे च भूतमात्रानिरूपिताधेयत्वस्यासंभवेन पूर्वनिर्दिष्टस्य जीवस्य त्यागेऽप्यत्र तस्यागे मानाभावात् ॥ ३० ॥

२२९–३ **प्रज्ञातजीवभावस्येति** । त्वाष्ट्रवधादिभिरत्र वक्तुर्जीवभावो ज्ञायते । तथा च जीवत्वादनुपास्यत्वेन मामुपास्स्वेति कथमुक्तवानित्यर्थः ।

—५ **शास्त्रेति** । परमात्मा जीवानामप्यात्मेत्यन्तः प्रविष्टेत्यादीनि शास्त्राणि प्रतिपादयन्ति । तथा च शास्त्रेण जाता या स्वस्यात्मभूते परमात्मनि स्वस्यात्मेति दृष्टिस्तयेन्द्रस्य जीवस्यैव सतः स्वात्मत्वेनोपास्यभूतपरमात्मोपदेशोयं वामदेववदिति सूत्रार्थः । जीवात्मवाचिनः शब्दा जीवात्मशरीरकं परमात्मानमेव वदन्तीति विदितशास्त्रार्थस्य मामेव विजानीहि मामुपास्स्वेति स्वात्मवाचिशब्देन परमात्मोपदेशोयं न विरुध्यते (वे. दी.) ।

—७ **प्रमाणान्तरेति** । शास्त्रदृष्टिशब्दस्य व्यवच्छेद्यमेतत् (श्रु.) ।

२३०–७–८ **सर्वगत्वादिति** । अनन्तस्य परमात्मनः सर्वव्यापित्वात्स परमात्मैवाहं मच्छरीरकत्वेन स्थितः । मत्तो मच्छरीरकात्परमात्मनः सर्वं जायते । अहं मच्छरीरकः परमात्मैव सर्वम् । सनातने मयि मच्छरीरके परमात्मनि सर्वमित्यर्थः ॥ ३१ ॥

—१२ **जीवेति** । मुख्यः प्राणः पञ्चवृत्तिः । मुख्यशब्द इन्द्रियादिव्यावृत्त्यर्थः (श्रु.) ।

२३०–१४ **न वाचमिति** । न केवलं मद्वचनमेव विजानीहि वक्तारं मां च विजानीहीत्येवमिन्द्रेण प्रतर्दनायोक्तम् ।

२३१–२ **स्वरूपेणानुसंधानम्** । अङ्गारकगुणविशिष्टानुसंधानम् ।

—१० **भोक्तृशरीरतयेति** । अत्र भोग्यभोगोपकरणशरीरतयेत्यत्र च बहुव्रीहेस्तल् । भोक्ता भोग्यं प्रेरितारं च मत्वा (श्वे. १।१२) । सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् (श्वे. १।१२) इत्यादावपि त्रिविधोपासनं दृश्यते ।

—११ **इहापीति** । आनन्दोजरोमृतः (कौ. ३।८) इति स्वेन रूपेणानुसंधानम् । प्राणोस्मि (कौ. ३।३) इत्यचिद्विशिष्टानुसंधानम् । मामुपास्स्व (कौ. ३।२) इति चिदचिद्विशिष्टानुसंधानमिति बोध्यम् ॥ ३२ ॥ (११)

अथ प्रथमाध्यायस्य द्वितीयः पादः प्रारभ्यते ॥

२३२–३ **प्रथमे पाद इति** । प्रथमपादस्योत्तरपादेन संगतिं दर्शयितुं प्रथमपादस्थैकादशाधिकरणानां संक्षेपेणार्थः क्रमशः प्रतिपाद्यते ।

—१२ **प्रत्यपादीति** । प्रत्यपादि, अभ्यधायि, अब्रूम, उपापीपदाम, समादधीमहि, उदैरिराम, समगरिष्महि, आतिष्ठामहि, अब्रूमहीति क्रियापदानि नव समानार्थकानि ।

२३३–४ **स्वाभाविकेति** । स्वाभाविकेत्यस्यानवधिकातिशयेत्यस्य चानन्दादिषु सर्वत्रान्वयः । नावधिर्यस्य तादृशोतिशयो यस्येति बहुव्रीहिगर्भो बहुव्रीहिः ।

—१४ **परमकारणेति** । परमकारणस्यासाधारणधर्मभूतं यदमृतत्वं तत्प्राप्तिः परमकारणसाम्यापत्तिस्तद्धेतुभूत इत्यर्थः ।

—१७ **अतिपतितेति** । आगमव्यतिरिक्तसकलेतरप्रमाणाविषय इत्यर्थः ।

—२१ **प्रधानेति** । अथ परा (मु. १।१।५) इत्यादीनि वाक्यानि प्रधानस्वरूपप्रतिपादकानि । अथ खलु क्रतुमयः (छा. ३।१४।१) इत्यादीनि वाक्यानि क्षेत्रज्ञस्वरूपप्रतिपादकानि । य एषोक्षिणि (छा. ४।१५।१) इत्यादीनि वाक्यान्यन्तर्भूतवस्तुविशेषस्वरूपप्रतिपादकानि । अन्तर्भूतवस्तुविशेषश्च प्रतिबिम्बादिः ।

२३४–६–८ **अथ खल्विति** । क्रतुशब्दस्योपासनमर्थः । अयं पुरुषः क्रतुमयः क्रतुप्रधान उपासनप्रधानः । यस्मादिह लोके पुरुषो यथोपासनस्तथैवेतः प्रेत्यामुष्मिँल्लोके भवति । तं यथा यथोपासते तथैव भवति (मुद्ग० ख. ३) इति श्रुत्यन्तरात् । तस्मात्स पुरुषः क्रतुं ब्रह्मोपासनं कुर्वीत । उपास्यश्च मनोमयो निर्मलीकृतमनोमात्रग्राह्यः । श्रुतौ हि ग्राह्यग्राहकत्वरूपसंबन्धविशेषाभिप्रायेण मनोमय इत्युक्तम् । प्राणः शरीरं यस्य स प्राणशरीरः । जगति सर्वेषां प्राणानां धारकः । भारूप आदित्यादिवद्भास्वररूप इत्यर्थः ।

२३४-१३-४ **न च सर्वमिति** । सर्वं खल्विदं ब्रह्मेति पूर्ववाक्येन ब्रह्मणि प्रतिपादिते तादृशब्रह्मणः किं कर्तव्यमित्याकाङ्क्षायां तस्य प्रकृतस्य ब्रह्मण एव स क्रतुं कुर्वीतेति वाक्य उपास्यत्वेन संबन्धं कृत्वाग्रे तदेव मनोमयत्वादिगुणानां विशेष्यं स्यादिति शङ्काशयः ।

—१५ परिहरति-**शान्त इति** । श्रुतौ हि सर्वं खल्वित्यादिवाक्योत्तरं शान्त उपासीतेति पठ्यते । शान्तिविशिष्टः सन्नुपासनां कुर्यादिति तदर्थः । सा च शान्तिः सर्वस्य ब्रह्मात्मकत्वदृष्टिं विना दुर्लभेति शान्त्युत्पत्तये ब्रह्मात्मकत्वोपदेशः पूर्वं प्रतिपादितः । तथा च तस्यान्यार्थतया निराकाङ्क्षत्वेन न तस्य ब्रह्मणः स क्रतुमित्यत्रोपास्यत्वेन संबन्धो नापि मनोमय इत्यादौ विशेष्यत्वेन संबन्ध इति भावः ।

—१९ परिहरति-**स्ववाक्योपात्तेनेति** ।

२३५-१ **मनोमय इति** । एतच्च स क्रतुं कुर्वीतेत्यत्रोपास्यप्रदर्शनार्थमेव निर्दिष्टं न त्वन्यार्थम् । संनिहितत्वात् । स क्रतुमित्यत्र कस्योपासनं कार्यमित्याकाङ्क्षा । मनोमय इत्यत्र च तादृशमनोमयेन किं कर्तव्यमित्याकाङ्क्षा । मनोमयादिपदानां षष्ठ्यन्तत्वेन विपरिणामे चैतदाकाङ्क्षाद्वयमपि निवर्तत इति तथैव संबन्धो युक्तो न तु निराकाङ्क्षस्य वाक्यान्तरस्थस्य ब्रह्मणः क्रतुं कुर्वीतेत्यत्र संबन्धः । तथा च मनोमयस्य भारूपस्य प्राणशरीरस्य क्रतुमुपासनां कुर्वीतेत्येवार्थो न तु पूर्ववाक्यनिर्दिष्टस्य ब्रह्मण उपासनां कुर्वीतेति ।

—४ **पूजार्थमिति** । जीवस्य महत्त्वप्रदर्शनार्थमित्यर्थः ।

—१२ **हृदेति** । हृदिति भक्तिरुच्यते । मनीषेति धृतिः । अभिक्लृप्तो ग्राह्यः ।

२३६-१ **अप्राण इति** । प्राणशरीर इत्यत्र परमात्मनः प्राणेन सहाधाराधेयभावसंबन्धो नियन्तृनियाम्यत्वरूपसंबन्धश्च विधीयते । अप्राण इत्यत्र परमात्मनः प्राणेन सहोपकरणोपकरणित्वरूपसंबन्धो निषिध्यते । तथा मनोमय इत्यत्र परमात्मनो मनसा सह ग्राह्यग्राहकभावसंबन्धो विधीयते । अमना इत्यत्रोपकरणोपकरणित्वरूपसंबन्धो निषिध्यते । यथा जीवस्य प्राणमनसी साधनभूते न तथा परमात्मन इत्यर्थः ।

—३ **अथ वा सर्वं खल्विति** । इदमेव सूत्रकृतोभिप्रेतम् । पूर्वव्याख्याने तु सूत्रस्थसर्वशब्दस्य प्रसिद्धोपदेशादिति हेतुघटकप्रसिद्धपदार्थान्वयेन सूत्रे प्रतिज्ञाप्रतिपादकपदाभाव इत्यरुचिः । अस्मिन्व्याख्याने तु सूत्रस्थं सर्वत्रेति पदमेव प्रतिज्ञापरमिति बोध्यम् । जायत इति जम् । लीयत इति लम् । अनितीत्यन् । जनधातोर्लीधातोश्च डप्रत्ययः । अन्धातोः क्विप् । इदं सर्वं जगत्तस्माद्ब्रह्मणो जायते तत्रैव लीयते तेनैवानितीत्यतः सर्वात्मकं ब्रह्मेति शान्तः सन्नुपासीतेति श्रुत्यर्थः ।

२३६-६ गुणोपादानार्थः । गुणविधानार्थः ।

उपादेयाः । विधेयाः । यथाग्निहोत्रं जुहोतीति होमे विहिते दध्ना जुहोतीत्यत्र दध्नो होमसाधनत्वमात्रं विधेयं जुहोतीत्यनुवादस्तद्वत् ।

—११ ब्रह्मादीति । ब्रह्मशब्देनात्र चतुर्मुखस्य जीवविशेषस्य ग्रहणम् ।

—१४ समस्तहेयेति । समस्ताः सकला ये हेयास्त्याज्या जरामरणादयो धर्मास्तेषामाश्रयभूतं यच्चतुर्मुखादि सर्वं जगत्तत्स्वरूपत्वं परब्रह्मणो न संभवति । तस्य सर्वज्ञत्वेनेदं हेयमिति ज्ञानसत्त्वात् । सर्वशक्तित्वेन तन्निवारणे शक्तत्वाच्च ।

—१६ सविशेषण इति । यथा परमात्मेत्यत्र जीवव्यावृत्त्यर्थमात्मशब्दस्य परमेति विशेषणं तथा परं ब्रह्मेत्यत्रापि जीवव्यावृत्त्यर्थं ब्रह्मशब्दस्य परमिति विशेषणं दृश्यते । तथा च ब्रह्मशब्दस्य जीववाचित्वमप्यस्तीति सिद्धम् ।

—१७ बृहत्त्वं चेति । बृंहणाद्ब्रह्मेति ब्रह्मशब्दस्यावयवार्थोपि जीवे संभवतीत्याशयः ।

—१८ अविदुष इति । अज्ञानिनो जीवस्य यत्कर्म तन्निमित्तका एव जगज्जन्मस्थितिलयाः । जीवकृतकर्मानुरोधेनैव हीश्वरेण जगतो जन्मस्थितिलयाः क्रियन्ते । तथा च सर्वं खल्विदं ब्रह्मेत्यत्र तज्जलानिति हेतुर्निर्दिष्टो न विरुध्यते । तथा च जन्मादिहेतुत्वं बद्धस्य ब्रह्मत्वं तु शुद्धस्येति पूर्वपक्ष्याशयः ।

२३७-१ तदात्मतयेति । तस्य जगतो य आत्मा तत्स्वरूपेणेत्यर्थः ।

२३८-११-२ जगज्जन्मेति । जगज्जन्मस्थितिप्रलयकारणत्वनिमित्तमिति पाठे जगज्जन्मस्थितिप्रलयकारणत्वं निमित्तं यस्येति जगत्तादात्म्यविशेषणम् । जीवस्य यज्जगज्जन्मस्थितिप्रलयकारणत्वं तन्मूलकं जीवस्य जगत्तादात्म्यं न संभवति । जीवस्य जगत्कारणत्वाभावादित्यर्थः । जगद्व्यापारेति सूत्रार्थः प्रागुक्तः (विवृति-पृ. ७२ प. २२) ।

—१३ जीवकर्मेति । जीवकर्म निमित्तं येषां तत्त्वादित्यर्थः । जगज्जन्मस्थितिलयानां जीवकर्ममूलकत्वादिति यावत् ।

—१४ तत्कर्मेति । यद्यपि जीवकृतं कर्म जगतः कारणं तथापि न तत्कर्तृ । नाप्युपादानम् । किं तु जगद्वैषम्यमात्रहेतुः । कर्ता त्वीश्वर एव । उपादानमपि स एव । किं च जगद्वैषम्यमात्रहेतुत्वमपि जीवकृतकर्मणो न जीवस्य । यथा देवदत्तकृतं चक्रं गृहीत्वा तत्सहायेन यज्ञदत्तेन घटे कृतेपि न तादृशघटकारणत्वं देवदत्तस्य तद्वत् । तथा च न जीवस्य जगत्कारणत्वकृतं तादात्म्यमस्तीति भावः ॥१॥

२३९-४ मनसैकेनेति । मनोमात्रग्राह्य इत्यर्थः । मनोमय इत्यवधारणगर्भम् । यथाऽभक्षो वायुभक्ष इत्यत्राप एव भक्षयति वायुमेव भक्षयतीति गम्यते तद्वत् ।

२३९–५ साधनसप्तकेति । इदं प्रागुक्तम् (श्रीभाष्य–पृ. ११ प. १४) ।

—७ मलिनेति । यत्र हेयार्हत्वं तत्र मलिनमनोग्राह्यत्वमिति हि व्याप्तिः । परमात्मनि च मनोमय इत्यनेन परिशुद्धमनोग्राह्यत्वस्य बोधनेन मलिनमनोग्राह्यत्वाभावात्तद्व्याप्यभूतस्य हेयार्हत्वस्याप्यभावः सिध्यतीति बोध्यम् ।

—९ आधेयमिति । आधेयमाश्रितम् । विधेयं नियाम्यम् । शेषभूतमङ्गम् ।

—११ भास्वररूप इति । रूपशब्दो हि धर्मवाची । भाशब्दो दीप्तिपरः । दीप्तिधर्मकत्वं विग्रहद्वारकम् (श्रु.) ।

—१३ सूक्ष्मेति । सूक्ष्मत्वं व्याप्यर्हत्वम् । स्वच्छत्वं निर्मलत्वम् ।

—१८ परिशुद्धा इति । न तु जीवस्येव प्राकृताः । सत्यकामत्वानुगुण्यादिति भावः ।

२४०–३ भुक्ता ब्राह्मणा इति । भुक्ता इत्यत्र व्यत्ययेन कर्तरि क्तप्रत्ययः । भुक्तमस्ति येषामिति भावार्थकक्तप्रत्ययान्तादर्शआदिभ्योच् (पा. सू. ५।२।१२७) इति पाणिनिसूत्रेणाच्प्रत्यये तु भुक्तशब्दस्यार्शआदिगणे पाठकल्पने गौरवम् ।

—४ अवाकीति । वचेर्भावे घञ् । उक्तिरित्यर्थः । ततो नञा समासे मत्वर्थीय इन्प्रत्ययः । इन्प्रत्ययान्तेन नञ्तत्पुरुषो वा ॥ २ ॥

—११ बद्धमुक्तेति । यथा बद्धस्य निग्राह्यस्य निग्राहकेण परमात्मना सह स्वरूपैक्यं न संभवति तथानुग्राह्यस्य मुक्तस्याप्यनुग्राहकेण परमात्मना सह स्वरूपैक्यं न संभवतीति भावः ॥ ३ ॥

—१५ एतमिति । इतोऽस्माच्छरीरात्प्रेत्यैतं परमात्मानमभिसंभवितास्मि प्राप्तास्मीत्युपासकेनानुसंधानं कर्तव्यमिति श्रुत्यर्थः । तथा चोपास्यस्य ब्रह्मणः प्राप्तिकर्मत्वेन व्यपदेशादुपासकस्य जीवस्य प्राप्तिकर्तृत्वेन व्यपदेशाच्च जीवादन्यदेवेदं परं ब्रह्मेति सूत्रार्थः ॥ ४ ॥

—२० एष म इति । मदीये हृदय एष आत्मोपासनार्थमवस्थित इत्यनुसंधानं कर्तव्यमिति भावः । अत्रोपासकः शारीरो म इति षष्ठ्या निर्दिष्टः । उपास्यस्त्वात्मेति प्रथमया निर्दिष्टः । अयमेव शब्दविशेषः । विशेषत्वं चासमानविभक्त्यन्तत्वेन बोध्यम् ।

२४१–२ व्रीहिर्वेति । अन्तरात्मन्निति सप्तम्यन्तं लुप्तविभक्तिकम् । व्रीह्यादिवत्सूक्ष्मोन्तरात्मनि जीवे विद्यमानः शुष्केन्धनानलवत्प्रकाशमानो हिरण्मयः पुरुष इत्यर्थः ॥ ५ ॥

—९–१३ सर्वस्येति । सर्वस्य भूतजातस्य हृदये सर्वं मत्संकल्पेन नियच्छन्नहमात्मतया संनिविष्टः । मत्तो मत्सकाशादेव सर्वेषां स्मृतिर्ज्ञानमपोहनं

च वर्तते । पूर्वानुभूतविषयकमनुभवसंस्कारमात्रजं ज्ञानं स्मृतिः । इन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयो ज्ञानम् । ज्ञाननिवृत्तिर्वितर्को वापोहनम् । यो मामिति । असंमूढो मोहरहितः । ईश्वर इति । देहेन्द्रियावस्थप्रकृत्याख्यं यन्त्रमारूढानि सर्वभूतानि स्वकीयया सत्त्वादिगुणमय्या मायया भ्रामयन्गुणानुगुणं प्रवर्तयन्नीश्वरः सर्वनियमनशीलो वासुदेवः सर्वभूतानां हृद्देशे तिष्ठतीत्यर्थः ॥ ६ ॥

२४१-१६ अर्भकौकस्त्वादिति । अर्भकशब्दोल्पवाची । ओकःशब्दः स्थानवाची । व्यपदेशो व्यवहारः । निचाय्यो द्रष्टव्यः । सर्वं खल्विदमित्यत्र निर्दिष्टो न परमात्मा । अपि तु जीव एव । तस्य हृदयरूपाल्पस्थानकथनादणीयानित्यणीयःशब्देनाणीयस्त्वव्यवहाराच्चेति चेन्न । एवंरूपेण परमात्मन एवात्रोपास्यत्वात् । यथा महतोपि व्योम्नः सूच्यादिष्वल्पत्वानुसंधानं तद्वदिति सूत्रार्थः ।

२४२-२ सर्वगतमिति । सर्वेष्वन्तः प्रविश्यावस्थितम् । धीराः प्रज्ञाशालिनो भूतोपादानतया यत्पश्यन्तीति श्रुत्यर्थः ।

—७ स्वाभाविकं महत्त्वमिति । एतच्च महत्त्वं जीवे न संभवतीति जीवग्रहणं न युक्तम् । यद्यपि परमात्मग्रहणे तस्याल्पत्वं न संभवति तथाप्यल्पत्वप्रतिपादकश्रुतौ हृदयशब्दसंनिधानेनाल्पत्वस्यौपाधिकत्वसूचनान्न दोष इत्याशयः ।

२४३-९ यस्य स्यादिति । उक्तप्रकारेण यस्योपासकस्याद्धा निश्चयोस्ति तस्य प्राप्तौ विचिकित्सा संशयो नास्तीत्यर्थः (वि. दी.) ॥ ७ ॥

—१२ संभोगेति । वैशेष्यं विशेषः । स्वार्थे ष्यञ् ।

—१८ तयोरिति । तयोर्जीवेश्वरयोर्मध्येन्यतरो जीवः स्वादु परिपक्वं पिप्पलं कर्मफलं भुङ्क्ते । अन्यः परमात्मा त्वभुञ्जान एव प्रकाशत इत्यर्थः ॥ ८ ॥ (१)

२४४-१ अत्तेति । ब्रह्मक्षत्रौदनस्यात्ता परमात्मा । ब्रह्मक्षत्रशब्देन चराचरस्य कृत्स्नस्य जगतो ग्रहणात् । मृत्यूपसेचनो ह्योदनो न ब्रह्मक्षत्रमात्रम् । अपि तु चराचरात्मकं कृत्स्नं जगदेव (वे. दी.) ।

—३ यस्य ब्रह्मेति । ब्रह्मक्षत्राख्यवर्णद्वयोपलक्षितकृत्स्नचराचरात्मकमिदं जगद्यस्यौदनो भवति विनाश्यं भवति यस्य मृत्युरुपसेचनं विनाशसाधनं भवति स निखिलचराचरसंहर्ता परमात्मा यत्र यस्मिन्प्रकारे स्थितो यत्प्रकारविशिष्टस्तत्प्रकारमित्थमिति को वेदेति सिद्धान्ते श्रुत्यर्थः । उपसेचनत्वं नाम स्वयमद्यमानत्वे सत्यन्यस्यादनहेतुत्वम् । यथा लवणादि ।

—७ तत्संभवादिति । ब्रह्मक्षत्रादिप्राणिनां स्त्रीपुरुषोभयरूपाणां परस्परभोग्यत्वम् । जीवस्य च न मृत्युवश्यत्वम् । तस्य नित्यत्वात् । किंतु शरीरस्य । तदपि जीवानुरोधेनैवेति मृत्युर्जीवस्य विधेयः । अबाधक इति यावत् । तथा च

लक्षणयौदनशब्दस्य भोग्यपरत्वं न तु विनाश्यपरत्वमुपसेचनपदस्य च विधेयपरत्वं न तु विनाशसाधनपरत्वमिति पूर्वपक्ष्याशयः ।

२४४–१२ **सोध्वन इति** । स समीचीनविज्ञानमनःशाली संसाराध्वपारभूतं परमात्मस्वरूपं प्राप्नोतीत्यर्थः । तथा चैतत्प्रकरणानुरोधात्पूर्वनिर्दिष्टोक्ता परमात्मैवेत्यत्तृत्वं संहर्तृत्वमेव न तु भोक्तृत्वमिति भावः ।

—१३ **तथा च मृत्युरिति** । मृत्यूपसेचनानुरोधेनाप्यत्तृत्वं संहर्तृत्वमेव ग्राह्यं न तु भोक्तृत्वम् । स्त्रीपुरुषयोः परस्परभोग्यत्वे मृत्योः सहायत्वाभावात् । तथा च यस्य ब्रह्म, मृत्युर्यस्येति वाक्यद्वयस्य परस्परानुगुण्येनैवार्थयोजना युक्तेति भावः । यद्यप्युपसेचनपदस्य विनाशसाधनपरत्वे विधेयपरत्वे वा लक्षणारूपो दोषस्तुल्य एव तथापि विशेषाकारेण लक्षणासंभवे साधारणाकारेण लक्षणा न युक्ता । न ह्यग्निर्माणवक इत्युक्तेग्निशब्दो द्रव्यत्वाभिप्रायेण वर्ण्यते किं तु द्रव्यत्वव्याप्यतेजस्त्वाभिप्रायेण । तद्वदत्र मृत्योरुपसेचनत्वं विनाशसाधनत्वरूपविशेषाकारेणैव न त्वबाधकत्वरूपसामान्याकारेणेति बोध्यम् ।

२४५–१ **तस्मादिति** । सोध्वन इत्यादिवाक्ये विष्णोः श्रूयमाणत्वान्मृत्यूपसेचनसामर्थ्यसिद्धचराचरादनीयत्वाच्च कृत्स्नजगदुपसंहर्तृत्वरूपमेवेदं भोक्तृत्वमिति नेदं कर्मनिमित्तम् । अतः परमात्मैवात्तेत्यर्थः (श्रु.) ॥ ९ ॥

—५–७ **महान्तं विभुम्** । महावैभवशालिनम् । **प्रवचनेन** । मननेन । **मेधया** । तीक्ष्णबुद्ध्या । तत्कृतनिदिध्यासनेनेति यावत् । **श्रुतेन** । श्रवणेन । एष परमात्मा यं साधकं प्रार्थयते तेन लभ्यः । प्रार्थनीयपुंसा लभ्यः । तत्प्रार्थनीयत्वं च तत्प्रियतमस्य पुंसः । तत्प्रियतमत्वं च तत्प्रीतिमत एव । ततश्च भगवद्विषयिण्युपासकस्य प्रीतिर्भगवत उपासके प्रीतिमुत्पाद्य तत्प्राप्तिहेतुर्भवति । तस्योपासकस्यैष आत्मा परमात्मा स्वरूपं प्रकाशयति स्वात्मानुभवं प्रयच्छतीत्यर्थः ।

—९ **क इत्थेति** । तथा च नायमात्मेत्यादिना पूर्वनिर्दिष्टस्य परमात्मनो दुरवबोधत्वस्यैव यस्य ब्रह्म च क्षत्रं चेति प्रकृतविषयवाक्ये क इत्थेत्यनेन प्रत्यभिज्ञानात्सर्वमिदमेकमेव प्रकरणमिति प्रकरणभेदो न शङ्कनीय इति भावः ॥ १० ॥

—१३ **ऋतमिति** । ऋतमवश्यंभावि कर्मफलमनुभवन्तौ सुकृतस्य लोके सुकृतसाध्यलोकवर्तिनौ गुहां प्रविष्टौ हृदयगुहावर्तिनौ परार्ध उत्कृष्टे परमाकाशे वर्तमानावज्ञमसर्वज्ञरूपतया छायातपशब्दनिर्दिष्टौ जीवेश्वरौ त्रिणाचिकेतास्त्रिःकृत्वो नाचिकेतोग्निश्चितो यैस्तादृशाः पञ्चाग्नयः पञ्चाग्निपरिशुश्रूषापरिशुद्धान्तःकरणा ब्रह्मविदश्च वदन्तीति सिद्धान्तेर्थः । शङ्काकृता त्वस्यां श्रुतौ प्राणो जीवश्चेत्येतद्द्वयं बुद्धिर्जीवश्चेत्येतद्द्वयं वा निर्दिष्टमिति गृहीतम् ।

—१९ **यथाकथंचिदिति** । उपकरणत्वेनान्वय इत्यर्थः । असिश्छिनत्तीतिवत्करणे कर्तृत्वारोपात्पिबन्ताविति युक्तिः ।

२४६-८ तं दुर्दर्शमिति । दुर्दर्शं द्रष्टुमशक्यं गूढं कर्मरूपाविद्यातिरोहितं सर्वभूतानुप्रविष्टं गुहाहितं हृदयगुहावर्तिनं गह्वरेष्टमात्मान्तर्यामिणं पुराणमनादिमध्यात्मयोगाधिगमेन विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानमध्यात्मयोगस्तेन योयमधिगमो जीवात्मज्ञानं जीवात्मज्ञानस्य परमात्मज्ञानहेतुत्वात्तेन हेतुना देवं परमात्मानं मत्वा ध्यात्वा विषयलाभालाभप्रयुक्तहर्षशोकौ जहातीत्यर्थः (वि. दी.) ।

—१३ भूतेभिरिति । छान्दस ऐसादेशाभावः ।

—१८ छत्रिण इति । छत्रिष्वच्छत्रिषु च गच्छत्सु तत्र केषांचिदच्छत्रित्वेपि समुदाये लक्षणया छत्रिशब्दः प्रयुज्यते तद्वदत्र परमेश्वरस्य कर्मफलभोक्तृत्वाभावेपि लक्षणया जीवेश्वरयोरुभयोः पिबन्ताविति प्रयुक्तमिति भावः ।

—१९ यद्वेति । जीवः कर्मफलं पिबति परमात्मा तु तं पाययति । भोक्ता जीवः प्रयोज्यः । भोजयिता परमात्मा प्रयोजकः । अस्मिन्पक्षे छत्रिण इतिवल्लक्षणा नाश्रयणीयेति लाघवम् । किं च जीवेश्वरग्रहण एव तयोरुभयोश्चेतनत्वेन पिबन्ताविति निर्देशः स्वरसतः संगच्छते न तु प्राणजीवग्रहणे बुद्धिजीवग्रहणे वेति बोध्यम् ॥ ११ ॥

—२१ विशेषणाच्चेति । अस्मिन्प्रकरणे परमात्मोपास्यत्वेन प्राप्यत्वेन च विशिष्यते तथा जीव उपासकत्वेन प्रापकत्वेन च विशिष्यत इति तयोरेव जीवपरमात्मनोर्ऋतं पिबन्तावित्यत्र ग्रहणं युक्तमिति सूत्रार्थः ।

२४७-४ ब्रह्मात्मकत्वेनेति । ब्रह्मात्मा यस्य तत्त्वेनावगम्य निचाय्य ब्रह्मात्मकं स्वात्मानं साक्षात्कृत्येमां संसाररूपानर्थशान्तिमेतीत्यर्थः ।

—५ यः सेतुरिति । यः परमात्मेज्ञानानां यज्वनां सेतुराधारभूतः कर्मफलप्रदो यदक्षरं निर्विकारं परं ब्रह्म यत्संसारसागरं तितीर्षतां निर्भयं दृढतरं तीरं तं नाचिकेतं नाचिकेतस्य कर्मणः प्राप्यं परमात्मानमुपासितुं शकेमहि शक्ताः स्येत्यर्थः (वि. दी.) ।

—११ विज्ञानेति । मनःप्रग्रहवान्मनोरूपरशनावान्विज्ञानसारथिः समीचीनविज्ञानशाल्यध्वनः पारं संसाराध्वपारभूतं विष्णोः परमं पदं परमात्मस्वरूपं प्राप्नोतीत्यर्थः ।

—१३ इहापि । ऋतं पिबन्तावित्यत्रापि । तथा च सूत्रे विशेषणशब्देन च्छायातत्त्वरूपविशेषणमपि विवक्षितमिति भावः ।

—१६ येयमिति । मनुष्ये प्रेते मृते सति तदुत्तरं सोस्तीत्येके वदन्ति नास्तीत्येके वदन्तीत्येवं या विचिकित्सा संशयो भवत्यतस्तज्ज्ञानं भाव्यमिति नचिकेतसा मृत्युं प्रति तृतीयवरः प्रार्थितः । तथा चोपक्रमस्य जीवपरत्वादस्मिन्प्रकरणे जीवपरमात्मनोरुभयोर्विशेष्यत्वमयुक्तमिति शङ्काशयः ।

२४७-२१ **सर्ववेदसदक्षिणेति** । सर्वस्वदक्षिणेत्यर्थः । नचिकेतसः पिता वाजश्रवसनामर्षिर्यज्ञे सर्वस्वं ददौ । तत्र चायोग्यगोप्रदानेन क्रतुवैगुण्यं स्यादिति तन्निवृत्तये मत्प्रदानेनापि साद्गुण्यं स्याच्चेऋत्विज्याशयेन कस्मै मां दास्यसीति पुत्रेणासकृत्पिता पृष्टः । असकृत्प्रश्नेन क्रुद्धः पिता मृत्यवे ददामीत्युक्तवान् । तद्वचनसत्यत्वाय यमसदनं प्रति गतः पुत्रस्तत्र यमस्य स्थित्यभावेन तत्प्रत्यागमनपर्यन्तं त्रिरात्रमुपवासं कृतवान् । प्रत्यागतो यमोतिथेस्त्रिरात्रोपोषणं श्रुत्वा तन्मनःप्रसन्नतायै तस्मै त्रीन्वरान्ददौ । तत्र प्रथमेन वरेण पितुः प्रसादो वृतः । एतत्सर्वं देहस्यैवात्मत्वे न संभवतीति भावः ।

२४८-१५ **न प्रेत्येति** । प्रेत्य चरमदेहवियोगं प्राप्य मोक्षदशायां संज्ञा देहात्मैक्यज्ञानं नास्ति । तदानीं स्वाभाविकापरिच्छिन्नज्ञानस्य संकोचाभावात् । समित्येकीकारे । ज्ञाधातोर्ज्ञानमर्थः । ततश्च भूतसंघातेनैकीकृत्य ज्ञानं संज्ञाशब्दार्थः । मोक्षपर्यन्तं देहात्मभ्रमोनुवर्तत इति तात्पर्यम् ।

२४९-४ **त्रय्यन्तनिष्णाताः** । वेदान्तनिष्णाताः (रामानुजीयाः) ।

—१६ **विशेषान्** । प्रणवाग्निविद्यादीन् ॥ १२ ॥ (२)

—१९ **अन्तर इति** । अक्ष्यन्तरः पुरुषः परमात्मा संयद्वामत्वादीनां गुणानामत्रैवोपपत्तेरिति सूत्रार्थः (वे. दी.) ।

—२०-१ **य एष इति** । योगिभिर्योन्तर्वर्तिपुरुषो दृश्यतेऽयमेवात्मा नियन्तेति यावत् । अमृतत्वं निरतिशयभोग्यत्वम् । अभयत्वं दुःखासंभिन्नत्वम् । ब्रह्मत्वं निरतिशयबृहत्त्वम् (वि. दी.) । इत्युपकोशलं प्रत्याचार्य उक्तवानिति सिद्धान्ते श्रुत्यर्थः ।

२५०-३ **प्रसिद्धवदिति** । श्रुतौ य एष इति पदाभ्यां प्रसिद्धवन्निर्देशः क्रियते । अमृतादिशब्दाश्च प्रशंसापरतया कथंचिन्नेया इति पूर्वपक्ष्याशयः ।

—५ **संनिधानादिति** । जीवस्य देहसंनिधेश्चक्षुष्यवगमादित्यर्थः ।

—७ **रश्मिभिरिति** । एष आदित्यपुरुषो रश्मिद्वारा चक्षुषि प्रतिष्ठित इत्यर्थः ।

—११ **एतं संयद्वाम इति** । संयन्ति संगतानि वामानि वरणीयानि प्रार्थनीयानि यस्मिन्स संयद्वामः । सर्वकल्याणगुणाश्रयत्वं सत्यसंकल्पत्वं वा संयद्वामत्वम् । स्वाश्रितेषु शोभनप्रापकत्वं वामनीत्वम् । सर्वलोकव्याप्तदीप्तिमद्विग्रहयुक्तत्वं भामनीत्वम् । तथा चैतादृशानेकगुणविरोधेन नास्य वाक्यस्य केवलप्रसिद्ध्यनुरोधाज्जीवपरता वक्तुं शक्या । संयद्वामत्वाद्यनेकगुणविरोधात् । अमृतादिशब्दानां प्रशंसार्थकत्वे लक्षणारूपदोषप्रसङ्गश्च । प्रशंसार्थकत्वे चैकेनैव शब्देन निर्वाह इतरशब्दवैयर्थ्यापत्तिश्च ॥ १३ ॥

२५०-१६ **स्थानादीति**। स्थानं स्थितिः। आदिशब्देन नियमनधारकत्वादि संग्रहः। परमात्मन एव चक्षुषि स्थानादीनां व्यपदेशादयं परमात्मेति सूत्रार्थः।

—१७ **यश्चक्षुषीति**। यश्चक्षुषि तिष्ठंश्चक्षुषोन्तरो यं चक्षुर्न वेद यस्य चक्षु शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः (बृ. ३।७।१८) इति श्रुतौ तिष्ठन्नित्यनेन स्थितिर्यमयतीत्यनेन नियमनं शरीरशब्देन धारणं च प्रतिपाद्यते ॥ १४ ॥

—२३ **कं ब्रह्मेति**। कमित्यनेन सुखमभिधीयते। खमित्यनेनाकाशवाचिनाऽपरिच्छिन्नत्वमभिधीयते। तयोरन्योन्यविशेष्यविशेषणभावेनापरिच्छिन्नसुख ब्रह्मेति श्रुत्यर्थः।

२५१-३ **एवकारादिति**। अन्तर उपपत्तेरिति सूत्रोक्त उपपत्तेरिति हेतुर्यथान्यत्रासंभवरूपव्यतिरेकोक्तिसापेक्षः। अन्यथान्यत्रासंभवस्यासंदिग्धत्वाभावेनोपपत्तेर्हेतुत्वायोगात्। यथा च स्थानादिव्यपदेशाच्चेति सूत्रोक्तो हेतुः प्रतिबिम्बाद्यनवस्थितिरूपव्यतिरेकोक्तिसापेक्षः। चक्षुषि प्रतिबिम्बाद्यवस्थितौ स्थानादिव्यपदेशस्याहेतुत्वात्। अत एवानवस्थितेरसंभवाच्च नेतर इत्यग्रे सूत्रकाररुक्तम् तथायं सुखविशिष्टाभिधानरूपो हेतुर्न व्यतिरेकोक्तिसापेक्षः। ब्रह्मणोन्यस्य सुख विशिष्टत्वेनाप्रकृतत्वात्।

—९ **सर्वायुरिति**। सर्वमायुरेति नास्यापरपुरुषाः क्षीयन्त इति श्रुतौ सर्वायुःप्राप्तिः संतत्यविच्छेदश्चाग्निविद्यायाः फलत्वेन कथ्यते।

—११ **उभयत्रेति**। प्राणो ब्रह्मेत्युपक्रम एतद्ब्रह्मेत्युपसंहारे च ब्रह्मशब्देन मध्यपठिताग्निविद्याया ब्रह्मविद्याङ्गत्वं निश्चीयते।

—१४ **अथ हैनमिति**। अथशब्दः प्रकृतविषयत्वद्योतनार्थः। एनमित्यत्र च द्वितीयाटौस्स्वेनः (पा. सू. २।४।३४) इति पाणिनिसूत्रेणैनादेशः। स चान्वादेश एव विधीयते। अन्वादेशश्च प्रकृतस्यैव पुनः परामर्शः। तथा चैनमित्यस्य प्रकृतं श्रुतब्रह्मविद्यमुपकोसलमित्यर्थाद्ब्रह्मविद्याधिकृतस्यैवाग्निविद्योपदेश इत्यग्निविद्याया ब्रह्मविद्याङ्गत्वं सिध्यतीति भावः।

—२५२-१ **फलानुकीर्तनमिति**। सर्वायुःप्राप्तिसंतत्यविच्छेदरूपफलकथनं प्रशंसापरमित्याशयः।

—७ **ब्रह्मलोकं प्राप्नोतीति**। यद्यपि ब्रह्मप्राप्तिविरोधिपापनिवृत्तेर्ब्रह्मप्राप्तेश्च प्रधानभूतब्रह्मविद्याफलत्वमेव तथाप्यङ्गिफलेनाङ्गं स्तूयत इति द्रष्टव्यम्। यद्वा पापशब्दो ब्रह्मविद्योत्पत्तिप्रतिबन्धकपापपरः। लोकशब्दश्च ब्रह्मलोकप्राप्तिमार्गभूताग्निलोकपरो द्रष्टव्यः (वि. दी.)।

२५२—८ यावदायुरिति । तथा च न सर्वायुःप्राप्तेर्मोक्षविरोधित्वमिति बोध्यम् ।

२५३–२ अनाश्वासम् । आश्वासरहितम् । विषादयुक्तमिति यावत् ॥१५॥

—१७ यस्येहेति । यस्येह य एषोक्षिणीति श्रुतावक्ष्याधारतयाभिधानं रूपे तद्ब्रह्म कं ब्रह्मेत्यत्राभिहितमिति कथमवगम्यत इत्यन्वयः ।

—१८ यावता । प्रत्युत ॥ १६ ॥

२५५–९ श्रुतेति । श्रुतोपनिषत्कैरधिगतब्रह्मयाथात्म्यैर्ब्रह्मप्राप्तये या गतिरर्चिरादिकाधिगन्तव्यतयावगता श्रुत्यन्तरे तस्याश्चेहाक्षिपुरुषं श्रुतवतोधिगन्तव्यतयाभिधानादक्षिपुरुषः परमात्मेति सूत्रार्थः (वे. दी.) ।

—१०–१६ श्रुत्यन्तरेति । तद्य इत्थं विदुर्ये चेमेरण्ये श्रद्धा तप इत्युपासते तेर्चिषमभिसंभवन्ति (छा. ५।१०।१) । य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमित्युपासते तेर्चिषमेवाभिसंभवन्ति (बृ. ६।२।१५) । अग्निलोकमागच्छति (कौ. १।३) इत्यादिश्रुतयो द्रष्टव्याः । तेर्चिषमिति । अयमेवार्चिर्मार्गः । आपूर्यमाणपक्षः शुक्लपक्षः । एनानक्षिपुरुषोपासकान् । देवैर्मार्गदर्शकैर्नीयमानः पन्था देवपथः । ब्रह्मप्रापकः पन्था ब्रह्मपथः । एतेन मार्गेण प्रतिपद्यमाना इमं घोरं घटीयन्त्रवज्जननमरणाद्यावर्तकं मनुष्यादिशरीरोपलक्षितं संसारं पुनर्न प्रतिपद्यन्त इत्यर्थः ॥ १७ ॥

२५६–२ सर्वेन्द्रियकन्दभूते । हृदये ।

—३ रश्मिभिरिति । एष आदित्यो रश्मिद्वारास्मिन्नेत्रे स्थित इत्यर्थः । आदित्यो रश्मिद्वारा चाक्षुषोपकारक इति यावत् ।

—५ निरुपाधिकेति । अहेतुकेत्यर्थः । जीवस्यापि परमात्मोपासनेनामृतत्वादिधर्मदर्शनात्तद्व्यावृत्तय इदम् ॥ १८ ॥ (३)

—१४–६ यः पृथिव्यामिति । यः परमात्मा पृथिव्यां स्थितः पृथिव्या अन्तर्गतः पृथिव्यवेद्यः पृथिवीशरीरकः सन्यः परमात्मान्तः प्रविश्य प्रवृत्तिनिवृत्तिलक्षणनियमनं करोत्येषोन्तर्यामी तेमृत आत्मा निरुपाधिकामृतत्वशाल्यात्मेति सिद्धान्तेर्थः । यः पृथिव्यां तिष्ठन्योप्सु तिष्ठन्नित्यादिपर्यायोपदेशबाहुल्यं तु पृथिव्याद्येकैकवस्तुषु परिपूर्णत्वेन नियन्तृतया स्थितिज्ञापनार्थम् (वि.) ।

—२२ सर्वेषु वेदेष्विति । ननु यस्य वेदाः शरीरमिति नोपपद्यते । वेदस्य शब्दरूपस्य गुणत्वेन द्रव्यत्वाभावात् । शरीरत्वस्य द्रव्यत्वव्याप्यत्वात् । एवं यज्ञस्यापि क्रियारूपस्य शरीरत्वं नोपपद्यत इति चेन्न । वेदयज्ञशब्दयोस्तदभिमानिदेवताविशेषपरत्वात् ।

२५७-१ **यो विज्ञान इति** । काण्वशाखायां यो विज्ञाने तिष्ठन्निति पाठः । माध्यंदिनशाखायां तु तत्स्थान एव य आत्मनि तिष्ठन्निति पाठः ।

—१३ **तद्धर्मेति** । तस्य परमात्मनो धर्माः सर्वान्तरत्वसर्वाविदितत्वसर्वशरीरकत्वसर्वनियन्तृत्वसर्वात्मत्वामृतत्वादयो बोध्याः ।

२५८-३ **सच्च त्यच्चेति** । सच्छब्देन निर्विकारतया सततैकरूपश्चेतन उच्यते । त्यच्छब्देन पूर्वपूर्वावस्थात्यागविकारास्पदमचेतनमुच्यते । ब्रह्मैव चेतनाचेतननामरूपभाग्भवतीत्यर्थः (वि.) ।

—१५ **स्वभावत इति** । श्रुतौ द्रष्टेत्यत्र न चक्षुर्जन्यज्ञानवत्त्वं प्रतिपाद्यते । पश्यत्यचक्षुरिति श्रुतिविरोधात् । किं तु रूपसाक्षात्कारवत्त्वमेव द्रष्टृत्वम् । तथा श्रोतृत्वं शब्दसाक्षात्कारवत्त्वम् । मन्तृत्वं मन्तव्यविषयसाक्षात्कर्तृत्वम् । विज्ञातृत्वं निदिध्यासनविषयसाक्षात्कर्तृत्वम् ।

—२१ **नान्योतोस्तीति** । ननु जीवस्यान्यस्य द्रष्टुः सत्त्वेन कथमयं निषेध उपपद्यत इति चेन्न । अतो निरुपाधिकरूपादिसाक्षात्कारादिमतः परमात्मनः सकाशान्निरुपाधिकरूपादिसाक्षात्कारादिमानन्यो द्रष्टा नास्तीति तदर्थात् । अन्यशब्दस्य पूर्वनिर्दिष्टसमानान्यपरत्वात् ॥ १९ ॥

२५९-१४ **यथा स्मार्तमिति** । तथा च सूत्रे दृष्टान्तार्थमेव स्मार्तशब्दोपादानमिति बोध्यम् । एतेन प्रधानस्यान्तर्यामित्वनिरसनमत्राप्रासङ्गिकमित्यपास्तम् ॥ २० ॥

२६०-३ **यो विज्ञान इति** । अत्र विज्ञानशब्द आत्मपरः । समानप्रकरणे माध्यंदिनशाखायां विज्ञानशब्दस्थान आत्मशब्देन निर्देशदर्शनात् (वि.) ॥ २१ ॥ (४)

—९-११ **अथ परेति** । अत्र तच्छब्द इति ह स्म यद्ब्रह्मविद इति पूर्ववाक्योदितयच्छब्दप्रतिनिर्देशकः । अथ परा विद्या कथ्यते यया परविद्यया तदक्षरं ब्रह्माधिगम्यत आधिक्येन गम्यतेऽपरोक्षीक्रियते । अपरोक्षीकरणं च विवेकादिसाधनसप्तकजन्यं श्रवणजन्यज्ञानानन्तरभावि दर्शनसमानाकारं परज्ञानम् । अद्रेश्यमदृश्यम् । ज्ञानेन्द्रियाविषयम् । अग्राह्यं पाण्यादिकार्यहानोपादानाद्यविषयम् । अगोत्रं कुलरहितम् । अवर्णमपेतब्रह्मक्षत्रादिकम् । अचक्षुःश्रोत्रं ज्ञानेन्द्रियरहितम् । तत्प्रसिद्धम् । अपाणिपादं कर्मेन्द्रियरहितम् । नित्यं कालापरिच्छिन्नम् । विभुं देशापरिच्छिन्नम् । सर्वगतं सर्वेष्वन्तः प्रविश्यावस्थितम् । तत्र हेतुः सुसूक्ष्ममिति । उक्तविशेषणविशिष्टं यत्तदव्ययं धीराः प्रज्ञाशालिनो भूतयोनिं सर्वभूतोपादानतया पश्यन्तीति सिद्धान्ते श्रुत्यर्थः ।

२६०–१२ **अक्षरादिति**। अक्षरादव्याकृताद्यः परः समष्टिरूपः पुरुषस्तस्मादपि कारणत्वेन परः। प्रधानपुरुषयोस्तज्जन्यत्वात्। अत्राक्षरशब्दोऽश्नुत इति न क्षरतीति वा व्युत्पत्त्या स्वविकारव्यापके नामान्तराभिलापयोग्यक्षरणाभाववत्यव्याकृते वर्तते । न तु भूतयोन्यक्षरे । स्वस्य स्वस्मादेव परत्वासंभवादिति सिद्धान्ते श्रुत्यर्थः।

—१३ **किमिहेति** । अदृश्यत्वादिगुणकमक्षरं प्रकृतिः परस्मादक्षरात्परश्च पुरुषो जीवसमष्टिरूप इति भावः।

—१८ **परभूतादिति**। पूर्वपक्षी ह्यक्षरात्परत इति श्रुतौ परत इत्यक्षरादित्यस्य समानाधिकरणं विशेषणं न त्वक्षरादित्यस्य व्यधिकरणं विशेष्यमित्यभिप्रैति।

२६१–३ **यथोर्णनाभिरिति**। अयं चेतनाधिष्ठिताचेतनदृष्टान्तः। ऊर्णनाभिर्लूताख्यकीटविशेषः । यथा पृथिव्यामिति चेतनानधिष्ठिताचेतनदृष्टान्तः। यथा सत इति चेतनसंनिधिमात्रापेक्षाचेतनदृष्टान्तः । तथाक्षरादव्याकृतान्निखिलं जगत्संभवतीत्यर्थं पूर्वपक्षी मन्यते। सिद्धान्तिसंमतश्चतुर्थचरणार्थस्तु तथाक्षरान्निर्विकारात्परमात्मनः परस्परविलक्षणचेतनाचेतनात्मकं निखिलं जगत्संभवतीति।

—१५ **यः सर्वज्ञ इति** । सर्वज्ञः सर्वविषयकज्ञानवान्। सर्ववित्तद्वस्तुगतसर्वप्रकारज्ञानवान्। यस्य ब्रह्मणो ज्ञानमयं तपः । संकल्परूपज्ञानव्यतिरेकेण जगत्सृष्ट्युपयुक्तं कर्मान्तरं नास्ति। तस्मात्संकल्पेन सृष्ट्युन्मुखाद्ब्रह्मण एतदव्याकृताख्यं ब्रह्म साक्षाज्जायते। तद्द्वारा नामरूपमन्नं च जायत इत्यर्थः।

—१९ **परत्वेनेति**। पर इति प्रथमान्तपरशब्देनेत्यादिः ॥ २२ ॥

२६२–२१ **यमेवेति**। एष परमात्मा यं साधकं प्रार्थयते तेन लभ्यः। भगवद्विषयिण्युपासकस्य प्रीतिर्भगवत उपासके प्रीतिमुत्पाद्य तत्प्राप्तिहेतुर्भवतीत्यर्थः।

२६३–६ **विवेकाच्चेति**। उत्थितमिति शेषः।

—१८ **अन्नात्प्राण इति** । प्राणो मुख्यप्राणः । मनोन्तःकरणम्। सत्यं भोक्तृवर्गः। लोकाः स्वर्गादयः। कर्मसु कर्ममध्ये। अमृतममृतत्वसाधनम्। कर्ममध्ये मोक्षार्थं कर्मेति यावत्। एतत्सर्वमन्नादभिजायत इत्यर्थः।

२६४–३ **यः सर्वज्ञ इति**। यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इति श्रुत्येति भावः।

—९ **मन्त्रेष्विति**। कवयोतीन्द्रियार्थसाक्षात्कारसमर्था मन्त्रेषु वेदेषु यानि कर्माण्यग्निहोत्रादीन्यपश्यन्दृष्टवन्तस्तानि कर्माणि त्रेतायां गार्हपत्यादिवैतानिकाग्निषु बहुधा संततानि विहितानि। तानि कर्माणि हे सत्यकामाः स्वतः सत्यं परं ब्रह्मैव कामयमानाः फलाभिसंधिरहिताः सन्त आचरतेत्यर्थः।

२६४-१७-२६५-१० एकतरकर्मवैधुर्येपीति। एकस्यापि कर्मणो वैधुर्य इत्यर्थः। अपिरहितः पाठः साधुः। यस्याग्निहोत्रमदर्शमपौर्णमासमनाग्रयणमतिथिवर्जितं चाहुतमवैश्वदेवमश्रद्धयाऽविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति (मु. १। २।३) इति तत्र श्रुतिः। दर्शाख्यपौर्णमासाख्येष्टयननुष्ठाने नवान्नस्वीकारार्थं शरत्कालकर्तव्याग्रयणाख्येष्टिविशेषानुष्ठानेतिथिसत्कारोपासनहोमवैश्वदेवानानुष्ठाने श्रद्धावैधुर्येण यथाशास्त्रमननुष्ठाने वानुष्ठितमप्यग्निहोत्रकर्म तस्य सुकृतफलं सर्वं सप्तपुरुषपर्यन्तं नाशयतीति तदर्थः। प्लवा इति। षोडशर्त्विक्पत्नीयजमानरूपाष्टादशकर्त्राश्रितत्वेनोक्तमवरं फलाभिसंधिमत्त्वेनाश्रेष्ठं कर्म येषु यजमानेषु वर्तते ते यज्ञरूपा यज्ञप्रधानाः पुरुषा अदृढाः प्लवा जीर्णनौका इव संसारार्णवसंतरणासमर्थाः। एतत्कर्म श्रेयःसाधनमिति मत्वा ये हृष्यन्ति ते मूढा जरां मृत्युं च भूयो भूयो गच्छन्तीत्यर्थः। तपःश्रद्धे इति। तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्ति। सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मेति श्रुतिः। ये संन्यासिनः कृतश्रवणमनना वने स्थित्वोपरतकरणग्रामास्तपःशब्दितं ब्रह्म तदादरातिशयरूपां श्रद्धां च सेवन्ते तेवधूतपापाः सूर्यमण्डलं भित्त्वा यत्र परमात्मास्ते तत्र यान्तीत्यर्थः। परीक्ष्येति। परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिः। चितान्कर्मसंपाद्यांल्लोकान्परीक्ष्य मीमांसान्यायैर्निरूप्य ब्राह्मणोधीतसाङ्गरस्कवेदः। य इत्यध्याहार्यम्। स इत्युत्तरत्र श्रवणात्। अकृतो नित्यः पुरुषः कृतेन कर्मणा नास्ति न लभ्यत इति यो निर्वेदमायात्स तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्। समित्पाणिः। न रिक्तपाणिः। श्रोत्रियं श्रुतवेदान्तम्। ब्रह्मनिष्ठं ब्रह्मसाक्षात्कारवन्तम्। तदेतदिति। तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति। दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इत्यादिश्रुतिर्द्रष्टव्या॥ २३॥

२६६-८ रूपेति। अग्निर्मूर्धेत्यादिना समस्तस्य चिदचिदात्मकप्रपञ्चस्य भूतयोन्यक्षररूपत्वेनोपन्यासाच्चायमदृश्यत्वादिगुणकः परमात्मेति सूत्रार्थः (वे.)। सर्वभूतान्तरात्मसंबन्धितयोच्यमानमीदृशं रूपं परमात्मन एव संभवतीत्याशयः॥ २४॥ (५)

—१६-८ आत्मानमिति। उपमन्युसुतः प्राचीनशालनामा पुलुषसुतः सत्ययज्ञनामा भाल्लविसुत इन्द्रद्युम्ननामा शार्कराक्षिसुतो जननामाश्वतराश्वसुतो बुडिलनामा चैते पञ्चोद्दालकेन सहिताः केकयमश्वपतिमभ्येत्य प्रोचुर्हेश्वपते त्वमिमं वैश्वानरमात्मानं संप्रत्यधुनाध्येष्युपास्से तमेव नो ब्रूह्युपदिश नास्माकमन्नाग-

मनेन्यत्प्रयोजनमित्यर्थः । यस्त्वेतमिति । अभिविमानं सर्वात्माभिव्याप्ततया विगतमानं विश्वेषां नराणां नेतारमेतमात्मानं प्रादेशमात्रम् । द्युलोकादिप्रदेशसंबन्धिनी प्रादेशी । प्रादेशी मात्रा परिमाणं यस्य तं प्रादेशमात्रं द्युप्रभृतिप्रदेशपरिच्छिन्नं य उपास्त इति सिद्धान्तेर्थः ।

२६६-२२ अयमग्निरिति । यदिदमद्यते तदिदमन्नं येनाग्निना पच्यते सोयमग्निर्वैश्वानरः । तस्याग्नेरेष घोषः शब्दो भवति यं घोषं जीवः कर्णावपिधाय शृणोति । तत्र प्रासङ्गिकमिदमरिष्टलक्षणमुच्यते स जीवो यदोत्क्रमिष्यन्भवति तदा नैनं घोषं शृणोतीत्यर्थः ।

२६७-२ विश्वस्मा इति । विश्वस्मै भुवनाय विश्वभुवनोपकारार्थं वैश्वानरं महाभूततृतीयमह्नां केतुं दिवससूचकमग्निमादित्यमकृण्वन्नित्यर्थः ।

—५ वैश्वानरस्येति । वैश्वानरस्य देवताविशेषस्य सुमतौ शोभनायां बुद्धौ वयं स्याम तद्बुद्धिविषयीभूता भवेम । अस्मद्विषये तस्य शोभना बुद्धिरस्विति यावत् । स देवताविशेषोभितः श्रीर्यस्यैतादृशो भुवनानां राजास्तीत्यर्थः ।

—७ वैश्वानर इति । विश्वे च ते नराश्च विश्वानराः । स एव वैश्वानरः । सर्वेषामात्मेत्यर्थः ।

—९ वाक्योपक्रमेति । हृदयं गार्हपत्यो मनोन्वाहार्यपचन आस्यमाहवनीय इति वैश्वानरस्य हृदयादिस्थस्याग्नित्रयरूपत्वं काल्पनिकं चतुर्ष्वपि संभवति। अन्नादनरूपं फलमपि सर्वत्रोपपद्यते। किं ब्रह्मेत्युपक्रमस्थब्रह्मशब्दोपि न विशेषार्थसाधकः । अग्निशब्देन विरोधात् ।

—२३-२६८-३ न मे स्तेन इति । न मे स्तेनो जनपदे न कदर्यो न मद्यपः । नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतः । यक्ष्यमाणो ह वै भगवन्तोहमस्मीति श्रुतिः । हे भगवन्तो मे जनपदे मदीये देशे स्तेनश्चोरः कदर्यो दानशून्यो मद्यपः सत्यां योग्यतायामनाहिताग्निरविद्वान्स्वैरी परदारगन्ता चैते न सन्ति । स्वैरिणी पुंश्चली तु कुतः स्यात् । यतश्चोरादयो दुष्टा मदीये देशे न सन्यतो न तैर्दत्तं धनमुपजीवामीत्यतो मत्सकाशात्प्रतिग्रहो योग्य एव । अचिरेणैव कालेन यागं करिष्यामि तत्र च धनं दास्यामीति तावत्कालपर्यन्तमत्रैव वसन्त्वित्यश्वपतिनोक्तमित्यर्थः । अत्र ब्रह्मविदाप्यश्वपतिना स्तेनादिद्रव्यं प्रतिषिद्धमिति परिहृतम् । विहितं कर्म यज्ञादि च कृतमिति सूचितम् । वृत्तस्थतया । वृत्तं सद्वर्तनम् । तच्छीलतया । व्रतस्थतयेति क्वचित्पाठो दृश्यते ।

२६८-१२ स सर्वेष्विति । यो वैश्वानरमुपास्ते स सर्वलोकसर्वभूतसर्वात्मवर्ति ब्रह्मरूपमनुभवति । मूल एवाग्रे (श्रीभाष्य-पृ. २७३ प. ८) एतत्स्पष्टम् । यथेषीकायास्तृणविशेषस्य तूलमग्नौ प्रोतं प्रक्षिप्तं प्रदूयते सद्यो दह्यत

एवमस्य वैश्वानरोपासकस्य सर्वे पाप्मानः सर्वाणि पापानि प्रदूयन्ते दग्धानि भवन्तीत्यर्थः ॥ २५ ॥

२६८-१८ द्युप्रभृतीति । द्युलोको वैश्वानरस्य मूर्धा । आदित्यश्चक्षुः । वायुः प्राणः । आकाशो मध्यकायः । आपो मूत्रस्थानम् । पृथिवी पादाविति तत्र श्रुतो वर्णितम् ।

२६९-७ पद्भ्यामिति । व्यत्ययेन प्रथमार्थे तृतीया । प्रकृत्या चारुरितिवत्प्रकृत्यादित्वादभेदे वा ।

—१३ यस्याग्निरिति । इहाग्निशब्देन प्रसिद्धोऽग्निर्ग्राह्यः । न त्वग्निर्मूर्धेत्यत्रेव द्युलोकः । द्यौर्मूर्धेति पृथङ्निर्देशात् ।

—१९ विशेषप्रश्नेति । यतश्चैतैर्वैश्वानरात्मविषयको विशेषप्रश्नः कृतोत एतेषां वैश्वानरविषयकं कियज्ज्ञानं वर्तत इति परीक्षार्थं तानेकैकं पप्रच्छेत्यर्थः ।

—२३-२७०-५ पूर्णवैश्वानरेति । त्वया वैश्वानरबुद्ध्योपास्यमान एष द्युलोकपरिच्छिन्न आत्मा वैश्वानरस्यात्मनो मूर्धरूपावयवभूतः । न तु स एव वैश्वानर आत्मा । एतदर्थनिर्णयार्थं मत्समीपागमने वैश्वानरमूर्धावयवभूते कृत्स्नवैश्वानरबुद्धिं कुर्वतस्तव विपरीतविद्यावशादनर्थः स्यादतः साध्वकार्षीस्त्वं यतो मामागतोसीत्येवं तस्यौपमन्यवस्य दिवि पूर्णवैश्वानरबुद्धिर्निवर्तिता । द्युलोकस्य सुतेजस्त्वगुणयोगेन सुतेजा इति नाम च तत्रोक्तम् । शोभनं तेजो यस्य स सुतेजा द्युलोकः । एवमादित्यस्य विश्वरूप इति नाम । विश्वं सर्वं जगद्रूपं प्रकाश्यं यस्येत्यर्थात् । वायोः पृथग्वर्त्मेति नाम । पृथग्वर्त्मा पृथङ्मार्गः । विविधगतिस्वभाव इति यावत् । आकाशस्य बहुल इति नाम । बहुलत्वं च महत्त्वम् । भूतान्तरेभ्य आकाशस्य महत्त्वात् । अपां वेगवत्त्वाद्रयिरिति नाम । रयो वेगोस्यास्तीति रयिः । पृथिव्याः प्राण्याधारत्वात्प्रतिष्ठेति नाम कृतमिति बोध्यम् । सत्ययज्ञादिभिरित्यादिपदेनेन्द्रद्युम्नजनबुडिलोद्दालकसंग्रहः । वस्तीति । बस्तिशब्देन मूत्रस्थानमुच्यते ॥ २६ ॥

२७०-९ शब्दादिभ्य इति । आदिशब्देनाग्नित्रयकल्पनं प्राणाद्युत्पाधारत्वं च संगृह्यते ।

—१५ हृदयमिति । एतत्तात्पर्यमग्रे (विवृति-पृ. १७५ प. १८) उरःप्रभृतीनामित्यत्र वक्ष्यते ।

२७१-४ तथा दृष्टीति । दृष्टिरुपासनम् । तथोपासनोपदेशादित्यर्थः । जाठराग्निशरीरकतया वैश्वानरस्य परमात्मन उपासनं ह्यत्रोपदिश्यत इत्याशयः ।

—१७ निरुपाधिकमिति । जीवस्य पुरुषशब्दवाच्यत्वं प्रधानपुरुषावेतौ । द्वाविमौ पुरुषौ लोक इत्यादिषु प्रधानादिपदान्तरसमभिव्याहाराक्षरत्वाद्युपाधिना-

श्रीयते न तु स्वतः । अतः पुरुषशब्दवाच्यत्वं परमात्मन एव निरुपाधिकम् । अतो जाठरस्य पुरुषत्वं दूरतो निरस्तमिति भावः ॥ २७ ॥

२७१–२१ **उक्तेभ्य इति** । त्रैलोक्यशरीरत्वनिरुपाधिकपुरुषशब्दनिर्दिष्टत्वादिभ्य इत्यर्थः ॥ २८ ॥

२७२–१ **साक्षादिति** । अग्निशरीरकतया वैश्वानरस्योपासनार्थमग्निशब्दनिर्देश इति पूर्वसूत्र उक्तम् । इदानीमग्निशब्दस्य साक्षादेव परमात्मवाचकत्वमुच्यते ।

—४ **आचार्य इति** । पूजाद्योतनार्थमाचार्यशब्दप्रयोगः ।

—६–१० **यथा वैश्वानर इति** । विश्वान्नरान्नयतीति विश्वानरः । स एव वैश्वानरः । स्वार्थेण् । राक्षसवायसादिशब्दवत् । **काष्ठागतस्येति** । निरवधिकातिशययुक्तस्येत्यर्थः ॥ २९ ॥

—१७ **उपासकाभिव्यक्त्यर्थमिति** । उपासकस्य सौलभ्येनात्मज्ञानायेत्यर्थः ।

—२० **कृत्स्नमिति** । श्रुतावभिविमानशब्दस्याभिशब्दस्य कृत्स्नमिदमभिव्याप्तवत इत्यर्थः । विमानशब्दस्य विगतमानस्येत्यर्थ इत्याशयः ॥ ३० ॥

२७३–३ **अनुस्मृतेरिति** । अनुस्मृतिरुपासनम् । उपासनार्थं पुरुषविधत्वमित्यर्थः (श्रु.) ॥ ३१ ॥

—१३ **उरःप्रभृतीनामिति** । श्रुतौ ह्युपासकावयवीभूतस्योरसो वेदित्वं लोम्नां बर्हिष्ट्वं हृदयस्य गार्हपत्यत्वं मनसोन्वाहार्यपचनत्वमास्यस्याहवनीयत्वं च कल्पितम् । तच्च वैश्वानरपदस्याग्निवाचकत्व एवोपपद्यते न तु परमात्मवाचकत्व इति भावः । यावतेत्यस्य प्रत्युतेत्यर्थः । हृदयस्य गार्हपत्यत्वमित्यस्य हृदयकमलावच्छिन्नजाठराग्नेर्गार्हपत्यत्वमिति तात्पर्यम् । एवं मनइन्द्रियावच्छिन्नजाठराग्नेर्दक्षिणाग्नित्वम् । आस्यावच्छिन्नजाठराग्नेराहवनीयत्वम् । गार्हपत्यादीनामग्निविशेषत्वेन तत्कल्पनायाः सजातीये जाठराग्नावेवोचितत्वात् । अत एव प्राक् (श्रीभाष्य-पृ. २७० प. १६) भाष्ये वैश्वानरस्य हृदयादिस्थस्याग्नित्रयकल्पनं क्रियत इत्युक्तम् ।

—१५ **संपत्तेरिति** । संपत्तिः संपादनमतस्मिंस्तत्कल्पनमिति यावत् । वैश्वानरविद्याङ्गभूताया उपासकैरहरहः क्रियमाणायाः प्राणाहुतेरग्निहोत्रत्वसंपादनाय वेदित्वादिकल्पनमिति जैमिनिर्मन्यते । तथा हि श्रुतिरेवाग्निहोत्रसंपत्तिं दर्शयतीति सूत्रार्थः ।

—२० **स य इति** । इदमुरःप्रभृतीनां वेदित्वादिरूपेणाग्निहोत्रसाधनत्वमविद्वानजानन्योग्निहोत्रं जुहोति प्राणाहुतिमनुतिष्ठति तस्य तद्धवनमङ्गारांस्त्यक्त्वा भस्मनि कृतं हवनमिव निष्फलं भवतीत्यर्थः ॥ ३२ ॥

२७४-५ आमनन्तीति । परस्यात्मनो द्युप्रभृतिशरीरकत्वमयुक्तम् । उपासकस्य मूर्धाद्यवयवानामेव द्युप्रभृतित्वेनोपासनविधानादिति शङ्कानिरसनार्थमेतत्सूत्रम् । उपासकशरीरे द्युमूर्धताद्यनुसंधानं परमात्मनो द्युमूर्धत्वादेर्न विरोधि । उभयस्यापि विहितत्वात् । अत उपासकशरीर एव द्युमूर्धत्वाद्यवयवत्वमित्यवधारणं न युक्तम् (श्रु.) ।

—७ तस्य ह वेति । अत्र तस्यैतस्येति च षष्ठ्यौ न समानाधिकरणे । किं तु तस्येति वैश्वानरस्येत्यस्य विशेषणम् । एतस्येत्यनेन च प्रकृतोपासकस्य परामर्शः । एतस्योपासकस्यात्मनो मूर्धैव तस्य वैश्वानरस्य सुतेजोनामको मूर्धेत्यर्थः ॥ ३३ ॥ (६)

अथ प्रथमाध्यायस्य तृतीयः पादः प्रारभ्यते ॥

२७६-३ द्युभ्वादीति । द्युपृथिव्यादीनामायतनं परमात्मा स्वासाधारणात्मादिशब्दादिति सूत्रार्थः ।

—५ यस्मिन्द्यौरिति । यस्मिन्नक्षरे द्युपृथिव्यन्तरिक्षमनःप्राणादिकं समवेतं तमेव स्वेतरसमस्तनियन्तृत्वेन व्यापकतयात्मानं जानीत । अनात्मविषया वाचस्त्यजत । अमृतस्यैष सेतुः । नद्यादिषु सेतुर्हि कूलस्य प्रतिलम्भकः । तद्वत्संसारार्णवपारभूतस्यामृतस्यैष प्रतिलम्भक इति सिद्धान्ते श्रुत्यर्थः (वि. दी.) ।

—१० अरा इवेति । रथनाभावरा इव यत्र प्रकृते द्युभ्वाद्यायतने (जीवे) नाड्यः संगतास्तत्रान्तर्मध्ये स एष (जीवो) बहुधा देवादिरूपेण जायमानः संश्चरते वर्तत इत्यर्थः ।

—१९ यथाकथंचिदिति । द्युपृथिव्याद्युत्पत्तौ जीवकृतकर्मणः सहकारिकारणत्वात्कर्मद्वारा द्युपृथिव्याद्यायतनत्वं जीवस्य संभवति । मुक्तावस्थायां जीवस्य ज्ञानविकासेन तद्द्वारा वा द्युभ्वाद्यायतनत्वं बोध्यम् ।

२७७-११ नियन्तृत्वेन व्याप्तिरिति । आत्मशब्दस्य हि नियन्तृत्वेन व्याप्तिरेव प्रवृत्तिनिमित्तम् । न तु सामान्यतो व्याप्तिः । तथासत्याकाशेऽप्यात्मशब्दप्रयोगप्रसङ्गात् ।

—१४-६ संततमिति । आकोशः पद्मस्य मुकुलम् । तत्संनिभं तत्सदृशं हृदयकमलं लम्बति शरीरमध्येधोमुखत्वेनावलम्बते । तच्च शिराभिर्नाडीभिः संततं परितः सम्यग्व्याप्तमित्यर्थः । ततस्तत्समीपे किंचित्सुषिरं तदूर्तमग्निं च वर्णयित्वा तस्याग्नेः शिखाया मध्ये परमात्मा व्यवस्थित इत्युक्तम् ।

२७८–३ **अजोपीति** । प्रकृतिः स्वभावः । मायाशब्दो ज्ञानवाची । आत्मज्ञानेनात्मसंकल्पेनेत्यर्थः । अजत्वाव्ययत्वसर्वेश्वरत्वादिपारमैश्वर्यप्रकारमत्यजन्नेव स्वमेव स्वभावमधिष्ठाय स्वेनैव रूपेणात्मसंकल्पेन संभवामि । अपहतपाप्मत्वादिसमस्तकल्याणगुणात्मकत्वं सर्वमैश्वरं स्वभावमत्यजन्नेव स्वमेव रूपं देवमनुष्यादिसजातीयसंस्थानं कुर्वन्नात्मसंकल्पेन देवादिरूपः संभवामीति तात्पर्यम् ॥ १ ॥

—११–५ **यदेति** । पश्यतीति पश्य उपासकः । रुक्मवर्णं देदीप्यमानदिव्यमङ्गलविग्रहयुक्तम् । ब्रह्मयोनिं तस्मादेतद्ब्रह्मेति निर्दिष्टाव्याकृतब्रह्मोपादानम् । अथ वा ब्रह्मयोनिशब्दयोः सामानाधिकरण्येन जगदुपादानभूतं ब्रह्मेत्यर्थः । निरञ्जनः प्रकृतिसंसर्गरहितः । अपहतपाप्मत्वादिगुणाष्टकलक्षणेन ब्राह्मेण रूपेण परमं साम्यमुपैतीत्यर्थः । येन गुणेन साम्यं तस्यापरिच्छिन्नत्वमेव परमसाम्यम् । **यथेति** । यथा नदीसमुद्रजलयोर्भेदकाकारप्रहाणमेव न स्वरूपैक्यमेवं मुक्तस्यापि परमात्मना सह भेदकाकारप्रहाणकृतसादृश्यमेव न त्वैक्यमिति श्रुतितात्पर्यम् ॥ २ ॥

२७९–३ **नानुमानमिति** । अनुमानशब्दश्चात्र सूत्रे दृष्टान्तार्थमुपन्यस्तः । अनुमीयत इत्यनुमानं प्रधानम् । बाहुलकात्कर्मणि ल्युट् । आनुमानमिति वा पदच्छेदः । अनुमानेन प्रमितमानुमानम् । शेषे (पा. सु. ४।२।९२) इति सूत्रेणाण्प्रत्यय आदिवृद्धिः ।

—७ **अर्थाभाव इति** । अर्थस्य पदार्थस्याभावः । तद्वाचिनो नञित्यव्ययस्य तच्छब्द इति शब्देन सहाव्ययं विभक्ति (पा. सू. २।१।६) इत्यादिसूत्रेणाव्ययीभावः । नाव्ययीभावादतोऽत्वपञ्चम्याः (पा. सू. २।४।८३) इति निषेधात्पञ्चम्या न लुक् । अपञ्चम्या इत्युक्तेश्च नामादेशः । तच्छब्दः प्रधानजीवप्रतिपादकशब्दः । तत्पुरुषस्तु नात्र कृतः । तथासति तच्छब्दभिन्नादित्यर्थः स्यात् । प्रधानजीवप्रतिपादकशब्दभिन्नः शब्दश्चार्थादेवात्र परमात्मप्रतिपादकशब्दः । स तु प्रथमसूत्रे स्वशब्दादित्युक्त एवेत्यत्र पुनरुक्तिः स्यादिति बोध्यम् ॥ ३ ॥

—११ **समान इति** । वृक्षे वृक्ष इव च्छेदनार्हे एकस्मिञ्छरीरे स्थूलोहं कृशोहमित्यादितादात्म्यबुद्ध्या पांसूदकवत्तदेकतामापन्नः संस्तत्संसर्गकृतानि दुःखान्यनुभवतीत्यर्थः । जुष्टं प्रीयमाणम् । जुषी प्रीतिसेवनयोरिति धातोरादिकर्मणि क्तः । श्रुतौ महिमानमित्युत्तरं चशब्दाध्याहारः । इतिशब्दो बुद्धिस्थप्रकारवचनः । बुद्धिस्थप्रकारश्चात्र निखिलजगन्नियमनरूप एव । ईशशब्दसंनिधानात् ॥ ४ ॥

२७९-१८ **प्रकरणात्**। अथ परा यया तदक्षरमधिगम्यत इत्यादिना परमात्मन एव प्रकृतत्वादयं परमात्मैवेति सूत्रार्थः।

२८०-१ **प्रतिपादितमिति**। अदृश्यत्वादिगुणकाधिकरणे विशेषणभेदव्यपदेशाभ्यां च नेतरौ (ब्र. सू. १।२।२३) इति सूत्रे तथा हि (श्रीभाष्य-पृ.२६२ प. ७) इत्यारभ्योपसंहृतम् (श्रीभाष्य-पृ. २६५ प. १९) इत्यन्तेन ग्रन्थेन प्रागेतदृर्शितमेव। तथापि प्रकरणापेक्षया लिङ्गस्य प्राबल्यान्नाडीसंबन्धादिभिर्जीवलिङ्गैरिदं भिन्नमेव प्रकरणमित्याशङ्का स्यात्तन्निरसनार्थमेतत्सूत्रम्। नाडीसंबन्धादिलिङ्गानां च परमात्मन्यपि संभवाद्विरोधाभावेन न परमात्मप्रकरणस्य लिङ्गेन बाध इति बोध्यम्॥ ५ ॥

—५ **द्वा सुपर्णेति**। युज्यत इति युक्शब्दो गुणपरः। सयुजा समानगुणकौ। सखाया अपहतपाप्मत्वादिगुणैर्मिथः समानौ द्वौ सुपर्णौ पक्षिसदृशौ समानमेकं वृक्षं वृक्षवच्छेदनार्हं शरीरं समाश्रितौ। तयोर्मध्येन्यतरो जीवः स्वादु परिपक्वं पिप्पलं कर्मफलं भुङ्क्ते। अन्यस्तु परमात्माऽभुञ्जान एव प्रकाशत इत्यर्थः॥ ६ ॥ (१)

—१४-६ **यत्रेति**। अनुभूयमान इत्यध्याहारः। यत्र यस्मिन्वस्तुन्यनुभूयमाने सत्यन्यन्न पश्यति न शृणोति न विजानाति स भूमा यस्मिन्ननुभूयमानेप्यन्यत्पश्यति शृणोति विजानाति तदल्पमित्यर्थः।

—१८ **पृथ्वादिभ्य इति**। पृथ्वादिगणपठितेभ्यः शब्देभ्यस्तस्य भाव इत्यर्थे इमनिच्प्रत्ययो विकल्पेन भवतीति सूत्रार्थः। अनेन सूत्रेण बहुशब्दाद्बहोर्भाव इत्यर्थे इमनिच्प्रत्यये बहोर्लोप इति सूत्रेण प्रकृतिभूतस्य बहुशब्दस्य भू इत्यादेश इमनिच्प्रत्ययावयवस्येकारस्य च लोपे भूमेति भवति।

२८१-३ **वैपुल्येति**। वैपुल्यं विशालता। बहुश्रुतोयं ब्राह्मण इत्यत्रेवात्रापि बहुशब्दो वैपुल्यवाच्येव गृह्यते न तु बहवः पुरुषा इत्यत्रेव संख्यावाचीति भावः।

—५ **अल्पशब्देति**। यद्यपि प्रत्ययार्थप्राधान्यस्यौत्सर्गिकत्वेन भूमशब्दस्य बहुत्वरूपधर्मार्थकत्वं तथाप्यत्र प्रकृत्यर्थप्राधान्येन धर्मिवाचकत्वमेव ग्राह्यम्। अनुयोगिनिर्देशस्याल्पमित्यस्य धर्मिवाचकत्वेन तत्प्रतियोगिनिर्देशस्य भूमेत्यस्यापि धर्मिवाचकत्वस्यैवोचितत्वात्। न चाल्पमित्यस्यैव धर्मवाचकत्वं किं न कल्प्यत इति वाच्यम्। तथासति स भूमा तदल्पमिति प्रथमान्ततच्छब्दस्यासंगतेः। तथासति हि तस्येत्येवोचितम्।

—११-८ **भगवदृशेभ्य इति**। भवादृशेभ्य इत्यर्थः। सनत्कुमारेण नारदाय नामब्रह्मोपासनायां कथितायां नाम्नो ब्रह्मत्व आत्मत्वे च श्रद्धामलभमानस्य ब्रह्मज्ञानेच्छोर्नारदस्यास्ति भगवो नाम्नो भूय इति प्रश्नः। भगव इति

संबोधनम्। हे भगवन्नित्यर्थः। ततो वाग्वाव नाम्नो भूयसीति सनत्कुमारस्योत्तरम्। पुनर्नारदस्यास्ति भगवो वाचो भूय इति प्रश्नः। पुनः सनत्कुमारस्य मनो वाव वाचो भूय इत्युत्तरम्। एवं प्रश्नप्रतिवचनरूपेण वाङ्मनःसंकल्पचित्तध्यानविज्ञानबलान्नजलतेजआकाशस्मराशापर्यन्तमुपन्यस्यान्ते प्राणो वावाशाया भूयानित्युक्तम्। तत्र चात्मोपदेशेन प्राणशब्दस्य न वायुमात्रमर्थः। वायोरात्मत्वासंभवात्। प्राणो ह पितेत्यादिनोच्यमानस्य प्राणस्य पितृत्वादेर्वायावसंभवाच्च। किं तु लक्षणया प्राणसहचारी जीव एवार्थः। तदनन्तरं चास्ति भगवः प्राणाद्भूय इति प्रश्नस्तदुत्तरं च न दृश्यते। तथा च श्रुतौ जीवापेक्षया भूयांसं पदार्थमनिर्दिश्यैव वर्ण्यमानोयं भूमा जीव एव न परमात्मा। अन्यथा प्रकरणविच्छेदापत्तेरिति पूर्वपक्ष्याशयः।

२८१–२० अन्यत्रापि प्राणशब्दस्य जीववाचित्वं दृश्यत इत्याह–**प्राणो हेति। प्राणस्य चेतनताम्**। प्राणशब्दस्य जीववाचित्वम्।

—२२ **सप्राणेषु**। सजीवेषु। जीवोपमर्द एव हिंसा न तु पञ्चवृत्तिवायूपमर्दः। वृक्षादिषु पञ्चवृत्तिवायुमन्तरेणापि केवलजीवोपमर्देनैव हिंसादर्शनात्।

२८२–३ **अप्राणेषु**। पञ्चवृत्तिवायुरहितेषु। ननु न तु दृष्टान्तभावादिति सूत्रे भाष्ये (श्रीभाष्य–पृ. ४१३ प.११) स्थावरेषु हि प्राणसद्भावेपि तस्य पञ्चधावस्थाय शरीरधारकतयावस्थानं नास्तीत्युक्तत्वादत्राप्राणेष्वित्युक्तिर्न संभवति। किं च नायं हन्ति न हन्यते (भ. गी. २।१९) इति निर्दिष्टस्य जीवस्य स्वतो हिंसायोग्यत्वाभावेन देहादिसाहित्यप्रयुक्तहिंस्यत्ववन्मुख्यप्राणस्यापि हिंस्यत्वं सुवचम्। प्राणो ह पितेत्यादौ पित्रादिशब्दास्तु गौणार्थका भवन्तिवति चेदुच्यते। प्राणो ह पितेत्यादिवाक्यनिर्दिष्टानां बहूनां जीववाचितया लोके प्रसिद्धानां पित्रादिशब्दानां गौणत्वकल्पनापेक्षयैकस्य प्राणशब्दस्यैव जीववाचित्वमाश्रयणीयमित्येव भाष्यकृतामाशय इति (वि.)।

—५ **अरनाभीति**। यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितमिति श्रुतावरनाभिदृष्टान्तपूर्वकसर्वाधारत्वोपन्यासेन प्राणशब्दवाच्यः परमात्मैवेति न भ्रमितव्यमित्यर्थः। रथचक्रमध्यं नाभिः। तस्माच्चेमिपर्यन्तं तिर्यग्दलानि काष्ठान्यरा इत्युच्यन्ते।

—१२–७ **अतिवादित्वमुक्त्वेति**। स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवतीति श्रुतिः। एष प्राणशब्दनिर्दिष्टो जीवः स्वात्मानमुक्तेन प्रकारेण मन्वानोनेन प्रकारेण विजानन्नुपासीनस्तेन प्रकारेण पश्यन्साक्षात्कुर्वन्नतिवादी भवति। स्वोपास्यवस्तुनः सर्वोत्कृष्टत्ववादी भवति। पश्यन्नित्यत्र लक्षणहेत्वोः क्रियायाः (पा. सू. ३।२।१२६) इति सूत्रेण हेत्वर्थे शतृप्रत्ययः। ततश्च स्वोपास्यदेवतासाक्षात्कारोतिवादित्वे हेतुः। साक्षात्कारप्रीतस्वो-

पास्यदेवतानुग्रहादीदृशमतिवादित्वं भवतीति तात्पर्यम् । अत्र प्राणवेदिनोतिवादित्वोक्तिपर्यन्तमेव जीवप्रकरणम् । तदुत्तरमेष तु वेत्यारभ्य परमात्मप्रकरणम् । विशेषद्योतनार्थकतुशब्दस्त्वारस्यादिति सिद्धान्तः । परं तु पूर्वपक्षी तन्न मनुते । एष इत्येतच्छब्देन पूर्वप्रक्रान्तस्य प्राणवेदिन एव प्रत्यभिज्ञानात् । सत्यशब्दश्च नात्र ब्रह्मपरः । किं त्वेष तु वा अग्निहोत्री यः सत्यं वदतीत्यत्राग्निहोत्रिण इवात्र प्राणातिवादिनः सत्यभाषणमङ्गतया विधीयते । **मननेति** । यदा वै मनुते यदा वै श्रद्दधाति यदा वै निस्तिष्ठति यदा वै करोतीत्यादिश्रुतिप्रतिपादितानि मननश्रद्धानिष्ठाप्रयत्नानि प्राणोपासनोपायभूतानि न तु ब्रह्मोपासनोपायभूतानीति पूर्वपक्ष्याशयः ।

२८३-५ **अहमेवेति** । अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोहमुत्तरतोहमेवेदं सर्वमिति श्रुतौ हि जीवस्य वैभवमुपदिश्यते । जीवस्यैवाहमर्थत्वात् । एतच्च परमात्मपरिग्रहे न संगच्छते । परमात्मनोहमर्थत्वाभावात् । यद्यप्येतादृशं वैभवं जीवस्य नोपलभ्यते तथापि मुक्तस्य तत्संभवोस्त्येवेति पूर्वपक्ष्याशयः ।

—८ **वाक्यशेष इति** । श्रुतौ भूमवर्णनोत्तरं स भगवः कस्मिन्प्रतिष्ठित इति नारदस्य प्रश्नः । स्वे महिम्नीति सनत्कुमारस्योत्तरम् । अनाधार एवायमित्यभिप्रायः । अत्र यत्स्वमहिमप्रतिष्ठितत्वमुच्यते तज्जीव एवाविद्याविमुक्ते संगमनीयमिति भावः ।

—११ **एष संप्रसाद इति** । संप्रसादशब्दः सुषुप्तिस्थानवचनस्तत्संबन्धादत्र जीवं लक्षयति । एष जीवोस्माद्धेयतया परिदृश्यमानाच्छरीरादुत्क्रम्य देशविशेषनिष्ठं परमात्मानं प्राप्य स्वेन रूपेणाभिनिष्पद्यत इत्यर्थः ।

२८४-७ **तुशब्देनेति** । तुशब्दस्त्वारस्येनैष तु वेत्यारभ्य प्रकरणान्तरमेवेदं ब्रह्मविषयकमारब्धमिति गम्यते । तदनुसारेणैष इत्येतच्छब्दोपि न प्रकृतजीवपरामर्शकः । किं त्वग्रिमयच्छब्दस्य प्रतिनिर्देशरूप एवेति बोध्यम् ।

—९ **अतोस्येति** । स्वोपास्यवस्त्वाधिक्यं ह्यतिवादनिमित्तम् । तुशब्देन पूर्वातिवाद्यपेक्षयायमतिवाद्यतिशयितोपास्यान्तरविशिष्टत्वेन भिन्न इति गम्यते । अतः प्राणातिवादिनोतिवदननिमित्तात्तदुपास्यात्प्राणादपि तदुत्तरवाक्यनिर्दिष्टस्य सत्यातिवादिनोतिवदननिमित्तं तदुपास्यं सत्यमधिकमित्यर्थः (श्रु.) ।

—२० **वस्त्वन्तरादिति** । वस्त्वन्तरापेक्षया पुरुषार्थभूतत्वेनातिशयितं यद्वस्तु तद्वादित्वमित्यर्थः ।

२८५-४ **इत्थंभूतेति** । इत्थंभूतलक्षणे (पा. सू. २।३।२१) इति सूत्रम् । इत्थंभूतः कंचित्प्रकारं प्राप्तः । लक्षणं कंचिद्धर्मम् । चित्प्रकारं प्राप्तस्य लक्षणे

गम्यमाने तृतीया भवतीति तदर्थः। यथा जटाभिस्तापस इति। जटोपलक्षित इत्यर्थः। पूर्वपक्षिमते तु सत्यं वदतीत्येव वक्तव्यमिति तृतीयाया आनर्थक्यमतिवदतीत्यत्रातीत्युपसर्गवैयर्थ्यं च बोध्यम्।

२८५-५ अत एवेति। सत्यशब्दस्योपास्यान्तरपरत्वादेव सत्येनातिवदानीति प्रार्थितं न तु प्राणेनातिवदानीति।

—८ आत्मन इति। आत्मनः सकाशात्प्राणशब्दनिर्दिष्टस्योत्पत्तिरित्यर्थः। नामवागादिक्रमेणोत्तरोत्ताधिक्यविशिष्टान्सत्यशब्दनिर्दिष्टात्मपर्यन्तान्पदार्थानुक्त्वा पार्यन्तिकाधिक्यविशिष्टादात्मनः सकाशात्प्राणशब्दनिर्दिष्टजीवपर्यन्ताः सर्वे पदार्था उत्पद्यन्त इत्यात्मनः प्राण आत्मन आशात्मनः स्मर आत्मन आकाश इत्यादिश्रुतावुक्तम्। प्राणशब्दनिर्दिष्टजीवस्यैव पार्यन्तिकाधिक्यविशिष्टत्वे त्वात्मनः प्राण इति न वक्तव्यं स्यादिति जीवापेक्षया परमात्मन आधिक्यं सिध्यतीत्यर्थः।

—१५ उक्तं चेति। तुशब्दश्रुतिरात्मनः प्राणोत्पत्तिश्चार्थान्तरत्वे लिङ्गमिति प्रमाणान्तरमुक्तमित्यर्थः।

२८६-१ स्वयमेवेति। यथा भगवद्गीतायां तस्माद्योगी भवार्जुन (भ. गी. ६।४६) इति जीवात्मयोगं परिसमाप्य योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः (भ. गी. ६।४७)इति परमात्मोपासनं भगवान्स्वयमेवोक्तवांस्तद्वत् (श्रु.)।

—९-१४ अर्थसिद्धं मत्वेति। अत एवात्र श्रुतौ मननोपायभूतस्यापि श्रवणस्य पृथगुपदेशो न कृत इति भावः। तदुपायभूतामिति। श्रद्धा त्वरा। तदुपायभूता निष्ठा। सा च ब्रह्मैव श्रोतव्यं नान्यदिति व्यवसायरूपा। श्रोतव्यनिश्चये सत्येव श्रोतुं त्वरा भवतीति प्रसिद्धमिति निष्ठायाः श्रद्धोपायत्वम्। उद्योगप्रयत्नरूपामिति। उद्योगप्रयत्नापरपर्याया श्रोतव्यान्तरेषु हेयत्वानुसंधानेन मनसो नियमनरूपा कृतिः। कृतिसिद्धय इति। ब्रह्मणः सुखरूपताज्ञानं विना कृतिर्न सिध्यतीति भावः।

—२२ ब्रह्मस्वरूपेति। स्वरूपान्तर्गता ज्ञानादिगुणाः। विभूत्यन्तर्गतं जगदखिलमित्यभिप्रायः (श्रु.)।

२८७-६ कथमिवेति। एकस्यैव दुःखात्मकत्वं सुखात्मकत्वं च विरुद्धम्। न हि निम्बपत्रं कस्यचिन्मधुरं भवतीति भावः।

—७ उच्यत इति। स्वतोपरिच्छिन्नसुखरूपस्यापि कर्माद्युपाधितोन्यथा रूपसंभवाद्दुःखरूपत्वं भासत इति न विरोधः।

२८८–६ **आत्मरतिरिति** । आत्मन्येव रतिर्यस्येत्येवं व्यधिकरणबहुव्रीहिः । तत्र रतिः स्वक्चन्दनादिजन्या प्रीतिः । क्रीडा तूद्यानादिजन्या प्रीतिः । मिथुनं स्त्रीसंभवा प्रीतिः । आनन्दो विभूतिजन्या प्रीतिः । सर्वविधसुखानुभवोऽप्यात्मसुखान्तर्गत एवेति भावः ।

—९ **अकर्मवश्य इति** । विधिनिषेधकिंकरो न भवतीत्यर्थः ।

—११ **न पश्य इति** । पश्यो ब्रह्मदर्शी मृत्युं मरणं रोगं दुःखसाधनं दुःखतां जगति प्रतिकुलतां च न पश्यति । सर्वसाक्षात्कर्ता सन्संकल्पमात्रेण संकल्पितानर्थान्सर्वस्मिन्काले प्राप्नोतीत्यर्थः ॥ ७ ॥

२८९–५ **अथात इति** । अथातोहंकारादेश इति श्रुतावहंकारोहंबुद्धिः । अथशब्दः प्रकृतब्रह्मविषयत्वद्योतनार्थः । अहंग्रहेण भूम्न उपासनप्रकारोतः परमुपदिश्यत इत्यर्थः । न तु जीवस्वरूपोपदेश इति मन्तव्यम् । तथासत्यहमादेश इति निर्देशस्यैव युक्ततयाकारपदवैयर्थ्यात् (वि.) ।

—७ **परमात्मपर्यवसायीति** । तथा च नेयमतस्मिंस्तद्बुद्धिरिति भावः ॥८॥

२९०–२ **स होवाचेति** । स याज्ञवल्क्यः । गार्गीति संबोधनम् ।

—८ **शङ्कते–ययेति** ।

—९ **प्रमाणान्तरेति** । यद्यपि प्रधाने परस्मिंश्चाक्षरशब्दप्रयोगदर्शनं सममेव तथापि प्रधानमनुमानेन ज्ञायते । परमात्मा तु श्रुत्या ज्ञायते । तत्रानुमानस्य केवलं प्रत्यक्षापेक्षा । लिङ्गस्य प्रत्यक्षज्ञानं विनानुमानासंभवात् । श्रुतेस्तु शब्दार्थसंबन्धग्रहणापेक्षा । तादृशसंबन्धग्रहणं चोभयापेक्षम् । तत्र पुरोवर्तिपदार्थं प्रत्यक्षतो निर्दिश्य तत्रास्य शब्दस्य संबन्ध इति ज्ञापयतीति संबन्धग्रहणस्य प्रत्यक्षापेक्षा प्रसिद्धैव । गोशब्दज्ञाने सास्नादिमत्पदार्थज्ञानमन्यथा नेत्याकारकतर्कापेक्षं च संबन्धग्रहणम् । तथा च श्रौतेश्वरापेक्षयानुमानिकं प्रधानं प्रथमं बुद्धिमारोहतीति पूर्वपक्ष्याशयः ।

—११–५ **यदूर्ध्वमिति** । स होवाच यदूर्ध्वं गार्गि दिवो यदर्वाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति श्रुतिः । अत्राकाशशब्देन भूताकाशस्य ग्रहणमिति पूर्वपक्ष्याशयः । **प्रत्युच्यमानमिति** । अस्थूलमनण्वित्यादिना प्रत्युच्यमानमित्यर्थः ।

—१९ **अन्तः पारभूतमिति** । अन्तःशब्दोवधिवाची । अव्याकृतस्याकाशकारणत्वात्कारणस्य च कार्यं प्रत्यावरकतया बहिर्विद्यमानत्वादव्याकृतस्याकाशावधित्वम् ।

२९१–८ **विकारान्तर्गतत्वादिति** । न हि स्वयं विकारान्तर्भूतः कृत्स्नविकारजातस्याधारो भवितुमर्हतीति भावः (श्रु.) ।

२९१–१४ **संबन्धग्रहणेति** । पुरोवर्तिनं सास्नादिमन्तं पशुं निर्दिश्यायं गोशब्दार्थ इति यदा संबन्धो ज्ञाप्यते तदा प्रत्यक्षप्रमाणापेक्षास्ति । परं तु गामानयेत्यादिवाक्येषु गोशब्देन सास्नादिमत्पदार्थप्रतिपादनं यदा क्रियते तदा न प्रत्यक्षप्रमाणापेक्षा दृश्यते । न हि कस्यचिच्छब्दस्य प्रथमतः कोशादर्थो ज्ञात इत्येतावता यदा यदा तच्छब्दं शृणोति तदा तदा तस्माच्छब्दाज्जायमानार्थप्रतिपत्तिस्तादृशकोशस्मरणपूर्विकैवेति नियमो दृश्यत इति भावः ॥ ९ ॥

२९२–७ **प्रकृष्टमिति** । शासनस्य क्वचिदप्यप्रतिहतत्वमत्र प्रकृष्टत्वम् ।

—८ **सर्ववस्त्विति** । श्रुतौ सर्वस्य वशी सर्वस्येशान इति सर्वशब्दप्रयोगदर्शनात्तदनुसारेणात्र सर्ववस्त्वित्युक्तम् ॥ १० ॥

—१३ **व्यावर्त्यत इति** । निवर्त्यत इत्यर्थः । प्रधाननिवर्तको जीवनिवर्तकश्च धर्मः प्रतिपाद्यत इति यावत् ।

अदृष्टं द्रष्टृति । परमात्मा यदा रूपादिविषयान्पश्यति शृणोति मनुते विजानाति च तदाप्ययं द्रष्टा श्रोतेत्यादिप्रकारेण लोकैर्न ज्ञायत इत्यर्थः । एतेनाश्रुतमिति श्रवणविषयत्वप्रतिषेधः परमात्मनि न संगच्छते । शब्दस्यैव श्रवणविषयत्वेन तद्विन्नस्य रूपस्येव परमात्मनः श्रवणविषयत्वप्रसङ्गस्यैवाभावादित्यपास्तम् । अश्रुत इत्यस्य श्रोतृत्वेनाज्ञात इत्यर्थात् ।

२९३–६ **प्रतिषेधतीति** । यद्यक्षरशब्देन प्रधानं जीवो वा गृह्येत तदा तद्व्यतिरिक्तस्य द्रष्टुः परमात्मनः सत्त्वान्नान्यदतोस्ति द्रष्टृत्यादिवाक्यशेषोऽसंगतः स्यादिति बोध्यम् ।

—७ **एतस्येति** । अक्षरं परं ब्रह्म । प्रशासनमाज्ञा । अन्वायत्ता अनुवशाः । ददत इति द्वितीयाबहुवचनम् । दर्वी घृतादिहवनसाधनीभूतः पात्रविशेषः । तत्साध्यो होमश्चात्र दर्वीशब्देनोच्यते । परब्रह्माज्ञाकैंकर्यबुद्ध्या दानं कुर्वतो जनानितरे मनुष्या अनुवशाः सन्तः प्रशंसन्ति । तथा तदाज्ञाकैंकर्यबुद्ध्या यज्ञं कुर्वाणं देवा अनुवशाः सन्तः प्रशंसन्ति । तथा तयैव बुद्ध्या कृतं दर्वीहोमं पितरोनुवशाः सन्तः प्रशंसन्तीत्यर्थः ।

—११ **यो वेति** । ब्रह्मज्ञानमन्तरेण क्रियमाणं होमयज्ञतपआदिकं बहुकालसाध्यमपि सर्वं नश्वरफलसाधनं भवति । तज्ज्ञानमन्तरेण परलोकगतस्यापि शोच्यता भवति । तदज्ञानात्संसारो भवतीति यावत् । ज्ञानी तु यो म्रियते स ब्राह्मणो ब्रह्मविन्मुक्त एव भवतीत्यर्थः ॥ ११ ॥ (३)

—१८ **यः पुनरिति** । एकमात्रत्वद्विमात्रत्वदशायामर्वाचीनफलसाधनेनैवोमित्यक्षरेण त्रिमात्रेण यः परं पुरुषमभिध्यायीताभिमुख्येन ध्यायति स उपासकस्तेजोमण्डले सूर्ये संगतः सन्यथा पादोदरः सर्पस्त्वचा जीर्णत्वचा निर्मोकेन

विनिर्मुक्तो भवत्येवं पातकेन विनिर्मुक्तः सन्ब्रह्मलोकं वैकुण्ठं सामभिर्गीतप्रधानैर्मन्त्रैः सामगानसहितैः पुरुषैर्वा सान्त्ववचनसहितैः पुरुषैर्वोन्नीयते । एतस्माज्जीवघनात्कठिनजीवात् । घनशब्दः कठिनवाची । जीवस्य काठिन्यं च देहद्वारकमेवेति देहविशिष्टाज्जीवादित्यर्थः । तस्मात्परो यः शुद्धात्मा तस्मादपि परभूतं पुरिशयं सर्वेषु प्राणिष्वन्तरात्मतया शयानं पुरुषमीक्षत इति सिद्धान्ते श्रुत्यर्थः । पूर्वपक्षे तु परपुरुषशब्देन चतुर्मुखो ब्रह्मलोकशब्देन च तस्यैव चतुर्मुखस्य लोको गृह्यते । परादिति तु जीवघनादित्यस्य विशेषणम् । इन्द्रियादिभ्यः परो यो जीवघनो व्यष्टिजीवस्तस्मात्परं पुरुषं चतुर्मुखमीक्षत इत्यर्थः ।

२९४-३ **यथाक्रतुरिति** । क्रतुशब्द इच्छावाची । अस्मिँल्लोके पुरुषो जीवो यथेच्छति तथेतः प्रेत्य भवतीति न्यायः ।

—५ **प्रत्यभिज्ञानादिति** । ध्यानकर्मण ईक्षणकर्मणश्च परपुरुषशब्देनैवाभिधानादुभयत्राप्येकमेव कर्मेति निश्चीयत इत्यर्थः ।

—९-१३ **प्रायणान्तम्** । मरणपर्यन्तम् । **विज्ञाप्यत इति** । अन्यथान्तरिक्षलोकप्राप्तिमभिधाय तादृशान्तरिक्षलोकात्परं चतुर्मुखलोकं त्यक्त्वा व्यवहितवैकुण्ठलोकस्य ब्रह्मलोकशब्देनाभिधाने लोकक्रमप्रत्यभिज्ञानभङ्गः स्यादित्याशयः ।

—१४ **तद्वतेनेति** । तादृशचतुर्मुखलोकस्थेन जीवेनेत्यर्थः ।

—१९ **यथाकथंचिदिति** । अजरममृतमभयं परं चेति श्रुतावुक्ताः परपुरुषस्याजरत्वादयो धर्माश्चतुर्मुखेपि संभवन्ति । इतरप्राप्यपेक्षया तस्याजरत्वाद्युपपत्तेः ।

२९५-३ **तमोंकारेणेति** । अयनं मार्गः । सूरयो यं लोकं पश्यन्ति तमोंकारेणैव मार्गेणायमुपासकोन्वेति । गत्वा च शान्तमूर्मिषट्करहितं जरामरणशून्यमकुतोभयं सर्वकारणत्वेन सर्वोत्कृष्टं ब्रह्म च प्राप्नोतीत्यर्थः ।

—१० **यो ब्रह्माणमिति** । यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति श्रुतिः । यः परमात्मा प्रथमतश्चतुर्मुखमुत्पादयति तस्मै चतुर्मुखाय वेदांश्च ददातीत्यर्थः । अत्र चतुर्मुखस्योत्पाद्यत्वश्रवणाच्चतुर्मुखोपि कर्मवश्य एवेति निश्चीयते । किं च यो वै वेदांश्च प्रहिणोति तस्मा इति द्वितीयपादेन चतुर्मुखज्ञानप्रसरस्य परमात्मकृतोपदेशसापेक्षत्वबोधनादुपदेशात्प्राग्ज्ञानसंकोचः सिद्धः । ज्ञानसंकोचश्च कर्ममूलक एव । किं च मुखचतुष्टयेन शरीरसंबन्धः सिध्यति । स च कर्ममूलक एवेति बोध्यम् ।

२९६-२ **न चेति** । तथा च चतुर्मुखलोकस्याप्यन्तरिक्षलोकादव्यवहितपरत्वाभावेन लोकक्रमप्रत्यभिज्ञानभङ्गस्तुल्य एवेति भावः ।

—३ **अत इति** । उदाहृतबहुवाक्यस्वारस्यानुगुण्यादित्यर्थः । एतद्वा इति श्रुतेरयमर्थः । ओंकार एव परं ब्रह्मापरं च ब्रह्म । वाच्यवाचकभावमूलकं

ब्रह्मोंकारयोः सामानाधिकरण्यम् । उभयविधब्रह्मवाचक ओंकार इति तात्पर्यम् । तस्माद्विद्वानोंकारोपासक एतेनैवोंकाररूपेण मार्गेणैकतरं परमपरं वा ब्रह्मान्वेतीत्यर्थः । अत्रेत्थं व्यवस्था । ब्रह्म परापरभेदेन द्विविधम् । अपरं चैहिकामुष्मिकभेदेन द्विविधमिति संकलनया त्रिविधम् । ओंकारश्चैकमात्रद्विमात्रत्रिमात्रभेदेन त्रिविधः क्रमेण त्रिविधब्रह्मवाचकः । एकमात्र ऐहिकापरब्रह्मवाचकः । द्विमात्र आमुष्मिकापरब्रह्मवाचकः । त्रिमात्रश्च परब्रह्मवाचकः । तत्र त्रिमात्रपरब्रह्मवाचकोंकारेण परब्रह्मलोकप्राप्तिरेव भवितुमर्हतीति भावः । परब्रह्मलोको वैकुण्ठः ॥ १२ ॥ (४)

२९६—१३ अथ यदिदमिति । उपास्यतया संनिहितस्य परब्रह्मणः स्थानतया नवद्वारवत्त्वादिना च पुरशब्दित उपासकशरीरे पुण्डरीकाकारं दहरमल्पं वेश्म स्थानम् । अस्मिन्स्थाने दहरः सूक्ष्मो य आकाशः परमात्मा स तस्मिन्परमात्मनि यदन्तर्वर्ति गुणजातं तच्चेति चशब्दाध्याहारः । एतदुभयं श्रवणमननाभ्यामवगन्तव्यमेतदेव विजिज्ञासितव्यमिति सिद्धान्ते श्रुत्यर्थः । पूर्वपक्षी त्वन्वेष्टव्यगुणाधारत्वं परमात्मनो न जानाति । अतस्तन्मत आकाशशब्देन भूताकाशो जीवो वा गृह्यते । तदन्तर्वर्ती तु परमात्मा गृह्यते । चशब्दाध्याहारश्च नास्ति ।

२९७–६ निरुपाधिकात्मत्वमिति । देवादिकतिपयशरीरविशेषानवच्छिन्नत्वं निरुपाधिकत्वम् । तच्च जीवे न संभवति । अतति स्वकार्यं व्याप्नोतीत्यात्मेति योगार्थाश्रयणेन यद्भूताकाशस्यात्मत्वं तदपि सोपाधिकमेव । योगाद्रूढिर्बलीयसीति न्यायविरोधश्च ।

—८ अथ य इति । य उपासका आत्मानमेतान्सत्यान्कामांश्चानुविद्योपास्य परलोकं व्रजन्ति तेषां सर्वेषु लोकेषु कामचारो भवति । सत्यान्नित्यान् । कामान्काम्यमानानपहतपाप्मत्वादीन्परमात्मगुणान् । कामचारः स्वातन्त्र्यम् । संपन्नः सहितः । महीयते पूज्यते ।

—१३ यावानिति । यथायं भूताकाशो द्यावापृथिव्याद्याश्रयस्तथैषोन्तर्हृदय आकाशः परमात्मेति परमात्मनो भूताकाशेनोपमा प्रतिपाद्यते । यदि हृदय आकाश इत्यत्राप्याकाशशब्देन भूताकाश एव गृह्यते तर्ह्युपमानोपमेययोर्भेदाभावेनोपमा न संभवति ।

—१५ हृदयेति । यदि भूताकाशस्योपमानत्वं तस्यैव च हृदयावच्छिन्नस्योपमेयत्वमित्यौपाधिकभेदेनोपमानोपमेयभावः कल्प्यते तर्हि हृदयावच्छिन्नाकाशस्य द्यावापृथिव्याद्याश्रयत्वाभावेन साधारणधर्माभावादुपमा न संभवति ।

२९७-१९ **श्रवणादिति** । तथा च भूताकाशस्य सर्वस्माज्ज्यायस्त्वाभावेनोपमा न संभवतीत्याशयः ।

२९८-४ **युक्तत्वादिति** । तथा चापहतपाप्मत्वादिगुणानां दहराकाशान्तर्वर्तिपरमात्मनिष्ठत्वेनोपपत्तौ दहराकाशस्य भूताकाशत्वेपि न विरोध इति शङ्काकाशयः ।

—६ **व्यभाङ्क्षीदिति** । अयं दहराकाशोयं च तदन्तर्वर्तीति विभागः श्रुत्यैव प्रदर्शित इति भावः ।

२९९-२२ **यथा हीति** । यथेह लोके प्रजा अन्वाविशन्ति राजानमनुसरन्ति राजशासनानुरोधेन राजदत्तं क्षेत्रादिकं फलं भुञ्जन्ति न तु स्वातन्त्र्येण तथा तेषां परमात्मानं तद्गुणांश्चानुपास्यैव परलोकं गतानां सर्वेषु लोकेष्वकामचारः पारतन्त्र्यमेव भवतीत्यर्थः ॥ १३ ॥

३००-१४-३०१-२ **तद्यथेति** । तथा भूमेरन्तर्निक्षिप्तं हिरण्यनिधिं निधिमत्क्षेत्रस्वभावविज्ञानहीना निधेरुपर्युपरि सञ्चरन्तोपि न लभन्त एवमेवेमाः सर्वाः प्रजाः सुषुप्तिकालेहरहर्गच्छन्त्यः सुषुप्तौ सति संपद्य न विदुरित्युक्तरीत्याऽविभागं गच्छन्त्य एतं दहराकाशाख्यं ब्रह्मरूपं लोकं न विन्दन्ति । अनृतेन सांसारिकफलकेन कर्मणा प्रजाः प्रत्यूढाः प्रतीपं नीताः स्वभावान्तरं नीता इत्यर्थः । **गमयत इति** । सुषुप्तौ सर्वेषां जीवानां भूताकाशे जीवे च गमनस्यासंभवाद्भूताकाशजीवयोर्ब्रह्मलोकशब्देन निर्देशस्यासंभवाच्च ।

३०१-९ **मा भूदिति** । दहराकाशस्य ब्रह्मत्वे यद्गतिशब्दयोर्हेतुत्वं तदन्यत्र श्रुतौ तथाविधार्थदर्शनसापेक्षमिति तथा हि दृष्टमिति सूत्रावयवस्यार्थः । अन्यत्र दर्शनाभावेपि गतिशब्दयोर्हेतुत्वमिति लिङ्गं चेति सूत्रावयवस्यार्थ इति भावः ।

—१३ **समानाधिकरणवृत्त्येति** । ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयसमासो हि समानाधिकरणवृत्तिः । ब्रह्मशब्दस्य लोकशब्देन सह सामानाधिकरण्यात् । ब्रह्मणो लोक इति षष्ठीतत्पुरुषो हि व्यधिकरणवृत्तिः । सा च गौरवात्परित्यज्यते । तत्पुरुषे हि पूर्वोत्तरपदार्थयोर्भेदेन प्रतीतेर्गौरवं स्पष्टमेव । अत एव निषादस्थपतिं याजयेदित्यत्र निषादरूपः स्थपतिरिति कर्मधारयः स्वीकृतः । न तु षष्ठीतत्पुरुषो बहुव्रीहिश्च । बहुव्रीहावप्यन्यपदार्थकल्पनया गौरवं स्पष्टमेव । स्थपतेर्निषादत्वे तस्य याज्ञे कर्मण्यधिकाराभावेप्येतद्वाक्यसामर्थ्येनाधिकारकल्पनमिति बोध्यम् ॥ १४ ॥

३०२-१२ **धृतेश्चेति** । अस्य परमात्मनो धृतिरूपमहिम्नोस्मिन्दहराकाश उपलब्धेर्दहराकाशः परमात्मेति सूत्रार्थः ।

३०२–१४ **स सेतुरिति**। संभेदः संकरः। एषां लोकानामसंकराय स दहराकाशशब्दवाच्य आत्मा सेतुरिव विधारक इत्यर्थः। यद्ययं परमात्मा स्वशासनेन जगन्न धारयेत्तर्हि सर्वधर्माणां सांकर्यमेव स्यात्। पृथिव्या गन्धवत्त्वं जलस्य शैत्यं तेजस औष्ण्यमित्यादयो धर्माः परमात्माज्ञया व्यवस्थिता भवन्ति ॥१५॥१६॥

३०३–११ **साक्षादिति**। न तु परमात्मवद्धर्मद्वारा परामर्श इति भावः।

—११–३ **अथ य इति**। संप्रसादशब्दः सुषुप्तिस्थानवचनः संस्तत्संबन्धाज्जीवं लक्षयति। एष जीवोस्माद्धेयतया परिदृश्यमानाच्छरीरादुत्क्रम्य देशविशेषनिष्ठं परमात्मानं प्राप्य स्वेन रूपेणाभिनिष्पद्यते। एष आत्मेतदमृतमित्युभयत्राप्येतच्छब्देन न य एष इति निर्दिष्टस्य जीवस्य परामर्शः। किं तु परं ज्योतिरिति निर्दिष्टस्य परमात्मन एव। तस्यैव प्राप्यतया प्राधान्यादव्यवहितत्वाच्च ॥ १७ ॥

३०४–१ **उत्तराच्चेदिति**। उत्तरात्प्रजापतिवाक्यादपहतपाप्मत्वादिगुणको जीवो गम्यत इति चेन्न। कर्मणा तिरोहितगुणकः परब्रह्मोपासनयाविर्भूतस्वरूपो जीवस्तत्र प्रजापतिवाक्येपहतपाप्मत्वादिगुणकः कथितः। दहराकाशस्त्वतिरोहितस्वरूपापहतपाप्मत्वादिगुणक इति दहराकाशे न जीवाशङ्केति सूत्रार्थः।

—६–१२ **यस्तमिति**। य उपासकस्तमात्मानमुक्तविशेषणविशिष्टं जीवात्मानमनुविद्य वाक्यार्थज्ञानविषयीकृत्य विजानाति ध्यायतीति प्रजापतिरुवाचेत्यर्थः। **मघवन्निति**। हे मघवन्निदं शरीरमेव हि मरणधर्मि। न केवलं मरणधर्मित्वमात्रमपि तु मृत्युनात्तं व्याप्तं च। सततविनाशशीलमिति यावत्। इदं च शरीरे हेयत्वानुसंधानार्थमुक्तम्। एवंभूतं कर्मकृतमिदं शरीरं कर्मकृतशरीररहित्यलक्षणामृतत्वस्वरूपस्यात्मनो भोगाधिष्ठानमित्यर्थः (वि. दी.)।

३०५–३ **स उत्तम इति**। स प्राप्य उत्तमः पुरुषस्तत्रोत्तमपुरुषे स प्राप्तो जीवः पर्येत्युत्तमपुरुषं परितोनुभवति। जक्षन्नित्यादेर्यथेष्टं भोगानवाप्नोतीति तात्पर्यम्। तत्र चेदमुपजनं स्त्रीपुंसयोरन्योन्योपगमेन जातमत एवापुरुषार्थभूतं शरीरं बद्धावस्थायामिव स्वीयत्वेन न स्मरन्नित्यर्थः। यद्यपि मुक्तस्य सर्वज्ञत्वात्तेन त्यक्तस्य शरीरस्येतरबद्धजीवशरीराणां च तस्यानुसंधानमस्त्येव तथापि यथा तस्य प्राग्बद्धावस्थायां शरीरस्याब्रह्मात्मकतया दुःखरूपत्वेनानुसंधानं न तथा मुक्तावस्थायामित्यर्थः। **स यथेति**। आचरणं शकटम्। प्रयोग्यो युग्यः। यथा शकटे युगं वहन्नश्वो बलीवर्दो वा पाशेन युक्तो भवत्येवमेवायं प्राणः प्राणसहचारी जीवः शरीरे संसारदशायां कर्मपाशेन युक्तो भवतीत्यर्थः।

—११ **अथ यत्रेति**। यत्र यस्मिञ्जीवेनुविषण्णमुपकरणत्वेन निबद्धमेतच्चक्षुराकाशं प्रकाशं रूपं वा प्रकाशयति स चाक्षुषश्चक्षूरूपकरणकः पुरुष

आत्मा । चक्षुस्तु दर्शनसाधनमात्रम् । तथा घ्राणं गन्धग्रहणसाधनमात्रम् । ज्ञाता त्वात्मा । अभिव्याहार उक्तिः ।

३०६-३ तं वा एतमिति । एतादृशात्मस्वरूपस्य मघवत उपदिष्टत्वाद्देवाः सर्वे मघवतः सकाशादेतमात्मानमुपश्रुत्य तमेवोपासत इत्यर्थः ।

—६ यस्तमिति । इदानीमपि तमात्मानमुपासीनानां मनुष्याणामपि सर्वलोकसर्वकामावाप्तिर्भवतीत्यर्थः ।

—१३ आविर्भूतेति । आविर्भूतस्वरूपस्य प्रजापतिवाक्योक्तत्वाद्दहराकाशस्य च स्वत एवापहतपाप्मत्वादिप्रतिपादनात्तच्छरीरान्तस्थितस्यैव गुणाष्टकप्रतिपादनान्मुक्तेष्वसंभावितसर्वलोकविधरणादिश्रुतेश्च दहराकाशः परं ब्रह्मेत्यर्थः (श्रु.) ॥ १८ ॥

३०७-५ अन्यार्थ इति । अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति परज्योतिःस्वरूपदहराकाशोपसंपत्त्यास्य जीवस्य कर्मतिरोहितस्वरूपस्य स्वरूपाविर्भावो भवति । तथा च यथा जगद्विधरणत्वादयः परमात्मनो गुणास्तथा जीवस्य या स्वाभाविकरूपप्राप्तिस्तद्धेतुत्वं परमात्मनो गुणः । यत उपासकस्य स्वाभाविकरूपप्राप्तिः परमात्मनः सकाशादेव जायते । तथा च तादृशगुणकथनाय जीवपरामर्शः । तस्य गुणस्य जीवनिरूपकत्वात् ।

—१० दहरविद्योपयोगितयेति । तथा च प्रजापतिवाक्योक्तं जीवात्मविज्ञानं दहरविद्याशेषभूतमेव । दहरविद्यायां हि ब्रह्मणः प्राप्यत्वम् । प्राप्यत्वं च प्राप्तिविशिष्टत्वम् । सा च प्राप्तिः कल्याणगुणविशिष्टजीवकर्तृकेवेति तादृशजीवस्यापि प्राप्यान्तर्भावात्तस्यापि ज्ञातव्यत्वात् ।

—१४ ननु जीवात्मविज्ञानस्य दहरविद्याशेषत्वे तस्य सर्वलोकावाप्त्यादिपृथक्फलकथनानुपपत्तिः । फलवत्संनिधावफलं तदङ्गमिति न्यायादिति चेत्तत्राह-सर्वांश्चेति । अङ्गिनः फलमेवाङ्गे कथितमिति भावः ॥ १९ ॥

३०८-६ घ्नन्तीति । एनं स्वप्नावस्थं जीवमितरे घ्नन्ति तथा विच्छादयन्ति द्रावयन्ति । एवमादिभिरित्यादिशब्देनाप्रियवेत्तेव भवति रोदितीवेत्यस्य परिग्रहः ॥ २० ॥

—१५ यदा पश्य इति । एतच्छ्रुत्यर्थः प्राक् (विवृति-पृ. १७७ प. ७) उक्तः । तस्य परमात्मनोनुकाराद्धि जीवस्याविर्भूतस्वरूपस्यापहतपाप्मत्वादिगुणकत्वम् । तथा चानुकर्तुर्जीवादनुकार्यः परब्रह्मभूतो दहराकाशो भिन्न एवेति सिद्धमिति भावः ॥ २१ ॥

३०९-१ अपीति । अपिशब्दः समुच्चयार्थः । स्मर्यते चेत्यर्थ इति वेदान्तदीपकाराशयः ।

३०९–७–१५ **केचिदिति** । शांकरमतानुयायिनः । तथा च तन्मत इत्थं सूत्रार्थः–**अनुकृतेस्तस्य च** । न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति (मु. २।२।१०) इति श्रुतौ तस्य सूर्यचन्द्रादिप्रपञ्चस्यानुकृतेः परमात्मानमनुसृत्य भानात्तस्य भासेत्यत्र तच्छब्देन परमात्मैवोच्यते । सूर्यचन्द्रादिव्यतिरिक्तमलौकिकं तेज इत्यर्थः । **अपि च स्मर्यते** । न तद्भासयते सूर्यः (भ. गी. १५।६) इति स्मृतौ च सूर्यचन्द्राद्यप्रकाश्यत्वं परमात्मनः प्रतिपाद्यत इति । **भारूपत्वावगतेरिति** । एकेनाधिकरणेन प्रतिपादितोर्थोधिकाशङ्कायां सत्यामेवान्येनाधिकरणेन पुनः प्रतिपाद्यत इति वक्तुं युक्तं न त्वन्यथेत्याशयः । **सूत्राक्षरेति** । तन्मते ह्यनुकृतिशब्दस्यानुभानमर्थः । स च न संभवति । कृधातोर्भानार्थत्वाभावात् । धातूनामनेकार्थत्वेन तत्कल्पनेपि सूत्राक्षराननुगुण्यं स्पष्टमेवेति बोध्यम् ॥ २२ ॥ (५)

—१८–३१०–५ **अङ्गुष्ठेति** । आत्मशब्दो देहवाची । भूतभव्यस्य कालत्रयवर्तिनिखिलचेतनाचेतनात्मकप्रपञ्चस्येशान ईश्वर उपासकशरीरमध्येङ्गुष्ठपरिमाणः सन्नास्ते । ततः कष्टभूतदेहान्तरावस्थानान्न विजुगुप्सते । वात्सल्यातिशयेन भोग्यमेव पश्यति । **एतद्वै तत्** । एतन्मन्त्रप्रतिपाद्यमपि पूर्वोक्तपरमात्मस्वरूपमेव । **ज्योतिरिवाधूमकः** । शुष्केन्धनानलवत्प्रकाशमानः । अद्याद्यतनपदार्थजातम् । श्वः श्वस्तनपदार्थजातम् । कालत्रयपदार्थजातं स एवेत्यर्थः । **तं स्वादिति** । यथा मुञ्जात्तृणविशेषादन्तर्भूतशलाका पृथक्क्रियते तथा तमन्तर्यामिणं परमात्मानं स्वाच्छरीरात्परमात्मशरीरभूताज्जीवात्प्रवृहेत्पृथक्कुर्यात् । धारकत्वनियन्तृत्वशेषित्वधर्मैर्विलक्षणधैर्येण प्रज्ञाकौशलेन जानीयात् । शुक्रं तेजिष्ठम् । अयं सिद्धान्तिसंमतोर्थो दर्शितः । पूर्वपक्षी तु भूतभव्यशब्दस्य संकुचितार्थकत्वं गृह्णाति । तन्मते भूतभव्यस्य जीवाधीनशरीरेन्द्रियादिवस्तुन इत्यर्थः ।

३१०–१७ **शब्दादेवेति** । भूतभव्यशब्दस्य संकुचितार्थकत्वे प्रमाणाभावात् । न हि प्राणाधिप इति श्रुतौ स्वकर्मभिरिति जीवलिङ्गं यथा दृश्यते तथात्र किंचिद्दृश्यते ॥ २३ ॥

३११–७ **स्थितमिति** । अस्मिन्नधिकरणे किंचिदधिकं यद्वक्तव्यमवशिष्टमस्ति तत्सूत्रकृद्भिः कम्पनात् (१।३।४०) ज्योतिर्दर्शनात् (१।३।४१) इति सूत्रद्वयेन वक्ष्यते । मध्ये तु प्रासङ्गिको ब्रह्मविद्याधिकारविचारः क्रियत इति भावः ॥ २४ ॥ (६)

—१४ **विवेकविमोकादीति** । तत्स्वरूपं प्राक् (श्रीभाष्य–पृ. ११ प. १६) प्रतिपादितम् । उपसंहारसामर्थ्यम् । अनुष्ठानसामर्थ्यम् ।

३११–१६ यद्यपीति। प्रयोजनपर्यवसायितयैव हि शब्दस्य प्रामाण्यम्। तत्र पूर्वभागवचसां प्रवृत्तिनिवृत्तिरूपप्रयोजनपर्यवसानात्तत्र तात्पर्यम्। ब्रह्मणः पुरुषार्थरूपतया तत्र वेदान्तानां तात्पर्यम्। देवादीनां विग्रहेषु तथात्वाभावान्न तात्पर्यमिति भावः (श्रु.)। परिनिष्पन्नेपीति। इदं प्राक् (श्रीभाष्य–पृ. १२७ प. ३) उक्तम्।

—१९ मन्त्रार्थवादा इति। तत्र मन्त्राणामनुष्टेयार्थप्रकाशकत्वेनार्थवादानां च स्तावकत्वेन कर्मविधिशेषत्वं बोध्यम्।

—२० उद्देश्येति। उद्देश्यकारकं संप्रदानकारकम्। यज्ञादिकर्मणि हविःप्रदान उद्देश्यभूता देवतेत्येतावन्मात्रमेव कर्मविधिभ्योवगम्यते न तु तासां शरीरादि। न च शरीराभावे कथं तासां यज्ञादिकर्मफलभूतस्वर्गादिसुखप्रदातृत्वमिति वाच्यम्। अपूर्वस्यैव तत्प्रदातृत्वाभ्युपगमादिति पूर्वपक्ष्याशयः।

३१२–२ अर्थित्वमपीति। अर्थित्वं हि दुःखजिहासा। देवतानां शरीराभावे दुःखं तज्जिहासा च न संभवतीति भावः।

३१३–१–४ देवादीनां विग्रहवत्त्व उपासनप्रकरणस्थश्रुतीर्दर्शयति–तद्धोभय इति। उभये देवा असुराश्च तत्सोन्वेष्टव्य इत्यादिप्रजापतिवचनमैतिह्यरूपेण श्रुतवन्तः। ते देवा असुराश्चात्मानमन्विच्छाम इत्यूचुः। ततो देवानां मध्य इन्द्रोसुराणां मध्ये विरोचनश्चाभिप्रव्रव्राज। प्रजापतिसकाशं गन्तुं प्रस्थितः। असंविदानौ। परस्परासूयया परस्परसंमत्रणमकुर्वन्तौ। ब्रह्मचर्यमूषतुः। शुश्रूषापरौ भूत्वा ब्रह्मचर्यं चेरतुरित्यर्थः।

—१७ न च निर्विशेषेति। यः पदार्थो बुद्धावनुसंधीयते स केनचिद्रूपेणैवेति नियमान्मत्रैर्जायमानमिन्द्राद्यनुसंधानमेतादृश इन्द्र इत्यादिप्रकारेण तद्गतशरीरादिविशेषानुसंधानपूर्वकमेव भवितुमर्हतीति भावः।

३१४–१ तत्रेति। देवतादिगतशरीरादिविशेषमभिदधत एवार्थवादा गुणानां प्रमाणान्तराप्राप्तत्वे तान्स्वयमेव विधाय तैर्गुणैस्तत्कर्म प्ररोचयन्ति। तादृशा मन्त्राश्च गुणानां प्रमाणान्तराप्राप्तत्वे तान्स्वयमेव विधाय तादृशगुणविशिष्टमुपास्यादिकं प्रकाशयन्ति। गुणानां प्रमाणान्तरप्राप्तत्वे तु तानूद्य तैरर्थवादाः प्ररोचनं कुर्वन्ति मन्त्राश्च प्रकाशनं कुर्वन्ति। अर्थवादगतानां मन्त्रगतानां च गुणानां प्रमाणान्तरविरुद्धत्वे तु तादृशगुणवाचकशब्दैः प्रमाणान्तराविरुद्धान्गुणाल्लक्षयित्वा तैरर्थवादाः प्ररोचनं कुर्वन्ति मन्त्राश्च प्रकाशनं कुर्वन्तीत्यर्थः।

—५–६ ननु कर्मविधिशेषभूतानां मन्त्रार्थवादानां कर्मविध्यपेक्षितार्थ एव तात्पर्यम्। देवताविग्रहादेर्विध्यपेक्षितत्वं कथमित्यत्राह–कर्मविधेश्चेति।

अपेक्षितमेवेति । स्वर्गादिकर्मफलसाधकतयेति शेषः । मन्त्रार्थवादप्रतिपादितैश्वर्यस्यैव फलसाधकत्वेन कल्पनमुचितं न तु तदप्रतिपादितापूर्वस्येत्याशयः ।

३१४–८ अपेक्षत इति । क्षणप्रध्वंसिनः कर्मणः कालान्तरभाविस्वर्गादिफलसाधकत्वासंभवेन स्वर्गकामो यजेतेत्यादिविधिरनुपपन्नः सन्निकृष्टसाधकमपेक्षते । तत्र प्रतीयमानैश्वर्यादेरेव साधकत्वेनान्वयो न त्वप्रतीयमानापूर्वस्य । एतेनापूर्वं कल्पयन्तस्तस्य चापूर्वस्य साधकत्वेनान्वयार्थं लिङादिप्रत्ययवाच्यत्वं च स्वीकुर्वन्तो मीमांसकाः प्रत्युक्ताः । अपूर्वकल्पनां विनाप्युपपत्तेरुक्तत्वात् ।

—८–११ वायुर्वा इति । भूतिकामो वायुदेवताकं पशुमालभेतेति पूर्वमुक्त्वा तत इदमुच्यते । वायुदेवता क्षेपिष्ठातिशयेन क्षिप्रगामिनी । भागधेयेनेति धेयप्रत्ययः स्वार्थे । स्वेन भागेन वायवीयेन पश्वंशेन यजमानो वायुमेवोपधावति । इतरदेवतानामस्मिन्पशावत्यन्तप्रियत्वाभावाद्वायुमेवेत्यवधार्यते । स वायुरेनं यजमानं भूतिं ददातीत्यर्थः । यदनेनेति । अनेन हविषा यजमानो यत्फलमाशास्ते तत्फलमश्याद्गुङ्क्ताम् । तच्च फलमृध्यात्समृद्धमस्य भवतु । तत्सर्वमस्मै यजमानायाङ्गयादयो राधन्तां साधयन्तामित्यर्थः ।

—१४ प्रतीयत इति । तथा च यजिधातुवाच्यदेवपूजायां पूज्यत्वेन प्रतीयमानस्य प्रधानीभूतस्य देवस्यैव फलसाधकत्वेनान्वय इत्याशयः ।

—१६ व्युत्पत्तिसमयेति । यस्माच्छब्दाद्योर्थः प्रतीयते स तस्य वाच्य इति व्युत्पत्तिसमयः । स्वर्गकामो यजेतेत्यत्रापूर्वकल्पनां विनाप्युक्तरीत्योपपत्तेस्तत्रापूर्वं न प्रतीयत इति तस्यापूर्वस्य वाच्यत्वं व्युत्पत्तिसमयविरुद्धम् । तथा च नापूर्वं वाच्यं नापि कल्प्यमिति भावः ।

—१७ संकीर्णेति । संकीर्णाः प्रसङ्गादन्यत्रानुप्रविष्टाः । ब्राह्मणशब्देन विध्युद्देशग्रहणम् । धर्मशास्त्रादीनि हि ब्राह्मणमन्त्रार्थवादरूपवेदमूलानि । यद्यपि क्वचिद्धर्मशास्त्राद्युक्तार्थविषये मूलभूतश्रुतिः स्वप्रकरणे नोपलभ्यते तथापि प्रकरणान्तरे प्रसङ्गादन्यत्रानुप्रविष्टोपलभ्यत एव । एतेन तादृशार्थानामनुमेयश्रुतिमूलत्वमुत्सन्नशाखामूलत्वं वा निरस्तम् ॥ २५ ॥

३१५–६–७ अग्निमिति । हे आहुत्याधारभूताग्ने प्रथमाज्यभागदेवतामग्निमावहेत्यर्थः । हरिव इति । हरिनामकावश्वौ विद्येते अस्य तत्संबोधनं हे हरिव इति ।

—११ श्वोभूत इति । परेद्युरित्यर्थः ॥ २६ ॥

—२० इन्द्रादीति । इन्द्रादिशब्दानां योर्थो देवतारूपस्तदुत्पत्तेः प्राक्तद्विनाशादूर्ध्वं चेन्द्रादिशब्दाः सन्ति न वा । आद्ये तेषां शब्दानामनर्थकत्वम् । तदानीमर्थस्याविद्यमानत्वात् । अन्त्ये वेदस्यानित्यत्वं प्रसज्येतेत्याशयः ।

३१६-६ विपरिवर्तमानादिति । बुद्धिस्थस्य शब्दस्य तत्तदाकृतिस्मारकतया हेतुत्वमिति भावः ।

—१० सतासती इति । चिदचिती इत्यर्थः ॥ २७ ॥

३१७-६ मन्त्रकृत इति । अध्ययनाभावेप्यस्खलितक्रमस्वरवर्णतया यन्मन्त्राणां दर्शनं तदेव मन्त्रकृत्त्वम् । न तु मन्त्रोत्पादकत्वम् । अयं सो अग्निरिति सूक्तं विश्वामित्रस्येत्यर्थः ।

—९-१२ एभिरेवेति । वसिष्ठादीनां मन्त्रकृत्त्वेपि मन्त्रादिमयस्य वेदस्य नित्यत्वं तिष्ठत्येव । प्रजापतिर्हि नैमित्तिकप्रलयानन्तरं मन्त्रकृतो वृणीते विश्वामित्रस्य सूक्तं भवतीत्यादिवेदशब्देभ्योनधीतमन्त्रादिदर्शनशक्तवसिष्ठाद्याकृतिविशेषं स्मृत्वा वसिष्ठत्वादिपदप्राप्तयेनुष्ठितकर्मविशेषांश्चानुस्मृत्य तदाकारांस्तावद्वसिष्ठादीन्सृजति । ते चानधीत्यैव वेदैकदेशभूतमन्त्रादीन्स्वरतो वर्णतश्चास्खलितान्पठन्ति । तदेषां मन्त्रादिकृत्त्वेपि वेदस्य नित्यत्वमुपपद्यते (वे. दी.) । प्राकृतप्रलये त्वग्रे वक्ष्यते । नियुङ्क्त इति । मन्त्रदर्शनानुगुणं तपश्चरतेति नियुङ्क्त इत्यर्थः ॥ २८ ॥

३१८-१ भूतादीति । तामसाहंकारस्य भूतादिरिति संज्ञा । तस्मादेव शब्दादयो जायन्ते । वेदश्च शब्दरूप एव । तथा च प्राकृतप्रलये प्रकृतिपरिणामभूतसर्वविकाराणां लयस्यावश्यकतया प्रजापतेः शब्दस्य च लयात्प्रजापतिकर्तृका शब्दपूर्विका सृष्टिर्नोपपद्यत इत्यर्थः । प्राकृतप्रलय एव महाप्रलयः ।

—४ प्रवाहानादितेति । सांप्रतं यो लोकव्यवहारो दृश्यते स प्रवाहरूपेणानादिरेव न तु मध्ये सृष्टिप्रलयाविति शङ्काशयः ।

—८ कृत्स्नोपसंहारे जगदुत्पत्त्यावृत्तावपीति । मध्ये सृष्टिप्रलयसद्भावेपीत्यर्थः ।

—११ शक्तिमात्रावशेषमिति । विद्यमानस्यैव भोग्यवर्गादेर्भोग्यत्वाद्यनुगुणा शक्तिरस्ति न तु तत्कार्यमिति भावः ।

३१९-१ इदमिति । ईश्वरेण कृता हिरण्यगर्भोत्पत्तिस्तस्मै वेदोपदेशश्चेत्यर्थः ।

—७ सोभिध्यायेति । यद्यप्यस्यां स्मृतौ वेदोपदेशो नोक्तस्तथापि प्रागुक्तश्रुत्यनुरोधाद्ग्राह्यः । अनुक्तमन्यतो ग्राह्यमिति नियमात् । तथा च वेदनित्यत्वं नाम प्रत्युच्चारणपूर्वपूर्वक्रमसदृशानुपूर्वीविशिष्टतयोच्चार्यमाणत्वम् । अर्थनित्यत्वं नाम प्रतिसर्गमिन्द्राद्यर्थानां पूर्वपूर्वार्थाकारसदृशसंस्थानविशिष्टत्वम् । तथाविधार्थप्रतिपादकत्वमेव वेदस्य नित्यार्थसंयोग इति सिद्धम् ॥ २९ ॥ (७)

३२०-१ मध्वादिष्विति । अमधुनः सूर्यस्य मधुत्वकल्पनयोपासनं मधुविद्या । तत्प्रभृतिविद्यासु वस्वादीनां देवानामनधिकारं जैमिनिर्मन्यते । अर्थि-

त्वसामर्थ्ययोरसंभवात् । वस्वादीनामेवोपास्यानामुपासकत्वासंभवात्सामर्थ्याभावः । कर्तृकर्मविरोधात् । वसुत्वादेः प्राप्तत्वादेव प्राप्यत्वासंभवाच्चार्थित्वाभावः । प्राप्तफलत्वादिति सूत्रार्थः । यद्यपि यस्यां विद्यायां यस्या देवताया उपास्यत्वं तस्यां विद्यायां तद्देवताव्यतिरिक्तदेवताया उपासकत्वं संभवति तथाप्युपास्याया न संभवतीत्येव पूर्वपक्ष्याशयो बोध्यः ।

३२०–५ **आदित्यवस्वादिभिरिति** । आदिशब्देन मरुद्रुद्रसाध्यसंग्रहः ।

—७ **मधुविद्यायामिति** । कर्मनिष्पाद्यस्य रश्मिद्वारेणेति पाठः । आदित्यस्य मधुत्वकल्पनं हीत्थम्–अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठत इत्युक्तरीत्या यज्ञकर्मण्यग्नौ प्रक्षिप्ता सोमाज्यपयःप्रभृतिद्रव्याहुती रश्मिद्वारा रसरूपेणादित्यमुपतिष्ठते । तत्र च यथा मधुकराः पुष्पेभ्यो रसमानीय मधु संचिन्वन्ति तथा मन्त्ररूपमधुकरा वेदोक्तकर्मरूपपुष्पेभ्यः सकाशात्सोमाज्यपयःप्रभृतिद्रव्यनिष्पन्नानि यशस्तेजोवीर्याद्यात्मकानि लोहितशुक्लकृष्णादीनि पञ्चामृतानि प्राग्दक्षिणपश्चिमोत्तरोर्ध्वदेशस्थितसूर्यरश्मिद्वारा सूर्यमण्डलमानयन्ति । तानि च वस्वादिदेवा अग्न्यादिमुखेनोपभुञ्जन्ति । उपभोगश्चात्र तादृशामृतदर्शनजा तृप्तिरेव । अस्यां विद्यायां लोहिताद्यमृतरूपाणामादित्यांशानां यदुपास्यत्वं तत्तद्भोक्तृभिर्वस्वादिभिः सहैव । आदित्यांशानां वस्वादिभिर्भुज्यमानाकारेणैवोपास्यत्वोपदेशात् । तथा चोपासकत्वमर्थादितरेषामेव न वस्वादीनामिति भावः ।

—११–३ **तद्यदिति** । अग्निमुखेन वसवो रोहितरूपलक्षणममृतमुपजीवन्तीत्यर्थः । **स य इति** । तत्क्रतुन्यायेन तदुपासीनोपि वसुत्वं प्राप्य तथैव भवतीत्यर्थः ॥ ३० ॥

—१६ **तं देवा इति** । ज्योतिषां ज्योतिः प्रकाशकानां प्रकाशकम् । अमृतं कालापरिच्छिन्नम् । आयुः सर्वप्राणिप्राणनहेतुभूतम् । तं परमात्मानं देवा उपासते । अत्र देवानामुपासकत्वस्य सिद्धत्वेनेयं श्रुतिर्व्यर्था सती नियमार्था । नियमश्च द्विविधः किं परं ब्रह्म देवानामेवोपास्यमुत देवानां परं ब्रह्मैवोपास्यमिति । तत्राद्ये मनुष्याणामनधिकारप्रसङ्गादन्त्य एव युक्त इति मध्वादिविद्यायां देवानामधिकाराभावः सिद्ध इत्याशयः ॥ ३१ ॥

३२१–३ **अस्ति हीति** । अत्र हीत्यादिनानुपदमेव वक्ष्यमाणप्रकारेण मधुविद्यादौ न वस्वादिदेवतामात्रमुपास्यं किं तु तदवस्थं ब्रह्म । तथा च वस्वादीनां स्वोपासकत्वासंभवेपि स्वावस्थब्रह्मोपासकत्वसंभवेन कर्तृकर्मविरोधाभावात्सामर्थ्यमस्त्येवेति बोध्यम् ।

—५ **अपेक्षिता भवतीति** । तथा चार्थित्वमप्यस्त्येवेति भावः ।

—१२–७ **न ह वा इति** । य एतां मधुविद्यारूपां ब्रह्मोपनिषदं ब्रह्मविद्यां

वेदास्मै ब्रह्मविद आदित्यो नोदेति न निम्लोचति नास्तमेति । आदित्योदयास्तमयाभ्यां न किंचित्तस्य प्रयोजनम् । अस्मै ब्रह्मविदे सकृदुदितमहरेव भवति । सततं सर्वविषयकसाक्षात्कारोस्य भवतीत्यर्थः । **तदवस्थस्यैव ब्रह्मण इति** । तदवस्थस्य ब्रह्मण एवेत्यर्थः ।

३२२-१ **निचाय्यत्वादिति** । द्रष्टव्यत्वादित्यर्थः ॥ ३२ ॥ (८)

—७ **अग्निविद्येति** । अग्न्याधानादिकर्मप्रतिपादकवेदाध्ययनसाध्येष्वित्यर्थः ।

—९ **शास्त्रीयक्रियापेक्षत्वेपीति** । उपासनस्य कर्माङ्गकत्वेन शास्त्रप्रतिपादितकर्मापेक्षत्वेपीत्यर्थः ।

—११ **तस्मादिति** । यतः परमपुरुषेण स्वपादतो न काचिद्देवता सृष्टा तत एव तत्पादोत्पन्नस्य शूद्रस्य देवतामनुसृज्यत्वाभावः । तस्मादेव कारणाच्छूद्रो यज्ञे प्रवर्तितुं न योग्य इत्यर्थः (सा.) ।

—२१ **संवर्गेति** । संवर्गः संवर्जनविशिष्टः । संवर्जनं सम्यग्ग्रहणम् । एकीकृत्य ग्रहणमिति यावत् । एतादृशगुणविशिष्टो यो वायुर्वायुशरीरकः परमात्मा तदुपासनं संवर्गविद्योच्यते ।

३२३-१ **आजहारेति** । मुखमुपायः । हे शूद्र त्वमिमा दक्षिणा आजहर्थानीतवानसि । अनेनैवोपायेन मां ब्रह्मोपदेशरूपं वाक्यमालापयिष्यसे । ब्रह्मविद्योपदेष्टारं करिष्यसीत्यर्थः । थासः से (पा. सू. ३।४।८०) इत्येतदभावश्छान्दसः । आजहर्थेति वक्तव्य आजहारेति पुरुषव्यत्ययोपि च्छान्दस एव । भवानित्यध्याहारो वा । शूद्रेति जानश्रुतेः संबोधनम् ।

—८ **यथैव हीति** । अपरानित्यस्य त्रैवर्णिकेतराञ्छूद्रान्प्रतीत्यर्थः । यथा शूद्रस्य याज्ञे कर्मणि नाधिकारस्तथैव ब्रह्मविद्यायामपि । याज्ञे कर्मणि कुतो नाधिकार इति चेदित्थम्-कर्मविधिर्हि देवताहविरादिपदार्थज्ञानसापेक्षः । ज्ञानपूर्वकत्वात्कर्मणः । तथा ज्ञानहेतुभूताध्ययनसापेक्षश्च । अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एवार्थावबोधित्वदर्शनादध्ययनस्य ज्ञानहेतुत्वम् । तथा व्रतोपनयनादिसापेक्षश्च कर्मविधिः । ते च कर्मविध्यपेक्षिता ज्ञानादयस्त्रैवर्णिकेषु लभ्यन्त एव । एतेन कर्मविधिसार्थक्याय शूद्राणामप्यधिकारकल्पनमित्यपास्तम् । कर्मविधेस्त्रैवर्णिकेषु चारितार्थ्यात् । कर्मविधिवदुपासनविधयोपि त्रैवर्णिकविषयाध्ययनगृहीतस्वाध्यायोत्पन्नज्ञानमेवोपासनोपायतया स्वीकुर्वत इति बोध्यम् ।

—१२ **कुर्वती एवेति** । तदुक्तम् ' इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति ।

३२४–१८ **शुगस्येति**। शुक्छब्देन शोक उच्यते । आद्रवणमागमनम्। हिशब्दो हेतौ । ब्रह्मविद्यावैकल्येन हंसोक्तानादरवाक्यश्रवणात्तदैवाचार्यं प्रत्याद्रवणाच्चार्योपणास्य शुश्रूषोर्विद्याऽलाभकृता शुगत्र शूद्रशब्देन सूच्यते । यस्मादस्य शुक्सूच्यतेतः शोचनाच्छूद्र इति कृत्वाचार्यो रैक्को जानश्रुतिं शूद्र इत्यामन्त्रयते न तु शूद्रत्वजातियोगेनेति सूत्रार्थः ।

जानश्रुतेरिति। जनश्रुतस्यापत्यं जानश्रुतिः । पुत्रसंज्ञकस्य राज्ञो गोत्रापत्यं पौत्रायणः ।

३२४–९ **भल्लाक्ष भल्लाक्षेति**। भल्लाक्षशब्दस्य तीक्ष्णनेत्र इति वाच्यार्थः । अत्र च विपरीतलक्षणया मन्दलोचनेत्यर्थः । संभ्रमेण द्विरुक्तिः । हे मन्दलोचनास्य जानश्रुतेस्तेजः स्वर्गेण दिवसेन वा समं सृतम् । तस्मिंस्तेजसि मा सक्तो भूः । तत्तेजस्त्वां मा दहेदित्यर्थः ।

१२ **कं वर इति**। कम् उ अरे इति च्छेदः । उ इत्यनर्थको निपातः । अरे कं सन्तं केन माहात्म्येन युक्तमेनं जानश्रुतिं सयुक्तानं गुणश्रेष्ठं सशकटं वा रैक्कमिवात्थ । रैक्कस्येवैतस्य प्रशंसावचनं कुतो ब्रवीषीत्यर्थः ।

—१९–२२ **आत्मनिन्देति** । आत्मशब्देन जानश्रुतिः परामृश्यते । **क्षत्तारमिति**। सारथिमित्यर्थः । निष्कं कण्ठाभरणम् । अश्वतरीयुक्तं रथं च रैक्काय दत्वेत्यर्थः । गर्दभादश्वायामुत्पन्नोश्वतरः । अयमश्वापेक्षयातिशयेन बलवान् ।

३२५–९ **अपाहरेति**। दक्षिणात्वेन दातुमानीतमेतत्त्वं नय तत्तवैवास्त्विति रैक्को जानश्रुतिमाहेत्यर्थः । जानश्रुतिना स्वशक्त्यपेक्षयाल्पमानीतं तेनास्य ब्रह्मविद्योपदेशयोग्यता कथं स्यादिति रैक्कस्याभिप्रायः ।

—१८ **उपदेशयोग्यताख्यापनेति**। शोचनीति शूद्र इति शूद्रशब्देन शोकाविष्टत्वसूचनादुपदेशयोग्यता ख्याप्यते ॥ ३३ ॥

३२६–२–४ **बहुदायीति**। अर्थिभ्यो बहु दातुं शीलमस्य स बहुदायी। बह्वस्य गेहेन्नं पक्तव्यं स बहुपाक्यः । अस्य जानश्रुतेर्दानपतित्वेन बहुतरपक्कान्नप्रदायित्वेन क्षत्तृप्रेषणेन बहुग्रामप्रदानेन च क्षत्रियत्वं प्रतीयत इति भावः। **संजिहान इति**। आसनमुज्झन्नुत्तिष्ठन्नेवेत्यर्थः ॥ ३४ ॥

—१२ **अथ हेति**। संवर्गविद्यास्तुत्यर्थमाख्यायिकेयमारभ्यते । कपिगोत्रं शुनकसुतं कक्षसेनसुतमभिप्रतारिनामानं चैतौ द्वौ सूपकारैः परिविष्यमाणौ भोजनायोपविष्टौ कश्चित्संवर्गोपासको ब्रह्मचारी भिक्षितवानित्यर्थः । अत्र ब्रह्मचारिणो भिक्षणेन कापेयाभिप्रतारिणोस्त्रैवर्णिकत्वमथार्दवे सिद्धम् ।

३२७-४ कापेयसाहचर्यादिति । कापेयेन सह पाठादित्यर्थः । कापेयसहपाठबलेन कापेयसंबन्धः सिद्धः । तेन तत्पुरोहितकस्य चैत्ररथत्वं सिद्धम् । तेन च क्षत्रियत्वमवगतम् (श्रु.) । तथा चास्यामाख्यायिकायां ब्राह्मणस्य क्षत्रियेणैव संबन्धात्तदनुसारेणास्यां विद्यायामपि रैक्वस्य ब्राह्मणस्य जानश्रुतिना क्षत्रियेणैव संबन्ध इत्यवगम्यत इति भावः ॥ ३५ ॥

—१४ उप त्वेति । ब्रह्मविद्याधिकारसिद्ध्यर्थमाचार्येण शिष्यस्योपनयनसंस्कारः कृत इत्यस्यां श्रुतौ प्रतिपादितम् ।

—१७ न शूद्रे पातकमिति । शूद्रस्य संध्यावन्दनादावधिकाराभावेन संध्यावन्दनाद्यभावनिमित्तं पातकं तस्य नास्तीत्यर्थः (श्रु.) ॥ ३६ ॥ ३७ ॥

३२८-५ पद्भ्यु हेति । पादयुक्तं जङ्घममित्यर्थः । समीपोच्चारणप्रतिषेधादेव श्रवणाध्ययनप्रतिषेधोर्थसिद्धः ॥ ३८ ॥

—१० अथ हास्येति । अस्य शूद्रस्य द्विजैः पठ्यमानं वेदं शृण्वतः सीसलाक्षाभ्यां तप्ताभ्यां श्रोत्रद्वयपूरणं प्रायश्चित्तं कार्यमित्यादिरर्थः । उदाहरणं कथनम् । धारणं मनसा धारणम् ।

—१८ अनुपनीतस्येति । यथा नायं सर्पो रज्जुरेषेति वाक्याज्जायमाना भ्रमनिवृत्तिरुपनयनादिसंस्कारं नापेक्षते तद्वदिति भावः ।

३२९-११ वेदविदिति । वेदविदां यः संप्रदायस्तादृशसंप्रदायावगतं यन्निर्विशेषचिन्मात्रं ब्रह्म परमार्थान्यत्सर्वं मिथ्याभूतमिति पौरुषेयवाक्यं तस्मादित्यर्थः।

—१४ वेदशिरसीति । वेदान्तनिष्ठतया दग्धोखिलविधिनिषेधाधिकारो येषाम्। तथा च तेषां न चास्मोपदिशेद्धर्ममिति निषेधकिंकरत्वं नास्तीति भावः। तदुक्तं नैष्कर्म्यसिद्धौ—दग्धाखिलाधिकारत्वाद्ब्रह्मज्ञानाग्निना मुनिः । वर्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्वेदकिंकर इति ।

—१६ अतिक्रान्तेति । उल्लङ्घितनिषेधैरित्यर्थः । यद्यपि निषेधोल्लङ्घने वक्तुर्दोषस्तथापि श्रोतुर्ज्ञानमुत्पद्यत एवेत्याशयः ।

—१९ उत्तरयति—तत्त्वमसीति ।

—२०-३३०-१ पुनः शङ्कते—निदिध्यासनेनेति । तथैवेति । निदिध्यासनेन द्वैतवासनायां निरस्तायामेव निवर्तकज्ञानोत्पादकमित्यर्थः ।

३३०-३ तदर्थभावनेति । सा च श्रुतिवाक्याद्वत्तु पौरुषेयवाक्याद्वा न कश्चिद्विशेषः । यदि निदिध्यासनमदृष्टद्वारा किंचित्कार्यकरं स्यात्तर्हि तस्यादृष्टोत्पादनाय श्रुतिवाक्यजन्यत्वापेक्षा स्यात् । तत्तु त्वयैव न स्वीकृतम् । यतस्त्वमेव निदिध्यासनविधेर्दृष्टार्थत्वं ब्रूष इत्यर्थः ।

३३०–५ विविदिषायां जातायामिति । जन्मान्तरानुष्ठितयज्ञादिकर्मभिरिति शेषः । तथा चास्मिञ्छूद्रजन्मनि यज्ञादिकर्माधिकाराभावेपि न क्षतिरिति भावः ।

—१५ सुशोभन इति । इतः पूर्वमविद्यमानमीश्वरेशितव्यादिभेदज्ञानं जनयद्वेदान्तवाक्यं हित्वा केवलाद्वैतज्ञानजनकतर्कावलम्बिनामेव ब्रह्मविद्याधिकारः सुलभ इत्यर्थः (श्रु.) ।

—१६ तपस्विनी । शोचनीया देशकालव्रताद्यनेकनियमवतीति भावः(श्रु.)।

—२० उत्तरयति–यत इति ।

३३१–४ नाभ्युपगम्यत इति । एतेन तर्कागोचरा य आत्मनिष्ठविशेषास्तत्सिद्ध्यर्थं श्रुत्यपेक्षेति परास्तम् ।

—७ तद्रूपत्वादिति । आनन्दरूपत्वादित्यर्थः । आनन्दत्वं ह्यसुखव्यावृत्तिः । सा च सकलेतराचिद्रूपव्यावृत्तचिद्रूपतापेक्षया नातिरिक्तेति भावः ।

एवं परपक्षं दूषयित्वेदानीं स्वपक्षं साधयति–यस्य त्विति ॥ ३९ ॥ (९)

३३२–१–४ वाक्ययोर्मध्य इति । प्रमिताधिकरणविषयीभूतयोर्वाक्ययोर्मध्य इत्यर्थः । अनेनास्य सूत्रस्य प्रमिताधिकरण–(अ. १ पा. ३ सू. २३ अधि. ६) शेषत्वं सूच्यते । यदिदमिति । प्राण इत्युत्तरं स्थितमिति शेषः । प्राणो ब्रह्म । एजति कम्पते । महदिति भयमिति वज्रमित्युद्यतमिति चत्वारि पदानि पञ्चम्यर्थे प्रथमान्तानि । वज्रशब्देन वज्रसदृशं ब्रह्म गृह्यते । यदिदं किं च जगत्सर्वं प्रलयदशायां ब्रह्मणि स्थितं सृष्टिदशायां ततो निःसृतं सदुद्यतवज्रादिवद्ब्रह्मणः सकाशात्संजातेन महता भयेन कम्पते । कम्पनं च प्रत्यवायभयात्स्वस्वकार्यप्रवृत्तिः । भयं चागाम्यनिष्टापत्तिज्ञानरूपं दुःखम् । कम्पनं च तत्कार्यम् ।

—१२ अयं चेति । कृत्स्नजगद्भयावहत्वरूपो ब्रह्मण एव स्वभाव इत्यदुष्टप्रमितः परमात्मैवेति सिद्धम् ॥ ४० ॥

३३३–१ न तत्रेति । अत्र पूर्वार्धेन ब्रह्मणः सर्वतेजसां छादकत्वं सूच्यते । तृतीयपादेन सर्वतेजसां कारणभूतत्वं सूच्यते । चतुर्थपादेन चानुग्राहकत्वं सूच्यते ।

—११ इत्यादिष्विति । आदिशब्देन तच्छुभ्रं ज्योतिषां ज्योतिः । नारायणपरो ज्योतिः (म. ना. १३ । १) इत्यादिसंग्रहः ॥ ४१ ॥ (६)

—१४ आकाश इति । आकाशः परमात्मा । स च नामरूपयोर्निर्वहिता नामरूपकर्ता । यतः स परमात्मा ते नामरूपे अन्तरा ताभ्यामस्पृष्टोर्थान्तरभूतः। तद्ब्रह्म तदमृतं स आत्मेति सिद्धान्ते श्रुत्यर्थः । पूर्वपक्षिमते तु वहधातोर्वहनमर्थो न तूपत्तिः । तथा चाकाशो मुक्तात्मा स च पूर्वं बद्धावस्थायां नामरूपयो-

निर्वहिता नामरूपभाक्। पश्चान्मुक्तावस्थायां ते अन्तरा ताभ्यां नामरूपाभ्यां मुक्तस्तद्वहेत्यादिरर्थः ।

३३४–१० **अर्थान्तरत्वादीति** । भेदकधर्मव्यपदेशादित्यर्थः । यत आकाशशब्दवाच्यस्य नामरूपयोर्निर्वोढृत्वतदस्पर्शलक्षणार्थान्तरत्वव्यपदेशो दृश्यते । प्रत्यगात्मनो ह्यर्थान्तरभूत एव नामरूपयोर्निर्वोढा । बद्धावस्थस्तावन्नामरूपाभ्यां स्पृष्टस्तत्परवशश्चेति न निर्वोढा । मुक्तस्यापि जगद्व्यापाररहितत्वान्न निर्वोढृत्वम् । आदिशब्देन निरुपाधिकब्रह्मत्वामृतत्वात्मत्वादीनि गृह्यन्ते। तानि निरुपाधिकानि मुक्तस्यापि न संभवन्ति (वे. दी.)। यद्यपि वहधातोर्वहनमर्थस्तथापि योगाद्बृढिर्बलीयसीति न्यायान्निर्वहितेत्यस्य कर्तेत्यर्थो ग्राह्य इत्याशयः ।

—१४ **निर्वोढुमिति** । उत्पादयितुमित्यर्थः ।

३३५–११ **ब्रह्मलोकमिति** । ब्रह्मरूपं लोकमिति समानाधिकरणसमासः ।

—१२–४ **यद्यपीति** । मुक्तस्य हि कर्तृत्वेन निर्देशः । ब्रह्मणश्च कर्मत्वेन । तयोर्मध्ये कर्तुः प्राधान्यात्तस्यैवाग्रे प्राकरणिकत्वेन निर्देश उचित इति शङ्काशयः । **तथापीति** । नामरूपनिर्वोढृत्वं हि परब्रह्मणो लिङ्गम् । लिङ्गस्य च प्रकरणापेक्षया बलीयस्त्वमिति पूर्वमीमांसायां श्रुतिलिङ्ग (जै. सू. ३।३।१४) इति सूत्रे सिद्धान्तितमेवेत्युत्तराशयः ।

—१६ **प्रजापतिवाक्यस्येति** । इदं प्रागुक्तम् (श्रीभाष्य—पृ. ३०७ प. ९) ॥ ४२ ॥

३३६–३ **ऐक्येति** । तत्त्वमसि (छा. ६।८।७) इत्यैक्योपदेशः । नेह नानास्ति (बृ. ४।४।१९) इति द्वैतप्रतिषेधः ।

—१० **वर्तत इति** । ननु पूर्वसूत्रेऽर्थान्तरत्वादिव्यपदेशादिति समस्तपदघटकस्य व्यपदेशादित्यस्य कथमनुवृत्तिरिति चेन्न । यथा पातञ्जले महाभाष्ये पस्पशाह्निकेऽथ शब्दानुशासनं केषां शब्दानामित्यत्र केषां शब्दानामित्युत्तरवाक्ये पूर्ववाक्यस्थशब्दानुशासनमितिसमस्तपदघटकानुशासनपदस्यानुवृत्तिः स्वीक्रियते तद्वदत्रापीत्यदोषात् ।

सुषुप्त्युत्क्रान्त्योरिति । सप्तम्यन्तं पदम् । सुषुप्त्यवस्थायामुत्क्रमणावस्थायां चेत्यर्थः ।

—१६ **प्राज्ञेनात्मनान्वारूढ इति**। यथा शकटं सुतरां समाहितं यात्रोपकरणसंभाराक्रान्तं सत्पूर्वदेशमुत्सृज्य यात्येवमेव शकटस्थानीयो जीवः प्राज्ञेन परमात्मना सारथिस्थानीयेन संबन्धविशेषं प्राप्तः शरीरमुत्सृज्य यातीत्यर्थः॥४३॥

३३७–६–११ **सर्वस्येति** । सर्वस्य ब्रह्मरुद्रादेर्वशी । सर्वो यस्य वशे वर्तते । अधिपतिवशीशानशब्दैः क्रमेण शेषित्वधारकत्वनियन्तृत्वलक्षणमात्मत्वमुच्यते ।

स च परमात्मा साध्वसाधुकर्मकृतोत्कर्षापकर्षशून्यः । सर्वेश्वरो नियन्ता । अधिपतिः शेषी । भूतपालो रक्षकः । एषां सर्वेषां लोकानामसांकर्याय धारकः सेतुरप्ययमेवेत्यर्थः । ईदृशं परमात्मानं वेदाध्ययनेन यज्ञेन दानेनानशनलक्षणेन तपसा च ज्ञातुमिच्छन्ति । अन्नानशनं कामानशनम् । न तु सर्वात्मनानशनम् । देहपातप्रसङ्गात् । यद्वाऽनाशकेनाशारहितेन फलाभिसंधिरहितेनेत्यर्थः । तच्च यज्ञेनेत्यादेर्विशेषणम् । विविदिषन्तीत्यत्र वेदनसाधनत्वमेव प्रतिपाद्यते । न तु विविदिषासाधनत्वम् । अश्वेन जिगमिषत्यसिना जिघांसतीत्यादावश्वादेः सन्प्रत्ययप्रकृत्यर्थभूतगमनादिसाधनत्वप्रतिपादनदर्शनात् । एवमेवात्मानं विदित्वा मुनिर्मननशीलो योगी भवति नान्यम् । लोक्यत इति लोकः । एतमेव लोकं परमात्मानमिच्छन्तः संन्यासिनः संन्यस्यन्ति । अन्नादोन्नद इत्यर्थः ।

३३७–१६ **तदात्मकत्वेति** । कार्यकारणैक्यनिबन्धन ऐक्योपदेशो न तु जीवेश्वरैक्यनिबन्धन इत्यर्थः (श्रु.) ॥ ४४ ॥ (१०)

अथ प्रथमाध्यायस्य चतुर्थः पादः प्रारभ्यते ॥

३३८–७ **निरस्तेति** । समस्तशब्देन चिद्गतमचिद्गतं च हेयं विवक्षितम् । गन्धशब्देन मुक्तव्यावृत्तिः । एतादृशं ब्रह्मोक्तमित्यन्वयः ।

—११ **ब्रह्मैकेति** । ब्रह्मैकमेव जगतः कारणमेतन्मतस्थिरीकरणायेत्यर्थः ।

—१४ **इन्द्रियेभ्य इति** । अर्थाः शब्दादयो विषयाः । महानात्मा महत्तत्त्वम् । अव्यक्तं प्रधानमिति पूर्वपक्षिसंमतोर्थः । सिद्धान्तिसंमतोर्थस्तु भाष्यकृद्भिरेवाग्रे प्रतिपादितः । कार्यकारणभावेनात्र परत्वं विवक्षितमिति पूर्वपक्षाशयः । अर्थज्ञानार्थमिन्द्रियोत्पादनेनार्थानामिन्द्रियकारणत्वं कथंचिद्योज्यम् । वशीकार्यतया परत्वं विवक्षितमिति तु सिद्धान्ताशयः (श्रु.) ।

३३९–९ **कारणमाम्नायत इति** । इन्द्रियेभ्य इति श्रुतावव्यक्तशब्दवाच्यस्य प्रधानस्य महदादिभ्यः परत्वप्रतिपादनात्परत्वस्य च कारणत्वमूलकत्वात्प्रधानं महदादिकारणत्वेनाम्नातं भवतीति भावः ।

—११ **शरीरेति** । रूप्यतेनेनेति रूपकं दृष्टान्तः । रूपकत्वेन विन्यस्तं रूपितमित्यर्थः । शरीरसंज्ञकं यद्रथत्वेन पूर्वस्मिन्मन्त्रे कल्पितं तस्यात्राव्यक्तशब्देन ग्रहणादित्यर्थः ।

—१३ **रथिरथादिभावेनेति** । आदिशब्देन सारथिरशनाहयमार्गाणां संग्रहः ।

—१५ **एतदिति** । पूर्वत्र हीत्यादिना **रूपकविन्यस्तानामेवेह ग्रहणम्** (श्रीभाष्य–पृ. ३४२ प. ८) इत्यन्तेन ग्रन्थेन वक्ष्यमाणमित्यर्थः ।

३३९-१६-३४०-३ आत्मानं रथिनमिति। बुद्धिशब्दोध्यवसायरूपज्ञानविशेषपरः। तदधीनत्वाद्देहप्रवृत्तेस्तस्याः सारथित्वम्। प्रग्रहो रशना। तेषु हयत्वेन रूपितेष्विन्द्रियेषु गोचरान्मार्गाञ्छब्दादिविषयान्विद्धि। रथसारथिहयरशनात्वेन कल्पितानां शरीरबुद्धीन्द्रियमनसामभावे रथित्वेन कल्पितस्योदासीनस्यात्मनो लौकिकवैदिकक्रियाकर्तृत्वमेव नास्तीत्याशयः। वशीकार्यतयेति। नन्वत्र वशीकार्यतायां प्राधान्यमेव परशब्देन विवक्षितमिति कथं गम्यत इति चेदुच्यते। परशब्दः प्रकर्षवाची। प्रकर्षश्चात्र न कारणत्वनिबन्धनः। अर्थानामिन्द्रियकारणत्वाभावात्। नाप्यन्तरङ्गत्वलक्षणः। इन्द्रियापेक्षया बाह्यार्थानां परत्वायोगात्। अतः पारिशेष्याद्वशीकार्यत्वमूलको गृह्यते। यस्त्वविज्ञानवान्भवति तस्येन्द्रियाण्यवश्यानि। न स तत्पदमाप्नोति संसारं चाधिगच्छति। यस्तु विज्ञानवान्भवति तस्येन्द्रियाणि वश्यानि। स तु तत्पदमाप्नोति यस्माद्भूयो न जायत इतीन्द्रियादिवशीकारावशीकारयोरर्थानर्थप्रतिपादनात्। यच्छेद्वाङ्मनसीत्यत्र यच्छेदित्यनेन वशीकारकथनाच्च वशीकार्यतायामेव प्राधान्यं परशब्देन विवक्षितमिति गन्यते। अत्रेन्द्रियाणां वशीकरणं विषयान्निवर्तनम्। अर्थानां वशीकरणं चासंनिधापनं हेयतया ज्ञापनं च। मनसो वशीकरणं मुहुर्मुहुर्विषयदोषचिन्तनेन तेभ्यो निवर्तनम्। बुद्धेर्वशीकरणं च विषयदोषदर्शनसंशीलनेन तद्दृढीकरणरूपं मनोनिवर्तनपाटवापादनम्। आत्मनो वशीकरणं चात्मरूपयाथात्म्याध्यवसायप्रावण्यरूपेच्छापादनम्। शरीरस्य वशीकरणं च रजस्तमोनुदयसत्त्वप्राचुर्यकरपरिशुद्धाहारेण सत्त्वोद्रिक्ततापादनम्। परमपुरुषस्य वशीकरणं च तच्छरणागतिरिति बोध्यम्।

३४०-१५ उपासनस्यापि निर्वर्तक इति। उपासननिर्वाहकत्वात्परमात्मनो वशीकार्यत्वम् (श्रु.)।

परादिति। तज्जीवस्य कर्तृत्वं परात्परमात्माधीनम्। अन्तः प्रविष्टः शास्ता जनानाम्। य आत्मानमन्तरो यमयतीत्यादिश्रुतेरिति सूत्रार्थः।

—१७ वशीकार्येति। वशीकार्येषूपासनानिर्वृत्युपायेषु काष्ठाभूत इत्यर्थः।

३४१-६ अधिष्ठानमिति। कायिके वाचिके मानसे च विहिते प्रतिषिद्धे च सर्वस्मिन्कर्मणि पञ्चैते हेतवः। अधिष्ठानं शरीरम्। तद्धि जीवेनाधिष्ठीयते। कर्मणि ल्युट्। कर्ता जीवः। करणं समनस्कं वागादिपञ्चकम्। पृथग्विधं कर्मनिष्पत्तौ पृथग्व्यापारम्। विविधा चेष्टा प्राणापानादिभेदभिन्नस्य पञ्चात्मनो वायोर्विविधा वृत्तिः। अत्र कर्महेतुकलापे दैवं पञ्चमं परमात्मान्तर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः। न दैवं केशवात्परमित्यादिषु दैवशब्दः परमात्मनि प्रसिद्धः।

३४१-९ सर्वस्येति । स्मृतिः पूर्वानुभूतविषयमनुभवसंस्कारमात्रजं ज्ञानम् । ज्ञानमिन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयः । अपोहनं ज्ञाननिवृत्तिः । अत्र कर्मादिकारणीभूतज्ञानादेरपि कारणमीश्वर एवेत्युक्तत्वात्तदनुसारेणाधिष्ठानमिति श्लोकोक्तकारणकलापे दैवशब्देन परमात्मैव ग्राह्य इति भावः ।

३४२-१ कारणत्वमूलकपरत्वाभिप्रायकं पूर्वपक्षिसंमतमर्थं खण्डयति-न चात्रेति ।

—३ तद्दर्शने । सांख्यमते ।

—६ न हि महत इति । बुद्धिर्व्यष्टिबुद्धिः । महानात्मा समष्टिबुद्धिः । तथा च व्यष्टिबुद्ध्यपेक्षया समष्टिबुद्धेः परत्वमित्यर्थस्त्वस्वरसग्रस्तः ।

—९ सूत्रस्थं दर्शयतिपदं व्याचष्टे-दर्शयति चेति । तदेव । वशीकार्यत्वे परत्वमेव ।

—१० गूढोत्मेति । अस्य पृषोदरादि-(पा. सू. ६।३।१०९) गणपठितत्वात्साधुत्वम् । इतरथा समासे गूढात्मेत्यसमासे गूढ आत्मेति स्यात् ।

—१७ वाचं मनसीति । वाचो मनसि नियमनं मनोननुगुणप्रवृत्तिवैमुख्यापादनम् । मनसो बुद्धौ नियमनं व्यवसायानुगुणप्रवृत्त्यापादनम् । बुद्धिश्चार्थेषु हेयताध्यवसायरूपा । तस्या बुद्धेरात्मनि नियमनं स एवोपायतया साक्षात्कार्य इत्येतदर्थविषयत्वापादनम् । जीवस्य परमात्मनि नियमनं तच्छेषतया प्रतिपत्तिः । अत्रानुक्तमपि विषयाणां शरीरस्य च नियमनं ग्राह्यम् । तदन्तरेणेन्द्रियादिनियमनासंभवेन तस्यार्थसिद्धत्वात्तन्नोक्तम् । विषयाणां नियमनं दूरतस्त्यागः । शरीरस्य नियमनं सात्त्विकाहारेण परिशोधनम् ।

३४३-३ आत्मनि वर्तमान इति । आत्मनीति विषयसप्तमी । आत्मविषयके ज्ञान इत्यर्थः । तच्चात्मोपादेयस्तदतिरिक्ता अर्था हेया इत्येवंरूपम् । अनात्मविषयके ज्ञाने मनोनियमनासंभवादात्मनीत्युपात्तम् ।

—५ तद्यच्छेदिति । तं यच्छेदित्यर्थः । शान्ते । ऊर्मिषड्करहिते । ऊर्मिषड्कं तु बुभुक्षापिपासाशोकमोहजराम्रत्युरूपम् । तत्र बुभुक्षापिपासे प्राणस्य शोकमोहौ मनसो जराम्रत्यू शरीरस्येति बोध्यम् । तदुक्तम्—बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ । शोकमोहौ शरीरस्य जराम्रत्यू षड्मय इति ॥ १ ॥

—१० सूक्ष्मं त्विति । तुशब्दोवधारणे । पूर्वं भूतसूक्ष्ममव्याकृतमेव सत्पश्चादवस्थान्तरप्राप्तं शरीरं भवति । तथा च भूतसूक्ष्मरूपकारणवाचिनाव्यक्तशब्देन तत्कार्यभूतं शरीरं लक्षणयोपस्थाप्यते । तस्यैव पुरुषार्थसाधनप्रवृत्तियोग्यत्वात् । कारणावस्थायां नियमनवशीकार्यत्वादेरसंभवादिति सूत्रार्थः ।

३४३—१३ **अचिद्वस्तुन एवेति**। एवशब्दो भिन्नक्रमो विकारमापन्नस्येत्युत्तरं योज्यः ॥ २ ॥

—१८ **तदधीनत्वादिति**। परमपुरुषशरीरतया तदधीनत्वाद्भूतसूक्ष्ममव्याकृतमर्थवदिति तदिहाव्यक्तशब्देन गृह्यते नाब्रह्मात्मकं स्वतन्त्रं कापिलतन्त्रसिद्धमित्यर्थः।

३४४–१ **तदात्मकत्वविरहेणेति**। नाभ्युपगच्छाम इत्यत्रानुषज्यते। परमपुरुषशरीरतयेति त्वभ्युपगमाभावे हेतुनिर्देशः।

—२ **स्वप्रयोजनम्**। महदादिरूपकार्यं पुरुषस्य भोगापवर्गरूपं वा।

—३ **अन्यथेति**। प्रकृत्यादीनां ब्रह्मात्मकत्वविरह इत्यर्थः। न तदस्ति विना यत्स्यात् (गी. १०।३९) इत्यनेन स्वरूपे, मयि सर्वमिदं प्रोतम् (गी. ७।७) इत्यनेन स्थितौ, मत्तः सर्वं प्रवर्तते (गी. १०।८) इत्यनेन प्रवृत्तौ च प्रकृत्यादीनां परमात्माधीनत्वोक्तेरित्याशयः।

—५ **जगदुत्पत्तीति**। तस्मात्तमः संजायत इत्यादिरुत्पत्तिवादः। पृथिव्यप्सु प्रलीयते (भार. शा. प. ३३९।२९) इत्यादिः प्रलयवादः। यस्य पृथिवी शरीरम् (बृ. ३।७।३) इत्यादिर्महिमवादः।

—७ **भूतादाविति**। तामसाहंकारस्य भूतादिरिति संज्ञा।

—१२ **मृत्युः शरीरमिति**। अत्र मृत्युशब्देन तमःशब्दवाच्यं सूक्ष्मावस्थमचिद्वस्त्वभिधीयत इति गीताभाष्ये (१३।२) उक्तम्।

—१५–९ **भूमिराप इति**। भूम्यादिः प्रकृतिरपरा। इतश्चेतनभोग्यभूतायाः प्रकृतेरन्यां विसजातीयाकारां जीवभूतां परां भोक्तृत्वेन प्रधानभूतां प्रकृतिं विद्धि। एतद्योनीन्येतत्प्रकृतिद्वयमूलकानि सर्वाणि भूतानि ब्रह्मादिस्तम्बपर्यन्तानीत्यर्थः ॥ ३ ॥ ४ ॥

३४५–१५ **अशब्दमिति**। अत्र यत्तच्छब्देन प्रसिद्धवन्निर्देशेपि तत्रसिद्धमव्यक्तमेवेह प्रतीयते। शब्दादीनां व्यक्तानां धर्माणां निषेधेनाव्यक्ते पर्यवसानात्। महतः परत्वोक्तेश्चेति पूर्वपक्ष्याशयः।

३४६–३ **पुरुषान्न परं किंचिदिति** पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधाच्चाव्यक्तशब्देन प्रधानमेव तत्रसिद्धं प्रतीयत इति यत्पूर्वपक्षिणोक्तं (श्रीभाष्य–पृ. ३३९ प. ६) तत्खण्डयति–**अत एवेति**। यतः परमात्मन एवैतत्प्रकरणं न तत्रसिद्धतत्त्वानामत एवेत्यर्थः।

—६ ननु महतः परत्वोक्तेस्त्राञ्चिकमव्यक्तं प्रतीयत इति चेत्तत्राह–**महत इति**। महच्छब्देन जीवात्मन एव ग्रहणं न तु त्राञ्चिकस्य महत्तत्त्वस्य। तत्रा-

त्मनः परमव्यक्तमित्यात्मशब्दमनिर्दिश्य महच्छब्देनैव निर्देशस्तु तस्यात्मन इन्द्रियादिपरिकरवत्त्वलक्षणप्राधान्यविवक्षातिशयाद्बोध्यः ॥ ५ ॥

३४६—९ त्रयाणामिति । एवंशब्देन ज्ञेयत्वावचनाच्चेति सूत्रस्थज्ञेयत्वस्य परामर्शः ।

—१० उपायोपेयोपेतृणामिति । उपासनोपास्योपासकानामित्यर्थः ।

—१४-७ प्रतिलभ्येति । विस्तरेण चैतत्प्राक् (श्रीभाष्य—पृ. २४७ प.२१) उपपादितम् । स त्वमिति । स्वर्गशब्दात्तदस्य प्रयोजनमित्यर्थे स्वर्गादिभ्यो यद्वक्तव्य इति यत्प्रत्ययः । हे मृत्यो सर्वज्ञस्त्वं स्वर्गप्रयोजनकमग्निं जानासि तमग्निं मोक्षश्रद्धावते मह्यं प्रब्रूहि । स्वर्गो लोको येषां ते स्वर्गलोकाः परमपदं प्राप्ता अमृतत्वं भजन्त इत्यर्थः ।

—१९ मोक्ष इति । मोक्षस्थानमित्यर्थः ।

—२० उत्तरत्रेति । तृतीयवरवरणप्रश्ने श्वो भावा मर्त्यस्य (क. १।२६) इत्यादौ ।

३४७—१ हेत्वन्तरमाह—त्रिणाचिकेत इति । अयं वाव यः पवत इत्याद्यनुवाकत्रयाध्यायी यजनाध्ययनदानरूपत्रिकर्मकृत्पाकयज्ञहविर्यज्ञसोमयज्ञकृद्वा । त्रिभिरनुष्ठितैरग्निभिः संधिं परमात्मोपासनेन संबन्धमेत्य प्राप्य जन्ममृत्यू तरतीत्यर्थः ।

—६ येयमिति । एतदर्थो भाष्य एव प्रागुक्तः (श्रीभाष्य—पृ. २४८ प. १२) ।

—१० तं दुर्दर्शमिति । दुर्दर्शं द्रष्टुमशक्यं गूढं कर्मरूपाविद्यातिरोहितं शरीरमनुप्रविष्टं तत्रापि हृदयगुहागतं गह्वरेष्ठं हृदयगुहान्तर्गते गह्वरे जीवरूपवस्तुनि स्थितं पुराणमनादिम् । विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानमध्यात्मयोगः । तेन ज्ञात्वा हर्षशोकौ जहातीत्यर्थः ।

१५—८ वेदितव्यतयेति । अध्यात्मयोगशब्दः प्राप्तृस्वरूपविषयकयोगपर इत्यभिप्रायः (श्रु.) । अध्यात्मयोगाधिगमेनेति वेदितव्यतया निर्दिष्टमात्मशब्दवाच्यं प्रजापतिविद्याप्रतिपन्नमुपास्यं प्राप्यभूतं परिशुद्धस्वरूपमेव । अतस्तस्यापि प्राप्यनिर्देशकत्वमेव । वस्तुगत्या तस्य प्राप्तुरभिन्नत्वात्प्राप्तुः प्रत्यगात्मनश्चेत्यत्रत्यं भाष्यमुपपद्यते (वि.) । धीरशब्देन प्रतिपन्नस्य प्राप्तुः प्रत्यगात्मनश्चेति तु वक्तुं युक्तम् । अन्यत्रेति । धर्म उपायः । तदितरोऽधर्म उपेयः । ताभ्यामन्यत्र प्रसिद्धसाधनसाध्यविलक्षण इत्यर्थः । अस्मादिति बुद्धिस्थसाधको विवक्षितः । स एवोपेता । स हि प्रसिद्धोपेतृविलक्षणः । साधकावस्थायामितरफलविरक्तत्वात् । एवं फलदशायामाविर्भूतगुणाष्टकविशिष्टस्वरूपत्वाच्च । कृताकृतादित्यादि धर्मादेर्विशेषणम् ।

३४८-१ **प्रणवं प्रशस्येति**। प्रणव ओंकारः। तत्प्रशंसा च सर्वे वेदा इत्यादिश्रुतौ ब्रह्मप्रतिपादकतया कृता। तत्रैव श्रुतौ तत्ते पदमिति पदशब्देन प्राप्यस्वरूपं प्रतिपाद्यते। प्रापुर्जीवस्य स्वरूपं च प्राप्ये परमात्मनि प्रकारतयान्तर्गतमेव। परिशुद्धजीवस्य प्राप्यान्तर्भावात्। ब्रह्मवाचको यः प्रणवस्तद्रूप उपाय ओमित्येतदित्यनेन प्रतिपादितः।

—७ **पुनरपि प्रणवं प्रशस्येति**। एतद्ध्येवाक्षरं ब्रह्म (क. २।१६) इति श्रुत्येति भावः॥ ६॥ ७॥ (१)

३४९-९ अब्रह्मात्मकत्वेनाभिमतानां कापिलतन्त्रसिद्धानां प्रकृत्यादीनां निरासार्थं प्रथमतः प्रकृत्यादीनां ब्रह्मात्मकत्वं साधयति-**नाब्रह्मात्मकेति**।

—१२-२० **विकारजननीमिति**। भूमिरापोनलो वायुः खं मनो बुद्धिरेव च। अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ (गी. ७।४) इत्युक्तप्रकारेणाष्टरूपाम्। अजामुत्पत्तिरहिताम्। ध्रुवां नाशरहिताम्। ध्यायते परमात्मना संकल्परूपज्ञानेन ज्ञायते। अध्यासिताधिष्ठिता। तन्यते विस्तार्यते स्थूलत्वावस्थं क्रियते समष्टिभूतरूपेण क्रियते। प्रेर्यते व्यष्टिसृष्ट्यर्थं प्रेर्यते। पुरुषार्थं पुरुषाणामर्थनीयं भोगोपकरणभोगस्थानरूपं जगत्सूयते। गौरित्यनेनास्यां प्रकृतौ गोत्वं कल्प्यते। जनित्री समष्टिसृष्टिकरी। भूतभाविनी व्यष्टिसृष्टिकरी। सिताऽसिता च रक्ता च गौण्या वृत्त्या सत्त्वरजस्तमोमयी। यद्वा तेजोबन्नद्वारा सिताऽसिता रक्ता। विभोरीश्वरस्य सर्वकामदुघा लीलारसदोग्ध्री। अविषमां भोक्तृकर्मानुगुणपरिणामित्वादपक्षपातिनीम्। अविज्ञाताः स्वात्मभिर्देहेभ्यो विविच्यापरिज्ञाताः। एकस्त्विति। कर्मवश्यबहुभोक्तृव्यावृत्त्यर्थमेकः स्वच्छन्द इत्युक्तम्। ध्यानक्रियाभ्यां संकल्पसर्गादिव्यापाराभ्याम्। ऐक्षतासृजतेति द्वयमपि हि श्रूयते। पीड्यमानां तु यज्ञभिरिति। वत्सा हि मातरं क्षीरक्षरणार्थं पीडयित्वा भुञ्जते तद्वत्कर्मवश्यैरात्मभिर्भोक्तव्यफलानुरूपं परिणाम्यमानामित्यर्थः। अत्र प्रकृतिपुरुषमहदादीनां स्वरूपमभिहितम्। एषु वाक्येष्वीश्वरप्रतिपादनं प्रधानादीनामीश्वरतादधीन्यविशिष्टत्वपरमिति भावः (श्रु.)।

३५०-३ **षड्विंशकमिति**। कालस्य विशेषणत्वेन प्रकृतितद्विकारेष्वन्तर्भावादिति भावः। कालस्य पृथग्विवक्षया तु सप्तविंशकत्वम् (श्रु.)।

—५ **अष्टौ प्रकृतय इति**। अत्रापि वाक्यान्तरैकार्थ्याद्ब्रह्मात्मकत्वं सिद्धम् (श्रु.)।

—८-१३ **संयुक्तमेतदिति**। ईशः परमात्मा व्यक्तरूपं क्षरमचिद्वर्गमव्यक्तमक्षरं चिद्वर्गं च परस्परसंयुक्तं बिभर्ति न तु बध्यते। अनीशो जीवस्तु बध्यते। नन्वविशिष्टे प्रकृतिसंबन्धे कुत एतद्वैलक्षण्यमित्यत्राह-**भोक्तृभावादिति**। भोक्तृत्वाभिसंधिलक्षणभावसत्त्वात्। परमात्मनस्तु न मां कर्माणि लिम्पन्ति न

मे कर्मफले स्पृहा (गी. ४।१४) इति कर्मफलस्पृहाया अभावेन कर्मफललेपाभावात् । ईशश्चानीशश्चेशानीशौ । ईशनीशाविति पाठे शकंध्वादित्वात्पररूपं बोध्यम् । भोक्तुर्जीवस्य भोगप्रयोजनसाधिकेत्यर्थः । ननु परमात्मनोपि जीववत्फलाभिसंधिपूर्वककर्तृत्वं कुतो न भवतीत्याशङ्क्याह–अनन्त इति । विश्वशरीरकस्य परमात्मनो नान्तं गुणानां गच्छन्ति तेनानन्तोयमुच्यत इत्युक्तरीत्या सत्यकामत्वाद्यनन्तगुणाश्रयतया काम्यमानवस्त्वन्तराभावेन फलाभिसंध्यभावेन फलाभिसंधिपूर्वककर्तृत्वं नास्तीत्यर्थः । एतत्त्रयं परस्परवैलक्षण्येन दर्शनसमानाकारध्यानेन यदा विषयीकरोति तदा ब्रह्म भवति मुक्तो भवतीत्यर्थः । ब्रह्ममिति च्छान्दसं रूपम् । प्रधानशब्दिता प्रकृतिः क्षरमित्युच्यते । भोग्यमात्मनो भोगार्थं हरतीति हरो जीवः । अमृतत्वान्मरणधर्मशून्यत्वादक्षरमित्यर्थः । तादृशचेतनाचेतनयोरीशिता देव एको नारायणः । तस्यारम्भणसंशीलनलक्षणाभिध्यानाद्योजनशब्दिताद्योगात्तत्त्वाविर्भावरूपात्तद्भावाच्च चरमशरीरवियोगकाले समस्तप्रकृतिसंबन्धनिवृत्तिर्भवतीत्यर्थः ।

३५०—१९ अवयवभूतैः । शरीरभूतैः ।

३५१–४–९ प्रकृतिमिति । प्रकृतिपुरुषावुभावन्योन्यसंसृष्टावनादी इति विद्धि । विकारान्बन्धहेतुभूतानिच्छाद्वेषादीन्गुणान्मोक्षहेतुभूतानमानित्वादिकांश्च प्रकृतिसंभवान्विद्धि । पुरुषेण संसृष्टेयमनादिकालप्रवृत्ता क्षेत्राकारपरिणता प्रकृतिः स्वविकारैरिच्छाद्वेषादिभिः पुरुषस्य बन्धहेतुर्भवति । सैवामानित्वादिभिः स्वविकारैः पुरुषस्यापवर्गहेतुर्भवति । कार्यं शरीरम् । कारणानि समनस्कानीन्द्रियाणि । तेषां क्रियाकारित्वे पुरुषाधिष्ठिता प्रकृतिरेव हेतुः । प्रकृतिसंसृष्टः पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः । स्वानुभवैकसुखः पुरुषः प्रकृतिस्थः प्रकृतिसंसृष्टः सन्प्रकृतिजान्प्रकृतिसंसर्गोपाधिकान्गुणान्सत्त्वादिगुणकार्यभूतान्सुखादीननुभवतीत्यर्थः ।

—१६–९ प्रकृतिं स्वामिति । स्वकीयां विचित्रपरिणामिनीं प्रकृतिमवष्टभ्याष्टधा परिणमय्येमं चतुर्विधं देवतिर्यङ्मनुष्यस्थावरात्मकं भूतग्रामं मदीयाया मोहिन्या गुणमय्याः प्रकृतेर्वशादवशं पुनः पुनः कालेकाले विसृजामीत्यर्थः । मयाध्यक्षेणेति । मयाध्यक्षेणेक्षिता प्रकृतिः सचराचरं जगत्सूयते । अनेन क्षेत्रज्ञकर्मानुगुणमदीक्षणेन हेतुना जगद्विपरिवर्तत इत्यर्थः ।

३५२–६ अकार्यत्वेति । ब्रह्मात्मकत्वपक्षे ब्रह्मकार्यत्वाभ्युपगमेनाकार्यत्वासंभवः । तथा तस्याः प्रकृतेर्ब्रह्माधीनत्वेन स्वातन्त्र्यासंभवश्च । सृजमानामिति कर्तरि शानच्प्रत्ययः । कर्तृत्वं च स्वतन्त्रस्यैव । स्वतन्त्रः कर्ता (पा. सु. १।४।५४) इति पाणिनिना प्रतिपाद्यते ।

३५२—१० अजात्वमात्रेति। ब्रह्मात्मकत्वपक्षे ब्रह्मणः सकाशादुत्पन्नाया अप्यजात्वमवस्थाभेदेनास्त्येवेत्यग्रे कल्पनोपदेशात् (ब्र. सू. १।४।१०) इति सूत्रे वक्ष्यते।

—१३ चमसशब्देनेति। चम्यते भक्ष्यतेनेनेति चमसशब्दव्युत्पत्तेरिति भावः।

—१४ अर्थप्रकरणादिभिरिति। अर्थो वस्तुसामर्थ्यम्। आदिशब्देन स्ववाक्यस्थविशेषशब्दसंग्रहः।

—१५ इदं तच्छिर इति। अर्वाग्बिलश्चमस इति मन्त्रेणोच्यमानमिदं तदेव शिरः प्रसिद्धमेव शिरः। कण्ठादुपरिभाग इति यावत्। किं तदित्याह—एष इति। चम्यतेनेनेति चमसो भक्षणसाधनम्। एष मुखरूपश्चमसः। आस्यस्य बिलरूपत्वादर्वाग्बिलत्वं शिरसः। ऊर्ध्वस्थूलभागरूपवृक्षाकारत्वादूर्ध्ववृक्षत्वम्। लोके हि प्रसिद्धश्चमस ऊर्ध्वबिलस्तिर्यग्वृक्षः। अयं तु विलक्षणश्चमस इति भावः।

३५३-३ स्रष्टृत्वमात्रेति। स्वतन्त्रः कर्तेत्यत्र स्वातन्त्र्यं च स्वव्यापाराश्रयत्वमेव न स्वपरप्रेर्यत्वरूपम्। रथो गच्छतीत्यादौ रथादेस्तदभावादित्याशयः॥ ८॥

—६ ज्योतिरुपक्रमेति। ज्योतिर्ब्रह्मोपक्रमः कारणं यस्या इत्यर्थः।

—१८ तत उत्पन्नाभिधीयत इति। यद्यप्यजामेकामिति श्रुतावुत्पत्तिर्नाभिहिता तथाप्युत्पत्तिप्रकरणादुत्पत्तिः सिद्धैवेति बोध्यम्।

३५४-१० इहापीति। श्वेताश्वतरोपनिषदीत्यर्थः।

—१८ योनिमिति। जगद्योनिभूतां प्रकृतिमित्यर्थः॥ ९॥

३५५-१ कथमिति। सकारणकत्वाकार्यत्वयोर्विरोध इति भावः।

—६ यथा सूर्येति। सूर्याचन्द्रमसाविति श्रुतौ यथा क्लृपधातुः सृष्ट्यर्थको गृहीतस्तथात्र सूत्रेपि गृह्यते। तथा च कल्पनोपदेशादित्यस्य सृष्ट्युपदेशादित्यर्थः।

—९ स्वेनाविभक्तादिति। स्वशरीरभूतादित्यर्थः। शरीरशरीरिणोर्विभागेन परिज्ञानासंभवादविभक्तादित्युक्तम्।

—११ कल्पनोपदेशेनेति। सृष्ट्युपदेशेनेत्यर्थः।

—१२ ब्रह्मतापन्ना। कारणावस्थब्रह्मशरीरभूता।

—१७ यथेश्वरेणेति। यथादित्यस्यैकस्यावस्थाद्वयेनोदयास्तमयमधुत्वकल्पनानि (श्रीभाष्य- पृ. ३२०) तदभावश्चोपपद्यते तथैकस्याः प्रकृतेरवस्थाद्वयेनाजात्वं ब्रह्मकारणकत्वं चोपपद्यत इत्यर्थः।

३५६-६ शंकराचार्यकृतं ज्योतिरुपक्रमेति सूत्रार्थं दूषयति-अन्ये त्विति। ज्योतिस्तेज उपक्रम आदौ यस्यास्तेजोबन्नलक्षणायाः सा ज्योतिरुपक्रमा। सैवेहाजा

निर्धारणीया न प्रधानम् । यत एके छन्दोगा यदग्ने रोहितं रूपम् (छा. ६।४।१) इत्यादिना तेजोबन्नात्मिकाया भौतिककार्यप्रकृतेस्तथा लोहितादिरूपतामधीयत इति तन्मते सूत्रार्थः ।

३५६—७ **किं तेजोवन्नान्येवेति** । एकाजात्वेन परिकल्प्यमानं वस्तु किं तेजोबन्नान्येवेत्यर्थः ।

—१४ **किं तेजोबन्नरूपेणेति** । ब्रह्मणो विकारास्तेजोबन्नरूपाः किमजाशब्देनोच्यन्तेथ वा प्रकृतिभूतं ब्रह्मस्वरूपमित्यर्थः ।

—१८ **तृतीय इति** । यद्यप्यस्मिन्पक्षेजाशब्देन तेजोबन्नकारणभूतावस्थायाः परिग्रहेण लोहितशुक्लकृष्णत्वमजात्वमेकत्वं चोपपद्यते तथाप्यजाशब्देन कारणावस्थायाः परंपरया परिग्रहे बीजाभाव इत्याशयः ।

३५७–३ शंकराचार्यकृतं कल्पनोपदेशादिति सूत्रार्थं खण्डयति–**यत्पुनरिति** । छागत्वपरिकल्पनमिति । यथा हि लोके यदृच्छया काचिदजा लोहितशुक्लकृष्णवर्णा स्याद्बहुवर्करा सरूपवर्करा च । तां च कश्चिदजो जुषमाणोनुशयीत कश्चिच्चैनां भुक्तभोगां जह्यादेवमियमपि तेजोबन्नलक्षणा भूतप्रकृतिस्त्रिवर्णा बहु सरूपं विकारजातं चराचरलक्षणं जनयति । अविदुषा क्षेत्रज्ञेनोपभुज्यते विदुषा च परित्यज्यते । तथा चाजासारूप्यादजात्वं कल्प्यत इति भावः ।

—११ **अत्यल्पेति** । अत्यल्पप्रजासर्गकरत्वं चेतनविशेषरूपायाश्छागायाः स्वभावः । अयं च प्रकृतिनिष्ठस्य कृत्स्नजगत्कारणत्वस्य प्रत्यनीकभूतः । तथागन्तुकः संगमः संबन्धो येषामेतादृशा ये चेतनविशेषा बालच्छागास्तेषां दुर्धैकरूपं यदत्यल्पं प्रयोजनं तत्साधनत्वरूपो द्वितीयः स्वभावः । अयं चानादिकालसंबद्धानां सर्वेषामेव चेतनानां निखिलसुखदुःखोपभोगापवर्गसाधनत्वस्य प्रत्यनीकभूतः । तथा स्वपरित्यागस्य हेतुभूतो यः स्वसंबन्धिपरित्यागस्तत्समर्थत्वरूपस्तृतीयः स्वभावः । अयं चाचेतनत्वस्य प्रत्यनीकभूतः । चेतनाया एव स्वसंबन्धिपरित्यागसमर्थत्वात् ।

—१५ **विरूपार्थपरिकल्पनम्** । एकार्थग्रहणम् ॥ १० ॥ (२)

३५८–१ **न संख्येति** । नानाभावः पृथग्भावो न बहुत्वम् । अतिरेकः संख्याधिक्यम् ।

—१० **लिङ्गव्यत्ययश्छान्दस इति** । अन्यथा समाहारद्विगोरकारान्तस्य स्त्रीत्वेन पञ्चजनीति स्यात् ।

—१६ **मूलप्रकृतिरिति** । जगतो मूलभूता प्रकृतिस्त्रिगुणात्मकं प्रधानमनादित्वादविकृतिः । कस्यचित्कार्यं न भवतीत्यर्थः । महदहंकारपञ्चतन्मात्रा-

णीति सप्त प्रकृतयो विकृतयश्च । भूतानामव्यवहितसूक्ष्मावस्थाविशिष्टं द्रव्यं तन्मात्रशब्देनोच्यते । तत्र महान्प्रधानस्य विकृतिरहंकारस्य प्रकृतिः । अहंकारस्तामसः पञ्चतन्मात्राणां शब्दादीनां प्रकृतिः । सात्त्विकस्त्वेकादशेन्द्रियाणां प्रकृतिः । पञ्चतन्मात्राणि पञ्चानां स्थूलभूतानां प्रकृतयः । पञ्च स्थूलभूतानि पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चेति षोडशसंख्याको गणो विकार एव न प्रकृतिः । तत्त्वान्तरोपादानत्वाभावात् । पुरुषस्तूदासीन इति तत्कारिकार्थः । न चैतत्कारिकोक्तपञ्चविंशतितत्त्वान्तर्गतयोरात्माकाशयोर्यस्मिन्पञ्च पञ्चजना इति मन्त्रे यस्मिन्नित्यनेनाकाशशब्देन चाभिधानादवशिष्टानां तत्त्वानां त्रयोविंशतित्वमेव न पञ्चविंशतित्वमिति वाच्यम् । त्रिगुणात्मकप्रकृतेरेकस्या अप्युद्भूतावयवभेदविवक्षया तत्त्वत्रयरूपत्वेन पञ्चविंशतिसंख्योपपत्तेः ।

३५९-२ **प्रतीयत इति** । तथा च तत्रसिद्धानां पञ्चविंशतितत्त्वानामब्रह्मात्मकत्वान्नेह तेषां ग्रहणमिति भावः ।

—४ **तमिति परामर्शेनेति** । तमिति परामर्शं कृत्वाग्रे ब्रह्मामृतोमृतमिति निर्दिष्टत्वेनेत्यर्थः ।

—८ **तं षड्विंशकमिति** । प्राग्व्याख्यातम् (श्रीभाष्य-पृ. ३५० प. ३) ।

—१७ **समूहासिद्धेरिति** । किं च प्रकृतेरिव महदहंकारयोरपि सात्त्विकादिभेदेन प्रत्येकं त्रिविधत्वात्तत्त्वानामेकोनत्रिंशत्संख्या स्यान्न तु पञ्चविंशतिः । किं चाकाशस्य पृथगुक्तिरनुपपन्ना । न चाकाशस्य वैपुल्यगुणविशिष्टत्वेन तदादरार्थं ब्राह्मणवसिष्ठन्यायेन पृथगुक्तिरिति वाच्यम् । आकाशादपि तत्कारणीभूतानां तत्त्वानां वैपुल्येन तदनादरेणाकाशस्य पृथगुक्त्यनुपपत्तेः ।

३६०-१ **पञ्चसंख्यया विशेष्यन्त इति** । ननु पञ्चजनशब्दावयवीभूतपञ्चन्निति शब्देन पञ्चत्वसंख्याप्रतिपत्तौ पुनः पञ्चेति विशेषणं किमर्थमिति चेत्सत्यम् । पञ्चजनशब्दस्य संज्ञात्वेन तदवयवीभूतपञ्चन्निति शब्देन पञ्चत्वसंख्याया उपलक्षणतयैव भानं संज्ञिप्रतिपत्त्यर्थं भवति न तु विशेषणतया । तथा च विशेषणतया भानार्थं पुनः पञ्चन्निति शब्दस्यावश्यकत्वान्न पुनरुक्तिः । यथा संज्ञाभूतगोशब्दावयवीभूतगम्धातुना गमनक्रियाया भानेपि तस्या उपलक्षणत्वेन भानान्न गौर्गच्छतीति पुनरुक्तिस्तद्वत् । अत एव गौस्तिष्ठतीत्यत्र न व्याघात इति बोध्यम् ॥ ११ ॥ १२ ॥

—१२ **ज्योतिषेति** । ज्योतिषां ज्योतिरिति पूर्ववाक्यस्थज्योतिषामिति षष्ठ्यन्तज्योतिःशब्देनेत्यर्थः । ज्योतिषां प्रकाशकानामिन्द्रियाणां ज्योतिः प्रकाशकं ब्रह्मेति तदर्थः । तथा च ज्योतिःशब्देनेन्द्रियाणामभिधानादुत्तरवाक्यस्थपञ्चजनशब्देन पञ्च ज्ञानेन्द्रियाणि गृह्यन्त इति पञ्चत्वसंख्यापूर्तिः सिध्यति । यद्यपि

प्राणस्य प्राणमिति वाक्यशेषे चत्वार्येवोक्तानि तथापि स वाक्यशेषः प्रदर्शनार्थत्वेन नेय इति भावः।

३६०—१८ ब्रह्माधीनेति। अनेन प्राणस्य प्राणमित्यादेरर्थ उक्तः (श्रु.)।

—२० अनिर्धारितेति। यस्मिन्पञ्चेति मन्त्रे प्रकाशकानि पञ्च प्रतिपादितानि। तानि च प्रसिद्धानि पञ्च ज्ञानेन्द्रियाण्येव। न तु सूर्यादीनां प्रकाशकानामत्र ग्रहणम्। तेषां विशेषतो निर्देशाभावात्। न चेन्द्रियाणां ग्रहणेऽग्रे प्राणस्य प्राणमित्यत्र प्राणान्नयोरनिन्द्रिययोः किमर्थमुपादानमिति वाच्यम्। तत्र प्राणशब्देनान्नशब्देन चेन्द्रियाणामेव ग्रहणात्।

३६१–४ अन्नस्येतीति। सर्वशाखाप्रत्ययन्यायेन काण्वानां पाठेप्यन्नशब्दपाठो ग्राह्य एवेति बोध्यम्।

—६ घ्राणरसनयोरिति। यद्यपीन्द्रियाणां मनसा सह षट्त्वं तथाप्यन्नशब्देन घ्राणरसनयोस्त्रेणोपादानेन तयोरन्नत्वेनैक्यात्पञ्चत्वमपि वर्तत इति न पञ्च पञ्चजना इत्यनेन विरोध इति भावः॥ १३॥ (३)

३६२–२ स्रष्टुरव्यवस्थितेरिति। सर्वेषु जगदुत्पत्तिप्रतिपादकवाक्येषूत्पादकस्यैकरूपेण प्रतिपादनाभावादित्यर्थः।

—९ स्वरूपनित्यत्वेनेति। प्रधानस्य स्वरूपेण नित्यत्वात्सच्छब्दवाच्यत्वमिति न सदेव सोम्येति श्रुतिविरोधः। तथा परिणामाश्रयत्वेन विकारित्वादसच्छब्दवाच्यत्वमिति नासद्वा इदमिति श्रुतिविरोधः। ब्रह्मणस्त्वसच्छब्दवाच्यत्वाभावेन विरोधः स्यादेव। ब्रह्मणीवेति वैधर्म्यदृष्टान्तः। यथा ब्रह्मणि सदसच्छब्दौ विरुद्धौ न तथा प्रधान इत्यर्थः।

—११ ईक्षणादय इति। आदिशब्देन पूर्वाकारपर्यालोचनाप्रयत्नयोर्ग्रहणम्। सृष्ट्यौन्मुख्येति। तदैक्षतेत्यस्य तत्प्रधानं सृष्ट्युन्मुखमभूदित्यर्थः। यथा कूलं पिपतिषतीत्यस्य कूलं पतनोन्मुखं भवतीत्यर्थस्तद्वत्।

—१८ आकाशादिषु कारणत्वेनेति। आकाशादीनां कारणत्वेनेत्यर्थः। अथ वाकाशादिपदचिह्नितेषु तस्माद्वा एतस्मादात्मन आकाश इत्यादिवाक्येषु कारणत्वेनोक्तेरित्यर्थः॥ १४॥

३६४–२ अतोयमिति। अतः पूर्वत्र परत्र च ब्रह्मणः प्रतिपादनादयं मध्यपठितोऽसद्वेति मन्त्रो ब्रह्मविषय एवेत्यर्थः।

—१९ स्वयमेवेति। तन्नामरूपाभ्यामेव व्याक्रियतेति श्रुतौ व्याक्रियतेति कर्मकर्तरि प्रयोगः। कर्त्रन्तराक्षेपे गौरवात्तदात्मानं स्वयमकुरुतेत्यनेनैकार्थ्याच्च। एवकारश्च भिन्नक्रमः। तन्नामरूपाभ्यां स्वयमेव व्याक्रियतेत्यर्थः। नन्वव्याकृतमासीदिति क्तप्रत्ययः कर्मण्येव न तु कर्मकर्तरि। तत्र कर्मवत्कर्मणा

तुल्यक्रियः (पा. सू. ३।१।८७) इति सूत्रेण विहितस्य कर्मवद्भावस्याप्राप्तेः। लकारवाच्य एव कर्ता कर्मवदिति तदर्थेन तिङन्त एव तत्प्रवृत्तेः। तथा चाख्याकृतमित्यनेनावैरूप्याय व्याक्रियतेत्यपि कर्मणि प्रयोग एवास्त्विति चेन्न। एवकारेण कर्त्रन्तरस्य व्यवच्छेदात्कर्त्रन्तराक्षेपे गौरवाच्च व्याक्रियतेति प्रयोगस्य कर्मकर्तर्येवाभ्युपगन्तव्यत्वाद्वैरूप्यस्यापि सोढव्यत्वात्।

३६४–२० ब्रह्मात्मशब्दावपीत्यादि पूर्वपक्ष्युक्तं (श्रीभाष्य–पृ. ३६२ प. १२) खण्डयति–ब्रह्मात्मशब्दावपीति ॥ १५ ॥ (४)

३६५–८ ब्रह्म त इति। गार्ग्यगोत्रेण बलाकपुत्रेण ब्रह्माजानता बालाकिना काशीराजं ब्रह्मज्ञानिनमजातशत्रुनामानं प्रति ब्रह्म ते ब्रवाणीत्युक्त्वा तत आदित्याद्यन्तर्गताः पुरुषा ब्रह्मत्वेनोपदिष्टाः। ततोजातशत्रुरुक्तवान्–हे बालाके त्वया ब्रह्म ते ब्रवाणीति मृषोक्तम्। अब्रह्मवाद एव त्वया कृतः। त्वया ब्रह्मत्वेन ये पुरुषा उपदिष्टा एतेषां पुरुषाणां यः कर्ता। एते यत्कार्यभूताः। किं विशिष्याभिधीयते यस्यैतत्प्रत्यक्षादिसंनिधापितं जगत्कार्यम्। क्रियत इति व्युत्पत्त्या कर्मशब्दः कार्यवाची। स एव वेदितव्यो न तु त्वदुपन्यस्ता आदित्यादय इति सिद्धान्ते श्रुत्यर्थः। कर्मशब्देन पुण्यपापलक्षणं कर्म गृह्यते। तत्संबन्धादत्र वेदितव्यतयोपक्षिप्तो जीव एव गृह्यते। स एव ब्रह्म न तदतिरिक्त ईश्वरः। यष्टिघातोत्थापनश्रेष्ठिदृष्टान्तसुपुप्तिप्रबोधादियोगप्रदर्शनादिति तु पूर्वपक्षिमतम्।

—१८ पूर्वपक्षिमतेनोत्तरमाह–यो वै बालाक इति। पुरुषाणां जगदन्तर्गतत्वेन यस्य चैतत्कर्मेत्येतावतैव सिद्धे य एतेषां पुरुषाणां कर्तेति पृथङ्निर्देशस्य वैयर्थ्यमिति भावः।

३६६–१ भोक्तुरेवेति। जडस्येव पुरुषाणामपि पुरुषान्तरभोग्यभोगोपकरणत्वेन पुरुषान्तरस्य भोक्तुर्भोग्यभोगोपकरणभूतपुरुषकारणत्वमस्त्येवेत्याशयः।

—५ तौ हेति। ब्रह्मज्ञानार्थमुपसन्नं बालाकिं गृहीत्वाजातशत्रुर्ब्रह्मादिदर्शयिषया क्वचित्सुप्तपुरुषसकाशं गत्वा तं प्राणनामभिरामत्रयामास। आमन्त्रणेनानुत्थितं यष्टिघातेनोत्थापयामास। अत्र प्राणेभ्यः सुषुप्तिदशायामुपरतव्यापारेभ्यः शरीरेन्द्रियेभ्यश्च यो व्यतिरेकः प्रदर्शितः स जीवस्यैवेति जीवब्रह्मवादः सिध्यति।

—८ श्रेष्ठीति। यथा श्रेष्ठी कश्चित्प्रभुः स्वैर्भोगोपकरणभूतैर्जनैर्यथा भोगान्भुङ्क्ते यथा वा स्वकीया जनास्तं प्रभुमैश्वर्यादिसंपन्नमनुभूय तदत्तवित्तादीनि चोपजीव्य हृष्यन्त्येवमेवायं परमात्मा स्वोपकरणभूतैर्जीवात्मभिर्लीलारसं भुङ्क्ते ते च जीवात्मानः परमात्मदत्तभोगोपकरणाः सर्वैश्वर्यादिविशिष्टं तमनुभूय हृष्टा भवन्तीति सिद्धान्तेर्थः। पूर्वपक्षिमते तु प्रज्ञात्मपदेन जीव एव गृह्यते। दृष्टान्तदार्ष्टान्तिकयोः साम्यात्। तथा च जीवात्मानः परस्परदत्तभोगोपकरणा भोगान्भुञ्जत इत्यर्थः।

३६६-१० **तथा क्वैष इति**। सुप्तं पुरुषं दर्शयित्वा ततोजातशत्रुरुवाच हे बालाक एष पुरुषः क्वाशयिष्टेति स्वप्नस्थानप्रश्नः। एतदेष जीवः सुषुप्तौ क्वाभूदिति सुषुप्तिस्थानप्रश्नः। तथैतदेष जीवः कुत आगादिति जागृतौ जीवोद्गमनाप्पादानप्रश्नः। आत्मनो हितावहत्वाद्धिता इति प्रसिद्धा हृदयसंबन्धिन्यो नाड्यो हृदयात्पुरीतदाख्यं हृदयान्तर्वर्तिमांसपिण्डविशेषमभिप्रस्थितास्तासु स्वप्नकाल आश्रितो भवति। यदा सुप्तः सन्स्वप्नदर्शनोपरतो भवति तदा प्राणे प्राणशरीरके परमात्मन्येकधा भवति। एकधाभावो नाम रागद्वेषादिलक्षणकालुष्यराहित्येनावस्थानं न त्वैक्यम्। तत एनं परमात्मानमपियन्तं जीवं वागादीन्द्रियाणि स्वकार्येण सहापियन्ति। जागृतौ त्वग्नेर्विस्फुलिङ्गा इवैतस्मात्परमात्मनः प्राणशब्दिता जीवा यथास्थानं प्रस्थिता भवन्ति तेभ्यश्च देवशब्दितानीन्द्रियाणि तेभ्यश्च लोकशब्दितानि ज्ञानानि भवन्तीति सिद्धान्ते श्रुत्यर्थः। पूर्वपक्षिमते त्वस्मिन्प्राण एवैकधेत्यत्र प्राणशब्दस्य प्राणभृज्जीव एवार्थः। तस्मिन्नेकधाभावश्चेन्द्रियाणामेव। सुषुप्तिस्थानं तु नाड्य एव। एतस्मादात्मनः प्राणा इत्यत्र प्राणशब्दः पञ्चवृत्तिप्राणपरः।

३६७-१३ **प्रकृतिधर्माध्यासेनेति**। स्वस्मिन्प्रकृतिगतकर्तृत्वाध्यासेनेत्यर्थः।

—१७-८ **अर्थप्रकरणादिभिरिति**। अर्थशब्देन स्ववाक्यस्थपदान्तरान्वययोग्यत्वं विवक्षितम्। असंकुचितवृत्तिरिति। लिङ्गवचनविरोधात्पुरुषपरामर्शोनुपपन्नः। पुण्यपापरूपं कर्म त्वप्रकृतमेव।

३६८-७ **क्रियामात्रवाची वेति**। वाशब्द इवार्थे। यथाजातशत्रोर्बालाक्यविदितपुरुषज्ञापने प्रवृत्तत्वादत्र कर्मशब्दो न क्रियामात्रवाची तथा न पुण्यापुण्यमात्रवाचीत्यर्थः।

—९-१२ **पुरुषस्येति**। नन्वत्र वेदितव्यतया जीव एवोपन्यस्यते। यद्यपि जीवः प्रसिद्धत्वाद्विदित एव तथापि स कर्मसंबन्धवत्त्वेन प्रसिद्धः स्वाभाविकस्वरूपेणाप्रसिद्ध एवेति चेन्न। यस्य वैतत्कर्मेति कर्मसंबन्धबोधकवाक्यस्य कर्मरहितस्वाभाविकस्वरूपबोधकत्वाङ्गीकारे लक्षणापत्तेः। यस्य कर्मेत्येतावतैव लाक्षणिकार्थप्रहणे सिद्ध एतच्छब्दवैयर्थ्यं च स्यादिति भावः।

—१२ **पृथङ्निर्देशवैयर्थ्यादिति पूर्वपक्ष्युक्तं (श्रीभाष्य-पृ. ३६५ प. १९) खण्डयति-य एतेषामिति**। य एतेषां कर्तेत्युक्तावेतच्छब्देनादित्यादिपरामर्शात्तत्कर्तृत्वसिद्धावपि तदधिकहिरण्यगर्भादिकर्तृत्वं न सिध्यतीत्यतो यस्य चैतत्कर्मेत्युक्तमिति भावः।

३६९-२ **न तस्येति**। न हि घटादिकर्तृत्वं विनियोगाहृष्टवतः पुरुषस्यापि तु

कुलालस्यैव । तथा चात्र जीवो वेदितव्यतयोपक्रान्त इति पूर्वपक्षिमते य एतेषां पुरुषाणां कर्तेत्यस्यासंगतिरिति बोध्यम् ॥ १६ ॥

३६९-५ **जीवेति** । एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्त इत्यादिभोक्तृत्वरूपजीवलिङ्गादथास्मिन्प्राण एवैकधा भवतीति मुख्यप्राणलिङ्गाच्च नायं परमात्मेति चेत्तद्व्याख्यातं तस्य परिहारः प्रतर्दनविद्यायामेव व्याख्यात इति सूत्रार्थः ।

—१४ **सर्वान्पाप्मन इति** । पाप्मनः पातकानि कालजरामृत्युशोकादीन्वा । स्वाराज्यं स्वाधीनत्वमकर्मवश्यत्वम् । आधिपत्यं सर्वभूतश्रेष्ठ्यम् । अधिपतिः परमात्मा तस्येदमाधिपत्यमपहतपाप्मत्वादिगुणाष्टकमिति वा । मुक्तो भवतीति फलितार्थः ॥ १७ ॥

३७०-४ **तुशब्द इति** । तुशब्दो न पूर्वसूत्रोक्तप्राणलिङ्गनिर्वाहव्यावृत्त्यर्थः । किं तु पूर्वपक्षव्यावृत्त्यर्थ इति भावः ।

—६ **जैमिनिराचार्य इति** । जैमिनिग्रहणमुक्तस्यार्थस्य पूज्यत्वायेत्याशयः ।

३७१-८ **एकतापत्तीति** । सुषुप्तावेकतापत्तिर्जागृतौ विभाग इति बोध्यम् ॥ १८ ॥ (५)

—२२ **वाक्यान्वयादिति** । आत्मा वा अर इत्यादिवाक्ये द्रष्टव्यतया निर्दिष्ट आत्मा परमात्मैव । वाक्यस्य कृत्स्नस्य परमात्मन्येवान्वयादिति सूत्रार्थः ।

३७२-३ **न वा अर इति** । कामः संकल्पः । कामायेति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा. सू. २।३।१४) इति सूत्रेण चतुर्थी । अहमस्याः प्रियः स्यामित्याकारकं पत्युः संकल्पं सफलीकर्तुं न जायायाः पतिः प्रियो भवति किं तु परमात्मनः संकल्पं सफलीकर्तुमेव । पतिसंकल्पायत्तं न पतिप्रियत्वं किं तु परमात्मसंकल्पायत्तमिति सिद्धान्ते श्रुत्यर्थः । पूर्वपक्षिमते त्वात्मशब्देन जीवात्मनो ग्रहणम् । तथा च जायायाः स्वसंकल्पेनैव पतिः प्रियो भवतीत्यर्थः ।

—१० **तन्त्रसिद्धपुरुष इति** । भोक्ता जीवात्मेत्यर्थः । निरीश्वरसांख्या हीश्वरं नाङ्गीकुर्वन्ति ।

—१३ **विज्ञानघन इति** । विज्ञानघनो जीवः । भूतशब्देन पञ्चमहाभूतात्मकं शरीरमुच्यते । देहोत्पत्तिविनाशानुविधाय्युत्पादविनाशवाञ्जीवः । अत्र विनाशोत्यन्तज्ञानसंकोचः । उत्पत्तिर्नाम ज्ञानविकाशप्रादुर्भावः । तस्य मरणोत्तरं मनुष्यपश्वादिसंज्ञा नास्तीति पूर्वपक्षिमते श्रुत्यर्थः । सिद्धान्ते तु विज्ञानघनशब्देन जीवशरीरकः परमात्मोच्यते । तस्य देहान्तर्यामिजीवान्तर्यामित्वेन देहस्योत्पत्तिविनाशौ तत्रोपचरितावितिं बोध्यम् ।

—२१ **अत एव** । अमृतत्वप्राप्त्युपायोपदेशपरत्वादेव ।

३७३-४ **एकरूपम्**। ज्ञानैकप्रकारकम्।

—८ **सर्वं तमिति**। अस्यार्थः प्रागुक्तः (विवृति-पृ. १०२ प. २७)। सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेत्यत्रात्मनोन्यत्वदर्शनं नाम निष्कृष्टस्वरूपव्यतिरिक्तदेवाद्याकारदर्शनमिति तस्यानर्थहेतुत्वमत्रोच्यत इत्याशयः।

—९ **यत्र हीति**। अनात्माकाराणां देवत्वादीनां बहुत्वादेकाकार आत्मनि देवत्वादीनि न सन्तीति निषिध्यत इत्यर्थः।

—११ **तस्य ह वा इति**। यद्यपि सांख्यमते पुरुषस्योदासीनत्वेन तस्यर्ग्वेदादिकारणत्वं न संभवति तथापि पुरुषाधिष्ठितप्रधानादाकाशगुणशब्दोत्पत्तिरिति तस्यर्ग्वेदादिकारणत्वमुपपद्यते।

३७४-८ **ननु यदि जीवस्वरूपज्ञानं न मोक्षसाधनं तर्हि किमर्थं प्रजापतिवाक्ये जीवस्वरूपं प्रतिपाद्यत इति चेत्तत्राह-परमपुरुषेति**। जीवस्य स्वस्वरूपयाथात्म्यविज्ञानवत एव परमात्मज्ञानेधिकार इति भावः।

—१४ **कर्मपरवशस्येति**। तथा च तस्य सर्वज्ञत्वाद्ययोगान्न जगत्कारणत्वम्। मुक्तस्यापि न। तस्य जगद्व्यापारवर्जमित्युक्तत्वात्। सांख्यमते सर्वेषामेव जीवानामुदासीनत्वेन निर्व्यापारत्वाच्च।

३७५-१ **एतदिति**। इदमिति निर्दिष्टं जगदित्यर्थः।

—३ **पुरुषेण**। जीवेन। न हि जीवेन सह जगदैक्यमुपगच्छति। किं तु परमात्मनैव। तदपि सूक्ष्मचिदचिद्वस्तुशरीरकस्य परमात्मनः स्थूलचिदचिद्वस्तुशरीरकत्वेन परिणामाद्बोध्यम्।

—४ **अत एवेति**। सर्वस्य परमात्मात्मकत्वादेवातदात्मकानुसंधाननिषेधः। न तु देवादिदृष्टिनिषेधः। देवादिशरीराणां सत्यत्वात्।

—१३ **अनन्वयप्रसङ्गादिति**। न चेष्टापत्तिरिति वाच्यम्। वाक्यमहिम्नान्वयस्य प्रतीतेः। यत आत्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्य इत्युक्त आत्मनस्तु कामायेत्यस्यात्मनो द्रष्टव्यतोपयोगित्वं स्वरसतः प्रतीयते।

-१८-९ **न त्विति**। यस्य प्रियं स शेषी। तस्य जीवस्य तादृशपत्यादिप्रियवियुक्तं स्वरूपमन्वेष्टव्यं न भवति। प्रियस्य प्रियसंयुक्तशेषिणो वान्वेष्टव्यत्वात्।

३७६-१ **न पत्यादीति**। अनेन न पत्युः कामाय पतिः प्रियो भवतीत्यस्यार्थः संगृहीतः।

—४ **परेण**। आत्मा वा अरे द्रष्टव्य इत्यादिवाक्येन। वाक्यस्वारस्येन प्रतीतस्याप्यन्वयस्य त्याग एकवाक्यताया अभावेन वाक्यभेदप्रसङ्ग इति भावः।

—१६-७ **मत्प्रयोजनाय**। स्वसंकल्पसाफल्याय। **अपि त्वात्मनः कामायेति**। परमात्मसंकल्पानुसारेणेत्यर्थः।

३७६–१९ **प्रतिनियतेति** । कस्यचिज्जीवस्य स्वक्चन्दनादिभोग्यमस्मिन्देश एव न सर्वत्रेति देशनियमः। तथास्मिन्नेव काले न सर्वदेति कालनियमः । अस्येदमेव भोग्यं नान्यदिति स्वरूपनियमः । किंचिद्वस्तु परिमाणविशेषविशिष्टमेव कस्यचिद्भोग्यं भवति न तदपेक्षया महदल्पं वा । यथा यावती स्वर्देवभोग्या न तावती मनुष्यभोग्येति परिमाणनियमः ।

३७७–१५ आत्मनस्तु कामायेत्यात्मशब्दस्य परमात्मवाचकत्वं जीवात्मवाचकत्वं च गृहीत्वा श्रुतेरर्थद्वयं यत्प्रतिपादितं तत्र प्रथमार्थ एव श्रेयानित्याह· **अस्मिन्नि**त्वति । आत्मशब्दद्वयस्यैकार्थकत्वाच्छ्रेयस्त्वम् । जीवात्मवाचिशब्देन परमात्मनोभिधानं तु जीवात्मनः परमात्मशरीरत्वाद्वोध्यम् ॥ १९ ॥

—१९ **मतान्तरेणापीति** । ये जीवात्मनः परमात्मशरीरत्वं न मन्यन्ते तेषामपि मते जीवात्मवाचिशब्देन परमात्मनोभिधानं सुवचमिति सूत्रद्वयेन सूत्रकारः प्रदर्शयतीत्यर्थः ।

३७८–१ **प्रतिज्ञेति** । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धये जीवस्य परमात्मकार्यत्वाङ्गीकारेण परमात्मनोनन्यो जीव इति जीवशब्देन परमात्मनोभिधानम् । प्रतिज्ञोपपादकं यत्कार्यकारणभावकृतमैक्यं तस्य लिङ्गं जीवात्मवाचिशब्देन परमात्माभिधानमित्याश्मरथ्यमतम् ॥ २० ॥

—१७ **तदयुक्तमिति** । अजत्वश्रुतिविरोधः १ अकृताभ्यागमकृतविप्रणाशप्रसङ्गः २ फलभोगार्थसृष्टिविरोधः ३ उपायानुष्ठानवैयर्थ्यम् ४ अपुरुषार्थता ५ चेति दूषणपञ्चकसत्त्वाज्जीवोत्पत्तिवादासंभवादाश्मरथ्यमतमयुक्तमिति भावः ॥ २१ ॥

३७९–१५ **अनेवंभावः** । ब्रह्मत्वाभावः । ब्रह्मप्रतियोगिकभेद इति यावत् । स्वाभाविकः स्वरूपप्रयुक्त उतौपाधिकः । औपाधिकपक्षेपि तस्यौपाधिकभेदस्य पारमार्थिकत्वमुतापारमार्थिकत्वमिति विकल्पः ।

—१७ **भेदस्येति** । ब्रह्मप्रतियोगिकभेदस्य स्वरूपप्रयुक्तत्वे जीवस्य यावत्स्वरूपस्थितिस्तावत्तत्र ब्रह्मप्रतियोगिकभेदस्यानपाय एव । भेदे च विद्यमाने ब्रह्मभावो जीवस्य सुतरां वक्तुमशक्यः ।

—१८ **विनष्टत्वादेवेति** । वस्तुनः स्वरूपस्य विनाशे वस्तुनो विनाशस्यावश्यंभावात् ।

—२० **पारमार्थिकेति** । औपाधिकस्य भेदस्य पारमार्थिकत्वे भेदस्योपाधिनिष्ठत्वेनोपाधिव्यतिरिक्तस्य ब्रह्मभेदो नास्तीत्युत्क्रान्तेः पूर्वमपि तस्य ब्रह्मत्वमेवेत्याशयः ।

३८०–१० **अथ स्वमतेन श्रुतितात्पर्यमाह–अस्माच्छरीरादिति** ।

३८०–१३ संपद्येति । परं ज्योतिरुपसंपद्य जीवस्य स्वस्वरूपाविर्भावो भवति । स्वेन रूपेणाभिनिष्पद्यत इति स्वेनेति शब्दादिति सूत्रार्थः ।

—१४ सूत्रं व्याचष्टे–अतोनेनेति ।

३८१–६–७ सर्वज्ञत्वादीति । आदिशब्देन विरजस्त्वसर्वशक्तित्वादिसंग्रहः । ब्रह्मोपासनान्मोक्षवादिन्य इति । ताश्च जीवब्रह्मभेदप्रतिपादिकाः । आत्मशरीरभावेन ब्रह्मजीवयोस्तादात्म्ये स्वीकृते द्विविधा अपि श्रुतयः प्रत्यक्षादिप्रमाणाविरोधेन परस्परविरोधेन च सम्यगुपपादिता भवन्तीति तात्पर्यम् ।

—१३–३८२–१२ आत्मनि खल्वर इति । आत्मनि खल्वरे दृष्टे मते विदित इदं सर्वं विदितं भवतीत्यात्मविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञोक्ता । तया च जगदुपादानत्वरूपं ब्रह्मलक्षणं सिध्यति । जगदुपादानत्वमन्तरेण सर्वविज्ञानासंभवात् । दुन्दुभ्यादीति । स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इति श्रुतिः । अत्र ग्रहधातुर्निरोधार्थकः । गृहीतश्चोर इति यथा । दुन्दुभेरित्यनादरे षष्ठी । यथा दुन्दुभौ हन्यमाने सति तदनादरं कृत्वा ततो बहिर्निःसरतः शब्दान्निरोद्धुं न शक्नुयात्किं तु दुन्दुभिनिरोधेन हन्तृपुरुषनिरोधेन वा शब्दो निरुद्धो भवति । तथेन्द्रियेषु व्याप्रियमाणेषु बाह्यार्थज्ञानं दुर्निरोधम् । किं त्विन्द्रियनिरोधेन तत्प्रवृत्तिमूलभूतस्य मनसो निरोधेन च परमात्मसाक्षात्कारविरोधि बाह्यार्थज्ञानं निरुध्यत इति तदर्थः । स यथार्द्रैधाग्नेरिति । स यथार्द्रैधाग्नेरित्यादिनोपास्यभूतस्य परस्य ब्रह्मणो निखिलजगदेककारणत्वमुपदिश्य स यथा सर्वासामपां समुद्रमेकायनमित्यादिना सकलविषयप्रवृत्तिमूलकरणग्रामनियमनं चोपदिश्येत्यन्वयः । स यथार्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेस्य महतो भूतस्य निःश्वसितमेतद्यग्वेदो यजुर्वेद इत्यादिश्रुतिः । एधशब्दोकारान्त इन्धनवाची । आर्द्रैधाग्निग्रहणं निमित्तोपादनयोर्ज्ञापनार्थम् । अग्निर्हि धूमोत्पत्तौ निमित्तम् । इन्धनं तदुपादानम् । यथाभ्याहितादाध्मानबीजनादिना प्रवर्तितात्पृथग्विधा धूमा विनिर्गच्छन्ति तथास्य महतो भूतस्य परमात्मनो निःश्वसितमनायासेनोद्गतमेतद्यग्वेदादीत्यर्थः । यद्यप्यत्र वाचकशब्दमात्रसृष्टिरुक्ता तथापि भोग्यभोगस्थानभोक्तृवर्गरूपवाच्यसृष्टिरप्यत्रोक्तेति द्रष्टव्यम् । अनुक्तस्यान्यतो ग्राह्यत्वात् । षष्ठे मैत्रेयीब्राह्मणे तथोक्तत्वात् । तेन च ब्रह्मणो निखिलजगदेककारणत्वं सिध्यति । तथाग्रे स यथा सर्वासामपां समुद्र एकायनमेवं सर्वेषां स्पर्शानां त्वगेकायनमित्यादिश्रुतिः । समुद्रस्यापामयनत्वं नाम तदुपादातृत्वमेव । एवं स्पर्शायतनत्वं नाम तदुपादातृत्वम् । यथा समुद्रो भूयसीरपो गृह्णात्येवं त्वगिन्द्रियमसंख्याकान्स्पर्शविशेषान्गृह्णाति । एवमितराण्यपीन्द्रियाणि । अत एतेषां सर्वेषामिन्द्रियाणामनन्ता वृत्तिविशेषा निरोद्धव्या

इत्याशयः। स यथा सैन्धवघन इति। यथा लवणशकल उदके निक्षिप्तस्तदनुप्रविश्य लीयते तस्य पृथग्ग्रहणाय न कोपि शक्तः स्यात्तदुदकं सर्वं लवणमेव भवत्येवमेतद्ब्रह्म विज्ञानघन एव। ज्ञानैकाकारो जीवो विज्ञानघनः। तदात्मभूतं ब्रह्म च तथैव। तच्च जीवशरीरकं सङ्घातेपूत्पद्यमानेषु स्वयमुत्पद्यते तेषु नश्यत्सु नश्यति। भूतपरिणाममनुवर्तते। विनाशो ज्ञानसंकोचः। उत्पत्तिश्च ज्ञानविकाशप्रादुर्भावः। न प्रेत्येति। समित्येकीकारे। ज्ञाधातोर्ज्ञानमर्थः। ततश्च संज्ञाशब्देन भूतसंघातेनैकीकृत्य ज्ञानमुच्यते देवोहं मनुष्योहमित्यादि। तच्च यथा संसारावस्थायां भवति तथा प्रेत्य चरमदेहवियोगं प्राप्य मोक्षदशायां न भवति। स्वाभाविकापरिच्छिन्नज्ञानसंकोचाभावादित्यर्थः। ब्रह्मव्यतिरिक्तेति। यस्य वस्तुन आत्मभूतं ब्रह्म नास्ति तथाविधं ब्रह्मव्यतिरिक्तं वस्त्वन्तरं नास्त्येव। तथाविधस्य वस्तुनो ब्रह्मणः सकाशाद्भेदेन दर्शनं निरस्यते। तथाविधवस्त्वभावात्। अप्रामाणिकज्ञानं हि दोषादुत्पद्यते। दोषाभावे तु वस्तुसद्भावं विना दर्शनं नोपपद्यत इत्यर्थः। अयं तमिति। अयं जीवात्मा। तं परमात्मानम्। स एष नेति नेतीति। स एष परमात्मा चिद्गतदेवत्वमनुष्यत्वादिप्रकारवान्न भवत्यचिद्गतपृथिवीत्वादिप्रकारवांश्च न भवतीत्यर्थः॥ २२॥ (६)

३८३-६ ईक्षणादीति। आदिशब्देनानन्दादिसंग्रहः। जगत्कारणत्वेनेत्यस्य जगन्निमित्तकारणत्वेनेत्यर्थः।

—८ न हीति। वेदान्तवाक्येष्वीश्वरश्चेतनोऽपरिणाम्यधिष्ठाता चोच्यत इति तस्य निमित्तकारणत्वम्। तथा तेषु प्रधानमचेतनं परिणाम्यधिष्ठेयं चोच्यत इति तस्यैवोपादानकारणत्वमिति भावः।

—१४ विकारजननीमिति। प्राग्व्याख्यातम् (विवृति-पृ. २०४प.१०)।

३८४-२ श्रुतिषु प्रधानप्रतिपादनाभावमभ्युपगम्य तस्योपादानत्वमर्थापत्तिप्रमाणेन समर्थयति-एवमश्रुतेपीति। ब्रह्मण इत्यस्य सत्यज्ञानादिलक्षणत्वादपरिणामिनो ब्रह्मण इत्यर्थः (श्रु.)।

—५ अत्यन्तभेदः। शरीरतयात्मनिष्ठत्वमप्यसहमानो भेदः (श्रु.)।

—७ अनेककारकेति। एतेन परमात्मनो यदि जगन्निमित्तकारणत्वं तर्हि तदस्तूपादानकारणत्वं च कस्यापि मास्विति परास्तम्।

—१९ यथा सोम्यैकेन लोहमणिनेति। यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्...यथा सोम्यैकेन नखनिकृन्तनेन सर्वं काष्णायसं विज्ञातं स्यादिति श्रुतिः। लोहमणिः सुवर्णपिण्डविशेषः। नखनिकृन्तनशब्देन काष्णायसपिण्डो लक्ष्यते (वि. दी.)।

३८५-१० आदिश्यत इति। आङ्पूर्वस्य दिशधातोः प्रशासनमर्थः। ततः करणे घञ्प्रत्ययः। प्रशासनकरणं चात्र प्रशासनकर्ता परमात्मैव। विव-

क्षातः कारकाणि भवन्तीति न्यायेन कर्तुरेवात्र करणत्वेन विवक्षणात् । येनाश्रुतं श्रुतं भवत्येतादृशमादेशं प्रशासनकर्तारं परमात्मानं गुरुं प्रति त्वमप्राक्ष्यः पृष्टवानसि किमित्युद्दालकेन गुरुकुले सर्ववेदानधीत्य प्रत्यागतः स्वपुत्रः श्वेतकेतुः पृष्टः । अत्र प्रशासितुर्विज्ञानेन सर्वविज्ञानोक्त्या निमित्तकारणस्य परमात्मन एवोपादानत्वं सिध्यति । उपादानकारणज्ञानेनैव कार्यविज्ञानात् । न च परमात्मन उपादानकारणत्वमेवास्तु निमित्तकारणं त्वन्यदेव किमपि भवत्विति वाच्यम् । सदेव सोम्येति श्रुतौ सृष्टेः प्रागेकत्वावधारणेनान्यस्याभावात् । अद्वितीयपदेनाधिष्ठात्रन्तरनिषेधाच्च ।

३८६–१ **एवं सति** । ब्रह्मण एव जगदुपादानत्वे सति ।

—१३–९ **योक्षरमिति** । त्रिगुणात्मकं कार्योन्मुखं प्रधानम् । तदेव सूक्ष्मावस्थमक्षरम् । क्वचिदक्षरशब्देन मुक्तात्माप्युच्यते । यथा गीतायां कूटस्थोक्षर उच्यते (गी. १५।१६) इत्यत्र । **कदाचिदिति** । प्रथमस्य कदाचित्पदस्य सिसृक्षोत्तरकालमित्यर्थः । द्वितीयस्य कदाचित्पदस्य संजिहीर्षोत्तरकालमित्यर्थः ।

३८७–३ **अभिधीयत इति** । अत्राद्यन्तराहित्यमजत्वं च यदुच्यते न तत्कारणावस्थाया नित्यत्वविवक्षयोच्यते किं तु कारणावस्थोपलक्षितद्रव्यनित्यत्वमभिधीयते । अवस्थायास्त्वनित्यत्वमेव । एतदेव शङ्कासमाधानाभ्यां विशदयति–ननु चेत्यादिना ।

—१३ **अत एव** । प्रलयावस्थायामपि तमःशब्दवाच्यस्य ब्रह्मप्रकारस्याचित्तत्त्वस्य सद्भावादेव ।

—२० **आसीदिदमिति** । प्रलय इदं तमोभूतं तमोवस्थमासीत् । तच्चालक्षणं शब्दस्पर्शविहीनं तद्रूपादिभिरसंहितमित्युक्तप्रकारेण रूपादिलक्षणरहितमत एवाप्रज्ञातमपरोक्षज्ञानाविषयीभूतमप्रतर्क्यं बाह्यतर्कागोचरम् । अविज्ञेयम् । विभागेन ज्ञेयं विज्ञेयम् । परस्माद्ब्रह्मणः पृथग्व्यपदेशानर्हावस्थां क्षीरे नीरमिव प्राप्तं सर्वतः प्रसुप्तमिव । यथा सुषुप्तौ जीवस्य परमात्मनः सकाशात्पृथग्व्यवहारानर्हावस्थापत्तिरेव न स्वरूपैक्यं तथा चिदचिदात्मकस्य जगतो ब्रह्मणि पृथग्व्यवहारानर्हसंसर्ग एव न स्वरूपैक्यमित्यर्थः ।

३८८–२ **अपरिणामित्वश्रुतयश्चेति** । उपपादयिष्यन्त इत्यनुषङ्गः ।

—४ **निष्पाद्यत्वं चेति** । न संभवतीत्यर्थः ॥ २३ ॥

—११ **अभिध्येति** । अभिध्या बहुभवनसंकल्पः ।

—१४ **विचित्रेति** । बहु स्यामिति श्रुतावुक्तं बहुत्वं चिदचिद्रूपेण विवक्षितम् । अग्रे तेजःप्रभृतिसृष्टेरुक्तत्वात् ॥ २४ ॥

—१९ **किंस्विद्वनमिति** । लोके हि गृहं चिकीर्षुः पुमान्वनं गत्वा कंचिद्वृक्षं छित्वा तदीयैः काष्ठैर्गृहं निर्मिमीते । तद्दृष्टान्तेनात्रापि यतो यस्माद्वनज-

न्याद्वृक्षाद्द्यावापृथिवी द्युलोकभूलोकौ निष्टतक्षुस्तक्षणेन निर्मितारो निर्मितवन्तः। तादृशं वनं किंस्विद्भवेत्। कश्च तादृशः स वृक्ष आसीत्। हे मनीषिणो बुद्धिमन्तो मनसा स्वकीयेन विचार्य तदिदमर्थद्वयमाचार्यसमीपे पृच्छत। किं च यत्कारणभूतं वस्तु भुवनानि सर्वाँल्लोकान्स्वात्मनि धारयन्नध्यतिष्ठन्नियमनमकरोत्तदिदु तदपि वस्तु पृच्छत। यदुक्तं मनीषिणां तस्याचार्यं उत्तरं ब्रूते। यस्माद्वनजन्याद्वृक्षाद्द्यावापृथिव्यौ निर्मिते तद्वनस्थानीयं तद्वृक्षस्थानीयं ब्रह्मैव। तस्य सर्वशक्तित्वात्। यस्योत्पाद्यस्य या सामग्र्यपेक्षिता सा सर्वा तस्मिन्विद्यते। तदेव ब्रह्म सर्वाणि भुवनानि स्वस्मिन्धारयति नियमयति च। हे मनीषिण आचार्योहं मनसा निश्चित्य वो युष्मभ्यं विब्रवीमि विविधमुत्तरं ब्रवीमीत्यर्थः (सा.) ॥ २५ ॥

३८९-१२ **अविभक्तेति**। आकारभेदात्कर्तृत्वकर्मत्वयोर्न विरोधः। आकारिण एकत्वादेकस्यैव निमित्तत्वमुपादानत्वं चेति बोध्यम् ॥ २६ ॥

—१६ **सत्यम्**। विकाररहितम्।

३९०-१६ **प्रपञ्चशरीरमिति**। तथा चायं परिणामः शरीरद्वारेति न निर्विकारे ब्रह्मणि काचिदनुपपत्तिः।

३९१-९ **विज्ञानम्**। जीवात्मा।

३९२-१ **ज्ञानावरणेति**। प्रकृतिभूतं त्रिगुणात्मकमचिद्वस्त्वव्यक्तशब्देनोच्यते। ततोपि सूक्ष्मं तदेव द्रव्यमक्षरशब्देनोच्यते। ततोपि सूक्ष्मतरं तदेवाचिद्वस्तु तमःशब्देनोच्यते। तच्च परमसूक्ष्मतया दुर्निवारं सज्ज्ञानमावृणोतीति ज्ञानावरकत्वेन तमःसाम्यात्। मृत्युशब्देन च तदेवोच्यते। ज्ञानावरकं तदनर्थहेतुर्भवतीत्यनर्थहेतुत्वेन मृत्युसाम्यात्।

—६ **भूतादौ**। सात्त्विकाहंकारे।

—२०-२ **सच्च त्यच्चेति**। सच्छब्देन निर्विकारतया सततैकरूपश्चेतन उच्यते। त्यच्छब्देन पूर्वपूर्वावस्थात्यागविकारास्पदमचेतनमुच्यते। ब्रह्मैव चेतनाचेतननामरूपभाग्भवतीत्यर्थः। ननु ब्रह्मण एव सर्वोपादानतया सर्वभावे विकारास्पदत्वं स्यादित्याशङ्क्याह—**निरुक्तं चेति**। जातिगुणक्रियावत्तया जातिगुणक्रियाभिधायिशब्दवाच्यमचेतनं निरुक्तम्। जातिगुणादिशून्यचेतनजातमनिरुक्तम्। एता भूतमात्राः प्रज्ञामात्रास्वर्पिता इत्युक्तरीत्याचेतनवर्गाधारभूतं चेतनजातं निलयनम्। विज्ञानमजडस्वरूपम्। अविज्ञानं जडस्वरूपम्। निर्विकारतया सत्यत्वं चेतनस्य। इतरस्य त्वतथात्वम्। ततश्च निरुक्तत्वानिरुक्तत्वनिलयनत्वानिलयनत्वविज्ञानत्वाविज्ञानत्वयुक्तसत्यानृतशब्दितचेतनाचेतननामरूपभाग्भवदपि ब्रह्म सत्यमेवाभवत्। अजहन्निर्विकारलक्षणस्वभावमेवाभवदित्यर्थः।

३९४-१७ **अस्मादिति**। स्वशरीरभूतादित्यर्थः ॥ २७ ॥ २८ ॥ (७) ॥ २९ ॥ (८)

अथ द्वितीयाध्यायस्य प्रथमः पादः प्रारभ्यते ॥

३९७-५ प्रथमद्वितीयाध्याययोः संगतिं दर्शयति-प्रथम इति।

—१२ **विरोध इति** । प्रत्यक्षश्रुतिविरोधे स्मृतिवचनमनपेक्षमनादरणीयम्। असति प्रत्यक्षश्रुतिविरोधे स्मृतिवचनेन मूलश्रुतिरनुमीयत इत्यर्थः।

—१५ **तद्विरुद्धा स्मृतिः**। औदुम्बरी सर्वा वेष्टयितव्येति स्मृतिः।

३९८-१ **निश्चयायोगादिति** । न च प्रथमाध्यायोक्तकैर्थो निश्चित एवेति वाच्यम्। स्मृतिवचनविरोधे तर्काणां दुर्बलत्वात्।

—३-७ **यथावदभ्युपगच्छतेति**। अनेन कपिलस्य लोकायतवन्न नास्तिकत्वमिति तन्मतस्य ग्राह्यत्वं सूचितम्। **अल्पश्रुतैर्मन्दमतिभिरिति**। अनेन स्मृतिसापेक्षत्वमुक्तम्। अनन्तशाखानुगतस्य वाक्यार्थस्यैकदेशज्ञैर्दुर्ज्ञेयत्वादिति भावः।

—१६-२१ **आसीदिति**। अयं श्लोकः प्राग्व्याख्यातः (विवृति-पृ. २१७ प. २०)। **ततः स्वयंभूरिति**। व्यञ्जयन्निति लक्षणहेत्वोः (पा. सू. ३।२।१२६) इति पाणिनिसूत्रेण हेतौ शतृप्रत्ययः। अर्जयन्वसतीतिवत्। ततः सर्गकाले संप्राप्ते भगवान्स्वयंभूः परमात्मेदं व्यष्टिरूपकार्यजातं व्यञ्जयन्व्यञ्जयितुम्। महाभूतादिषु प्रवृत्तमोजः संकल्पज्ञानरूपं तेजो यस्यैतादृशोऽव्यक्तोऽव्यक्तशरीरकः प्रादुरासीत्। महाभूतादिष्वित्यत्रादिशब्देन महदहंकारग्रहणम्। पूर्वमविभक्ततमःशरीरको भगवान्व्यष्टिसृष्टिहेतुभूततन्मात्राहंकारसृष्ट्यर्थं स्वसंकल्पाद्विभक्ततमःशरीरकोक्षरावस्थाप्राप्तिपूर्वकमव्यक्तावस्थप्रकृतिशरीरकोभूत्। सोभिध्याय संकल्पं कृत्वा स्वाच्छरीरादव्यक्तावस्थचित्संसृष्टाच्चिद्वस्तुनः सकाशाद्विविधाः प्रजाः सिसृक्षुरादावप एव ससर्ज। अप्शब्देन समस्ततत्त्वग्रहणम्। तासु वीर्यं त्रिवृत्करणजनितामण्डोत्पादनशक्तिमजनयदित्यर्थः।

३९९-१९-४००-१ **पूः प्राणिन इति**। पूः प्राणिनः सर्व एव गुहाशयस्याहन्यमानस्येत्यापस्तम्बधर्मसूत्रे पाठः। गुहा प्रकृतिस्तस्यां शेते तया सहाविभागापन्नस्तिष्ठतीति गुहाशय आत्मा तस्य। विकल्मषस्य निर्लेपस्य। **तस्मादिति**। तस्मात्परमात्मनः। काया देवादिशरीराणि। मूलप्रपञ्चसृष्टेर्भोक्तृतया मूलकरणम्। शाश्वतिक एकरूपोऽविकारः। नित्योऽविनाशी (उ. व्या.)।

४००-६ **भूतार्थेति**। सिद्धार्थेत्यर्थः। साध्यार्थप्रतिपादनपराणां वाक्यानां विरोधे तु विकल्पाङ्गीकारेण विरोधपरिहारो भवति न तु सिद्धार्थप्रतिपादनपराणामिति तात्पर्यम्।

—११ **विरुद्धार्थया**। न्यायानुगुणस्मृत्यनुगृहीतश्रुतिविरुद्धार्थया।

४०१-५ **फलसाधनकर्मेति** । निष्कामकर्मणां भगवदाराधनरूपत्वेपि सकामकर्मणां तत्त्वाभावेन स्मृतीनां सावकाशत्वमस्त्येवेति शङ्काशयः ॥ १ ॥ ॥ २ ॥ (१)

४०३-१ **आत्मेश्वरयोरिति** । आत्मा जीवस्तस्य योगमते ब्रह्मात्मकत्वं ब्रह्मात्मा यस्य तादृशत्वं नास्ति । तथेश्वरस्य तन्मते जगदुपादानत्वादिकल्याणगुणात्मकत्वं नास्तीत्यर्थः ॥ ३ ॥ (२)

—११ **चिदचिदात्मकस्येति** । यद्यपि तत्र चिदंशस्य नाचेतनत्वेनोपलब्धिस्तथाप्यसर्वज्ञत्वेनोपलब्धिरस्ति । तथा चाचेतनत्वपदेनासर्वज्ञत्वमप्युपलक्ष्यते । अत एवाचेतनत्वेनेति विशेषणस्य प्रतियोगित्वेन सर्वज्ञादित्युक्तम् । एवमेव दुःखात्मकत्वेनेति विशेषणस्य प्रतियोगित्वेनानन्दैकतानादित्युक्तम् । चिदंशस्य किंचित्सुखसत्त्वेप्यानन्दैकतानत्वाभावात् ।

—१४-७ **विज्ञानं चेति** । विज्ञानमजडस्वरूपम् । अविज्ञानं जडस्वरूपम् । **भूतमात्रा** ग्राह्यग्राहकजातं सर्वं जगद्विषयेन्द्रियरूपम् । **प्रज्ञामात्रासु** जीवेषु । **प्राणे** परमात्मनि । **समान इति** । अनीशया भोग्यभूतया प्रकृत्या मुह्यमानो जीवो वृक्ष इव च्छेदनार्हं एकस्मिञ्छरीरे स्थूलोहं कृशोहमित्यादितादात्म्यबुद्ध्या पांसूदकवत्तदेकतामापन्नः संस्तत्संसर्गकृतानि दुःखान्यनुभवतीत्यर्थः ।

४०४-४ **कार्यसलक्षणमिति** । कार्येण जगताऽचेतनत्वादिगुणैः समानमित्यर्थः ।

—६ **अनन्यापेक्षस्येति** । प्रमाणान्तरानपेक्षस्येत्यर्थः । शास्त्रस्य प्रमाणान्तरनैरपेक्ष्येपीतिकर्तव्यतापेक्षासत्त्वेन तेन प्रमाणाङ्गभूतस्तर्कोनुसरणीय एवेत्यर्थः ।

—७ **क्वचित्क्वचिद्विषये** । स्वत एवास्पष्टार्थे ।

—८ **अर्थस्वभावेति** । यन्नभसो नीरूपत्वादचाक्षुषत्वमुच्यते तदर्थस्वभावविषयनिरूपणेनार्थविशेषे प्रमाणव्यवस्थापनम् । वैधहिंसायाः श्रेयस्करत्वप्रमितिजनकवाक्यनिरूपणेन न हिंस्यादिति वाक्यस्य वैधहिंसाव्यतिरिक्तविषयत्वं यदुच्यते तत्सामग्रीविषयनिरुपणेनार्थविशेषे प्रमाणव्यवस्थापनम् (श्रु.) ।

—११ **आकाङ्क्षेति** । आकाङ्क्षादीनां लक्षणानि सोदाहरणानि यतीन्द्रमतदीपिकाप्रकाशेस्माभिर्निरूपितानि (य. दी. प्र. पृ. ३२) । आकाङ्क्षायोग्यतासंनिधिसापेक्षत्वमितरप्रमाणापेक्षया शास्त्रस्य साधनवैषम्यम् । तच्चात्र भाष्यकृद्भिर्विशेषेणेति शब्देन सूच्यते । तेन सर्वत्र तर्कसापेक्षत्वरूपं साध्यवैषम्यं सिध्यतीत्यभिप्रायः (श्रु.) ।

—१७ **अथोच्येतेति** । अचेतनत्वेनाभिमतेषु पृथिव्यादिष्वप्यनुद्भूतं चैतन्यमस्तीति कार्यकारणयोश्चेतनत्वाचेतनत्वकृतं वैलक्षण्यं नास्तीति शङ्काशयः ।

४०४–२० **अत एवेति** । यत्रोद्भूतं चैतन्यं तच्चेतनशब्देन व्यवह्रियते यत्रानुद्भूतं चैतन्यं तदचेतनशब्देनेत्याशयः ।

—४०५–१ **तेष्विति** । घटादिषु चैतन्यस्यानुपलम्भनियमेन तेषु चैतन्यशक्तिरपि नास्तीत्यर्थः । तथा चाचेतनत्वाभिमतेषु पदार्थेष्वनुद्भूतमपि चैतन्यं नास्त्येव नापि चैतन्यशक्तिरिति बोध्यम् ।

—६ **इतरेतराश्रयत्वमिति** । तथा चेदानीं जगतो ब्रह्मकारणकत्वमेव न सिद्धमिति जगतश्चेतनत्वासिद्धौ कारणत्वेन कार्यत्वेन चाभिमतयोरात्मजगतोश्चेतनत्वाचेतनत्वकृतं वैलक्षण्यं सिद्धमिति भावः ।

—१३ **सत्तादीति** । आदिशब्देन द्रव्यत्वसंग्रहः ।

४०६–३ **अचेतनाश एवेति** । अचेतनानां केशादीनां कारणं पुरुषशरीरमचेतनमेव । अचेतनस्य गोमयस्य कार्यं वृश्चिकशरीरमचेतनमेव । अचेतनस्य तन्तोः कारणमूर्णनाभिशरीरमचेतनमेव । ऊर्णनाभिः कीटविशेषः (कोळी इति प्र.) ॥ ४ ॥

—५ **तं पृथिवीति** । यद्यप्यत्र चैतन्ययोगो न साक्षाच्छ्रूयते तथापि चैतन्यव्याप्यानां संभाषणकामनासंविवादगमनानां श्रवणेन तद्व्यापकश्चैतन्ययोगोऽर्थात्सिध्यत्येवेत्यभिप्रायेण चैतन्ययोगः श्राव्यत इत्युक्तम् । तथा पुराणेषु नद्यादीनां संवाददर्शनेन चैतन्यं सिध्यतीति शङ्काशयः ।

—१० **अभिमानीति** । पूर्वसूत्रमेतत्सूत्रं च पूर्वपक्षिण एव । अत्र तुशब्दस्त्ववान्तरशङ्कानिरासार्थो न तु पूर्वपक्षनिरासार्थ इति बोध्यम् ।

—१४ **देवताशब्देनेति** । देवताशब्देन पृथिव्यादेर्विशेषणं दृश्यत इति तात्पर्यम् ॥ ५ ॥

४०७–१३ **न दृश्यत इतीति** । माक्षिकस्य वस्त्वन्तराकाराद्व्यावर्तकाकारो माक्षिकत्वम् । तच्च कृमिशरीरे नास्तीति माक्षिकस्य कृमिशरीरस्य चाचेतनत्वेन साम्येपि व्यावर्तकाकारेण वैलक्षण्यात्कार्यकारणयोः सालक्षण्यनियमो नास्तीति भावः ॥ ६ ॥

—२० **असत एवेति** । तथा चासत्कार्यवादोऽभ्युपगतः स्यात् । सर्वं खल्विदं ब्रह्मेति सामानाधिकरण्यं च न संगच्छत इति शङ्काशयः ।

—२२ **न त्विति** । तथा च कार्यकारणयोरेकद्रव्यत्वं स्वीक्रियत एव । एकमेव कारणावस्थं द्रव्यं कार्यावस्थां भजमानं क्वचित्सलक्षणावस्थां भजते क्वचिद्विलक्षणावस्थामपीत्येव केवलमत्रोच्यत इति भावः ॥ ७ ॥

४०८–५ **अपीताविति** । अपीतिः प्रलयः । अपीताविति सृष्टिस्थित्योरप्युपलक्षणम् । तद्वदित्यस्य सुवर्णकुण्डलादिवदित्यर्थः । सुवर्णकुण्डलादिदृष्टान्तस्य

बुद्धिस्थत्वात्। यद्वा तच्छब्देन जगतः परामर्शेन जगतीव ब्रह्मण्यपुरुषार्थादिप्रसङ्गादित्यर्थः। अथ वा तच्छब्दान्मतुप्प्रत्ययो न तु वतिः। तच्छब्देन जगन्निष्ठा अपुरुषार्थाः परामृश्यन्ते। तथा च ब्रह्मणस्तादृशापुरुषार्थाश्रयत्वप्रसङ्गादित्यर्थः।

४०९–२ **परस्परं विरुद्धानामिति**। यः सर्वज्ञ इत्यादीनां वाक्यानामनीशश्चात्मेत्यादीनां च परस्परं विरुद्धार्थकत्वेन भिन्नविषयकत्वमेवोचितम्। कार्यकारणयोरैक्ये तु भिन्नविषयकत्वस्य वक्तुमशक्यत्वेन तत्प्रतिपाद्यार्थस्यासामञ्जस्यं स्यादेवेति भावः।

—३ **अथोच्येतेति**। सिद्धान्त्येकदेशिनः शङ्क्यम्।

—१७ **न चाचेतनेति**। यन्निरूपितं शरीरत्वं वक्तव्यं स यादृशोपेक्षितस्तादृश ईश्वरो न भवतीति न तन्निरूपितं शरीरत्वं जीवस्य जडस्य चेति पूर्वमुक्तम्। संप्रति तु यस्य वस्तुनः शरीरत्वं वक्तव्यं तद्यादृशमपेक्षितं तादृशं न तृणादि भवतीत्युच्यते।

४१०–३ **तदेवेति**। एवकारेण वेश्मव्यावृत्तिः। न हि वेश्मनि वर्तमानस्यैव सुखाद्युपभोगसंभवः। वेश्मनोन्यत्र वर्तमानस्यापि तदुपभोगसत्त्वात्।

—४ **प्रविष्टशरीरत्वासिद्धेरिति**। परकाये प्रविष्टो यो जीवस्तन्निरूपितशरीरत्वं परकायस्य न स्यादित्यर्थः। न हि तस्य परकाय एव सुखाद्युपभोगसंभवः। स्वकायेपि तत्सत्त्वात्।

—६ **एतेनेति**। वेश्मादिषु शरीरत्वस्याप्रसिद्धत्वेनेत्यर्थः। भोगायतनत्वं भोगसाधनविशेषः। तथा च भोगायतनत्वं शरीरत्वमिति विशेषलक्षणमपि यदि वेश्मादिष्वतिव्याप्तिग्रस्तं तर्हि भोगसाधनत्वं शरीरत्वमिति सामान्यलक्षणमवश्यमेवातिव्याप्तिग्रस्तं स्यादिति भावः।

—८ **यदिच्छाधीनेति**। यस्य वस्तुनः स्वरूपं स्थितिः प्रवृत्तिश्च यदिच्छाधीना भवति तन्निरूपितं तस्य वस्तुनः शरीरत्वमित्यर्थः।

—१२ **सालभञ्जिकादिष्विति**। आदिशब्देन घटादिसंग्रहः। सालभञ्जिकादीनां चेतननिरूपितशरीरत्वस्याभावात्तत्रोक्तलक्षणस्यातिव्याप्तिः स्यादिति भावः।

—१५ **यद्यदेकेति**। नियाम्यं नियन्तुं शक्यम्। शेषभूतमङ्गभूतम्॥ ८॥

४१२–१३ **सर्वभूतानि प्रतीति**। आत्मशरीरशब्दौ हि ससंबन्धिकार्थप्रतिपादकौ। आत्मत्वं शरीरनिरूपितं शरीरत्वं चात्मनिरूपितमिति। तथा च श्रुत्या परमात्मनः सर्वभूतान्तरात्मत्वे प्रतिपादितेर्थादेव सर्वभूतानां परमात्मशरीरत्वं सिध्यतीति भावः।

४१३–४ **यथोक्तेष्विति**। यस्य पृथिवी शरीरमित्यादिश्रुतिस्मृतिप्रतिपादितेष्वित्यर्थः।

४१३–११–२ **स्थावरेष्विति** । अप्राणेषु स्थावरेष्विति यत्पूर्वमुक्तं तत्तात्पर्यं तत्रैव (विवृति–पृ. १७९ प. १५) निरूपितम् । **पञ्चधेति** । न च शरीरलक्षणे पञ्चवृत्तीति पदं नोच्यते किंतु प्राजाधीनधारणत्वमित्येव । तथा च न स्थावरेष्वव्याप्तिरिति वाच्यम् । तथापीश्वरशरीरतयाभिमतेष्वव्यक्तादिष्वव्याप्तिसत्त्वात् ।

—१४ **इन्द्रियाश्रयत्वमिति** । यदि कर्मनिमित्तशिलाकाष्ठादिशरीराणामिन्द्रियाश्रयत्वमस्त्येव केवलं तत्रेन्द्रियाणां ज्ञानप्रवृत्तिजनकत्वं नास्तीत्युच्यते तर्हि पूर्ववदव्यक्तादिष्वव्याप्तिर्बोध्या ।

अतो यस्येति । लक्षणत्रयमेतत् । तच्च यतीन्द्रमतदीपिकाप्रकाशे (पृ. ४०) स्फुटतरमुपपादितमस्माभिः ।

४१४–५ शरीरित्वप्रयुक्तदोषादिशङ्काव्यावृत्त्यर्थमाह–**उपरितनाधिकरणेष्विति** (श्रु.) ॥ ९ ॥ १० ॥

४१५–५ **तर्कस्येति** । केवलतर्कस्येत्यर्थः ।

—६ **शाक्येति** । शाक्यो बौद्धः । पितृशसाः केचिदिक्ष्वाकुवंश्याः कपिलमुनेराश्रमे योगाभ्यासाय शाकवृक्षे कृतवासा शाक्य इति प्रसिद्धिमापुः । तदुक्तं–शाकवृक्षप्रतिच्छन्नं वासं यस्मात्प्रचक्रिरे । तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्याः प्रकीर्तिता इति । उलूकस्यापत्यमौलूक्यो वैशेषिकसूत्रकारः कणादः । अक्षपादो न्यायसूत्रकारो गौतमः । स हि स्वमतदूषकस्य व्यासस्य मुखदर्शनं चक्षुषा न कर्तव्यमिति प्रतिज्ञाय पश्चाद्व्यासेन प्रसादितः पादे नेत्रं प्रकाश्य तं दृष्टवान् । अतस्तस्याक्षपाद इति नाम प्रसिद्धम् । क्षपणको जिनः । कपिलः सांख्यसूत्रकर्ता । पतञ्जलिर्योगसूत्रकर्ता ॥ ११ ॥

—११ **अतिक्रान्ततदुपदर्शितदूषणत्वेति** । इतः पूर्वं विद्यमानैस्तकैरप्रतिहतत्वं यथा संभवति तथा प्रधानकारणवादमनुमास्यामह इत्यर्थः ।

—१८ **वेदाख्येति** । वेदशास्त्राविरोधिनेत्यस्य वेदरूपं यच्छास्त्रं तदविरोधिनेत्यर्थः । अन्यथा वेदशास्त्रशब्दयोर्द्वैद्वे शास्त्रपदेन सांख्यशास्त्रस्यापि ग्रहणापत्तिरित्याशयः ॥ १२ ॥ (३)

४१६–७ **परमाण्विति** । परमाणुकारणवादस्य कणभक्षादिसर्वसंमतत्वात्तत्र तर्कस्याप्रतिष्ठितत्वं वक्तुं न शक्यत इति याधिका शङ्का जायते तन्निरासार्थमेतदधिकरणारम्भ इति भावः ।

—१० **शून्यात्मकत्वेति** । परमाणूनां शून्यात्मकत्वं माध्यमिकानां मते । अशून्यात्मकत्वमन्येषां मते । तथा तेषां ज्ञानात्मकत्वं योगाचारमते । अर्थात्मकत्वमन्येषां मते । क्षणिकत्वं बौद्धमते । नित्यत्वं नैयायिकादिमते । एकान्तत्वं

जैनव्यतिरिक्तमते । अनेकान्तत्वं जैनमते । सत्यत्वं वैशेषिकादिमते । असत्यत्वं योगाचारमते । एकविधत्वमार्हतमते । चतुर्विधत्वं नैयायिकादिमते । तथा च परमाणूनां सर्वसंमतत्वेपि तत्स्वरूपे विरोधदर्शनादप्रतिष्ठितत्वमेवेत्यधिकरणतात्पर्यम् ॥ १३ ॥ (४)

४१६-१४ **भोक्रापत्तेरिति** । भोक्तृपदं भोक्तृत्वपरम् । विभागो वैलक्षण्यम् । परमात्मनः सशरीरत्वे जीवस्येव तस्य भोक्तृत्वापत्तिः । ततश्च जीवपरमात्मनोरुभयोरपि भोक्तृत्वे तयोर्भोक्तृत्वाभोक्तृत्वरूपं वैलक्षण्य न स्यादिति चेन्नैष दोषः । यतो भोगनिमित्तं कर्म न शरीरमात्रम् । यथा लोके राजभृत्ययोरुभयोः सशरीरत्वेपि कर्ममूलकं न्यूनाधिकभोगवैलक्षण्यं तथा जीवब्रह्मणोर्भोक्तृत्वाभोक्तृत्वरूपं वैलक्षण्यं स्यात् । परमात्मनः सशरीरत्वेपि कर्माभावादित्यर्थः ।

—२१ **तत्र हीति** । यथा कार्यवशात्परगृहं प्रविष्टस्य गृहसंनिधिमात्रेण तद्गृहपतित्वप्रयुक्तसुखदुःखभाक्त्वं न भवति तथोपास्यत्वायोपासकहृदयं प्रविष्टस्य परमात्मनस्तच्छरीरसंनिधिमात्रेण सशरीरत्वप्रयुक्तभोक्तृत्वं नास्ति । परमात्मनः साक्षात्तच्छरीरस्वामित्वाभावादिति तत्रोक्तम् । अत्र तु शरीरस्वामित्वप्रयुक्तभोक्तृत्वं नास्तीत्युच्यत इति भेदः । तथा चोपास्यत्वायोपासकहृदयं प्रविष्टस्योपासकशरीरेण सशरीरत्वं जगद्रूपशरीरेण च सशरीरत्वमिति द्विधापि परमात्मनः सशरीरत्वे भोक्तृत्वं नास्तीति सिद्धम् ।

४१७-८ **मृत्सुवर्णादिवदिति** । यथा घटकुण्डलादिगतसर्वविशेषाश्रयत्वं मृत्सुवर्णादेरेव दृश्यते तथा जगद्गतापुरुषार्थादिसर्वविशेषाश्रयत्वप्रसङ्ग इति भावः ।

—१७ **आविर्भूतस्वरूपस्येति** । तथा च मुक्तावस्थस्य जीवस्यापि नापुरुषार्थगन्धः किमुत परमात्मनः ।

४१८-३-७ **प्रचुरदन्दशूके** । सर्पबहुले । **व्यजनादीति** । आदिशब्देन तत्तदनिष्टनिवारणसाधनानि विवक्षितानि । **भ्रमदिति** । भ्रमद्भ्रमणविशिष्टं स्वसामर्थ्यरूपं चामरं यस्य तादृशोत एव स दोषैर्न स्पृश्यते ।

—९ **नैवेति** । एतेन केवलब्रह्मकारणवादे पूर्वोक्तजगद्गतापुरुषार्थादिदोषप्रसङ्गः परिहृतः (श्रु.) ।

—११ **परैः** । शंकराचार्यैः ।

—१७ **न कर्मेति** । क्षेत्रज्ञानादित्वाभ्युपगम उपहितस्य ब्रह्मणः क्षेत्रज्ञत्वेनोपाधेश्च भोग्यत्वरूपेण नित्यत्वाभ्युपगमान्नित्यत्वेनाभ्युपगतयोस्तयोरविभागाभावः सिद्ध एवेत्यर्थः (श्रु.) ॥ १४ ॥ (५)

४१९-१० **काणादाः** । वैशेषिकाः । एत एवास्मिन्नधिकरणे पूर्वपक्षिणः । एतदारभ्य तत्कार्योत्पत्तिसिद्धेः (४२०-१७) इत्यन्तं काणादमतम् । ततोत्राद्ध

(४२०–१८) इत्यारभ्य तद्धेतुरन्वेषणीय इति (४२५–२) इत्यन्तं शंकराचार्यैकदेशिनां जीवाज्ञानवादिनां मतम्। ततस्तदेतत् (४२५–३) इत्यारभ्य तदनन्यत्वं जगत इति (४३२–७) इत्यन्तं शंकराचार्यानुयायिनां ब्रह्माज्ञानवादिनां मतम्। ततो निर्विशेष (४३२–८) इत्यारभ्य ब्रह्मणोन्यदेव (४३९–५) इत्यन्तं पुनः काणादमतम्। तदुत्तरं (४३९–६) सिद्धान्तिनां रामानुजानां मतमिति बोध्यम्।

४१९–१७ **सत्यामेवेति**। कार्यकारणयोरनन्यत्वे तु मृदः सत्त्वे तद्रूपघटस्यापि सत्त्वेन घटनाशव्यवहारो न स्यात्।

—१९ शङ्कते–**सत्यपीति**। उत्पत्तेः पूर्वं घटरूपकार्यस्य सत्त्वेपि तेन घटेन जलाहरणादि कार्यं न भवति तदर्थं चक्रभ्रमणादिरूपः कारकव्यापार आवश्यक इति चेद्घटनाशपर्यन्तं स व्यापार आवश्यकः स्यात्। तावत्कालपर्यन्तं घटेन जलाहरणादिकार्यनिष्पादनात्। यतश्च तावत्कालपर्यन्तं स व्यापारो लोके न दृश्यते ततः स व्यापारो जलाहरणादिकार्यार्थ इति वक्तुं न शक्यत इति कारकव्यापारवैयर्थ्यं दुर्निवारमिति भावः।

४२०–४ **विभागश्चोच्यत इति**। यत्सर्वदाभिव्यक्तं तन्नित्यं यन्न तथा तदनित्यमित्युच्यत इति नित्यानित्यविभागोपपत्तिरिति शङ्काशयः।

अभिव्यक्तेरिति। उत्पत्तेः पूर्वं सदेव घटादि कार्यं चक्रादिकारकव्यापारादभिव्यज्यत इत्युक्तम्। तत्र या घटादिकार्यस्याभिव्यक्तिः सा किं घटवत्पूर्वं सत्येव चक्रादिकारकव्यापारादभिव्यज्यत उतापूर्वोत्पद्यते। आद्येप्यभिव्यक्तिरभिव्यज्यत इत्यत्राभिव्यक्तिपदवाच्याभिव्यक्त्यपेक्षयाभिव्यज्यत इति क्रियापदवाच्याभिव्यक्तिर्भिन्नाथ वैकैव। आद्ये प्रथमाभिव्यक्तेर्यथा द्वितीयाभिव्यक्तिस्तथा तस्या अपि तृतीयाभिव्यक्तिस्तस्या अपि चतुर्थीत्येवमनवस्था। एकैवाभिव्यक्तिश्चेत्सा सर्वदा भाव्येव। अभिव्यक्तिरपूर्वोत्पद्यते चेदसत्कार्यवाद इति बोध्यम्।

—११ **न चेति**। घटार्थिभिर्मृदाद्येवोपादीयते न तन्त्वादि। पटार्थिभिश्च तन्त्वाद्येवोपादीयते न मृदादि। एष नियमो लोके दृश्यते। तद्बीजं तूत्पत्तेः पूर्वं घटस्य मृदि सत्त्वं पटस्य च तन्तुषु। असत्कार्यवादे तु घटस्योत्पत्तेः पूर्वं मृदि तन्तुषु चासत्त्वं समानमेवेत्युक्तनियमो न सिध्यति।

—१२ **कारणशक्तीति**। मृदि तन्तुषु च घटस्यासत्त्वे समानेपि घटोत्पादनशक्तेर्मृद्येव सत्त्वेन घटार्थिभिर्मृदादेरेवोपादानात्। अथ घटोत्पादनशक्तेर्मृद्येव सत्त्वमित्यत्र किं प्रमाणमिति चेत्सत्कार्यवादिनो भवतोप्युत्पत्तेः पूर्वं घटस्य मृद्येव सत्त्वं न तन्त्वित्यत्र किं प्रमाणम्। घटसद्भावयोग्यता मृद एवेति चेद्घटोत्पादनयोग्यतापि मृद एवेत्यङ्गीकारे बाधकाभावः।

४२०–१५ अन्यत्वाविशेषादिति । यदि घटभिन्नेषु मृदादिषु कारकव्यापारेण घट उत्पद्यते तर्हि घटभिन्नेषु तन्त्वादिष्वपि कारकव्यापारेण कुतो घटो नोत्पद्यत इत्याशयः ।

—१७ उत्पत्तिसिद्धेरिति । तथा चासत्कार्यवादसिद्धिः । अनन्यत्वप्रतिपादकश्रुतयस्तु गौणतया कथंचिन्नेया इति वैशेषिकाभिप्रायः ।

—१८ अस्मिन्वैशेषिकमते शंकराचार्यानुयायिनां जीवाज्ञानवादिनां मतेनोत्तरमाह–अत्राहुरित्यादिना तद्धेतुरन्वेषणीय इति (४२५–२) इत्यन्तेन ।

—२१–३ उपलभ्यमानादिति । अनुवर्तमानादित्यर्थः । अनेनानुवर्तमानस्य सत्यत्वं व्यावर्तमानस्यासत्यत्वं च सूचितम् । तच्च प्राक् (श्रीभाष्य–पृ.२३ प. ८) उक्तम् । अहंकारादीति । आदिशब्देन ज्ञेयमुच्यते (श्रु.) ।

४२१–१२ अनिर्वचनीयमिति । यदि घटादि कार्यं सत्स्याच्चेत्तस्य विनाशो न स्यात् । असत्स्याच्चेत्तस्योपलब्धिर्न स्यात् । अतः सदसद्भ्यामनिर्वचनीयमिति गम्यत इति भावः ।

—१३ तस्य चेति । शुक्तिरजतस्येत्यर्थः । शुक्तिरजतं हि प्रतीयते बाधितं च भवतीत्यनिर्वचनीयत्वं तस्य सिद्धं भवतीत्यर्थः ।

—१५ किं चेति । अनेन ग्रन्थेन कार्यस्य दुर्निरूपतां प्रदर्श्य तस्य सत्यत्वाभावः प्रतिपाद्यते ।

—१७ नापीति । विशेषान्तरमापन्नं विकारयुक्तम् । तथा च मृदादि कारणद्रव्यं विकारयुक्तं सद्घटादि कार्यं जनयतीति फलितम् । तत्र च विकारः कार्यमेवेति तादृशविकारस्य कारणीभूतं मृदादि द्रव्यमविकृतमेव तं विकारं जनयेदित्युक्तौ सर्वदा तदुत्पादकत्वप्रसङ्गः । विशेषान्तरमापन्नस्यैव कारणस्य कार्योत्पादकत्वमित्युक्तौ तु पुनरन्येन विकारेण युक्तं सदेव तं विकारं जनयेत् । तादृशस्यान्यविकारस्यापि कारणं तदेव मृदादि द्रव्यमिति पुनस्तत्रापि पूर्ववद्विकल्पेनवस्था स्यादिति भावः ।

—१९ शङ्कते–अविकृतमेवेति ।

४२२–१ देशादीति । अविकृतमेव मृदादि कारणद्रव्यं देशविशेषेण कालविशेषेण निमित्तविशेषेण च संबद्धं सद्घटादि कार्यमुत्पादयतीति चेत्स देशादिभिर्जायमानः संबन्धो मृदादिकारणद्रव्यस्याविकृतस्य भवति विकृतस्य वा । आद्ये सर्वदा देशादिसमवधानं स्यात् । विकृतस्य चेत्पूर्वोक्तानवस्थाप्रसङ्गस्तदवस्थ एव ।

—२ न च वाच्यमित्यादिरवद्यायाश्रयणीयेतीत्येतत्पर्यन्तः शङ्काग्रन्थः । यथा शुक्तिकायां प्रतीयमानमपि रजतमन्यस्मिन्काले नेदं रजतमिति बाध्यते

यथा वा तमोबहुले देशे प्रतीयमानमपि प्रकाशयुक्ते देशान्तरे बाध्यते तथा घटादि कार्यं मृदादिभ्यो नोत्पन्नमिति बाधो देशान्तरेपि कालान्तरेपि न दृश्यत इत्याशयः।

४२२-६ किं हेमादीति। किं द्रव्यमात्रं कारणमुताकारमात्रमुताकारविशिष्टं द्रव्यमिति प्रकारत्रयं बोध्यम्।

—१९ काल्पनिकेति। एतेन कृत्स्नस्य जगतो मिथ्यात्वे तदन्तर्गतस्य मृदादेरपि मिथ्यात्वान्मृत्तिकेत्येव सत्यमिति सत्यत्वप्रतिपादकश्रुतिविरोध इत्यपास्तम्। मृदादिसत्यत्वे तच्छ्रुतेस्तात्पर्याभावात्।

४२३-१० सन्मात्रेति। प्रागुपपादितमेतत् (श्रीभाष्य-पृ. २२ प. १)।

—११ असंभावितेति। प्रत्यक्षापेक्षया शास्त्रस्य बलीयस्त्वे हेतुचतुष्टयमसंभावितदोषत्वं चरमभावित्वं निराकाङ्क्षत्वं निरवकाशत्वं चेति। तत्र भेदवासनामूलत्वं संभावितदोषत्वम्। तच्च द्वैतग्राहिणः प्रत्यक्षस्य संभवति। तस्याविद्यारूपदोषमूलत्वात्। तदभावोसंभावितदोषत्वं शास्त्रस्य। चरमभावित्वं चापच्छेदन्यायाभिप्रायेणोक्तम्। तन्न्यायस्वरूपं प्रागुक्तम् (विवृति-पृ. २३ प. २६)। तथा यद्यपि शास्त्रं स्वघटकशब्दस्वरूपग्रहणे तदर्थग्रहणे च प्रत्यक्षाद्यपेक्षम्। प्रत्यक्षादिभिः शब्दज्ञाने तदर्थज्ञाने च सत्येव शास्त्रजन्यज्ञानोत्पत्तेः। तथापि प्रमितौ निराकाङ्क्षमेव शास्त्रम्। प्रमितिरर्थनिश्चायकत्वम्। यथा स्मृतिः प्रत्यक्षादिप्रमाणविषयीभूतमेवार्थं दर्शयतीति तस्याः प्रमाणान्तरसापेक्षत्वं तथा शास्त्रस्य तत्त्वाभावात्। शास्त्रं हि प्रमाणान्तरविषयीभूतमेवार्थं दर्शयतीति नियमे मानाभावादिति। निरवकाशत्वं च स्पष्टमेव।

४२४-१० पुनः शङ्कते-कस्येति। कस्येत्यादिर्जीवाश्रया च कल्पनेतीत्यन्तः शङ्काग्रन्थः।

—१४ किं चेति। निगरणं भक्षणम्। वेषः स्वरूपम्। अवस्तुभूताऽपरमार्थभूता। अनवक्लृप्तिरसिद्धिः। प्रासादभक्षणं केनापि कर्तुं न शक्यत इति यथा प्रासादभक्षणादेरनुपपन्नत्वं तथानुपपन्नत्वमेवैकं स्वरूपं यस्यास्तादृश्यपरमार्थभूता याऽविद्या तस्यामन्योन्याश्रयादिदोषाणां सत्त्वेपि न ते दोषास्तस्या असिद्धिं साधयन्ति। अविद्यातोन्यत्र ह्यनुपपद्यमानत्वमवस्तुभूतत्वं च पदार्थसिद्धेः प्रतिबन्धकम्। अविद्यायां तु न तथा। प्रत्युत साधकमेव। अविद्याया अनुपपद्यमानतैकस्वरूपत्वादवस्तुभूतत्वाच्च।

—१८ अशुद्धिसंभवादिति। अत्र चाशुद्धिरविद्यासंबन्धयोग्यत्वम्। तेन चाविद्याश्रयत्वं जीवस्योपपद्यत इति जन्मजरामरणादेः काल्पनिकत्वोपपत्तिरित्यर्थः।

४२५-३ इदं जीवाज्ञानवादिमतं ब्रह्माज्ञानवादिमतेन दूषयति-तदेतदितीत्यादिना **जगत इति** (४३२-७) इत्यन्तेन ।

—४ **जीवस्येति** । किं जीवस्य यत्स्वाभाविकं रूपं सोऽविद्याश्रय उत तादृशे रूपे यः कल्पित आकारः सोऽविद्याश्रयोथ वा तादृशकल्पिताकारविशिष्टं यत्स्वाभाविकं रूपं सोऽविद्याश्रय इति प्रकारत्रयं क्रमेण दूषितमत्र ग्रन्थ इति बोध्यम् ।

—६ **जडस्येति** । ब्रह्म चिद्रूपं तत्र कल्पितं तु जडमेवेति कल्पिताकारस्य जडत्वं बोध्यम् ।

४२६-२ **अनभ्युपगमादिति** । अद्वैतहानिप्रसङ्गेनानभ्युपगमादित्यर्थः ।

—४ **मदीयं मार्गमिति** । ब्रह्माज्ञानवादमित्यर्थः ।

—६ **विस्मरसीति** । जीवभेदकल्पकाविद्या जीवकल्पनात्प्रागेव न जीवानाश्रयितुं क्षमा जीवासिद्धेरित्यर्थः (श्रु.) ।

—९ **बीजाङ्कुरेषु हीति** । तत्र हि बीजं यद्यप्यङ्कुरादेवोत्पन्नं तथापि तत्स्वोत्पाद्याङ्कुरापेक्षयान्यस्मादङ्कुरात्समुत्पन्नम् । अङ्कुरोपि स्वोत्पाद्यबीजापेक्षयान्यस्माद्बीजात्समुत्पन्न इति न दोषः । अत्र तु जीवः स्वाश्रिताविद्ययैव कल्पितो न तदन्यया । तथाऽविद्यापि स्वकल्पितजीवमेवाश्रिता न तदन्यमिति दोष एवेत्याशयः ।

—११ **अशङ्कनीयतेति** । बीजाङ्कुरन्यायस्येति शेषः । तेन न्यायेन समाधानं न शङ्कनीयमिति भावः । अशकनीयतेति पाठेऽविद्याया जीवभेदस्य च साधयितुमशक्यतेत्यर्थः ।

—१२-४ **पूर्वपूर्वेति** । यथैकस्माद्बीजादुत्पन्नोङ्कुरोन्यद्बीजं समुत्पादयति तच्च बीजमन्यमङ्कुरं समुत्पादयति तथैवात्रैकं जीवमाश्रिताविद्याऽपरं जीवं कल्पयति स च जीवोन्यस्या अविद्याया आश्रयो भवतीति न दोष इत्याशयः । इयं धर्मिणो जीवस्य कल्पना । **कृतप्रहाणादीति** । आदिशब्देन जीवनित्यत्वप्रतिपादकश्रुतिविरोधसंग्रहः ।

—१५ **जीवकल्पनमिति** । ब्रह्मण एव जीवत्वरूपधर्मकल्पनमित्यर्थः । जीवशब्दो भावप्रधानः । क्वचिज्जीवभावकल्पनमित्येव पाठः ।

४२७-२ **मुक्तानिति** । मुक्तानां शुद्धानामशुद्धाविद्याश्रयत्वमनुपपन्नमिति तु न वाच्यम् । अविद्याया अनुपपन्नैकस्वरूपत्वात् ।

—४ **उक्ताभिः** । अन्योन्याश्रयादिमूलिकाभिः ।

४२८-३ **किं चेति** । अयं जीव इत्यविद्याकल्पितो यो भ्रमस्तदाश्रयः क इत्यर्थः ।

४२८-४ आत्माश्रयेति। स्वविषयभ्रमः स्वस्यैव भवितुं नार्हति। यतो जीवविषयभ्रमाश्रये सिद्धे हि जीवकल्पना न तु ततः प्रागित्याशयः।

—६ ब्रह्माज्ञानमेवेति। तच्च तव नेष्टम्। त्वन्मते जीवस्यैवाज्ञानाश्रयत्वात्। ब्रह्मविषयकं जीवनिष्ठं यदज्ञानं तज्जीवाज्ञानम्। ब्रह्मविषयकं ब्रह्मनिष्ठं यदज्ञानं तद्ब्रह्माज्ञानम्।

किं चेति। तवानिष्टमपि ब्रह्माज्ञानं तव गले पतितमेव स्यादित्याशयः।

—९ अनाद्यविद्यामिति। जीवभावस्यापरमार्थत्वेन तत्प्रतीतेरविद्यां विना दुर्लभत्वात्।

१०—अत एवेति। तवानिष्टस्यापि ब्रह्मण्यविद्यासंबन्धस्य तव गले पतितत्वादेवेत्यर्थः। परभ्रमहेतुर्माया स्वभ्रमहेतुरविद्येति हि मायाऽविद्ययोर्भेदः। तत्रेश्वरवृत्तिर्माया जीवानां भ्रमं जनयति। अविद्या तु जीववृत्तिर्जीवानामेव भ्रमं जनयति। अविद्यैव चाज्ञानशब्देनोच्यत इति हि त्वन्मतम्। परं तूक्तप्रकारेणापरमार्थजीवप्रतीतिरूपो यो ब्रह्मवृत्तिर्भ्रमस्तदुपपत्तये ब्रह्मणोऽप्यविद्यासंबन्धस्यावश्यकत्वेन मायाऽविद्याप्रविभागो निरर्थक एवेति भावः।

४२९-३ अविद्यात्वादिति। शङ्कोक्तरीत्या त्वस्या मायात्वापत्तिः। मिथ्याभूतस्य चन्द्रद्वयस्य मिथ्यात्वेन दर्शनात्।

—६ अपुरुषार्थेति। अपुरुषार्थभूतं यदपरमार्थदर्शनं तद्धेतुरित्यर्थः।

—९ प्रयस्यन्तीति। लोका इति शेषः। यतो लोकानां द्विचन्द्रज्ञानहेतुनिरासे प्रयासो दृश्यते ततः स हेतुरविद्यैव न माया। न हि मायानिरसनाय मायाविनां प्रयासो दृश्यते।

—११ द्वैतदर्शनमिति। ब्रह्म तन्माया चेति द्वैतं स्यादिति भावः।

—१६ तद्धत्तेति। मायासंबन्ध इत्यर्थः।

४३०-६ पूर्ववदेवेति। अन्योन्याश्रयादिभिर्दूषणैरित्यर्थः। तथा च मायाऽविद्ययोराश्रयविभागानुपपत्तिरित्याशयः।

४३१-३ द्वैतवादिनापीति। काणादपक्षेप्ययं दोष इत्याशयः।

—५ काणादः शङ्कते-अनन्तत्वादिति।

—८ पुनः शङ्कते-आत्मनामिति। विद्यमानस्य वस्तुनो ज्ञानाभाव एवासर्वज्ञत्वम्। न हि शशशृङ्गादेरज्ञानेन सर्वज्ञत्वहानिर्भवतीत्याशयः।

—१५ वस्त्वन्तरभाव इति। वस्त्वन्तरसत्तेत्यर्थः। यथा घटस्य वस्तुतः परिच्छेदो नाम घटाद्भिन्नस्य वस्तुनः पटादेः सत्त्वम्। तद्वदेवात्र ब्रह्मणः सकाशाद्भिन्नस्य जीवरूपवस्तुनः सत्त्वाद्ब्रह्मणो वस्तुतः परिच्छेदरहितत्वं वक्तुं न शक्यत इति भावः।

४३१-१६ **वस्त्वन्तरादिति**। अत्रायं प्रयोगः । ब्रह्म देशतः कालतश्च परिच्छिन्नं वस्तुतः परिच्छिन्नत्वाद्घटादिवदिति ।

४३२-८ **अत्रोच्यत इति**। काणादेनेति शेषः ।

—९-११ **निरंशस्येति**। एतेन ब्रह्मणि यः प्रकाशांशस्तस्याविद्यया तिरोधानेपीतरांशस्य सत्त्वान्न स्वरूपनाशप्रसङ्ग इत्यपास्तम् । **स्ववचनविरुद्धमिति**। ब्रह्मणो निर्विशेषत्वं तैरुक्तम् । तच्च तदुक्तेनैव नित्यत्वादिसाधकवचनेन सह विरुद्धम् । विशेषरहिते ब्रह्मणि नित्यत्वरूपस्य विशेषस्य नित्यत्वसाधकधर्मरूपाणां च विशेषाणामसंभवात् ।

—१६ **पूर्वमेवेति**। अथातो ब्रह्मजिज्ञासेति प्रथमसूत्र एवेत्यर्थः (श्रीभाष्य-पृ. ३३ प. ६)।

—१८ **उपलब्धीति**। यस्य वस्तुन एकक्षणपर्यन्तमपि सत्ता नास्ति तन्मिथ्या। यस्य तु वस्तुनः सत्ता वर्तते परं तु सर्वदा नास्ति तदनित्यम्। तथा च यद्वस्तूपलभ्यते विनश्यति च तस्य सर्वदा सत्ताया अभावेनानित्यत्वेपि न मिथ्यात्वम् । उपलब्धिवेलायां सत्तायाः सत्त्वेनैकक्षणपर्यन्तमपि सत्ता नास्तीति वक्तुमशक्यत्वात् ।

४३३-१ **देशकालादीति**। यस्य घटादेर्योग्यो यो देशः कालो ज्ञाता च तस्य घटादेस्तस्मिन्देशे तस्मिन्काले तादृशज्ञातृदृष्ट्या बाधो नास्तीति भावः ।

४३४-७ **सौभरीति**। एतेनात्मैक्येपि शरीरभेदेन तत्तच्छरीरप्रयुक्तसुखाद्यनुसंधानं तत्तच्छरीर एवेत्यभ्युपगमान्न पूर्वोक्तदोष इति निरस्तम् । सौभरिप्रभृतिषु शरीरान्तरप्रयुक्तसुखाद्यनुसंधानस्य शरीरान्तरेपि दर्शनात् । अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः (पा. यो. सू. २।३९) इति सूत्रोक्तरीत्या जन्मान्तरीयसुखाद्यनुसंधानवन्तो योगिनोत्र प्रभृतिशब्देन ग्राह्याः ।

—९ **न चाहमर्थस्येति**। अहमर्थोन्तःकरणम् । तस्यैव ज्ञातृत्वं प्रागुक्तं (श्रीभाष्य—पृ. २६) महापूर्वपक्षे । तस्य च प्रतिशरीरं भिन्नत्वादात्मैक्येपि न शरीरान्तरे शरीरान्तरप्रयुक्तसुखाद्यनुसंधानम् । सौभरिप्रभृतिषु त्वन्तःकरणस्यैक्यात्तथानुसंधानं युक्तमेवेति शङ्काशयः ।

—१० **आत्मेति**। आत्मन एव ज्ञातृत्वं नान्तःकरणस्येत्युत्तराशयः । इदं प्रागुक्तम् (श्रीभाष्य-पृ. ४० प. १३)।

—१५ **सत्यत्वोपपादनादिति**। एतेन बन्धमोक्षव्यवस्था इति (श्रीभाष्य-पृ. ४३० प. १७) प्रागुक्तानुमानमपि निरस्तं भवति । अपारमार्थिकत्वहेतोरसिद्धेरिति द्रष्टव्यम्।

४३४-१९ अहंत्वमाद्यर्थविलक्षणमिति। तथा च शरीरान्तराण्यपीत्याद्युक्तानुमानत्रये (श्रीभाष्य-पृ. ४३० प. १९) मयैवात्मवन्ति मदविद्याकल्पितान्यहमेवेत्येवमात्मनोस्मच्छब्दबोध्यत्वोक्तिर्न संभवति। आत्मनोहमर्थविलक्षणत्वादिति भावः।

—२२ निष्फल इति। मोक्षार्थप्रयत्नस्याविद्याकार्यत्वेन मिथ्यात्वात्तस्मान्मोक्षरूपसत्यफलसिद्धेर्वक्तुमशक्यत्वात्।

४३५-१९ न चातादृशस्येति। निर्विशेषत्वात्कर्तृकर्मरहितस्येत्यर्थः। तादृशस्येति पाठेयमर्थः—तादृशस्य कर्तृकर्मसहितो यः प्रकाशते तस्य निर्विशेषत्वेभिमते स्वप्रकाशता न सिध्यतीति (श्रु.)।

४३६-२ सोपि तानीति। एकं ब्रह्मैव परमार्थसत्। तस्य च कार्यत्वमेव नास्ति। तद्व्यतिरिक्तं च सर्वं मिथ्यैव। तथा च तेषां (शंकराचार्यानुयायिनां) नये परमार्थसत्कार्यं किमपि न दृश्यत इत्यपरमार्थादपि परमार्थकार्यं दृश्यत इत्युद्घोषो न संभवतीत्याशयः।

—१६ परत्वादिति। निषेधस्य विधिपूर्वकत्वेन विध्यपेक्षया निषेधस्य परत्वात्सर्वस्मात्परत्वमर्थसिद्धमिति भावः।

४३७-१३ संरम्भादिति। संरम्भ आग्रहः। पक्षपात इति यावत्। स्वमतपक्षपात एव विशेषो नान्य इत्याशयः।

—१७ घटादीनामपीति। सर्वस्यां पृथिव्यां वर्तमाना भूता भाविनश्च घटा अमुकसंख्याका इति ज्ञातुं न शक्यत इति घटादीनामपि संख्यावत्त्वाभावः। तथा च दृष्टान्ते घटे संख्यावत्त्वरूपं साध्यं नास्ति। या च दश घटा इत्येवं संख्या दृश्यते सा न सर्वदेशस्थितसार्वकालिकघटस्वरूपगता। अपि त्वेकदेशस्थितकिंचित्कालिकघटगता। तादृशी त्वात्मस्वस्माभिरपीष्यत एवेत्यन्यत्।

—१९ देशकालादीति। आदिना कर्तृसंग्रहः। कर्तृरूपोपाधिनापि संख्या दृश्यते। यथानेन दश घटाः कृता इति।

४३८-४ तदयुक्तमिति। यथात्मानो जडाः परस्परभिन्नत्वाद्घटवदित्युच्यते तथा पटा घटत्ववन्तः परस्परं भिन्नत्वाद्घटवदित्यपि वक्तुं शक्यते। तत्तु त्वयापि नेष्यते। तथा चानुकूलतर्कपराहतोयं हेतुर्न साध्यं साधयितुं क्षमत इत्यवश्यमङ्गीकर्तव्यमिति भावः।

—८ वस्तुतः परिच्छिन्नानामपीति। ब्रह्म देशकालपरिच्छिन्नं वस्तुतः परिच्छिन्नत्वादित्यनुमानेन ब्रह्मणि देशकालपरिच्छेदमापादयतस्तव वस्तुतः परिच्छेदो देशपरिच्छेदस्य कालपरिच्छेदस्य च प्रयोजक इत्यभिमतम्। परं तु देश-

कालपरिच्छेदेयत्तायास्तु न वस्तुतः परिच्छेदः प्रयोजको भवति । अन्यथा वस्तुतः परिच्छिन्ने घटे या देशकालपरिच्छेदयोरियत्ता सैवान्यत्र वस्तुतः परिच्छिन्ने ग्रामादावपि दृश्येत । सा तु न दृश्यते । तथा च यदि देशकालपरिच्छेदेयत्तायाः प्रमाणान्तरेणैव निर्णयः कार्यस्तर्हि देशकालपरिच्छेदयोरपि प्रमाणान्तरेणैव निर्णयः कार्यो न वस्तुतः परिच्छेदेनेति वस्तुतः परिच्छिन्नेपि ब्रह्मणि श्रुत्यादि-प्रमाणान्तरेण सिद्धो देशकालपरिच्छेदाभावो न विरुद्ध इति भावः ।

४३८-११-३ शङ्कते-वस्तुतः परिच्छेदमात्रादपीति । तथा च प्रयोगः । ब्रह्म नानन्तं त्रिविधपरिच्छेदरहितत्वाभावात् । काणादमते ब्रह्मणि देशकालपरिच्छेदरहितत्वेपि वस्तुतः परिच्छेदसत्त्वेन त्रिविधपरिच्छेदरहितत्वाभावः सिद्ध इति शङ्काशयः । तद्भवत इति । शंकराचार्यानुयायिमतेपि ब्रह्मण्यविद्याविलक्षणत्वेन वस्तुतः परिच्छेदसत्त्वादनन्तत्वाभावापादनं सममेवेति भावः ।

—१८ भेदतत्त्वेति । एतदनभ्युपगमकारणं प्रागुक्तम् (श्रीभाष्य-पृ. २२ प. ११) ।

—१९ आनन्त्येति । अनन्तत्वे हि देशकालपरिच्छेदरहितत्वमेव प्रयोजकं न तु त्रिविधपरिच्छेदरहितत्वम् । कस्यापि वस्तुनस्त्रिविधपरिच्छेदरहितत्वाभावात् । तथा च काणादमते ब्रह्मण्यानन्त्यं सिध्यतीति भावः ।

४३९-२ भेदवादिन इति । तथा च रामानुजमते त्रिविधपरिच्छेदरहितत्वमनन्तत्वप्रयोजकमिति भावः ।

—१७ स्तब्धोसीति । कृतविद्यं गुरुकुलात्प्रत्यागतं श्वेतकेतुं प्रति तत्पितुर्वचनम् । हे श्वेतकेतो त्वं स्तब्धोस्यप्रणतस्वभावोसि येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति तादृशमादेशं स्वगुरुं प्रति पृष्टवानसि किमित्यर्थः ।

—२३ अन्यज्ञानासंभवमिति । चोदित इत्यस्यैतन्मुख्यं कर्म । अन्यस्य ज्ञानेनान्यस्य ज्ञानं कथं संभवतीति प्रश्नः । गुरुरूपे गौणे कर्मणि चोदित इति निष्ठाप्रत्ययः ।

४४०-८ स्पृश्यत इति । प्राप्यत इति फलितोर्थः । घटरूपो विकारो घट इति नामधेयं च मृद्द्रव्येण प्राप्यते । अतो विकारनाम्नोरुभयोरप्यारम्भणत्वम् ।

—१२ संस्थानविशेष इति । अवयवरचनाविशेष इत्यर्थः ।

—१६ अतस्तस्यैवेति । एतेन काणादेन प्रागुक्ताः (श्रीभाष्य-पृ. ४१९ प. १०) कार्यकारणभेदहेतवो विलक्षणबुद्धिबोध्यत्वशब्दभेदकार्यभेदकालभेदाकारभेदा निरस्ताः ।

४४१-२ तदुत्पत्तीति। घटोत्पत्तिर्घटनाशश्च मृत्तिकाया एवावस्थाविशेष इति भावः।

—५ तस्यार्थवत्त्वमिति। एतेन काणादोक्तं (श्रीभाष्य-पृ. ४१९ प. १८) कारकव्यापारवैयर्थ्यं निरस्तम्।

अभिव्यक्तीति। सत्कार्यवादिना हि कारकव्यापारेण घटस्य नोत्पत्तिः किं त्वभिव्यक्तिरित्यवश्यमङ्गीकर्तव्यमिति प्रकल्प्य काणादैरनवस्थादीनि चोद्यानि यानि प्रागुक्तानि (श्रीभाष्य-पृ. ४२० प. ४) तानि सर्वाणि परिहृतान्येव। सत्कार्यवादेष्यभिव्यक्तेरनभ्युपगमात्।

—११ द्रव्यस्य सत्त्वादिति। तथा च प्राक्सदेव द्रव्यं कारकव्यापारेणावस्थान्तरभाग्भवतीत्येतावन्मात्रेणैव सत्कार्यवादव्यवहारः। न तु यद्यत्कार्यं तत्तत्सदेवेति नियमः। पृथुबुध्नोदराकाररूपस्यावस्थान्तरस्य प्रागसत एव कारकव्यापारेणोत्पत्तेः।

—१२ शङ्कते-संस्थानस्येति। संस्थानमाकारविशेषः। प्रतिबन्ध्योत्तरयति-असत्कार्येति। तथा च जात्युत्तरत्वान्नेदृशं केनापि कस्यापि चोद्यम्। ननु स्वस्य स्वविषयकः प्रश्नः कृतश्चेज्जात्युत्तरत्वम्। यथोत्पत्तेरुत्पत्तिविषये। अवस्थाया उत्पत्तिविषयकः प्रश्नस्तु न तादृश इति चेन्न। सिद्धान्तिमतेवस्थाया उत्पत्तिरूपत्वात्। अवस्थैव वस्तुन उत्पत्तिर्न त्ववस्थाया उत्पत्तिर्नामास्ति।

—१४ पृथक्प्रतिपत्तीति। यथा दण्ड्यपेक्षया दण्डस्य पृथक्प्रतिपत्तिर्भवति पृथक्कार्ययोगश्च भवति तद्वदपृथक्सिद्धधर्माणां धर्म्यपेक्षया पृथक्प्रतिपत्तिः पृथक्कार्ययोगश्च न भवति। अत एव च तेषां पृथगुत्पत्तिनिरपेक्षत्वम्। तथा च स्वाश्रयापेक्षयापृथक्सिद्धानामवस्थानां पृथक्प्रतिपत्तिकार्यानर्हत्वेन पृथगुत्पत्तिनिरपेक्षत्वान्न चोद्यस्यावकाश इत्याहुः।

—१५-६ कपालत्वेति। एतेन काणादैः प्रागुक्तः (श्रीभाष्य-पृ. ४१९ प. १७) संख्याभेदो निरस्तः।

—२० अधिष्ठात्रन्तरेति। तथा च श्रुतिस्थमद्वितीयपदमधिष्ठात्रन्तरं वारयतीति भावः। श्रुतेनाद्वितीयपदं गुणतोपि सद्वितीयतां न सहते (श्रीभाष्य-पृ. २१ प. २) इत्यपास्तम्।

४४२-१२ स्वात्मकेति। स्वं परमात्मात्मा यस्य स स्वात्मकः। एवंभूतो यो जीवस्तस्य तेजोबन्नरूपासु तिसृषु देवतास्वनुप्रवेशेनेत्यर्थः।

४४३-३ पूर्वोक्ताशङ्केति। इदंशब्दसामानाधिकरण्येन ब्रह्मणि जगद्व्यतदोषाशङ्केत्यर्थः (श्रु.)।

४४४-१५ ये त्विति। शंकराचार्यानुयायिनो ब्रह्माज्ञानवादिन इत्यर्थः।

—१९ ये चेति। भास्करमतानुयायिन इत्यर्थः।

४४५-४ व्याकुप्येयुरिति । ब्रह्मण एवोपाधिसंबन्धेन जीवत्वाङ्गीकारे जीवगतं कर्मवश्यत्वं ब्रह्मणि स्यात् । ब्रह्मगतापहतपाप्मत्वं च जीवे स्यात् । तथा च जीवस्यैव कर्मवश्यत्वं ब्रह्मण एवापहतपाप्मत्वमिति व्यवस्था न सिध्यति । एवमचितः परिणामो ब्रह्मणस्त्वपरिणाम इति व्यवस्था च न सिध्यति । अचिद्ब्रह्मणोरनन्यत्वस्यापि स्वाभाविकत्वेन ब्रह्मण एव हेयाकारपरिणामादित्याशयः ।

—६ ये पुनरिति । यादवप्रकाशमतानुयायिन इत्यर्थः । विप्लवो विकारः ।

४४६-१ सदैव सर्वज्ञमिति । यः सर्वज्ञः सर्वविदित्यादिश्रुतयो हि जगत्कारणस्य ब्रह्मणः कारणावस्थायामपि सर्वज्ञत्वादिगुणान्प्रतिपादयन्ति । तथा च सन्मात्रद्रव्यमेव कारणमित्याद्युक्तिर्विरुद्धेति भावः । ननु नेश्वरः कारणम् । किं तु यस्येश्वरोप्यंशभूतस्तादृशमीश्वरादपि यत्परं तत्त्वं सन्मात्ररूपं तत्कारणमिति चेन्न । सदेवेत्यादिश्रुतिभिः सोभिध्यायेति स्मृत्या नारायणो जगन्मूर्तिरित्यादीतिहासपुराणैश्च परमपुरुषस्यैव कारणत्वेन प्रतिपादनात् ।

४४७-११ न्यायविरोधमाह-न चेश्वर इति । यादवप्रकाशीयैरीश्वरस्य सन्मात्रद्रव्यांशभूतत्वाभ्युपगमान्नियन्तृत्वरूपविशेषवत्त्वाच्च कारणभूतेश्वरस्य सन्मात्रत्वं न्यायविरुद्धमिति भावः ।

—१३ कादाचित्क इति । तथा चोक्तगुणविशिष्टस्येश्वरस्यैव कदाचिद्गुणयोगाभावे निर्विशेषसन्मात्रत्वं स्यादिति शङ्काशयः ।

—१५ शङ्कते-परास्येति । ज्ञानबलक्रिया चेत्यत्र ज्ञानादिशब्दा लक्षणया तत्तच्छक्तिपरा इति परास्य शक्तिरित्यनेन ज्ञानबलक्रिया चेत्यनेन च ज्ञानादिशक्तेरेव स्वाभाविकत्वमुच्यते न तु ज्ञानादीनामिति ते कादाचित्का एवेति शङ्काशयः ।

—२० पाचकादिवदिति । यथा सांप्रतं पचनकर्तृत्वाभावेपि पचनशक्तिमत्त्वाभिप्रायेणायं पाचक इति प्रयुज्यते तत्र पाचक इत्यस्य पचनशक्तिमानित्यर्थो न तु पचनकर्तेति ण्वुल्प्रत्ययस्य शक्त्यर्थत्वं तथा सर्वज्ञ इत्यत्रापि कप्रत्ययस्य शक्त्यर्थत्वेन ज्ञानशक्तिमत्त्वमित्यर्थः स्यादिति लक्षणा नास्तीति शङ्काशयः ।

—२२ इत्यादिष्विति । आदिशब्देन शकि लिङ्च (पा. सू. ३।३।१७२) इत्यस्य संग्रहः ।

४४८-७ शङ्कते-स्वांशेष्विति ।

—१४ क्रियादिष्विति । काशस्य कुशत्वेन कुशस्थाने काशावलम्बनं काशकुशावलम्बनम् । तच्च न मुख्यम् । तद्वदत्र क्रियाया अमुख्यसत्त्वाभ्युपगमेपि सर्वत्रैकरूपं सत्त्वं नोपपद्यत इत्यर्थः ॥ १५ ॥

४४८–२० मृद्घटादिष्विति । तत्र घटादयः किं बालयुवादिवन्मृद एवावस्थाभेदा अथ वा मृदपेक्षया पटादिवद्द्रव्यान्तराण्येवेति संशय इति भावः ।

४४९–६ द्रव्यान्तरेति । घटोत्पत्तेः पूर्वमियं मृदिति तदुत्तरं चायं घट इति बुद्धिर्भिन्ना शब्दश्च भिन्नः । अस्य बुद्धिभेदस्य शब्दभेदस्य च हेतुर्मृदोवस्थान्तरयोग एव । लाघवात् । न तु तत्र घटस्य द्रव्यान्तरत्वं हेतुः । गौरवात् । घटस्य द्रव्यान्तरत्वस्वीकारेपि तादृशद्रव्यान्तरसिद्ध्यर्थं तदसमवायिकारणत्वेन मृदोवस्थान्तरयोगस्यावश्यं स्वीकार्यत्वाद्गौरवं स्पष्टमेव । तेनैवावस्थान्तरयोगेन बुद्ध्यन्तरस्य शब्दान्तरस्य चोपपत्तेस्तदर्थं द्रव्यान्तरकल्पनानुचितैव ।

—७ न च जातीति । भिन्नेष्वपि घटेषु घटोयमिति प्रत्यभिज्ञा घटत्वजातिनिबन्धना दृश्यते । तत्र घटव्यक्तिभेद उपलभ्यते । नैवं मृद्घटव्यक्तिभेद उपलभ्यत इतीयं मृदिति प्रत्यभिज्ञा न जातिनिबन्धनेत्यर्थः ।

—११ द्रव्यान्तरत्वे सतीति । घटस्याश्रयभूता या मृत्तिका तत्सामानाधिकरण्येन मृदयं घट इति घटप्रतीतिर्यथा त्वयोच्यते तथान्यत्रापि जलस्याश्रयभूतो यो घटस्तत्सामानाधिकरण्येन घट इदं जलमिति जलप्रतीतिर्भाव्या । परं त्वीदृशी क्वापि न दृश्यत इति भावः ।

—१२ शङ्कते- गोमयादीति । यथा सिद्धान्तिमते घटस्य मृदवस्थाविशेषत्वादियं मृदिति प्रत्यभिज्ञा तथा वृश्चिके गोमयप्रत्यभिज्ञा कुतो न भवतीति शङ्काशयः ।

—१३ तत्राप्यादीति । द्रव्यान्तरवादिनाप्यत्रेदमेव समाधानमवश्यं वक्तव्यम् ।

—१४ शङ्कते–अग्निकार्य इति ॥ १६ ॥ १७ ॥

४५०–१८ सत्त्वासत्त्वे इति । व्यवहारयोग्यता सत्त्वं विरोधिव्यवहारयोग्यता तद्व्यवहारयोग्यस्यासत्त्वमित्युक्तमित्यर्थः (श्रु.) ।

४५१–३ मनस्कारेति । इदमित्थमिति मनसि कल्पना मनस्कारः । स तुच्छस्य न संभवतीत्यर्थः ।

—९ तद्विरोधित्वेनेति । घटोस्तीति व्यवहारविरोधित्वेनेत्यर्थः ।

१०—न च तद्व्यतिरिक्त इति । अभावस्य पदार्थान्तरत्वं मन्यमानेनाप्यनवस्थाभिया घटाभावाभावादेर्घटादिस्वरूपत्वमुक्तम् । तद्वद्घटाभावोपि विरोध्यवस्थास्वरूप एवाभ्युपगन्तव्यः किमतिरिक्ताभावकल्पनया । तथा च घटस्य प्रागभावः प्रध्वंसाभावश्च पिण्डत्वकपालत्वाद्यवस्थास्वरूपः । घटान्योन्याभावश्च पटत्वादिस्वरूपः । घटसंसर्गाभावश्च कालविशेषविशिष्टदेशविशेषत्वमिति बोध्यम् ॥१८॥

४५२-२ व्यतिषङ्गेति । व्यतिषङ्गो मिथः संसर्गः ॥ १९ ॥ २० ॥ (६)

—१० तत्त्वमसीति । तत्त्वमस्ययमात्मा ब्रह्मेत्यादिश्रुतिभिर्यज्जीवब्रह्मणोस्तादात्म्यं प्रतिपाद्यते तन्मनुष्यो जीव इतिवच्छरीरशरीरिभावमूलकमिति सिद्धान्त्याशयः । पूर्वपक्षी त्वेतत्तादात्म्यं स्वरूपैक्यलक्षणं मन्यते ।

४५३-२ अहितकरणादीति । आदिशब्देन सुखदुःखभोक्तृत्वं विवक्षितम् (श्रु.) ।

—३-५ शङ्कते-जीवब्रह्मणोरिति । तथा च न मया भेदश्रुतिः परित्यक्तेति जीवब्रह्मणोर्भेदेन हिताकरणादिदोषानवकाश इति शङ्काशयः । तत्रापीति । जीवब्रह्मणोरज्ञानकृतो भेद इति शङ्काकृतोक्तम् । तत्राज्ञानं किं जीवनिष्ठं ब्रह्मनिष्ठं वा । आद्ये पूर्वोक्ता (श्रीभाष्य-पृ. ४२६) विकल्पादिदोषास्तदवस्था एव । अन्त्य आह-ब्रह्माज्ञानपक्ष इति ॥ २१ ॥

४५४-८ सर्वभूतेति । अत्र भूतशब्देन चेतनाचेतनग्रहणात्परमात्मनो जीवान्तरात्मत्वेन जीवादर्थान्तरत्वं सिद्धम् ॥ २२ ॥

—२२ इत्यादिभिरिति । आदिशब्देन न तु दृष्टान्तभावात् (ब्र.सू.२।१।९) उभयेपि हि भेदेनैनमधीयते (ब्र. सू. १।२।२१) इत्यादिसंग्रहः ।

४५५-४ स्वभावासंकर इति । अचिद्वस्तुनः परिणामित्वस्वभावो जीवस्य दुःखित्वस्वभावो ब्रह्मणः कल्याणगुणाकरत्वस्वभाव इत्येवं स्वभावासंकर इत्यर्थः । न च कारणावस्थायां चिदचिद्ब्रह्मणामेकत्वावधारणात्स्वभावसंकरो दुर्वार इति वाच्यम् । तदानीमप्यचिद्युक्तस्य जीवस्य ब्रह्मशरीरतया सूक्ष्मरूपेणावस्थानाद्विभागोस्त्येवेति स्वभावासंकरोपपत्तेः । तदानीं चिदचिद्ब्रह्मणामविभाग इति व्यवहारस्तु नामरूपविभागाभावमात्रमूलक इति बोध्यम् ।

—१२ ये तु पुनरिति । मायावादिन इत्यर्थः । अविद्यावस्थाविशिष्टो जीवः । स एवाविद्यावियुक्तावस्थाविशिष्टो ब्रह्मेति तन्मतम् । इममेव भेदं गृहीत्वाधिकं तु भेदनिर्देशादमादिवच्च तदनुपपत्तिरिति सूत्रद्वयं तैर्योजितम् ।

—१३ न हीति । मायावाद्युक्तरीत्या जीवब्रह्मणोरविद्यावत्त्वतद्रहितत्वादिभिर्भेदसिद्धावप्युक्तश्रुतिप्रतिपादितः किंचिज्ज्ञत्वसर्वज्ञत्वादिभिर्भेदो न सिध्येत् । सर्वज्ञत्वसर्वेश्वरत्वादीनामविद्याकल्पितत्वेन ब्रह्मणि वस्तुतः सर्वज्ञत्वाद्यभावात् ।

—१७ न चाविद्येति । ब्रह्मण्यविद्याकल्पितमेव सर्वज्ञत्वादिगुणगणं गृहीत्वा जीवब्रह्मणोर्भेदोत्राधिकरणे प्रतिपाद्यत इति तु न युक्तम् । यतः प्रथमाध्याये जिज्ञास्यतया प्रक्रान्तं ब्रह्मणो रूपं नाविद्याकल्पितं किं तु वास्तविकम् । तदेवात्र द्वितीयाध्याये स्मृतिन्यायविरोधपरिहारेण प्रतिपाद्यते । सिद्धान्ति-

(रामानुज-)मते तु नायं दोषः । तन्मते सर्वज्ञत्वादिगुणानामविद्याकल्पितत्वाभावात् ।

—४५६-२ अपीताविति । अपीतावित्यधिकरणमेतदधिकरणशेषभूतम् । अपीतावित्यधिकरणे न जीवब्रह्मणोर्भेदः प्रतिपाद्यते । किं त्वस्मिन्नधिकरणे सिद्धान्तितं भेदं गृहीत्वैव केवलं विलक्षणयोः कार्यकारणभावसंभवः प्रतिपाद्यते । असदिति चेन्नेति तस्मात्पूर्वस्मिन्सूत्रे विलक्षणत्वस्यैव शङ्कासमाधानाभ्यां स्थापितत्वात् ॥ २३ ॥ (७)

४५७-२ एतावानेवेति । अशक्तस्य कारककलापापेक्षा न शक्तस्येत्येवं यः शक्ताशक्तयोर्विशेषः सोत्रैवशब्देन व्यवच्छिद्यते । न तादृशः शक्ताशक्तयोर्विशेषः । किं तु शक्तः सामग्रीसहितश्चेत्कार्यं कर्तुं शक्नोति । अशक्तस्तु सामग्रीसहितोपि कार्यं कर्तुं न शक्नोतीति ।

—९ यथा क्षीरेति । जलं स्वयमेव हिमरूपेण परिणमते । रविकिरणास्तु तदुत्सर्गमात्रहेतवः (श्रु.) ।

—१२ आतञ्चनादीति । आदिशब्देन क्राथसंग्रहः । तत्रातञ्चनेन शैथ्यं क्राथेन रसविशेषोत्पत्तिरिति बोध्यम् ॥ २४ ॥ २५ ॥ (८)

४५८-२ सदेवेति । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिश्रुतिष्वेकशब्दो ब्रह्मण्यवयवतोपि विभागं न सहत इति ब्रह्मणो निरवयवत्वं सिद्धम् । इदं वा अग्र इति श्रुतौ च न द्यौरासीन्न पृथिवीत्यादिवाक्यशेषेण द्युपृथिव्यादिजगदवयवाभावकथनान्निरवयवत्वं सिद्धम् । आदिशब्दान्निष्कलं निष्क्रियमिति श्रुतिसंग्रहः । निष्कलमित्यस्य निरवयवमित्यर्थः ।

—४ एकमेव निरवयवमिति । एकमेवेत्यस्य व्याख्यानं निरवयवमिति (श्रु.) ।

—१४ यद्यपीति । सूक्ष्मचिदचिद्वस्तुरूपशरीरस्य स्थूलचिदचिद्वस्तुरूपेण परिणामेपि शरीरिणो ब्रह्मणोऽपरिणामान्न कृत्स्नप्रसक्तिरिति शङ्काशयः ॥ २६ ॥

४५९-३ शब्दमूलत्वादिति । अग्निना सिञ्चेदित्यादिषु सेचनसाधनतानर्हत्वं धर्मिणोग्नेः प्रत्यक्षसिद्धमिति न तद्विरुद्धं सेचनार्हत्वं वाक्येन प्रतिपाद्यते । प्रमाणान्तरागोचरस्य ब्रह्मरूपधर्मिणस्तु विलक्षणत्वं शास्त्रेणैव प्रतिपाद्यत इति विलक्षणधर्मिणो विलक्षणधर्मयोगो न विरुध्यते (श्रु.) ॥ २७ ॥

—९ तदप्रसक्तिश्चेति । एतदध्याहारलब्धम् ॥ २८ ॥

४६०-८ विसजातीयत्वाभावेनेति । विसजातीयत्वाभावेन विजातीयत्वाभावेन साजात्येनेति यावत् । तथा च लौकिकपरमाण्वादिनिरवयवपदार्थवत्कृत्स्नप्रधानपरिणामप्रसक्तिरित्यादयो दोषा बोध्याः । अथ वा विशेषतः साजा-

त्याभावेनेत्यर्थः। सामान्यतो द्रव्यत्वादिना साजात्यं च न कार्यकारणभावोपयोगि। तन्तुघटयोरपि तादृशसाजात्यात्। अतः कार्यकारणभावोपयोगि यद्विशेषतः साजात्यं तत्प्रधानस्य लौकिकवस्तुभिर्घटादिभिः सह नास्तीति भावः।

४६०-१४ अनन्तरे कल्प इति। सत्त्वरजस्तमोभ्यः सकाशात्प्रधानमुत्पद्यत इति पक्ष इत्यर्थः। अस्मिन्पक्षे सत्त्वादीनां जगतो मूलकारणत्वान्मूलकारणं प्रधानमिति तैः स्वीकृतं विरुध्यते। किं च मूलकारणं प्रधानमेकं गृहीत्वा तत्त्वानां पञ्चविंशतिसंख्या तैः प्रतिपादिता (श्रीभाष्य- पृ. ४६५ प. १५)। सत्त्वादीनां मूलकारणत्वे तत्त्वानां सप्तविंशतिसंख्या स्यात्।

—१७ न स्थूलेति। एकदेशेन संयोगे हि ये सत्त्वादीनामेकदेशाः संयुक्तास्ततोन्य एकदेशाः संयोगेनाव्याप्ता इति स्थूलत्वं सिध्यति। निरवयवानां तु सत्त्वादीनां संयोगस्य व्याप्यवृत्तित्वेन तेष्वेकस्मिन्नितरद्व्यमर्थात्संमात्येवेति स्थूलत्वासिद्धिरिति भावः॥ २९॥ ३०॥

४६१-१० विकरणत्वादिति। शरीरेन्द्रियरहितत्वादित्यर्थः। करणशब्देन शरीरमिन्द्रियं च गृह्यते।

—११-२ न तस्येति। कार्यं शरीरम्। करणमिन्द्रियम्॥ ३१॥(९)॥३२॥

४६२-१६ स्वसंकल्पमात्रेति। एतेन जगद्व्यापारस्य महायासरूपत्वेन लीलाकृतत्वाभाव इत्यपास्तम्॥ ३३॥

—१८ वैषम्यनैर्घृण्ये इति। वैषम्यं पक्षपातः।

४६३-१२ निमित्तमात्रमिति। निमित्तमात्रमप्रधानकारणं साधारणकारणमिति यावत्। यथा क्षेत्रसलिलादिकं धान्यमात्रस्य साधारणं कारणमित्यप्रधानकारणमेव। प्रधानकारणं तु तत्तद्बीजविशेष एव। तद्वदत्र प्रधानकारणं कर्मविशेष एवेति भावः॥ ३४॥

४६४-२ तदनादित्वेपीति। उपपद्यते चापीति सूत्रखण्डस्यायमर्थः॥ ३५॥ ३६॥ (१०)

॥ अथ द्वितीयाध्यायस्य द्वितीयः पादः प्रारभ्यते ॥

४६५-१५ मूलप्रकृतिरिति। अयं भावः—त्रयाणां गुणानां सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। सा चैकैव। पुरुषास्तु परं भिद्यन्ते। ते च कूटस्था नित्या अपरिणामिनो नित्यचैतन्यस्वभावाः। ते च पङ्गवः। अपरिणामित्वात्। प्रकृतिस्त्वन्धा। जडत्वात्। यदा विषयभोगेच्छा प्रकृतिपुरुषभेददिदृक्षा च प्रकृतेर्भवति तदा सा पुरुषोपरागवशात्परिणमते। तस्याश्चाद्यः परिणामो बुद्धिरन्तःकरणविशेषः। बुद्धिरेव महत्तत्त्वम्। सा च बुद्धिर्दर्पणवन्निर्मला। तस्याश्च बहिरिन्द्रि-

यप्रणाडिकया विषयाकारो यः परिणामविशेषो घट इति पट इत्याद्याकारस्तज्ज्ञानं वृत्तिरिति चाख्यायते। स्वच्छायां बुद्धौ वर्तमानेन ज्ञानेन चैतन्यस्य पुरुषस्य भेदाग्रहादहं जानामीति योभिमानविशेषः सैवोपलब्धिः। स्वक्चन्दनादिविषयसंनिकर्षादिन्द्रियप्रणाडिकयैव सुखदुःखाद्याकारो बुद्धेरेव यः परिणामविशेषः स प्रत्ययः। अत एव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्माः सर्व एव बुद्धेः परिणामविशेषाः सूक्ष्ममात्रया प्रकृतावेव वर्तमाना अवस्थाभेदादाविर्भवन्ति तिरोभवन्ति च। पुरुषस्तु पुष्करपलाशवन्निर्लेपः प्रतिबिम्बते परं बुद्धौ (क. सू. उप.८।१।१।)। तत्त्वानि तु पञ्चविंशतिः–१ मूलप्रकृतिः (प्रधानम्)। प्रकरोतीति प्रकृतिः। मूलं चासौ प्रकृतिश्चेति मूलप्रकृतिः। विश्वस्य कार्यकलापस्य सा मूलम्। न त्वस्या मूलान्तरमस्ति। अनवस्थाप्रसङ्गात्। इयं केवला प्रकृतिरेव। न तु कस्यचिद्विकृतिः। २ महत्तत्त्वम् (बुद्धिरन्तःकरणम्)। ३ अहंकारः (अहं सुखीत्याद्यभिमानः)। ४–८ पञ्च तन्मात्राणि (शब्दस्पर्शरूपरसगन्धाः)। एतानि महत्तत्त्वादीनि सप्त विकृतयः प्रकृतयश्च। तत्र महत्तत्त्वं मूलप्रकृतेर्विकृतिः। अहंकारस्य प्रकृतिः। बुद्धिमन्तरेणाहंतानुदयात्। अहंकारो महत्तत्त्वस्य विकृतिः। तामसोहंकारस्तन्मात्राणां प्रकृतिः। अहंतामन्तरेणेदंत्वावच्छिन्नानां तन्मात्राणामनुदयात्। सात्त्विकोहंकारः पञ्चज्ञानेन्द्रियपञ्चकर्मेन्द्रियमनसां प्रकृतिः। राजसाहंकारस्य त्वितरयोरहंकारयोः कार्योत्पादनेनुग्राहकत्वेन कारणत्वं बोध्यम्। तथा तन्मात्राण्यहंकारस्य विकृतयः। आकाशादिपञ्चमहाभूतानां क्रमेण पूर्वपूर्वभूतसहितानि प्रकृतयश्च। ९–१३ पञ्च ज्ञानेन्द्रियाणि १४–१८ पञ्च कर्मेन्द्रियाणि १९–२३ पञ्च महाभूतानि २४ मनश्चेत्येतानि षोडश तत्त्वानि केवलं विकृतय एव। न तु कस्यापि प्रकृतयः। श्लोके तुशब्द एवार्थको विकारपदोत्तरं योज्यः। यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो विकारा एवं तद्विकाराणां पयोबीजादीनां दध्यङ्कुरादयो विकाराः सन्त्येव तथापि गवादीनां बीजादीनां च न पृथिव्यादिभ्यस्तत्त्वान्तरत्वम्। इह तु प्रकृतिपदेन तत्त्वान्तरोपादानत्वमभिप्रेतमिति न दोषः। सर्वेषां गोघटादीनां स्थूलत्वमिन्द्रियग्राह्यत्वं च सममिति न तत्त्वान्तरत्वम्। तत्र पञ्च महाभूतानि तन्मात्राणां विकृतयः। अवशिष्टान्येकादश त्वहंकारस्य विकृतयः। २५ पुरुषरूपतत्त्वं तु न कस्यापि प्रकृतिर्नापि विकृतिः। पुरुषपदेनानन्तानां जीवानामीश्वरस्य च ग्रहणमिति।

४६५–१८–४६६–१ **लाघवेति**। लाघवं प्रकाशश्च सत्त्वस्य कार्यम्। चलनमवष्टम्भनं च रजसः कार्यम्। अवष्टम्भनं धारणम्। गौरवमावरणं च तमसः कार्यम्। **कार्यैकेति**। विवेको भेदः। सत्त्वरजस्तमःसु परस्परं भेदो न प्रत्यक्षमुपलभ्यते। सत्त्वादीनामतीन्द्रियत्वात्। किं तु केवलं कार्येणानुमीयत इति भावः।

४६६-१३ निर्धर्मक इति। ज्ञातृत्वरहितः। ज्ञातृत्वं त्वन्तःकरणस्येति तन्मतम् (श्रु.)।

—२० नातीवेति। सत्कार्यवादसमवायानभ्युपगमादिभिर्न विवाद इत्यर्थः। अभिव्यक्तयवस्थावैषम्यादिकमभिप्रेत्य नातीवेत्युक्तम् (श्रु.)।

४६७-१२ भेदानामिति। भेदा विशेषाः। महदादीनां विशेषाणां मूलकारणमव्यक्तमस्ति। कुतः। कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य। कार्यं चोत्पत्तेः प्राक्कारणेस्त्येव। तथा च यथा कूर्मशरीरे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते चेदं कूर्मशरीरमेतान्येव तस्याङ्गानीति। एवं निविशमानानि तस्मिन्नव्यक्तीभवन्ति। एवं कारणान्मृत्पिण्डाद्धेमपिण्डाद्वा कार्याणि घटमुकुटादीनि सन्त्येवाविर्भवन्ति विभज्यन्ते। एवं सन्त्येव पृथिव्यादीनि कारणात्तन्मात्रादाविर्भवन्ति विभज्यन्ते च। सन्त्येव च तन्मात्राण्यहंकाराद्विभज्यन्ते। सन्नेवाहंकारो महतो विभज्यते। सन्नेव च महानव्यक्ताद्विभज्यते। सोयं कारणात्परमाव्यक्तात्साक्षात्परंपरया च विश्वस्य कार्यस्य विभागः सर्गः। कारणरूपमेवानभिव्यक्तं कार्यमपेक्ष्याव्यक्तं भवति। तत्र पृथिव्यादीनि लयकाले तन्मात्रेषु विशन्ति स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति। एवं तन्मात्राण्यहंकारे विशन्ति स्वापेक्षयाहंकारमव्यक्तयन्ति। एवमहंकारो महत्याविशन्स्वापेक्षया महान्तमव्यक्तयति। महान्प्रकृतौ विशन्स्वापेक्षया प्रकृतिमव्यक्तयति। प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्याणामव्यक्तमेव। सोयमविभागः प्रकृतौ वैश्वरूप्यस्य नानारूपस्य कार्यस्य। विश्वरूपमेव वैश्वरूप्यम्। स्वार्थे ष्यञ्। तस्मात्कारणे सत एव कार्यस्य विभागाविभागाभ्यामव्यक्तं कारणमस्तीति सिद्धम्। शक्तितः प्रवृत्तेश्चाव्यक्तं कारणं सिध्यति। कारणशक्तितो हि कार्यं प्रवर्तते। अशक्तात्कारणात्कार्यस्यानुत्पत्तेः। कार्यस्योत्पत्तेः प्राक्कारणे यदव्यक्तत्वं सैव कारणशक्तिः। न त्वन्या। प्रमाणाभावात्। तस्मादव्यक्तं कारणमिति सिद्धम्। परिमाणाच्चाव्यक्तं कारणं सिध्यति। परिमाणं परिमितत्वमव्यापित्वमिति यावत्। अत्रायं प्रयोगः-विमता महदादिभेदा अव्यक्तकारणवन्तः। परिमितत्वाद्घटादिवत्। घटादयो हि परिमिता मृदाद्यव्यक्तकारणका दृश्यन्ते। समन्वयाच्चाव्यक्तं कारणं सिध्यति। भिन्नानां सरूपता समन्वयः। बुद्ध्यादयो हि सुखदुःखमोहसमन्विताः प्रतीयन्ते। यानि च यद्रूपमनुगतानि तानि तत्स्वरूपाव्यक्तकारणवन्ति। यथा मृद्धेमपिण्डसमनुगता घटमुकुटादयो मृद्धेमपिण्डाव्यक्तकारणका इति महदादीनां विशेषाणामव्यक्तं कारणमस्तीति सिद्धम्।

४६८-१६ चकारादिति। अनुपपत्तेश्चेति चकारादित्यर्थः। अन्वयः कार्ये संबन्धः। अनैकान्त्यं व्यभिचारः। यद्यत्कार्येन्वितं तत्तत्कारणं भवत्येवेति नियमो नास्ति। गुणादिषु व्यभिचारदर्शनात्। तन्तुनिष्ठानां शुक्लत्वादिगुणानां

पटेन्वितानामपि न पटकारणत्वं किं तु तन्तूनामेव तथा गवादिनिष्ठानां गोत्वादिजातीनां गवादिसंततावन्वितानामपि न तादृशसंततिकारणत्वं किं तु गवादीनामेव । तथा चान्वितमपि शौक्ल्यं गोत्वादि च कारणं न भवति । न च यद्यत्कार्येन्वितं द्रव्यं तत्तत्कारणं भवत्येवेति द्रव्यविषयको नियम इति सत्त्वादीनां कारणत्वं सिध्यतीति वाच्यम् । सत्त्वादीनां द्रव्यत्वासिद्धेः ।

४६९–१ **कारणत्वव्याप्तानीति** । इति न वाच्यमित्यन्वयः ।

—९ **अपरिमितत्वे हीति** । यदि सत्त्वादीनां गुणानां प्रत्येकमपरिमितत्वं तर्हि तेषु न्यूनाधिकभावो न संभवति । परिमितानामेव न्यूनाधिकभावदर्शनात् । तथा च गुणेषु वैषम्याभावेन कार्यारम्भ एव न संभवति । गुणानां साम्यावस्था प्रलयः । वैषम्यावस्था सृष्टिरिति तेरेवाङ्गीकृतत्वात् । गुणानां परिमितत्वाङ्गीकारे तु प्रागुक्तरीत्या (विवृति-पृ. २४० प. २४) तेषामपि किंचिदन्यत्कारणमाश्रयणीयमित्यनवस्था तदवस्थैवत्याशयः ॥ १ ॥

—१२ **तद्व्यतिरिक्तमिति** । पयोम्बवादीत्यर्थः । यथा पयआदीनां चेतनानधिष्ठितानामेव दध्याद्यारम्भकत्वं तथा तदृष्टान्तेन प्रधानस्य चेतनानधिष्ठितस्यैव जगदारम्भकत्वमिति वक्तुं न शक्यते । पयआदीनां पक्षीकरणात् । तत्राप्यनुमानेन चेतनाधिष्ठितत्वस्य साधनात् । यद्यपि पयआदीनां चेतनाधिष्ठितत्वं प्रत्यक्षतो नोपलभ्यते तथापि चेतनानधिष्ठितमेवेत्यपि निश्चयो न भवति । संदेहे च रथादिदृष्टान्तेन चेतनाधिष्ठितत्वमेवानुमीयत इति भावः ।

—१९–४७०–१ **तिन्तिण्यादीति** । तिन्तिणी चिञ्चा । आदिशब्देन बिल्वामलकादिसंग्रहः । **प्रतिसर्गावस्थायामिति** । प्रतिसर्गः प्रलयः ।

४७०–४ **परिणामत इति** । वस्तुतु प्रत्येकं गुणानामङ्गाङ्गिभावेनावस्थानरूपवैषम्यात्सलिलवत्स्वत एव परिणामाज्जगत्प्रवृत्तिश्चेतननिरपेक्षोपपद्यत इत्यर्थः (श्रु०) ॥ २ ॥

—१४ **सर्गव्यतिरेकेणेति** । प्रधानस्यान्यानपेक्षः स्वाभाविक एव परिणामश्चेत्सर्वदैव स्यादिति भावः ।

४७१–१ **दोष इतीति** । इति न वाच्यमिति पूर्वेणान्वयः । यथा प्रधानस्य जगत्कारणत्वे सर्वदैव सृष्टिः स्यादिति दोषस्तथेश्वरस्य जगत्कारणत्वे तस्य परिपूर्णस्य स्वतन्त्रत्वेन पारतन्त्र्याभावात्कदापि सृष्टिर्न स्यादिति दोष इति दोषसाम्यमिति शङ्काशयः ।

—२ **लीलार्थप्रवृत्तीति** । न हि लीलार्थं कदाचित्प्रवृत्तौ स्वातन्त्र्यहानिर्भवति । यथेच्छाचरणस्यैव स्वातन्त्र्यपदार्थत्वादिति भावः ।

—१६ **इति वदतीति** । तथा च कर्मसहितं प्रधानमीश्वरानपेक्षमेव विचित्रजगदारम्भकं भविष्यतीति वक्तुं न शक्यत इति भावः ।

४७२-१ इष्टापूर्तमिति । इष्टं दर्शपूर्णमासादि श्रौतं कर्म । पूर्तं वापीकूपादि स्मार्तं कर्म । बहुधा जातं पूर्वकल्पतत्पूर्वकल्पादिरूपेण बहुप्रकारमुत्पन्नमिदानीमपि तथा जायमानं विश्वं सर्वं जगद्भुवनस्य नाभिश्चक्रनाभिवत्सर्वस्य लोकस्याधारभूतः परमात्मा बिभर्ति स्वीकरोतीत्यर्थः ।

—४ यतः प्रवृत्तिरिति । यतो भूतानामुत्पत्त्यादिका प्रवृत्तिर्येन च सर्वमिदं ततं स्वकर्मणा तं मामिन्द्राद्यन्तरात्मतयावस्थितमभ्यर्च्य मत्प्रसादान्मत्प्राप्तिरूपां सिद्धिं विन्दति मानव इत्यर्थः ।

४७३-१ स्वातन्त्र्यादीति । आदिपदेन दयासंग्रहः । वैकल्यं राहित्यम् । पुण्यकर्मकारिणि निग्रहाकरणात्पापकर्मकारिणि चानुग्रहाकरणादीश्वरस्य स्वातन्त्र्यहानिः स्यादित्यतः प्रधानमेव कारणं नेश्वर इति नाशङ्कनीयम् । यतो नेयं स्वातन्त्र्यहानिः । प्रत्युततत्कर्मकारिण एतत्फलं दास्यामीति स्वसंकल्पानुरूपमाचरतस्तस्य पूर्णं स्वातन्त्र्यमेव । तथा पापकर्मकारिणि निग्रहादयाराहित्यमपि नाशङ्कनीयम् । प्रत्युत दयैवेयम् । पापकर्मकारिणोपि निग्रहेण सन्मार्गे प्रवृत्तिसंभवात् । निग्रहाभाव एव च पापकारिणः पापकर्मण्यधिकप्रवृत्तिसंभवेन तस्य यथोत्तरं घोरनरकपातप्रसङ्गेनेश्वरस्य दयाराहित्यप्रसङ्गः ।

—४ स्वशासनातिवृत्तिव्यवसायिनीति । स्वस्येश्वरस्य यच्छासनं सायंप्रातरग्निहोत्रं जुहुयात् । न हिंस्यात्सर्वा भूतानीत्यादिविधिप्रतिषेधरूपं तदतिवृत्तिस्तदुल्लङ्घनं तत्र व्यवसाय उद्योगः स यस्यास्ति तस्मिन्नित्यर्थः । पापकर्मकारिणीति यावत् ।

—५ अपुंस्त्वमिति । पौरुषाभावमित्यर्थः ।

—६ व्यवसायेति । व्यवसायस्य निवृत्तिरित्यर्थः । व्यवसायिनि वृत्तीति पाठे तादृशव्यवसायकारिणि वृत्तिमात्रेणान्तर्यामितया स्थितिमात्रेणेत्यर्थः ।

—९-१२ तेषामिति । तेषां सततयुक्तानां मयि सततयोगमाशंसमानानां मां भजमानानामहं तमेव बुद्धियोगं विपक्वदशापन्नं प्रीतिपूर्वकं ददामि येन ते मामुपयान्ति । किं च तेषामेवानुग्रहार्थमहमात्मभावस्थस्तेषां मनोवृत्तौ विषयतयावस्थितो मदीयान्कल्याणगुणगणांश्चाविष्कुर्वन्मद्विषयज्ञानाख्येन भास्वता दीपेन ज्ञानविरोधिप्राचीनकर्मरूपाज्ञानजं मय्यतिरिक्तविषयप्रावण्यरूपं पूर्वाभ्यस्तं तमो नाशयामीत्यर्थः ॥ ३ ॥

—१८ स्वयमेवेति । यद्यपि तत्र चेतनजीवाधिष्ठितत्वं दृश्यते तथापि तत्र तस्य संनिधिमात्रमेव । न तु स किंचित्करोति । सुप्तेपि जीवे धेनूपभुक्ततृणादेः क्षीरादिभावदर्शनात् । तथैवात्रेश्वरसंनिधिमात्रेण प्रधानं जगत्करोतीति शङ्काकाशयः ।

४७४–२ अनड्वाह्युपभुक्तमिति । वृषभाद्युपभुक्तमित्यर्थः । प्रहीणं त्यक्तम् ।

—३ न चैतदस्तीति । तथा च न जीवसंनिधिमात्रेण तृणादेः क्षीरादिभावेन परिणामः किं तु तत्रापीश्वर एव तादृशं परिणामं करोतीति भावः ॥ ४ ॥

—१४ पुरुषस्येति । प्रधानस्येति कर्मणि षष्ठी । पुरुषेण क्रियमाणं प्रधानकर्मकं यद्दर्शनमुपभोगस्तदर्थं तथा पुरुषस्य कैवल्यार्थं मोक्षार्थं पुरुषप्रधानयोः पङ्ग्वन्धयोरिव संयोगो भवति । तादृशसंयोगकृतः सर्गः सृष्टिः । भोग्येन प्रधानेन संयुक्तः पुरुषस्तादृशभोग्यगतं दुःखं स्वस्मिन्नभिमन्यमानो मोक्षं प्रार्थयते । मोक्षश्च पुरुषान्यताख्यातिमूलः । सा च पुरुषान्यताख्यातिः प्रधानमन्तरेण न संभवतीति मोक्षार्थं पुरुषः प्रधानमपेक्षत इति बोध्यम् ।

—२३ न तादृशा विकारा इति । यथा पङ्गोर्मार्गदर्शनतदुपदेशाद्याः क्रियाः संभवन्ति न तथा पुरुषस्य संभवन्ति । तस्य निष्क्रियत्वात् । न चायस्कान्तवत्संनिधानमात्रेण सृष्टिरिति वाच्यम् । पुरुषस्य विभुत्वेन तत्संनिधानस्य नित्यत्वेन नित्यसृष्टिप्रसङ्गात् । जीवस्य स्वभावतोसङ्गत्वेन नित्यमुक्तत्वाद्बन्धाभावः स्यात् । अपवर्गस्य मोक्षस्य बन्धपूर्वकत्वेन बन्धाभावे तदभावश्च स्यात् ॥५॥६॥

४७५–१० अन्यथेति । चोप्यर्थ इत्याहुः ॥ ७ ॥

—२१ प्रकृतिदर्शनेति । प्रकृतिसंनिहितेन पुरुषेण कृतं प्रकृतेर्यदात्मत्वेन दर्शनं तदध्यासकृतम् । तत एव च पुरुषस्य सुखादयो भोगा भवन्तीति हि सांख्यमतम् । परं तु निर्विकारस्य निर्मलस्य पुरुषस्याध्यासासंभवाद्भोगो न संभवतीत्यर्थः ॥ ८ ॥

४७६–३ अधिष्ठातारमिति । अधिष्ठाता स्वतन्त्रः । द्रष्टेन्द्रियादिभिर्द्रष्टा । साक्षी स्वरूपेणानुसंधाता (श्रु.) ।

—१० संघातेति । प्रकृतिमहदादेर्व्यतिरिक्तः पुरुषोस्ति । कुतः । संघातपरार्थत्वात् । संघातत्वं संहतत्वम् । येन केनापि पदार्थेन कार्येण कारणेन वा संबद्धत्वमिति यावत् । प्रकृतिः केवलं महदूपकार्येण संबद्धा । महत्तत्त्वं तु प्रकृतिरुपकारणेनाहंकाररूपकार्येण च संबद्धम् । एवं यथासंभवमूह्यम् । घटादयोन्त्यावयविनः पदार्थास्तु केवलं स्वस्वकारणेनैव संबद्धाः । आत्मा तु केनापि न संबद्ध इत्यसंहत एव । तथा च प्रकृतिमहदादयः पदार्थाः परार्थाः संघातत्वाच्छय्यासनादिवदित्यनुमानेन यदर्थाः प्रकृत्यादयः स पर आत्मा केनाप्यसंहतोस्तीति सिध्यति । तस्यापि संहतत्वाङ्गीकारे तु परार्थत्वेन तस्मात्परः कोपि सिध्यतीत्यनवस्था स्यात् । एवं त्रिगुणादिविपर्ययाच्च व्यतिरिक्त आत्मा सिध्यति । उक्तरीत्या परे ब्रह्मणि व्यावर्तमानं संहतत्वं स्वव्याप्यं त्रिगुणत्वमपि तस्मिन्व्यावर्तयति । व्यापकाभावे व्याप्यस्याभावात् । यथा काष्ठादिषु प्राणित्वाभावे सुतरां मनुष्यत्वाभावस्तद्वत् । तथा च गुणत्रयात्मकप्रकृत्यादिजगद्व्यतिरिक्तः

परमात्मा सिध्यति। अधिष्ठानाच्च व्यतिरिक्त आत्मा सिध्यति। बुद्ध्यादयः परेणाधिष्ठिताः सुखाद्यात्मकत्वाद्यथा रथादि सारथ्यादिनाधिष्ठितं तद्वत्। तथा च येनाधिष्ठितः स व्यतिरिक्त आत्मा सिध्यति। भोक्तृभावाच्च व्यतिरिक्त आत्मा सिध्यति। न हि बुद्ध्यादीनां सुखादिभोक्तृत्वम्। तेषां सुखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। कैवल्यार्थं प्रवृत्तेश्च व्यतिरिक्त आत्मा सिध्यति। कैवल्यं मोक्षः। न हि बुद्ध्यादीनां मोक्षार्थं प्रवृत्तिः संभवति। आत्यन्तिकदुःखत्रयाभावरूपमोक्षस्य तत्रासंभवात्। दुःखाद्यात्मकानां बुद्ध्यादीनां दुःखाद्वियोजयितुमशक्यत्वात्। न ह्यग्निरौष्ण्यात्कदापि वियुज्यत इति कारिकार्थः।

४७६-१३ **तस्मादिति**। द्रष्टृत्वमकर्तृभावश्चेति चतुर्थचरणे पाठः। तस्मात्त्रिगुणादेर्यो विपर्यासः पुरुषस्यात्रिगुणत्वचेतनत्वाप्रसवधर्मित्वादिरूपस्तस्माद्धेतोरस्य पुरुषस्य साक्षित्वं कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृत्वं च सिध्यति। तत्र चेतनत्वेन साक्षित्वं द्रष्टृत्वं च सिध्यति। यस्मै विषयः प्रदर्श्यते स साक्षी। न ह्यचेतनः शक्यो विषयं दर्शयितुम्। तथा चेतनत्वेन द्रष्टृत्वमपि सिध्यति। अचेतनस्य द्रष्टृत्वासंभवात्। अत्रिगुणत्वेन कैवल्यं सिध्यति। कैवल्यं मोक्षः। स चात्यन्तिकदुःखत्रयाभावः। पुरुषस्य च त्रिगुणरहितत्वेन सुखदुःखमोहरहितत्वात्स्वाभाविक एवात्यन्तिकदुःखत्रयाभावः। अत्रिगुणत्वेन माध्यस्थ्यमपि सिध्यति। माध्यस्थ्यमौदासीन्यम्। यः सुखेन तृप्यति दुःखं च द्वेष्टि स नोदासीनो भवति। पुरुषस्य तु त्रिगुणरहितत्वेन सुखाद्यभावादौदासीन्यं सिद्धम्। अप्रसवधर्मित्वेनाकर्तृत्वं सिध्यति। यस्मात्कार्यमुत्पद्यते तत्प्रसवधर्मि। यथा प्रधानम्। तस्यैव च कर्तृत्वं दृश्यत इत्यर्थः।

—२० **तस्मान्नेति**। साक्षान्न कश्चित्पुरुषो बध्यते न कश्चित्संसरति न च कश्चिन्मुच्यते। किं तु प्रकृतिद्वारा। प्रकृतिरेव नानापुरुषाश्रया बध्यते संसरति मुच्यते चेति प्रकृतिगता बन्धमोक्षसंसाराः प्रकृतिपुरुषयोर्भेदाग्रहात्पुरुषेपूपचर्यन्ते। यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते तद्वत्।

४७७-१ **तस्मात्तदिति**। यच्च लोके चेतनस्य कर्तृत्वं दृश्यते तन्न युक्तम्। तस्माच्चेति कारिकोक्तरीत्या पुरुषस्याकर्तृत्वसिद्धेः। तस्मादचेतनमपि प्रधानं चेतनसंयोगात्सचेतनमिव महदादि कार्यं करोतीति वक्तव्यम्। तथोदासीनोपि पुरुषो गुणस्य कर्तृत्वेन तत्संयोगात्कर्तेव भवति।

—६ **साक्षित्वेति**। अनेन ग्रन्थेन सांख्यस्वीकृतार्थानां परस्परविरोधः प्रदर्श्यते।

—१३ **संनिधेरिति**। पुरुषस्य यत्प्रकृतिसंनिधानं तद्यदि प्रकृतिसद्भावरूपं तर्हि मुक्तस्याप्यध्यासादिप्रसङ्गः। यदि प्रकृतिगतविकाररूपं संनिधानं तर्हि तस्या-

ध्यासादिहेतुत्वं न संभवति । प्रकृतिगतविकारस्याध्यासकार्यत्वात् । पुरुषगतविकाररूपं प्रकृतिसंनिधानमिति तु वक्तुमशक्यम् । पुरुषगतविकारानभ्युपगमात् ।

४७७–१६ **नानाविधैरिति**। यथा गुणवानुपकार्यपि भृत्यः कदाचिन्निर्गुणमत एवानुपकारिणं स्वामिनं निष्फलमाराधयति तथेयं प्रकृतिस्तपस्विनी गुणवत्युपकारिणी निर्गुणेनुपकारिण्यात्मनि व्यर्थपरिश्रमा केवलं पुरुषार्थमेव यतते न स्वार्थमित्यर्थः ।

—२१ **रङ्गस्येति**। रङ्गशब्देन तत्रस्थाः प्रेक्षकाः पुरुषा लक्ष्यन्ते । आत्मानं प्रकाश्येत्यस्य शब्दाद्यात्मना पुरुषाङ्गेदेन प्रकाश्येत्यर्थः ।

४७८–१ **प्रकृतेरिति**। सुकुमारतरत्वं परपुरुषदर्शनाद्यसहिष्णुत्वम्। यथा कुलवधूः प्रमादाद्गलितवस्त्रप्रान्ता परपुरुषेण दृष्टा चेल्लज्जया सद्यस्ततो निवृत्ता सत्यप्रमत्ता पुनस्तद्दृष्टिपथं कदाचिदपि नारोहति तथेयमतिसुकुमारतरा प्रकृतिरप्येकदा दृष्टा सती दृष्टास्मीति मत्वा पुनः परपुरुषदर्शनपथं प्रयत्नेन परिहरति। यः प्रकृतिपुरुषयोर्भेदं न पश्यति किं तु प्रकृतिमात्मत्वेनैव पश्यति स चार्थादेव न परपुरुषः । यश्च प्रकृतिमात्मत्वेन न पश्यति किं तु भिन्नत्वेन स परपुरुषो ज्ञानी । अत एव स्वाभाविक्यामपि प्रकृतेः प्रवृत्तौ ज्ञानी कदाचिदपि पुनः संसारं नाधिगच्छतीति सांख्याशयः ।

—४ **पुरुषो हीति**। प्रकृतिदर्शनमेव संसार इति हि सांख्यमतम् । तत्र प्रकृतिदर्शनं किं पुरुषकर्तृकं प्रकृतिकर्तृकमेव वा । नाद्यः। पुरुषस्य निर्विकारत्वात्तत्र दर्शनरूपविकारासंभवात् । नान्त्यः । अचेतनत्वात् ।

—६ **पुरुषस्य स्वात्मेति** । स्वात्मशब्देन प्रकृतिर्निर्दिश्यते । पुरुषकर्तृकं यत्प्रकृतिदर्शनं तत्स्वदर्शनमिति प्रकृतिर्नावगच्छति । अचेतनत्वात् । तथा च दृष्टास्मीति मत्वेति यत्पूर्वमुक्तं तन्न संभवति । अचेतनायास्तस्या दृष्टास्मीत्येवमनुसंधानाभावात् ।

—८ **अथ संनिधीति**। बन्धहेतुत्वेन मोक्षहेतुत्वेन चाभ्युपगतं यत्प्रकृतिदर्शनं तत्प्रकृतिपुरुषसंनिधिरूपमिति दर्शनस्यातिरिक्तत्वाभावेन विकारत्वाभावात्तस्य दर्शनस्य पुरुषे संभवोस्तु नाम । परं तु संनिधिः किं नित्य उतानित्यः । नित्यत्वे बन्धमोक्षयोर्नित्यत्वं स्यात्। अनित्यत्वे तु कोपि तस्य हेतुरवश्यं वाच्यः । तस्य हेतोरप्यपर इत्यनवस्था । तथा स संनिधिः प्रकृतिपुरुषस्वरूप एवाथ वातिरिक्तः । अतिरिक्तत्वे तस्य विकारत्वेनात्मन्यसंभवः । प्रकृतिपुरुषरूपत्वे तु तस्य नित्यत्वमवश्यं वाच्यमिति बन्धमोक्षयोर्नित्यत्वं स्यादिति भावः ।

४७९–४ **स्वव्यतिरिक्तेति**। स्वं ज्ञानरूप आत्मा तद्व्यतिरिक्तभूताज्ञानरूपा याऽविद्या तादृशाविद्याविरोधिनः पुरुषस्याविद्यासाक्षित्वं न संभवतीत्याशयः ॥ ९ ॥ (१)

४७९-९ महदिति । महद्दीर्घं त्र्यणुकम् । नैयायिका हि त्र्यणुकस्य महत्परिमाणं दीर्घपरिमाणं चेच्छन्ति । ह्रस्वं द्व्यणुकम् । परिमण्डलं परमाणुः ।

—१६ अन्यदपीति । नैयायिकाभ्युपगतमाकाशनित्यत्वादिकमपीत्यर्थः ।

—१७ षड्भिः पार्श्वैरिति । पूर्वदक्षिणपश्चिमोत्तरोर्ध्वाधरभूतैः षड्भिर्भागैरित्यर्थः ।

—२० प्रदेशभेदेति । प्रदेशशब्दोवयववाची । परमाणूनामवयवा न सन्तीति हि नैयायिकमतम् ।

४८०-१-४ न च वाच्यमिति । अभ्युपगमनीयेति न वाच्यमित्यन्वयः । सर्षपशब्देन सूक्ष्मं धान्यमुच्यते । मोहरीति प्रसिद्धम् । महीधरः पर्वतः । सर्षपमहीधरयोर्वैषम्यसिद्धये परमाणूनां निरवयवत्वं स्वीकर्तव्यम् । सावयवत्वे ह्यवयवानन्त्यसाम्यात्तयोर्वैषम्यं न सिध्येदिति भावः ।

—८ यत्तु परैरिति । मायावादिभिरेतत्सूत्रस्येत्थमर्थः प्रतिपादितः—कारणगुणसजातीयाः कार्ये गुणा उत्पद्यन्त इति नियमेन ज्ञानानन्दात्मकब्रह्मजन्यप्रपञ्चस्य ज्ञानानन्दात्मकत्वं स्यादिति यो दोषो नैयायिकैर्वेदान्तमते दीयते सोनेन सूत्रेण निराक्रियते । यथा द्व्यणुकाद्विजातीयपरिमाणविशिष्टं महद्दीर्घं च त्र्यणुकमुत्पद्यते यथा च परमाणोः सकाशादधिकपरिमाणविशिष्टं द्व्यणुकमुत्पद्यते तथा ज्ञानानन्दात्मकब्रह्मणः सकाशाज्जडं दुःखात्मकं च जगदुत्पद्यत इति । परं त्वयमर्थो न समीचीनः । अस्य पादस्य परपक्षप्रतिक्षेपपरत्वेन पादसंगत्यभावात् । कारणविजातीयकार्योत्पत्तेर्न विलक्षणत्वात् (अ. २ पा. १ सू. ४) इत्यत्रोक्तत्वेनास्यार्थस्य पुनरुक्तदोषग्रस्तत्वाच्च ॥ १० ॥

—१६ परमाणुगतेति । प्रथमतः परमाणुषु क्रिया जायते । तया च परमाणुद्वयसंयोगो भवति । ततो द्व्यणुकमुत्पद्यते । द्व्यणुकत्रयसंयोगेन च त्र्यणुकमुत्पद्यत इत्येवं सृष्टिक्रमो नैयायिकैरङ्गीकृतः ।

—१८ अदृष्टकारितमिति । अदृष्टशब्देन धर्मस्याधर्मस्य च ग्रहणम् ।

४८१-२ क्षेत्रज्ञेति । पुण्यपापानुष्ठानं हि स्वाधिकरणे जीवात्मन्येवादृष्टमुत्पादयेत् । न हि देवदत्तशरीरे विलेपिताच्चन्दनाद्यज्ञदत्तशरीरे शैत्योत्पत्तिः कदापि जायमाना दृश्यते ।

—७ विपाकापेक्षमिति । विपाकः फलोत्पादनयोग्यावस्था ।

—१२ युगपदिति । प्रलये युगपत्सर्ववस्तुसंहारो भवति स न संगच्छते । किं च प्रलयानन्तरं द्विपरार्धकालेन पुनः सृष्टिर्जायत इति तावत्कालपर्यन्तं तानि सर्वाण्यदृष्टानि फलमनुत्पादयन्त्येवावतिष्ठन्त इति च न संगच्छत इत्यर्थः ।

४८१–१३ **न चेश्वरेति**। यदादृष्टेष्वीश्वरेच्छया विशेष आधीयते तदा तादृशादृष्टसंयोगादणुषु कर्मोत्पद्यत इत्यनुमीयते। नित्यसृष्टयदर्शनादिति न वाच्यम्। ईश्वरस्य शास्त्रैकवेद्यत्वात्। यद्यनुमानेनेश्वरः सिध्येत्तर्हि स कदाचित्परमाणुषु विशेषमाधत्त इत्यप्यनुमानेन सिध्येत्। ईश्वरस्य श्रुत्येकवेद्यत्वात्तु श्रुतिसिद्धमीश्वरस्यैव जगदुपादानकारणत्वमङ्गीकर्तव्यं नानुमानसिद्धं परमाणूनामिति बोध्यम् ॥ ११ ॥

—१९ **समवायस्येति**। यथावयवेष्ववयविनो द्रव्यादिषु जातेर्द्रव्येषु गुणस्य च या स्थितिर्भवति सा संबन्धं विना नोपपद्यत इति तदुपपादकः समवायसंबन्धः कल्प्यते तथा समवायस्य स्वसंबन्धिद्वये या स्थितिर्भवति सापि संबन्धं विना नोपपद्यत इति तदुपपादकः समवायस्य तत्संबन्धिभ्यां सहान्यः संबन्धः कल्पनीयः। तस्यापि तयैव रीत्यान्यः संबन्धः कल्पनीय इत्यनवस्था स्यादिति भावः।

४८२–२ **अयुतेति**। ययोर्द्वयोः पदार्थयोः स्थितिरुपलब्धिश्च पृथग्भवति तौ युतसिद्धौ। तयोः संबन्धः संयोगः। युता पृथग्भूता सिद्धिर्ययोस्तौ युतसिद्धौ। यथा घटपटौ। घटं विना पटस्य स्थितिरुपलब्धिश्च भवति। पटं विनापि घटस्य स्थितिरुपलब्धिश्च भवति। अवयवावयविनोस्तु न तथा। अवयवं विनावयविनः स्थितेरुपलब्धेश्चासंभवात्। अतस्तावयुतसिद्धौ। अनयोः संबन्धः समवायः। एवं जातितदाश्रययोर्द्रव्यगुणयोश्च बोध्यम्। अयं च समवाय इहप्रत्ययहेतुत्वेन कल्प्यते। इहप्रत्ययस्येहावयवेष्ववयवी वर्तत इति ज्ञानस्य हेतुत्वेनेत्यर्थः। संबन्धं विना तथाविधज्ञानासंभवात्।

—६ **समवायस्य तदिति**। समवायस्य संबन्धिद्वयं विना स्थितिरुपलब्धिश्च न भवतीत्यपृथक्सिद्धत्वं यद्वर्तते तत्स्वाभाविकमेव न समवायस्य संबन्धिद्वयेन सह संबन्धान्तरापेक्षमिति शङ्काशयः ॥ १२ ॥

—१४ **नित्यमेव भावादिति**। तथा चावयवावयव्यादीनां सर्वेषां नित्यत्वे कार्यकारणभाव एव न सिध्यति ॥ १३ ॥

—१८ **प्रसज्येतेति**। तथा चानुमानम्–परमाणवोऽनित्या रूपवत्त्वाद्घटवत्। परमाणवः स्थूला रूपवत्त्वाद्घटवत्। परमाणवः सावयवा रूपवत्त्वाद्घटवत्। एवं रसवत्त्वगन्धवत्त्वस्पर्शवत्त्वैस्त्रिभिर्हेतुभिरप्यनित्यत्वाद्यनुमानं कर्तव्यम्। तत्र पार्थिवपरमाणुषु चत्वारोपि हेतवः संभवन्ति। आप्यपरमाणुषु गन्धवत्त्ववर्जं हेतुत्रयम्। तत्र गन्धाभावात्। तैजसपरमाणुषु रूपवत्त्वं स्पर्शवत्त्वं चेति द्वयमेव। वायवीयपरमाणुषु तु स्पर्शवत्त्वमेक एव हेतुः।

—१९ **दर्शनादिति**। तथा च तदृष्टान्तेन परमाणूनामपि कारणान्तरारब्धत्वकल्पनेनानित्यत्वादिप्रसङ्ग इति भावः ॥ १४ ॥ १५ ॥ १६ ॥ (२)

४८३-१६ सौगताश्चेति । सौगता बौद्धाः । ते चतुर्विधा वैभाषिकाः सौत्रान्तिका योगाचारा माध्यमिकाश्च । न चैतेषां मध्ये योगाचारा माध्यमिकाश्च बाह्यार्थास्तित्वं नेच्छन्ति माध्यमिकाश्चान्तरपदार्थास्तित्वमपि नेच्छन्तीत्यन्यत् । तथा च तयोर्मते बाह्यार्थाभावात्परमाणुकारणत्वं नास्तीति कथं तत्खण्डनमत्र संगतमिति वाच्यम् । नैयायिकमतखण्डनोत्तरं वैभाषिकसौत्रान्तिकमतयोः परमाणुकारणत्वस्वीकारेण नैयायिकमतसाम्यान्नैयायिकमतखण्डनोत्तरं वैभाषिकसौत्रान्तिकमतखण्डनम् । तदुत्तरं च योगाचारमाध्यमिकमतयोर्बौद्धत्वेन वैभाषिकसौत्रान्तिकमतसाम्याद्वैभाषिकसौत्रान्तिकमतखण्डनोतरं योगाचारमाध्यमिकमतखण्डनमिति संगतेः सत्त्वात् । तत्र वैभाषिकमते बाह्यार्थानां यथासंभवं प्रत्यक्षगम्यत्वमनुमानगम्यत्वं चास्ति । सौत्रान्तिकमते तु बाह्यार्थानामनुमानगम्यत्वमेव न तु प्रत्यक्षगम्यत्वम् । अयं घट इत्याद्याकारेण ज्ञानेन तादृशाकारसमर्पका घटादयोनुमीयन्ते । न तु कदाचिदपि ते प्रत्यक्षीभवन्ति ।

—१९ भूतेति । भूतानि पृथिव्यादीनि चत्वारि । तद्विकारभूता घटादयो भौतिकाः । एवं चित्तं ज्ञानसंतानः । तद्विकारभूता रागादयश्चैत्ता इति बोध्यम् ।

४८४-२ क्षणिकमिति । क्षणिकेष्वपि पदार्थेष्विमे स्थिरा इति बुद्धिरविद्याख्योत्पद्यते । तया च सर्वे लौकिका व्यवहारा भवन्तीति तन्मतम् ।

—१० तत्र चेति । अहं जानामीत्येतादृशो यो ग्राहकत्वेनाभिमानस्तमारूढः शरीरान्तर्वर्ती यो विज्ञानसंतानः स एवात्मेत्यर्थः ।

—१८ संहतौ व्याप्रियन्त इति । संघातार्थं चलिता भवन्तीत्यर्थः ।

४८५-५ वस्त्वन्तरत्वेति । यथा नैयायिकास्तन्तुसमुदायव्यतिरिक्तं तत्कार्यभूतं पटमभ्युपगच्छन्ति तथा नैतेभ्युपगच्छन्ति । तथा च क्षणिकेभ्यः संतानिभ्यः सकाशात्तद्व्यतिरिक्तस्य स्थिरस्य कस्याप्यभावेन लोकव्यवहारः सर्वो नोपपद्यत इति भावः ॥ १७ ॥

—८ इतरेतरेति । प्रत्ययशब्दो हेतुवाची ।

—१० संघातभावादिकमिति । आदिशब्देन विज्ञानविषयत्वं व्यवहारास्पदत्वं च विवक्षितम् (श्रु.) ।

—१३-८ तयेति । अविद्यायाः सकाशाद्रागद्वेषादयः संस्कारा जायन्ते । ततो विज्ञानमुत्पद्यते । जन्मान्तरीयाभ्यामविद्यासंस्काराभ्यां गर्भगते शुक्रशोणितसमुदायेहमित्यालयविज्ञानस्य वृत्तिलाभ एव विज्ञानम् । एतदेव चित्ताभिज्वलनशब्देनोच्यते । तदुत्तरोत्तरविषयविज्ञप्तिश्चित्तम् । तेन सह प्रतिक्षणमुत्पत्तिविनाशवन्तः स्पर्शादयस्तद्धर्माश्चैत्ताः । चित्तचैत्ता एव नामशब्देनाभिधीयन्ते । एते चित्तचैत्ता गर्भाशयगतकलिलबुद्बुदावस्थं पृथिव्यादिकं रूपि द्रव्यं

च विज्ञानाज्जायते । ततो नामरूपसमुदायात्षडायतनाख्यमिन्द्रियपङ्कं जायते । षडिन्द्रियरूपेण तदायतनरूपशरीराकारेण च गर्भाशये नामरूपपरिणामो भवतीत्यर्थः । ततः स्पर्शोत्पत्तिः । अत्र स्पर्शशब्देन शरीरमुच्यते । ततो सुख-दुःखानुभवरूपा वेदनोत्पद्यते । तस्माच्च वेदनायाः सकाशात्तृष्णा जायते । सुख-प्रेप्सा दुःखजिहासा च तृष्णा । ततस्तदनुकूलो व्यापार उपादानम् । ततो गर्भा-न्निर्गमनं भवः । तथोत्पन्नस्य जनकगतजात्यनुसारेण मनुष्यत्वादिजातिः । ततो जरा । ततो मरणम् । अत्र मरणं मुमूर्षुत्वम् । तदवस्थस्येच्छोपहतिः शोकः । प्रतिहतेच्छस्य प्रलापः परिदेवनम् । ततो दुःखं दुर्मनस्ता च । बाह्ये-न्द्रियकृतविषयानुभवजनितं दुःखं दुःखशब्देनोच्यते । मानसविषयानुभवजनितं दुःखं दुर्मनस्ताशब्देनोच्यते । ततो मरणम् । ततो लोकान्तरगमनम् । ततः पुनरागमनम् । ततः पुनर्गर्भाशयप्रवेशे पूर्वजन्मस्थाविद्यातज्जन्यसंस्काराभ्यां च पुनर्विज्ञानोत्पत्तिरित्येतदविद्यादीनां चक्रं रथचक्रवत्परिवर्तत इत्यर्थः ।

४८६–२ **न खल्विति** । यद्यप्यविद्याख्या विपरीतबुद्धिः क्षणिकं वस्तु स्थिरत्वेन विपर्यीकरोति तथापि वस्तुतस्तद्वस्तु न स्थिरं भवति । एवं चाविद्या वस्तुतः स्थिरकार्योत्पादिका न भवतीति भावः ॥ १८ ॥

—९ **उत्तरक्षणेति** । अस्मिन्प्रकरणे क्षणशब्देन क्षणिकपदार्थानां ग्रहणम् ।

—११ **पूर्वक्षणवर्तित्वमेवेति** । न तु पूर्वक्षणिकपदार्थस्योत्तरक्षणिकपदा-र्थोत्पत्तिप्रयोजकः पूर्वकालिकास्तित्वादन्यः कश्चिद्व्यापार आश्रीयते येनोत्तरक्ष-णिकपदार्थोत्पत्तिवेलायां पूर्वक्षणिकपदार्थस्यास्तित्वमवश्याश्रयितव्यं स्यादिति शङ्काशयः ।

—१८–९ **हेतुरितीति** । ब्रूषे चेदिति शेषः । यस्मिन्देशे यः पूर्वक्षणिक-घटः स्थितः स तद्देशस्थस्यैवोत्तरक्षणिकघटस्य हेतुरिति ब्रूषे चेदित्यर्थः ॥ १९ ॥

४८७–२ **अधिपतीति** । अधिपतिरिन्द्रियम् । सहकारी प्रकाशादिः । आ-लम्बनं विषयो घटादिः । समनन्तरप्रत्ययः पूर्वक्षणकविज्ञानम् । एतच्चतुष्टय-स्योत्तरक्षणिकविज्ञानोत्पत्तिहेतुत्वमिति भावः ।

—४–८ **घटक्षण इति** । पूर्वक्षणिकघटे विद्यमान एवोत्तरक्षणिकघटस्योत्प-त्तिरिष्यते चेत्तदा यद्यपि पूर्वक्षणिकघटस्यैव तद्विज्ञानस्यापि क्षणद्वयं स्थित्यङ्गी-कारेणोक्तप्रतिज्ञा सिध्यति तथाप्युत्तरक्षणे द्वयोर्घटयोर्युगपदुपलम्भप्रसङ्गः । अधिपतीत्यादिप्रतिज्ञायाः सिद्धावपि क्षणिकाः सर्वे पदार्था इति प्रतिज्ञाया हानिश्च । ननु क्षणिकत्वं स्थितमेव । यतोस्माभिः पूर्वक्षणिकघटे विद्यमाने तस्मिन्पूर्वक्षण एवोत्तरघटस्योत्पत्तिरिष्यते । केवलं तज्ज्ञानमुत्तरक्षण इति चेन्न । तथासतीन्द्रियसंबन्धस्य ज्ञानकारणस्य तत्कार्यस्य ज्ञानस्य च यौगपद्यं प्रसज्येतेति तयोः कार्यकारणभाव एव भज्येत । ज्ञानात्पूर्वभावी हि घटान्तरोत्पत्तिक्षणः ।

न हि घटादिर्विषय उत्पत्तिकाल एवेन्द्रियेण संबध्यत इति वक्तुं शक्यते। पूर्वक्षणे घटद्वयोपलम्भप्रसङ्गश्च दुर्वार इत्यपि बोध्यम् ॥ २० ॥

४८७-९ **प्रतिसंख्येति**। सन्घट इति बुद्धिः संख्या। इममसन्तं करोमीति तद्विपरीता बुद्धिः प्रतिसंख्या। तत्पूर्वको यो दण्डादिप्रहारेण घटादिनाशः स प्रतिसंख्यानिरोधः। अयं च स्थूलः। दृष्टिगोचरत्वात्। प्रतिक्षणभावी घटादिनाशश्चाप्रतिसंख्यानिरोधः। बुद्धिपूर्वकत्वाभावात्। अयं च सूक्ष्मः। दृष्टयगोचरत्वात्।

—१६ **निरन्वयेति**। अन्वयः संबन्धः। घटनाशे कपालरूपेण स्थितस्य घटस्य संबन्धो दृश्यते। तन्नाशेपि मृत्तिकारूपेण स्थितस्य संबन्धो दृश्यत इत्येवंप्रकारेण नाशः सर्वत्र सान्वयः। यद्यपि दीपे विनष्टे न कथमपि तस्य संबन्धो दृश्यते तथापि तत्र घटनाशदृष्टान्तेन सूक्ष्मरूपेण स्थितस्य दीपस्य संबन्धोस्तीत्यनुमीयत इति न क्वापि निरन्वयविनाशोस्तीत्यभिप्रायः ॥ २१ ॥

४८८-६ **क्षणिकत्वेति**। उत्पन्नस्य घटादेः क्षणिकत्वेन तस्मिन्नेव क्षणे विनाशादसत्त्वम्। एतदेव तुच्छत्वमितीयमुत्पन्नस्य तुच्छतापत्तिः। अत एव च तस्माज्जायमानोत्तरक्षणिकघटस्योत्पत्तिस्तुच्छादुत्पत्तिः ॥ २२ ॥

—२१ **प्रतीयत इति**। अत्र श्येन इति श्येनाधिकरणत्वेनाकाशस्यानुमानिकी प्रतीतिः। न तु चक्षुरादिजन्या। रूपाद्यभावेनाकाशे चाक्षुषत्वादेर्विरुद्धत्वादिति केचित्। वस्तुतस्तु चाक्षुषत्वाङ्गीकारेपि न विरोधः। पञ्चीकरणेन पृथिव्यादाविवाकाशेपि रूपसत्त्वात्। न च तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्करणश्रुतेः पृथिव्यप्तेजसामेव परस्परं मिश्रणं न तु वाय्वाकाशसहितानां पञ्चानामिति वाच्यम्। त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात्।

४८९-६ **इतरेतरेति**। पृथिव्यां विद्यमानस्य जलादिभेदस्य जलादौ वा विद्यमानस्य पृथिव्यादिभेदस्याकाशरूपत्वे तादृशाकाशस्य पृथिव्यां जलादौ वा क्वचिदधिकरणे प्रतीतिः स्यात्। या त्वन्तराले जायत आकाशप्रतीतिः सा न स्यात्।

—८ **अभावस्येति**। आकाशस्य पृथिव्याद्यभावस्वरूपत्वाङ्गीकारेपि न तुच्छत्वम्। घटाद्यभावो घटादेरेवावस्थाविशेष इति सिद्धान्तात् ॥ २३ ॥

—१५ **प्रत्यभिज्ञायत इति**। प्रत्यभिज्ञा हि नामातीतवर्तमानकालवर्त्येकवस्तुविषयमेकं प्रत्यक्षज्ञानम्। तस्य कालद्वयसंबन्धविशिष्टमेकमेव वस्तु विषय इति वस्तुनः स्थिरत्वं सिध्यतीति भावः।

ज्वालादिष्विति। पूर्वोत्पन्नविनष्टवस्तुसदृशवस्तुदर्शने तयोर्वस्तुनोः सादृश्यादैक्यप्रतीतिर्भवति। यथा सेयं दीपज्वाला तदेवौषधमेतदित्यादि। तद्वदेवेदमिति वक्तुं न शक्यमिति भावः।

४८९-२० न च ज्ञेयेष्विति । घटादेः प्रतिक्षणभेदमङ्गीकृत्यानुसंधानं न संभवतीति पूर्वमुक्तम् । इदानीं तु स भेद एव न सिध्यतीत्युच्यते ।

४९०–३ नीलमिवेति । यथा नीलप्रत्यक्षं नेदं पीतमिति तस्य नीलस्य पीतभिन्नत्वं बोधयति । नीलपीतयोर्विरोधात् । तथा वर्तमानकालिकघटप्रत्यक्षं नायमवर्तमानकालिको घट इति तस्य वर्तमानकालिकघटस्यावर्तमानकालिकघटभिन्नत्वं बोधयतीत्याशयः ।

—११ संभवादिति । तथा च वर्तमानकालिकघटप्रत्यक्षे नायमवर्तमानकालिको घट इति या बुद्धिर्भवति तद्बीजं वर्तमानावर्तमानकालयोर्विरोधो न तु वस्तुविरोध इति वर्तमानकालेऽवर्तमानकालभिन्नत्वमास्तां नाम न तु वस्तुनि भिन्नत्वमिति वस्त्वैक्यमेवेति भावः ।

४९१–१ हेतव इतीति । हेतव इति न वाच्यमित्यन्वयः ।

—३ कपालोत्पत्तीति । घटविनाशस्य कपालत्वावस्थापत्तिव्यतिरिक्तत्वाङ्गीकारेपि मुद्गरादेर्घटविनाशं प्रत्येव हेतुत्वं युक्तं न तु तस्य कपालोत्पत्तिहेतुत्वम् । आनन्तर्यात् । न हि मुद्गराभिघातेपि घटेऽविनष्टे कपालोत्पत्तिर्भवति । किं तु मुद्गराभिघातेन घटनाशे सत्येव । तथा च मुद्गरस्य स्वव्यापाराव्यवहितोत्तरकालभाविघटनाशं प्रत्येव हेतुत्वं न तु तव्यवहितोत्तरकालभाविकपालोत्पत्तिं प्रति हेतुत्वमिति बोध्यम् ।

—९ दुःशक इति । तथा च स्वार्थानुमानं न संभवतीति भावः ।

—१० नोपपद्यत इति । तथा च परार्थानुमानमपि न संभवतीति भावः ॥ २४ ॥

४९२–१ स्वाकारेति । स्वाकारसमर्पणद्वारा यो ज्ञानहेतुर्भवति तस्यैव ज्ञानविषयत्वं स्वीक्रियते । घटपटादिर्विषयो हि स्वस्वज्ञाने स्वाकारं समर्पयन्नेव हेतुर्भवति । समर्पिताकारभेदेनैव चेदं घटज्ञानमिदं पटज्ञानमिति ज्ञानभेद उपपद्यत इति भावः ।

—३ ज्ञानाकारसिद्धिरिति । एतद्योगाचारमतम् । एतन्मते बाह्यार्थस्यास्तित्वमेव नास्ति कुतः पुनरनुमेयत्वम् । एतन्मतं सौत्रान्तिको दूषयति–नीलज्ञानसंततावित्यादिना ।

—९ न धर्ममात्रस्येति । किं तु धर्मविशिष्टधर्मिणः संक्रमणं दृश्यते । तथा चात्र सौत्रान्तिकोक्तं केवलाकारसंक्रमणं सुतरां न संभवतीति भावः ॥२५॥

—१३ उदासीनानामिति । वैभाषिकसौत्रान्तिकयोर्द्वयोरपि साधारणमिदं दूषणम् ।

—१७ संस्कारादिक इति । स्वर्गादिहेतुभूतविशेषः संस्कारादिः । मोक्षहेतुविशेषो विद्यादिः (श्रु.) ॥ २६ ॥ (३)

४९३-२ यदुक्तमिति । सौत्रान्तिकैरिति शेषः ।

—३ अर्थवदिति । यथेतरेषां मते घटादयः पदार्थाः साकारास्तथैतेषां योगाचाराणां मते ज्ञानान्येव स्वभावतः साकाराणि । घटादयः पदार्थाः पुनर्नैव सन्ति । अयं घट इत्यादयः प्रतिभासा ज्ञानस्यैव । सर्वत्र ज्ञानमेव बहिर्वदवभासते । ज्ञानाकाराश्च सर्वे न सजातीयाः किं तु विजातीया अपि । ज्ञानानि च प्रतिक्षणं भिद्यन्ते । तत्र यदा ज्ञानानां सजातीयः प्रवाहः प्रवर्तते तदा पूर्वक्षणिकं घटज्ञानमुत्तरक्षणिकघटज्ञानस्योत्पादकम् । तदपि तदुत्तरक्षणिकघटज्ञानस्योत्पादकम् । ततो यदा घटनाशात्कपालदर्शनेन विद्यमान एव घटेन्यकपालदर्शनेन पटादिदर्शनेन वेदं कपालमयं पट इत्येवं विजातीयप्रवाहप्रवृत्तिस्तदा सजातीयज्ञानप्रवाहस्थं चरमक्षणिकं घटज्ञानमेव विजातीयज्ञानप्रवाहस्थप्रथमक्षणिककपालादिज्ञानस्योत्पादकं भवति । यथा बाह्यपदार्थवादिसौत्रान्तिकवैभाषिकमतेष्यन्तिमक्षणिकघट एव विजातीयकपालाद्युत्पादकोऽवश्यमभ्युपेयते तथैतन्मते पूर्वज्ञानं स्वविजातीयज्ञानोत्पादकमपि भवतीत्यभ्युपेयते ।

—१० अर्थस्यापीति । घटादिपदार्थस्य यदा ज्ञानेन प्रकाशो भवति तदैवायं घट इति व्यवहारो भवति । अत एव यस्य यथा ज्ञानं जायते स एव तथैव व्यवहरति नान्यो नापि च स एवान्यप्रकारेणेति भावः ।

—१२ अवश्येति । बाह्यपदार्थवादिमतेपि ज्ञानं सूर्यादिवत्स्वयं प्रकाशमानमेवान्यं प्रकाशयेदिति ज्ञानस्य साकारत्वमवश्याश्रयणीयमेव । तत्रायं घट इत्यादौ घटतज्ज्ञानयोर्द्वयोः साकारयोराकारद्वयं नोपलभ्यते । किं त्वेक एव । स चोभयवादिसंमतो ज्ञानस्यैवाङ्गीकार्य इत्याशयः ।

—१४ ज्ञानार्थयोरिति । घटादिर्बाह्यः पदार्थो यदि ज्ञानाद्भिन्नश्चेज्ज्ञानोपलब्धिं विनापि पदार्थोपलब्धिः स्यात् । पदार्थोपलब्धिं विनापि ज्ञानोपलब्धिः स्यात् । तथा तु कदापि न भवतीत्यतो ज्ञानादव्यतिरिक्तोर्थ इति सिध्यति ।

—१६ तत्तदर्थेति । ज्ञानस्य घटादिसर्वविषयसाधारणत्वे यद्घटज्ञानं तदेव पटज्ञानमित्यपि व्यवह्रियेत । तथाव्यवहाराभावाच्च घटज्ञानपटज्ञानादीनां परस्परं भेदोऽवश्यं वाच्यः । स च ज्ञानानां स्वस्वविषयसमानाकाराङ्गीकारेणैव सिद्धो भवति नान्यथा । तथा च साकारज्ञानेनैव सर्वव्यवहारोपपत्तौ तदतिरिक्तबाह्यार्थसद्भावकल्पनायां न किंचित्प्रमाणमित्याशयः ।

४९४-६ वेदवादेति । वयं वेदं प्रमाणत्वेन स्वीकुर्म इति च्छद्मना यैर्गुप्तरीत्या बौद्धानां ज्ञानमात्रास्तित्ववादिनां योगाचाराणां मतं स्वीकृतं ते वेदवादच्छद्मप्रच्छन्नबौद्धा मायाविनः ।

—११ हास्यमिति । सहोपलम्भनियमो हि भेदहेतुः । यतः साहित्यं द्वयोरेव दृश्यते । तादृशश्च स नियमः स्वमूलभूतभेदविरुद्धमवैलक्षण्यमभेदं कथं साध-

येत् । तथा च तस्मादभेदसाधनं हास्यास्पदमेव । ज्ञानानामयं घटोयं पट इत्येवं स्वस्वविषयीभूतघटादिवस्तुव्यवहारानुगुण्यापादनैकस्वभावत्वेन ज्ञानविषययोः सहोपलम्भनियमो न तु तयोरभेदादित्याशयः ।

४९४-११ निरन्वयेति । घटादीनां हि नाशोत्तरं कपालादिरूपेण संबन्धो दृश्यते । तथा च तत्र नाशस्य सान्वयत्वम् । ज्ञानस्य तु नाशोत्तरं न कथमपि संबन्धो दृश्यत इति तन्नाशस्य निरन्वयत्वम् ।

—१६ ज्ञानमपीति । एतेन ज्ञानस्य द्रव्यत्वाभावात्तस्य घटादिना विषयेण सह संबन्धः संयोगो न संभवति । द्रव्ययोरेव संयोग इति नियमादिति नैयायिकोक्तमपास्तम् ॥ २७ ॥

४९५-३-५ सर्वेषां चेति । अयं घट इत्यादि ज्ञानं घटादिपदार्थशून्यं ज्ञानत्वात्स्वाप्नज्ञानवदिति हि बौद्धाभिमतमनुमानम् । एतदनुमानज्ञानमर्थशून्यत्वरूपस्वविषयशून्यमथ वा तत्सहितम् । आद्येऽनुमेयोर्थो न सिध्यति । अन्त्ये त्वस्यैवानुमानज्ञानस्यार्थसहितत्वेन यद्यज्ज्ञानं तत्तदर्थशून्यमिति व्याप्तेर्वक्तुमशक्यतया ज्ञानत्वरूपो हेतुर्व्यभिचरित इत्यसद्धेतुः स्यादिति भावः ॥ २८ ॥ २९ ॥ (४)

—१३ अर्थाभ्युपगमेति । बाह्याभ्यन्तरपदार्थान्स्वीकृत्य क्षणिकत्वादयस्तद्धर्मा उक्ताः । वस्तुतस्ते पदार्था एव न सन्तीत्यर्थः ।

—१६ अहेतुसाध्यतयेति । यदि सत्त्वं स्यात्तर्हि तस्यावश्यं हेतुर्वक्तव्यः स्यात् । स तु वक्तुं न शक्यत इत्यर्थादेव शून्यं तत्त्वं सिध्यति ।

—१७ सत एवेति । न तु शून्यस्येत्याशयः । ननु सदेव तत्त्वं स्यात् । तस्य सहेतुकत्वाद्धेत्वपेक्षा चेत्स्यान्नाम कश्चित्तत्र हेतुरिति कथं शून्यसिद्धिरिति चेत्तत्राह-तच्च सदिति ।

४९६-६ दोषेति । प्राग्दृश्यम् (विवृति-पृ. ८२ प. १९)

—११ अन्यथा वेति । अत्रान्यथाशब्देनोभयात्मकमनुभयात्मकं चेति पक्षद्वयं गृह्यते । तत्राद्यः सत्पक्षो माध्यमिकासंमत एवात्र दृष्टान्तार्थमुपन्यस्तः । यथा सत्पक्षे वस्तुनः सत्यत्वं तथाऽसत्पक्षेपि स्यात् । असच्छब्दो ह्यभाववाची । अभावश्च क्वचिद्विद्यमानस्यैव वस्तुनोन्यत्र भवतीति वस्तुनः सत्यत्वं गले पतितमेव । उभयात्मकत्वं तु विरुद्धमेव । अनुभयात्मकत्वे तु सदसदेतदुभयविलक्षणायां तृतीयावस्थायां स्वीकृतायामवस्थावतस्तुच्छत्वं न संभवति । सर्वथापि माध्यमिकानुमतं तुच्छत्वं न सिध्यतीत्याशयः ॥ ३० ॥ (५)

४९७-४ गतिहेतुभूत इति । मोक्षहेतुभूत इत्यर्थः ।

—११ अनेकेति । अस्तीति कायते शब्द्यत इत्यस्तिकायशब्दः पदार्थवाची । स चात्र योगरूढ्याणुव्यतिरिक्तेषु वर्तते ।

४९७-१४ **सम्यग्ज्ञानेति** । मोहरहितं ज्ञानं सम्यग्ज्ञानम् । तच्च श्रवणमननाद्यभ्यासपाटवेनेन्द्रियासंयमरूपाया अविरतेर्ज्ञानावरकस्य वस्तुतत्त्वानिश्चयरूपमिथ्यादर्शनस्य पुण्यकर्मानुत्साहरूपप्रमादस्य चोपशमे सति स्वयमेव समुदेति । शरदि मेघापाये भानुवत् । अत एव ज्ञानं स्वयंप्रकाशमिति व्यवह्रियते । आर्हतोपदिष्टेर्थे विश्वासः सम्यग्दर्शनम् । मुमुक्षोः पापकर्मभ्यो विरतिः सम्यक्चारित्रम् । एतानि समुदितानि मोक्षकारणं न प्रत्येकम् । सम्यग्ज्ञानादित्रयमस्मिञ्छास्त्रे रत्नशब्देनोच्यते ।

—१७ **घातिकर्मेति** । ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमन्तरायमिति घातिकर्मचतुष्टयम् । तत्र सम्यग्ज्ञानं न मोक्षसाधनम् । न हि ज्ञानाद्वस्तुसिद्धिरतिप्रसङ्गादिति विपर्ययो ज्ञानावरणीयं कर्मोच्यते । इदं सम्यग्ज्ञानस्य प्रतिघातकरम् । आर्हतमताभ्यासान्न मोक्ष इति ज्ञानं दर्शनावरणीयं कर्म । इदं सम्यग्दर्शनस्य प्रतिघातकरम् । बहुषु परस्परविरुद्धेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं कर्म । इदं वीर्यस्य प्रतिघातकरम् । मोहे जाते सदपि वीर्यमाकिंचित्करं भवति । मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानमन्तरायं कर्म । इदं मोक्षसुखप्रतिघातकरम् । इमानि श्रेयोहन्तृत्वाद्घातिकर्माण्युच्यन्ते । वेदनीयं नामिकं गोत्रिकमायुष्कमित्यघातिकर्मचतुष्टयम् । सक्रियस्य शुक्रशोणितरूपबीजस्य पावकपवनवशादीषदुष्णीभावः शरीराकारपरिणामहेतुर्वेदनीयम् । तच्छक्तिमति तस्मिन्बीजे द्रवीभावात्मकककललावस्थाया बुद्बुदावस्थायाश्चारम्भकः क्रियाविशेषः शरीराभिमानहेतुर्नामिकम् । तत्त्वज्ञानानुकूलदेहपरिणामशक्तिरूपं शरीरस्थितिहेतुभूतं गोत्रिकम् । शुक्रशोणितमिश्रणे जाते मिलितं तदुभयरूपं सुखादिहेतुभूतमायुष्कम् ।

—२० **तप इति** । केशोल्लुञ्चनादीत्यर्थः ।

४९८-१ **पृथिव्यादीति** । पार्थिवाप्यतैजसवायवीयभेदेन परमाणुषु चातुर्विध्यं यद्वैशेषिका अभ्युपगच्छन्ति तदस्मिन्मते नास्तीत्यर्थः ।

—४ **सत्त्वासत्त्वेति** । अभिन्नत्वमेकत्वम् । तत्र द्रव्यस्वरूपस्य सद्बुद्धिबोध्यत्वात्स्थिरत्वादेकत्वाच्च तेन रूपेण सत्त्वं नित्यत्वमेकत्वं च युक्तम् । द्रव्यस्यावस्थाविशेषा ये घटपटादयस्तेषामसद्बुद्धिबोध्यत्वादस्थिरत्वादनेकत्वाच्च तेन रूपेणासत्त्वमनित्यत्वमनेकत्वं च युक्तम् । उभयाकारप्रतीतेश्चोभयमप्युपपन्नमित्यनैकान्तिकं सर्वम् । अनैकान्तिकमव्यवस्थितम् । यदि वस्तु सत्त्वादीनामेकतमेन व्यवस्थितं स्यात्तदा तस्य सर्वथा सर्वदा सर्वत्र सर्वात्मना नियमे तज्जिघृक्षाजिहासाभ्यां प्रवृत्तिनिवृत्त्ययोगात्प्रवृत्तिनिवृत्तिरहितमेव जगत्स्यात् । अस्थिरत्वे तु कस्यचित्कथंचित्केनचिद्रूपेणावस्थाने हानोपादाने संभवत इति प्रवृत्तिनिवृत्तिसंभवः । अत्रेदं बोध्यम्—पाटलिपुत्रदेशे शिशिरऋतौ विद्यमानः पार्थिवः

श्यामो घटादिर्द्रव्यतः पार्थिवत्वेनास्ति नाप्यत्वेन । क्षेत्रतः पाटलिपुत्रकत्वेनास्ति न कान्यकुब्जादित्वेन । कालतः शिशिरत्वेनास्ति न वासन्तिकत्वेन । भावतः श्यामत्वेनास्ति न रक्तादित्वेनेत्यवस्थाविशेषाणां घटादीनां भावाभावरूपत्वम् । तथा च स्वद्रव्यक्षेत्रकालभावरूपेणास्तीति विधिकल्पना । परद्रव्यक्षेत्रकालभावरूपेण नास्तीति निषेधकल्पनेति । तत्र स्यादस्त्येव सर्वमिति विधिकल्पनया स्यादस्तीति प्रथमो भङ्गः । स्यान्नास्त्येव सर्वमिति निषेधकल्पनया स्यान्नास्तीति द्वितीयो भङ्गः । स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया स्यादस्ति च नास्ति चेति तृतीयो भङ्गः । स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया स्यादवक्तव्यमिति चतुर्थो भङ्गः । स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च स्यादस्ति चावक्तव्यं चेति पञ्चमो भङ्गः । स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च स्यान्नास्ति चावक्तव्यं चेति षष्ठो भङ्गः । स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च स्यादस्ति च नास्ति चावक्तव्यं चेति सप्तमो भङ्गः । अयमेव सप्तभङ्गीनय इत्युच्यते । स्यादस्त्येवेत्याद्येवशब्दस्वनभिमतार्थव्यावृत्तिं दर्शयति न तु नियमम् । अत एव संभावनाद्योतकः स्याच्छब्दः प्रयुज्यते ।

४९९-१ **कालस्येति** । क्षणमयं तिष्ठतीत्यादिप्रकारेण तत्तदर्थविशेषणतया प्रतीतेरिति भावः । एतेन जैनाभ्युपगतं कालस्याणुत्वं परास्तम् ।

—६ **कथं पुनरिति** । स्वमतखण्डनमसहमानेन जैनेन ममेव भवतोपि मतमयुक्तमित्याशयेनेदमाशङ्क्यते । श्रोत्रियेत्युपहासोक्तिः । ततः सिद्धान्तिन उत्तरं **सर्वचेतनेत्यादि** ।

—८ **अत्यन्तवैलक्षण्यमिति** । तथा च शरीरभूतजीवगतानां दोषाणां शरीरिणि ब्रह्मणि स्पर्शलेशोपि नास्तीति न किंचिदूषणमिति भावः ।

—९ **एकद्रव्यपर्यायत्वाभावादिति** । न हि षडपि द्रव्याण्येकस्यैव द्रव्यस्यावस्थाविशेषभूतानीति भावः ।

—१३ **अन्योन्येति** । तथा च षण्णां द्रव्याणां मिलितानामेकत्वं केनापि रूपेण नास्तीति तत्रानेकत्वस्य व्यवस्थितत्वात्सर्वमव्यवस्थितमित्यभ्युपगमविरोध इति भावः ॥ ३१ ॥

—१८ **असंख्यातप्रदेश इति** । अनेकावयव इत्यर्थः ।

—२० **प्रसज्यत इति** । कृत्स्नस्यात्मनः पिपीलिका-(मुंगी इति प्र.) शरीरे प्रवेशासंभवादिति भावः ॥ ३२ ॥ ३३ ॥ ३४ ॥ (६)

५०१-१-२ **निमित्तेति** । पशुपतिः केवलं जगतो निमित्तकारणम् ।

जगदुपादानकारणं तु पशुपतेः सकाशादन्यदेव । तच्च प्रधानम् । मुद्रिकाषड्ङ्ग-धारणादिकं च मोक्षसाधनमित्याचक्षत इति भावः ।

५०१-२१ **मुद्रिकेति** । मुद्रिकापड्ङधारणादयो बहुषु तन्त्रेषूक्ताः क्रमेणात्र परिगणिताः । न त्वेकत्रोक्ताः (श्रु.) । तथा चानेकत्रानेकसाधनोक्त्या युगपदे-तेषां सर्वेषां साधनानामनुष्ठानस्याशक्यतया च विरोध इत्याशयः ।

५०२-२ **नारायणमेवेति** । एवशब्देन प्रधानव्यावृत्तिः ।

—७ **परमपुरुषवेदनमेवेति** । एवशब्देन मुद्रिकापड्ङधारणादिव्यावृत्तिः ।

—१३ **एकतां गता इति** । मोक्षसाधनपराणां सर्वेषां वेदान्तवाक्यानां सर्वशाखाप्रत्ययन्यायेनैकवाक्यत्वादिति भावः । एतन्न्यायस्वरूपं प्रागुक्तम् (विवृति-पृ. २५ प. २५) ।

—१३-४ **तदितिकर्तव्यताभूतमिति** । मोक्षसाधनभूतोपासनाङ्गभूत-मित्यर्थः । **यज्ञादिकमेवेति** । एवशब्देन कपालपात्रभोजनादिव्यावृत्तिः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ (७)

५०४-९ **संकर्षणो नामेति** । संकर्षण इति विशेष्यम् । जीव इति तस्य विशेषणम् । जीवशब्दो जीवाधिष्ठातृपरः । जीवाधिष्ठाता यः संकर्षणः स वासुदेवाज्जायते । वासुदेव एव संकर्षणरूपेणाविर्भवतीति स्वेच्छावतार एवात्रा-भिधीयत इति तात्पर्यम् । तथा च नात्र जीवस्योत्पत्तिरुच्यत इति सिद्धान्तेर्थः । एवमेव तस्मात्संकर्षणान्मनोधिष्ठाता प्रद्युम्नो जायते । तस्माच्चाहंकाराधिष्ठाता-निरुद्धो जायत इति बोध्यम् । पूर्वपक्षी त्वेवं मन्यते-जीव इति विशेष्यं संकर्षण इति तस्य विशेषणम् । संकर्षणसंज्ञको यो जीवविशेषः स वासुदेवादुत्पद्यत इत्यर्थः । तथा चास्यां भागवतप्रक्रियायां जीवस्योत्पत्तिर्या प्रतिपादिता सा श्रुति-विरुद्धा भवतीति ॥ ३९ ॥ ४० ॥

—२४ **विज्ञानमिति** । विज्ञानं चेतनम् । आदि मूलकारणम् । विज्ञानं च तदादि चेति कर्मधारयः । परब्रह्मेत्यर्थः । तस्य भावो विज्ञानादिभावः परब्रह्म-भावः । संकर्षणादीनां परब्रह्मभावे सति भागवतप्रक्रियायां स्वेच्छावतार एवा-भिधीयत इत्यर्थादेव सिद्धं भवति । तथा च श्रुतिविरुद्धा या जीवस्योत्पत्तिः सात्र सुतरां न प्रतीयत इत्याशयः ।

५०५-७ **कर्तव्यत्वेनेति** । इदं वचनमागमशब्दनिर्वचनपरम् । स्वसंज्ञा-भिर्नमःशब्दाद्युपेतैस्तत्तद्व्यूहनामभिश्चातुरात्म्यं व्यूहप्रकारचतुष्टयं कर्तव्यमिति बुद्ध्या क्रमेणोपास्यतया यत्र प्रतिपाद्यते तदागमपदवाच्यमित्यर्थः ।

—१३ **संपूर्णेति** । ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड्गुणाः । तत्र ज्ञानं नाम सर्वदा सर्वविषयप्रकाशकः स्वप्रकाशो गुणविशेषः । शक्तिर्जगत्प्रकृतिभावोऽघ-

टितघटनासामर्थ्यं वा । बलं जगत्कारणत्वप्रयुक्तश्रमाभावः समस्तवस्तुधारणसामर्थ्यं वा । ऐश्वर्यं कर्तृत्वलक्षणं स्वातन्त्र्यं समस्तवस्तुनियमनसामर्थ्यं वा । वीर्यं जगदुपादानत्वेपि स्वरूपविकाराभावः । तेजः सहकारिनैरपेक्ष्यं पराभिभवनसामर्थ्यं वा । एतैः षड्भिर्गुणैः पूर्णं वासुदेवाख्यं परं ब्रह्मेत्यर्थः ।

५०५–१५ **परं ब्रह्मेति** । परं सूक्ष्ममित्येकार्थं पदद्वयम् ।

—१८ **चतुर्व्यूह इति** । चतुर्विभाग इत्यर्थः ॥ ४१ ॥

५०६–१७ **यथोपपद्यत इति** । नित्यस्यैव जीवस्य शरीरसंबन्धेन भोक्तृत्वानुगुणज्ञानप्रकाशो यदा जायते तदा जीव उत्पद्यत इति व्यवह्रियते । ज्ञानसंकोचकाले तु म्रियत इति व्यवह्रियत इति भावः ।

५०७–७ **उदितहोमप्रशंसार्थेति** । यद्यपि प्रातः प्रातरित्यादिवाक्येन सूर्योदयात्प्राग्धोमकर्तॄणां निन्दा प्रतिपाद्यते तथापि न तद्वाक्यस्य स्वार्थे तात्पर्यं किं तु सूर्योदयोत्तरं होमकर्तॄणां प्रशंसायामेव तात्पर्यं तद्वदत्रापि न वेदनिन्दायां साङ्गेष्विति वाक्यतात्पर्यं किं तु पञ्चरात्रप्रशंसायामेव । न हि निन्दा निन्द्यं निन्दितुं प्रक्रमतेऽपि तु स्तुत्यं स्तोतुमिति न्यायात् ।

—१२ **भूमविद्याप्रशंसार्थमिति** । न तु ऋग्वेदादिनिन्दायां तत्तात्पर्यमिति भावः ।

—१४ **एवमेव शाण्डिल्यस्येति** । शाण्डिल्यस्य पञ्चरात्रशास्त्राभ्यासपर्यन्तं वेदवाक्यादर्थप्रतिपत्तिर्विशदा नाभूदिति तदभिप्रायः ।

५०८–७–१२ **अपारकारुण्येति** । प्राणिमात्रेषु दुःखासहिष्णुत्वं कारुण्यम् । महतो मन्दैः सह नीरन्ध्रेण संश्लेषस्वभावत्वं सौशील्यम् । दोषेपि गुणत्वबुद्धिर्दोषादर्शित्वं वा वात्सल्यम् । प्रभूतं दत्वाप्यतृप्तत्वमौदार्यम् । **स्वयमेवेति** । तदुक्तम्—पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति । एतेन कर्तृदोषसंभावना नास्तीति सूचितम् । यत्तु पाञ्चरात्रं भागवतं तत्रं वैखानसाभिधम् । वेदभ्रष्टान्समुद्दिश्य कमलापतिरुक्तवानिति वचनं तत्र वेदभ्रष्टानित्यस्यासंदिग्धवेदार्थज्ञानाभाववत इत्यर्थो बोध्य इति न तद्वचनविरोधः शङ्कनीयः । अत एव

अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन हि ।
आचारेण प्रवर्तन्ते ते मां प्राप्स्यन्ति मानवाः ॥
ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते ।
शूद्रादीनां न तच्छोत्रपदवीमुपयास्यति ॥

इति वराहपुराणे भगवतोक्तम् । ननु पञ्चरात्रकर्तरि माभूद्विभ्रमः । विप्रलिप्सा तु स्यादेव । दृष्टा हि भगवतोपि विप्रलिप्सा त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारयेत्यादाविति चेन्न । द्विधा खलु भगवतः प्रवृत्तिरसुरमोहनार्थमाश्रितसंरक्षणार्थं च । पञ्चरात्रे सात्त्विकजनसंरक्षणार्थमेव प्रवृत्तिः । अत एव सत्त्वोत्तराः शाण्डिल्यादय एव तच्छास्त्रप्रवक्तारः । तथा च पञ्चरात्रं न विप्रलिप्सामूलकमिति बोध्यम् ॥ ४२ ॥ (८)

अथ द्वितीयाध्यायस्य तृतीयः पादः प्रारभ्यते ।

५१३-३ न वियदिति । सूत्रार्थः प्रागुक्तः (विवृति-पृ. १२२ प. ३१) । अस्मिन्नधिकरणे प्रथमं सूत्रं पूर्वपक्षिणः । द्वितीयं सिद्धान्तिनः । पुनस्तृतीयं चतुर्थं चेति सूत्रद्वयं पूर्वपक्षिणः । तदुत्तरं सूत्रपञ्चकं सिद्धान्तिन इति बोध्यम् ।

—४ सांख्यादीति । सांख्यादीनि यानि वेदबाह्यतर्काणि तेषामित्यर्थः ।

—६ ब्रह्मकार्यतयेति । न च चिच्छब्दवाच्यानां जीवानां नित्यत्वेन ब्रह्मकार्यत्वं न संभवतीति वाच्यम् । जीवनिष्ठज्ञानस्य भोक्तृत्वानुकूलः प्रकाशो ब्रह्मणः सकाशाज्जायत इति तद्द्वारा जीवानां ब्रह्मकार्यत्वव्यवहारात् ।

—१० न खल्विति । तथा चानुमानम्—वियन्नित्यं निरवयवत्वात्सर्वगतत्वाद्वाऽऽत्मवत् । एवं च सूत्रे श्रुतिपदं संभवनीयार्थप्रतिपादकश्रुतिपरं बोध्यमिति वियदुत्पत्तिप्रतिपादिकायास्तैत्तिरीयश्रुतेः सत्त्वेपि न क्षतिः । तथा चोक्तानुमानसिद्धार्थविरोधात्तैत्तिरीयश्रुतिर्बाध्यते । मुख्यार्थत्वेन न स्वीक्रियत इति बोध्यम् ॥ १ ॥ २ ॥ ३ ॥

५१४-१६ कथमिति । आत्मन आकाशः संभूत इति वाक्ये संभूतशब्दः पूर्वपक्षिमतेन गौणार्थप्रतिपादकः । स एव संभूतशब्दस्तदुत्तरवाक्ये वायोरग्निरित्यत्र संबद्धो मुख्यार्थप्रतिपादक इत्येकस्यैव संभूतशब्दस्य प्रकारद्वयेनार्थप्रतिपादकत्वं न संभवतीति शङ्काकाशयः । शङ्काकक्षायं सिद्धान्त्यनुसारी ।

५१५-१-३ तस्मादिति । तच्छब्देन परब्रह्मणः परामर्शः । श्रुतिस्थब्रह्मशब्देनाव्याकृताख्यं ब्रह्म गृह्यते । प्रधानमिति यावत् । प्रधानं नाम रूपमन्नं च परब्रह्मणः सकाशादुत्पद्यत इति श्रुत्यर्थः । **तपसेति** । ब्रह्मशब्दोत्र परब्रह्मवाची । तच्च परं ब्रह्म तपसा ज्ञानेन चीयते । बहु स्यामिति संकल्परूपेण सृष्ट्युन्मुखं भवति । तस्मात्परब्रह्मणः सकाशादन्नमुत्पद्यते । अन्नशब्देनात्र भोक्तृभोग्यरूपचेतनाचेतनसंघातलक्षणमव्याकृतं गृह्यते ।

—४ अनुपङ्के चेति । अनुपङ्गः संबन्धः । यथा पूर्ववाक्यस्थस्य कस्यचित्पदस्योत्तरवाक्ये संबन्धे तस्यैकस्यैव पदस्य पूर्ववाक्य उत्तरवाक्ये चेति द्विवारं श्रवणं भवति तथा तेनैकेनैव शब्देनार्थप्रतिपादनमपि द्विवारं क्रियत इति प्रकारभेदेनाप्यर्थप्रतिपादकत्वं संभवत्येव । अभिधानावृत्तेरेव श्रवणावृत्तिफलत्वात् । अभिधानं बोधनव्यापारः ॥ ४ ॥

—१२ ब्रह्मकार्यत्वेनेति । न च यथा जीवानां नित्यानां ब्रह्मकार्यत्वाभावेपि ब्रह्मशरीरत्वेन ब्रह्मणः सकाशादव्यतिरेकस्तथाकाशस्यापि स्यादिति वाच्यम् । यथा सोम्यैकेन मृत्पिण्डेनेत्यादिश्रुतिप्रतिपादितमृत्पिण्डकार्यादिदृष्टान्तानुसारेण ब्रह्मकार्यत्वेनैव ब्रह्माव्यतिरेकस्याकाशे विवक्षितत्वात् ॥ ५ ॥

५१५–१९ **वियदुत्पत्त्यवचनमात्रेणेति** । मात्रपदेन प्रथमत इत्यादिशब्द-व्यावृत्तिः । छान्दोग्य आकाशोत्पत्तिमकथयित्वा तत्तेजोसृजतेति तेजउत्पत्तिः कथिता । एतावतैव तत्र तेजःसृष्टेः प्राथम्यं प्रतीयते । न हि तत्तेजोसृजतेत्यत्र प्रथमत इत्यादिः प्राथम्यबोधकः शब्दः कश्चन दृश्यते ॥ ६ ॥ ७ ॥

५१६–८ **पृथग्योगेति** । योगः सूत्रम् । ननु यथैतेन योगः प्रत्युक्तः (ब्र.सू. २।१।३) इति सूत्रेधिकाशङ्कानिरासार्थं न्यायातिदेश इत्युक्तं तथात्राधिकाशङ्कास्ति चेदुच्यताम् । नास्ति चेत्किमर्थं पृथक्सूत्रकरणम् । एकेनैव सूत्रेणाकाश-वायवोरुभयोरुत्पत्तिर्वक्तव्येति चेत्सत्यम् । तथा सति तेजोतः (ब्र. सू. २।३।१०) इत्युत्तरसूत्रेऽतःशब्देनोभयोः परामर्शे तेजस उत्पत्तिरुभयोः सकाशात्कथिता स्यात् । तथा तु सा न भवति । किं त्वेकस्मादेव वायोः । तथा चोत्तरत्रैकस्य वायोः परामर्शार्थं वायूत्पत्तिप्रतिपादकं पृथक्सूत्रमेतत्कृतमिति भावः ॥ ८ ॥

—११ **तुशब्दोवधारणार्थ इति** । स च सत इत्युत्तरं योज्यः ॥ ९ ॥ (१)

—१८ **तेजोत इति** । एतदादि सूत्रचतुष्टयं पूर्वपक्षिणः । परब्रह्मणः सकाशात्प्रधानमुत्पद्यते । प्रधानान्महत्तत्त्वम् । महत्तत्त्वादहंकारः । अहंकारादाकाशः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवीत्यादिः सृष्टिक्रमः । एतद्विस्तरः प्रधानादीनां लक्षणानि च यतीन्द्रमतदीपिकाप्रकाश–(पृ. ३६) तोवगन्तव्यानि । तत्र महत्तत्त्वं केवलात्प्रधानादुत्पद्यतेथ वा प्रधानशरीरकात्परब्रह्मणः । तथाहंकारः केवलान्महत्तत्त्वादुत्पद्यतेथ वा महत्तत्त्वशरीरकात्परब्रह्मणः । एवं सर्वत्रोत्पत्तिविषये संशयः । केवलात्पूर्वतत्त्वादुत्तरतत्त्वस्योत्पत्तिरिति पूर्वपक्षः । पूर्वतत्त्वशरीरकात्परब्रह्मणः सकाशादुत्तरतत्त्वस्योत्पत्तिरिति सिद्धान्तः । सूत्रार्थस्तु यतः श्रुतिस्तथा वायोरग्निरित्याह ततस्तेजोतः केवलाद्वायोः सकाशादुत्पद्यते । अनेनैव न्यायेन सर्वतत्त्वानां पूर्वतत्त्वात्केवलादुत्पत्तिरिति ।

—२१ **तत्तद्रूपादिति** । तत्तच्छरीरकादित्यर्थः ॥ १० ॥

५१७–३ **आप इति** । अत्र सूत्रे पृथिवीत्युत्तरसूत्रे च पूर्वसूत्रादतस्तथा ह्याहेत्यनुवर्तते । सूत्रार्थः पूर्ववत् ॥ ११ ॥

—७ **ता अन्नमिति** । ता आपः । अन्नं पृथिवीम् ॥ १२ ॥

—१० **अधिकारेति** । अधिकारः प्रकरणम् ।

—१२ **अदनीयस्येति** । अद्यते तदन्नम् । अदनीयमित्यर्थः । तच्चादनीयं वस्तु पृथिव्याः कार्यमिति कार्यवाचकेनान्नशब्देन स्वकारणभूता पृथिवी लक्ष्यत इति भावः ।

—१५ **सजातीयमिति** । भूतत्वेन सजातीयं वस्तु पृथिवीत्यर्थः । प्रसिद्धमन्नशब्दवाच्यं हि भौतिकं न तु भूतम् । अत्र साजात्यात्प्रसिद्ध्यर्थत्याग इत्याशयः ।

५१७-१९ यथाश्रुतीति । श्रुतौ ह्याकाशाद्वायुरित्येवोच्यते न त्वाकाशशरीरकात्परब्रह्मणो वायुरिति ॥ १३ ॥

५१८-६ तदभिध्यानादिति । तस्य बहुभवनस्याभिध्यानं संकल्पः । तल्लिङ्गं परमात्मलिङ्गम् । एवशब्दः स इत्युत्तरं योज्यः ।

—१२ महदहंकारेति । यद्यपि श्रुतौ महत्तत्त्वादीनामीक्षणं नोक्तं तथापि तेजःप्रभृतीनामीक्षणस्योक्तत्वादन्यत्रापीक्षणं गम्यते । महत्तत्त्वादीनां तेजःप्रभृतीनां च परमपुरुषशरीरत्वेन साम्यात् ॥ १४ ॥

—२३ ब्रह्मण इति । पञ्चम्यन्तं पदम् । ब्रह्मणः सकाशादित्यर्थः ।

५१९-४ एतस्मादिति । एतस्माज्जायत इत्यादि वाक्यं सर्वस्य वस्तुनो ब्रह्मणः सकाशात्साक्षादुत्पत्तौ ज्ञापकमित्यर्थः । अत्रेदं बोध्यम्-श्रुतौ हि द्विविधः क्रमः प्रतीयते । ब्रह्मणः सकाशात्प्रधानमुत्पद्यते तस्मान्महत्तत्त्वं तस्मादहंकार इत्यादिरेकः । अपरश्च तस्माद्विपरीतः प्रधानमहदहंकारादीनां सर्वेषां ब्रह्मणः सकाशादुत्पत्तिरित्येवंरूपः । तत्र पूर्वतत्त्वशरीरकाद्ब्रह्मणः सकाशादुत्तरतत्त्वस्योत्पत्तौ स्वीक्रियमाणायां द्विविधापि श्रुती रक्षिता भवति । आकाशाद्वायुर्वायोरग्निरित्यादिष्वाकाशादिशब्दानामाकाशात्मभूतब्रह्मपर्यन्तार्थाभिधायकत्वादिति ॥ १५ ॥

—११ अभिध्यानेनेति । अभिध्यानलिङ्गेन बहुभवनविषयसंकल्परूपचिह्नेनावगता ज्ञातोक्तभ्यते दृढीक्रियत इत्यर्थः ।

—१२ खादिषु तावदिति । खमाकाशः । आत्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः (तै. २।१) इत्यादितैत्तिरीयश्रुतावाकाशोत्पत्त्यनन्तरं वायोरुत्पत्तिस्ततस्तेजस उत्पत्तिरित्यादिरुत्पत्तिविषयकः क्रमः प्रतिपादितः । अत्राप्येतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीत्युत्तरार्धे स एव क्रमः प्रतीयते । केवलमत्रामुकतत्त्वस्यामुकस्मादुत्पत्तिरित्येवमुत्पत्त्यवधयो न प्रतीयन्ते । एतस्माज्जायत इति तु संनिहितत्वात्प्राणेनैव संबध्यते । प्राणव्यतिरिक्तेषु तु ये यदुत्पत्तावबधयस्तैत्तिरीयश्रुतावुक्तास्त एव गृह्यन्ते । उत्पत्तिक्रमस्योभयत्रैक्येनावधीनामपि तेषामेव स्वीकार्यत्वात् । न चोत्पत्तिक्रमस्यावधीनां चोभयत्रैक्य एतस्माज्जायत इति श्रुतौ किमपूर्वं विधीयत इति वाच्यम् । तैत्तिरीयश्रुत्युक्तानाकाशादीननूद्य तत्रानुक्तयोर्विज्ञानमनसोरुत्पत्तिक्रमस्यात्र मनः सर्वेन्द्रियाणि चेत्यनेन विधीयमानत्वात् । तावत्यंश एवैतस्मादिति श्रुतेस्तात्पर्यकल्पनादिति पूर्वपक्ष्याशयः । सिद्धान्ती त्वेतस्माज्जायत इत्यस्य न केवलं प्राण एव संबन्धः किं तु मनःप्रभृतिषु सर्वेष्वपि । श्रुत्यन्तरोक्तानामवधित्वेनान्वयकल्पनापेक्षया स्ववाक्यस्थस्यैतस्मादित्यस्यैवावधित्वेनान्वयस्योचितत्वात् । तथा चावधिविधायकमेवेदं वाक्यं नोत्प-

त्तिक्रमविधायकमिति मन्यते। सूत्रार्थस्त्वन्तरा मध्ये (प्राणानन्तरमाकाशात्प्राक्) विज्ञानमनसी (मन इन्द्रियाणि च) क्रमेणोत्पद्येते इत्येतस्माज्जायत इत्यत्र विधीयते। तल्लिङ्गात्। आकाशादिभिः सहपाठलिङ्गादिति चेन्न। प्राणस्य मनःप्रभृतीनां चाविशेषेणैतस्माज्जायत इत्यस्य सर्वत्र संबन्धादिति।

५१९-२१ क्रमान्तरेति। पृथिव्यप्सु प्रलीयत आपो ज्योतिषि ज्योतिर्वायौ वायुराकाश आकाश इन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राण्यहंकारेहंकारो महति महत्तमसि तमः परे देव एकीभवतीति हि तत्र प्रलयक्रमः प्रतिपादितः। तद्विपरीतो यः सृष्टिक्रमस्तत्र गम्यते स सृष्टिक्रमो भिन्नः। एतस्माज्जायत इत्यत्र प्रतीयमानश्च सृष्टिक्रमो भिन्न इति क्रमान्तरं बोध्यम्।

५२०-२ तेजःप्रभृतय इति। इदं प्रागुक्तम् (विवृति-पृ. १०१ प. २५)। तेन तेजसः सकाशादपामुत्पत्तिः कथिता न विरुध्यते॥ १६॥

—५ उपरुध्यत इति। लोके घटादयः पदार्था घटादिशब्दैर्व्यवह्रियन्ते। घटादयः सर्वे शब्दा ब्रह्मवाचिनश्चेत्स व्यवहारो विरुध्यत इत्यर्थः।

—६ चराचरेति। भाक्त इति पदच्छेदः। चराचरव्यपाश्रयः स्थावरजङ्गमपदार्थाश्रयः। व्यपदेशो व्यवहारः। भाक्तो गौणः। स्थावरजङ्गमपदार्थानाश्रित्य जायमानो गो लोके तत्तच्छब्दैर्व्यवहारः स गौणः। स्थावरजङ्गमपदार्थविशिष्टे ब्रह्मणि तत्तच्छब्दैर्यो व्यवहारः स मुख्यः। स तु लोके न भवति। मुख्यार्थस्य ब्रह्मणो ज्ञानाभावात्। तस्य मुख्यार्थज्ञानस्य भावेन सत्त्वेन मुख्यव्यवहारस्य भावित्वात्सत्त्वादिति सूत्रार्थः।

—९ वाच्यैकदेश इति। घटरूपप्रकारविशिष्टस्य प्रकारिभूतस्य ब्रह्मणो वाचको घटशब्दः स्ववाच्यैकदेशे प्रकारभूते केवले घटे लक्षणया प्रयुज्यत इत्यर्थः।

—११ प्रकारिप्रतीतीति। सर्वशब्दानां ब्रह्मवाचकत्व एव पर्यवसानम्। तस्य ब्रह्मप्रतीत्यधीनत्वाद्वेदान्तवाक्यश्रवणात्प्राग्ब्रह्मप्रतीत्यभावेन मुख्यव्यवहारो लोके न भवति। न तु ब्रह्मवाचकत्वाभावादिति भावः।

—१३ सूत्रस्यार्थान्तरमाह-अथ वेति। अस्मिन्पक्षे सूत्रेऽभाक्त इति पदच्छेदः। व्यपदेशो वाचकः शब्दः। वाचकत्वस्य वाच्यैकाश्रयत्वात्स्थावरजङ्गमपदार्थरूपवाच्याश्रयो यस्तद्व्यपदेशः स्थावरजङ्गमपदार्थवाचकः शब्दः स ब्रह्मरूपवाच्येऽभाक्तो मुख्य एव। तस्य ब्रह्मणो भावेन सत्त्वेन सर्वशब्दानां वाचकत्वस्य भावित्वात्सत्त्वादिति सूत्रार्थः। वाचकत्वं हि वाच्यैकाश्रयम्। लोके प्रसिद्धं यद्वाच्यं यच्च तन्निरूपितं शब्दानां वाचकत्वं तत्सर्वं ब्रह्माधीनम्। न हि ब्रह्मसंबन्धं विना कस्यापि वस्तुनोस्तित्वं सिध्यति। ब्रह्मानुप्रवेशेनैव सर्वस्य वस्तुनो नामरूपभाक्त्वात्। अतो ब्रह्मैव सर्वशब्दानां मुख्यं वाच्यमिति भावः॥ १७॥ (२)

५२१-१ **एकविज्ञानेनेति** । जीवस्यानुत्पत्तौ तु तस्य ब्रह्मकार्यत्वाभावेन ब्रह्मणो विज्ञानेपि जीवस्य विज्ञानं न स्यादिति प्रतिज्ञा नोपपद्यते ।

—३ **यत इति** । जगतः प्रसूतिः सृष्टिर्यतोस्मात्परमात्मनः सकाशात्प्रसूता प्रवृत्ता स परमात्मा तोयेन तोयोपलक्षितभूतपञ्चकेन सह भूम्यां जीवान्विससर्जोत्पादयामासेति पूर्वपक्षिसंमतोर्थः । सिद्धान्ते तु तोयेन भूतपञ्चकेन करणभूतेन जीवाञ्जीवदेहानुत्पादयामासेत्यर्थः ।

—५ **सन्मूला इति** । सद्ब्रह्म मूलं कारणं यासां प्रजानामित्यर्थः । अनेन जीवानां ब्रह्मकार्यत्वं दर्शितम् ।

५२२-७ **भोग्येति** । भोग्यं जडवर्गः । भोक्ता जीववर्गः । नियन्ता परमेश्वरः ।

५२३-२ **प्रकारद्वय इति** । यथा घटस्य घटत्वं प्रकारभूतं यथा वा जीवस्य शरीरं प्रकारभूतं तथा जडवर्गो जीववर्गश्चेत्येतदुभयं परमात्मनः प्रकारभूतम् । प्रकारी परमात्मा ।

—३ **अत एवेति** । यद्यपि मृत्तिकायाः केवलायाः कारणत्वं परमात्मनस्तु चिदचिद्विशिष्टस्यैव कारणत्वमिति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं तथाप्यवस्थान्तरापत्तिमात्रे दृष्टान्तो बोध्य इत्याशयः ।

—६ **ईदृशेति** । श्रुतौ या जीवस्योत्पत्तिः प्रतिपाद्यते सा ज्ञानविकासकरदेहसंबन्धरूपैव । तथा मरणमपि ज्ञानसंकोचकरदेहवियोगरूपमेवेति भावः ।

—८ **अचिदंशवदिति** । वैधर्म्ये दृष्टान्तः । यथा जडवर्गस्य स्वरूपान्यथात्वं भवति तथा जीवानां स्वरूपान्यथात्वं न भवति । श्रुतौ जीवस्योत्पत्तिप्रतिषेधो नित्यत्वं च यत्प्रतिपाद्यते तत्स्वरूपान्यथात्वाभावरूपमेवेति भावः ।

—१२ **उभयविधानिष्टेति** । जडवर्गस्य यादृशो विकारो यादृशश्च जीववर्गस्य तादृश उभयविधोपि विकारः परमात्मन्यनिष्ट एवेत्यर्थः ।

५२४-५-६ **विशेष इति** । परेषां मते स्वमते चेत्यर्थः । **स्वयमेवेति** । न हि तन्मते ब्रह्मोपाध्येतदुभयव्यतिरिक्तं तृतीयं किंचिदस्ति । यदौपाधिकबन्धस्य कारणमुच्येत ॥ १८ ॥ (३)

—१७ **जीवस्वरूपमिति** । स्वरूपं स्वाभाविक आकारः । तद्विषये सुगतादीनां विवादः । सुगतो बौद्धः । कपिलः सांख्यः । कणभुग्वैशेषिकः । तत्र ज्ञानमेव जीवस्याकार इति सुगतकपिलमतम् । वैशेषिकमते तु जीवस्याकारो जडः । ज्ञानं तु तन्निष्ठो गुणः । स गुणश्चानित्यः । रामानुजीयानां मते तु ज्ञातैव जीवस्याकारः ।

५२५–२ **यो विज्ञान इति**। न हि ज्ञानवतो ज्ञाने स्थितिः संभवतीत्याशयः।

—४ **विज्ञानं यज्ञमिति**। अत्र यज्ञकर्तुर्जीवस्य विज्ञानशब्देन निर्देशः।

—७ **अपर इति**। वैशेषिक इत्यर्थः। सुगतकपिलमतेन ज्ञानमेव जीवस्य स्वाभाविक आकारश्चेत्तथा रामानुजमतेन ज्ञातैव स्वाभाविक आकारश्चेत्तेनाकारेण सर्वदोपलब्धिप्रसङ्गः। जीवस्य विभुत्वेन सर्वत्रोपलब्धिप्रसङ्गश्च। स्वाभाविकस्येतरसाधनानपेक्षत्वेनेन्द्रियाणां वैयर्थ्यं च। किं च तदाकारस्य स्वाभाविकत्वेन सुषुप्त्यादावपि ज्ञानत्वेन ज्ञातृत्वेन वोपलब्धिः स्यादित्याशयः।

—१२ **आगन्तुकमेवेति**। अस्य किं त्वित्यादिः।

—१३ **सर्वत्रेति**। सर्वशरीरव्यापिसुखदुःखाद्युपलब्धेरित्यर्थः। किं च देशान्तरेपि जीवभोग्यं वस्तूत्पद्यते। तत्र हि जीवादृष्टं कारणमित्यदृष्टस्य देशान्तरे संनिधानमवश्यम्। कार्यकारणयोः सामानाधिकरण्यनियमात्। तच्चादृष्टमाश्रयमन्तरेण न संभवतीत्यगत्या जीवात्मनो विभुत्वमङ्गीकार्यम्। किं च जीवस्य न विभुत्वं नाप्यणुत्वं प्रत्यक्षमुपलभ्यते। जीवस्यातीन्द्रियत्वात्। अथेतस्ततो गमनेनाणुत्वं कल्प्यते विभोर्गमनासंभवादिति चेत्तद्वमनमपि न प्रत्यक्षमुपलभ्यते। न च निदाघे संतापदुःखितस्य जीवस्य सरःसु गमनेन सुखाद्युपलब्धेर्जीवस्य गमनं कल्प्यत इति वाच्यम्। प्रत्यक्षत उपलभ्यमानेन शरीरगमनेनैव तत्सिद्धेः। यद्यपि जीवस्य विभुत्वेन शरीरगमनात्प्रागपि सरःसु जीवो विद्यत एव तथापि भोगसाधनभूतशरीरस्य सरःस्वभावान्न तदा सुखोपलब्धिरिति वैशेषिकाशयः।

५२६–९ **पश्य इति**। ब्रह्मदर्शीत्यर्थः।

—१० **विज्ञानमय इति**। प्राचुर्यार्थे मयट्प्रत्ययः। ज्ञानप्रचुर इत्यर्थः॥ १९॥

—२० **प्रद्योतेनेति**। हृदयाग्रप्रकाशनेनेत्यर्थः॥ २०॥

५२७–७ **यद्यपीति**। यथा जीवस्य नित्यत्वेपि शरीरवियोगरूपं मरणमुपपद्यते तथा जीवस्य विभुत्वेपि शरीरवियोगरूपमुत्क्रमणमुपपद्येत। परं तु गमनमागमनं च विभुत्वपक्षे न केनापि रूपान्तरेणोपपद्यते। अतो गमनमागमनं च यथा लोके प्रसिद्धं तथैवात्र वक्तव्यमिति तदर्थं जीवस्याणुत्वमवश्यं स्वीकार्यमिति भावः॥ २१॥

—१० **नाणुरिति**। अधिकारः प्रकरणम्।

—१५ **यस्यानुवित्त इति**। प्रतिबुद्ध आत्मा प्राज्ञ आत्मा यस्योपासकस्य जीवस्यानुवित्त उपास्यः। विदिर्ज्ञाने। यद्वाऽनुवित्तः प्राप्यः। विदिर्लाभे (शु.)॥ २२॥

५२७-२१ **अणुसदृशमिति**। अणुत्वेन जीवसदृशं यद्वस्तु बालाग्रशतभागस्य शतभागरूपमराग्रं च तन्निर्दिश्य तत्परिमाणं जीवस्य श्रुतावुच्यत इत्यर्थः ॥२३॥

५२८-५ **वेदनेति**। सुखदुःखानुभव इत्यर्थः ॥ २४ ॥

—१३ **देशविशेषेति**। हृन्नासिकानयनश्रोत्रादिमर्मप्रदेशेत्यर्थः। तत्र स्थितश्चन्दनबिन्दुर्यथाह्लादयति तथा नान्यत्र पादादौ स्थित इति भावः।

—२० **देशविशेषेति**। हृन्मात्ररूपदेशविशेषेत्यर्थः। चन्दनस्य हृन्मात्ररूपदेशविशेषापेक्षा नास्ति। अन्यत्रापि मर्मणि स्थितस्याह्लादकत्वदर्शनादिति भावः ॥ २५ ॥

५२९-४ **सकलदेहमिति**। यत्र च सौभर्यादय एकदैवानेकदेहान्धारयन्ति तत्र तान्सर्वाननेकदेहान्व्याप्य ज्ञानं वर्तत इति तेषां सर्वेषु देहेषु सुखाद्यनुभवः। अविरोधश्चन्दनवत् (ब्र. सू. २।३।२४) इत्युक्तपक्षे तु नैतद्युज्यते। न हि चन्दनबिन्दुः शरीरान्तरेष्वाह्लादयति। इयमेव भाष्ये (श्रीभाष्य-पृ. ५२९ प. १) स्वमतेनेत्यनेन सूचिता परमतस्योपर्यरुचिरिति बोध्यम् ॥ २६ ॥

—१४ **जानातीति**। अत्र प्रकृतिभूतस्य ज्ञाधातोर्ज्ञानमर्थः। स च धर्मः। प्रत्ययार्थस्तु कर्ता। स च धर्म्यात्मा। अतस्तयोर्धर्मधर्मिणोर्भेदः सिद्ध इत्यर्थः ॥ २७ ॥

—१६ **पृथगुपदेशादिति**। न केवलं जानामीति पृथगुपलब्धिमात्रम्। किं त्वात्मनः सकाशात्पृथक्त्वेन श्रुतौ ज्ञानमुपदिश्यत एवेत्यर्थः ॥ २८ ॥

५३०-७ **अस्य सारभूत इति**। अस्य जीवस्य। सारभूतो मुख्यः। मुख्यत्वं चास्य स्वरूपानुबन्धिधर्मत्वात्।

—११ **स एक इति**। इयं श्रुतिरानन्दस्य गुणत्वप्रदर्शनार्थमुदाहृता। आनन्दस्य सारत्वं तु स्वाभाविकधर्मत्वात्सिद्धम्।

—१४ **सह ब्रह्मणेति**। सह ब्रह्मणा विपश्चितेति श्रुतिर्यः सर्वज्ञ इति च श्रुतिर्ज्ञानस्य गुणत्वप्रदर्शनार्थमुदाहृता। ज्ञानस्य सारत्वं तु स्वरूपानुबन्धिधर्मत्वात्सिद्धम्। विपश्चिता ज्ञानिना ॥ २९ ॥

—१७ **यावदिति**। आत्मस्वरूपं सदा व्याप्य स्थितत्वं यावदात्मभावित्वम्। यावदाश्रयस्थितिसंबन्धित्वं वा। यत्कदाप्याश्रयं न जहाति तत्त्वमिति यावत्।

—१८ **तद्व्यपदेश इति**। विज्ञानशब्देन जीवस्य निर्देश इत्यर्थः। यद्यपि परत्र परशब्दः प्रयुज्यमानो दोषावहस्तथापि संबन्धातिशये न दोषः। लोके तथा व्यवहारदर्शनादिति तात्पर्यम्।

५३०–२० **चकारादिति** । विज्ञानशब्देन जीवस्य निर्देशे हेत्वन्तरं सूत्रस्थचकारसूचितमनेन ग्रन्थेन प्रदर्श्यते । यथा ज्ञानं स्वप्रकाशं तथा जीवोपि स्वप्रकाश इति ज्ञानजीवयोः सादृश्याद्विज्ञानशब्देन जीवस्य निर्देश इति भावः ॥३०॥

५३१–१ **स्वरूपानुबन्धिधर्मत्वमिति** । स्वाभाविकधर्मत्वमित्यर्थः ।

—६ **पुंस्त्वाद्यसाधारणस्य धातोरिति** । यत्र पुरुषत्वं तत्रावश्यकस्य सप्तमधातोरित्यर्थः ।

—९ **तत्सप्तधात्विति** । त्वगसृङ्मांसमेदोस्थिमज्जाधातुरूपं धातुसप्तकम् । वातपित्तकफरूपं मलत्रयम् ।

—१५ **अणुपरिमाण इति** । अत एव न तस्य शरीरादन्यत्रोपलब्धिः । विभुत्वे तूत्तरसूत्रोक्तो दोषो दुर्वार एव स्यात् ।

—१९ **न विद्यत इति** । मुक्तस्य देहात्माभिमानभ्रमो नास्तीत्यर्थः ॥ ३१ ॥

५३२–१० **लोके तावदिति** । सूत्रस्थस्यान्यथेति पदस्यात्मनो विभुत्वस्वीकार इत्यर्थः । विभुरप्यात्मा किं ज्ञानस्वरूपो जडस्वरूपो वेति पक्षद्वयम् । तत्र विभुर्जडस्वरूप इति पक्षे दोषोग्रे (श्रीभाष्य–पृ. ५३२ प. १५) करणायत्तेत्यादिग्रन्थेन वक्ष्यते । विभुर्ज्ञानस्वरूप इति पक्षे दोषोयं प्रतिपाद्यते । अयमाशयः—लोके हि शरीरे केवलमात्मोपलभ्यते शरीरादन्यत्र नोपलभ्यते । तत्रात्मनो ज्ञानस्वरूपत्वात्स उपलब्धेर्हेतुः स्यात् । अथ शरीरादन्यत्रानुपलम्भादनुपलब्धेरपि स एव हेतुः कल्प्यत इति चेत्किमात्मोपलब्ध्यनुपलब्ध्योरुभयोर्मिलित्वा हेतुर्भवत्येकैकस्या एव वा । आद्ये सर्वत्र नित्यमुपलब्ध्यनुपलब्धिप्रसङ्गः । अन्त्येन्यतरनियमः । उपलब्धेरेव हेतुश्चेच्छरीर इवान्यत्राप्युपलब्धिः स्यात् । अनुपलब्धेरेव हेतुश्चेदन्यत्रेव शरीरेप्यनुपलब्धिः स्यादिति ।

—१५ **करणायत्तेति** । आत्मनो विभुत्वे जडत्वे चाङ्गीकृते दोषोयम् । तत्र यद्यप्यात्मन उपलब्धिरिन्द्रियाधीनेति जडेषु पाषाणादिष्विन्द्रियाभावादात्मानुपलब्धिः सिध्यति तथापि देवदत्तस्यात्मनो यज्ञदत्तशरीरे यज्ञदत्तशरीरस्थैरिन्द्रियैरुपलब्धिर्दुर्वारैव । इन्द्रियाणि चोपलब्ध्यनुपलब्ध्योरुभयोर्मिलित्वा हेतवो भवन्त्येकैकस्या एव वा । आद्ये नित्यमुपलब्ध्यनुपलब्धिप्रसङ्गः । अन्त्येन्यतरनियमः । उपलब्धेरेव हेतवश्चेद्देवदत्तशरीर इव यज्ञदत्तशरीरेपि देवदत्तस्यात्मन उपलब्धिः स्यात् । अनुपलब्धेरेव हेतवश्चेद्यज्ञदत्तशरीर इव देवदत्तशरीरेपि देवदत्तस्यात्मनोनुपलब्धिः स्यात् । न च यज्ञदत्तशरीरस्थानीन्द्रियाणि न देवदत्तस्यात्मन इति वाच्यम् । सर्वेषां विभूनां जीवात्मनां सर्वेषु शरीरेषु सत्त्वेनामुकशरीरस्थानीन्द्रियाण्यमुकस्यैवात्मन इति नियमे प्रमाणाभावात् । अत एवादृष्टेनापि नाभीष्टसिद्धिः । इदमदृष्टममुकस्येत्येवं नियमे प्रमाणाभावात् ॥ ३२ ॥ (४)

५३२-२० **अयमात्मेति** । जीवात्मेत्यर्थः ।

—२१ **गुणानामिति** । सत्त्वरजस्तमोरूपगुणत्रयात्मिकायाः प्रकृतेरित्यर्थः ।

५३३-५ **हन्ता चेदिति** । हन्तुर्हन्ता । हन्धातोः कर्तरि तुन्प्रत्ययः । हन्तात्मानं हन्तुं हन्तारं मन्यते चेदहं हन्तेति मन्यते चेदित्यर्थः ।

—१०-१४ **प्रकृतेरिति** । प्रकृतेर्गुणैः सत्त्वादिभिः स्वानुरूपं क्रियमाणानि कर्माणि प्रत्यहंकारविमूढात्माहं कर्तेति मन्यते । अहंकारेण विमूढ आत्मा । अहंकारो नामानहमर्थे प्रकृतावहमित्यभिमानः । तेनाज्ञातात्मस्वरूपो गुणकर्मस्वहं कर्तेति मन्यत इत्यर्थः । **नान्यमिति** । यदा द्रष्टा गुणेभ्योन्यं कर्तारं नानुपश्यति गुणा एव स्वानुगुणप्रवृत्तिषु कर्तार इति पश्यतीत्यर्थः । **कार्येति** । कार्यं शरीरम् । कारणानि समनस्कानीन्द्रियाणि । तेषां क्रियाकारित्वे पुरुषाधिष्ठिता प्रकृतिरेव हेतुः । पुरुषाधिष्ठितक्षेत्राकारपरिणतप्रकृत्याश्रया भोगसाधनभूता क्रियेत्यर्थः । प्रकृतिसंसृष्टः पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः । सुखदुःखानुभवाश्रय इत्यर्थः ।

—१८ **यजेतेति** । अत्र स्वर्गकामनाविशिष्टपुरुषोद्देशेन यागविधानात्तादृशपुरुषस्य भोक्तुर्जीवस्यैव यागकर्तृत्वं सिध्यति । एवं मोक्षेच्छाविशिष्टपुरुषोद्देशेन ब्रह्मोपासनविधानात्तादृशपुरुषस्य जीवस्यैवोपासनकर्तृत्वं सिध्यति ।

—२० **शासनाच्चेति** । शास्त्रं यस्य प्रवर्तकं स एव कर्ता । शास्त्रं च प्रकृतेः प्रवर्तकं न भवति । कर्तरि ज्ञानमुत्पाद्यैव तस्य प्रवर्तकत्वात् । प्रकृतौ च ज्ञानोत्पादनासंभवात् । न हि प्रकृतिः किंचिदपि जानाति । तस्या अचेतनत्वात् । तथा च शास्त्रं जीवस्यैव प्रवर्तकमिति जीव एव कर्ता सिध्यति ।

५३४-६ **उच्यत इति** । अहं जीव एतेषां जीवानां हन्तेति यज्ज्ञानं तत्सम्यग्ज्ञानं न भवतीति हन्ता चेदिति श्लोकस्य तात्पर्यम् । तत्र हेतुश्च जीवस्य नित्यत्वेन हननक्रियायां कर्मत्वासंभवात्तद्धन्तृत्वं जीवस्य न संभवतीति ।

—८ **प्राप्ताप्राप्तेति** । जीवस्य संसारदशायां गुणत्रयसंबन्धे प्राप्ते कर्तृत्वं दृश्यते । अप्राप्ते तु गुणत्रयसंबन्धे कर्तृत्वं न दृश्यते । एवमन्वयव्यतिरेकाभ्यां गुणत्रये कर्तृत्वमारोप्य गुणानामेव कर्तृत्वमित्युच्यते । वास्तविकं तु कर्तृत्वं जीवस्यैवेति भावः ।

—१२ **तत्रैवमिति** । एवं वस्तुतः परमात्मानुमतिपूर्वके जीवात्मनः कर्तृत्वे सति तत्र तत्र कर्मणि केवलमात्मानमेव कर्तारं यः पश्यति स दुर्मतिर्विपरीतमतिः । अकृतबुद्धित्वात् । अनिष्पन्नयथावस्थितवस्तुबुद्धित्वान्न पश्यति । न यथावस्थितं कर्तारं पश्यतीत्यर्थः ।

—१६ **अधिष्ठानमिति** । विहिते प्रतिषिद्धे च कायिके वाचिके मानसे च सर्वस्मिन्कर्मणि पञ्च हेतवः । अधिष्ठानं शरीरम् । अधिष्ठीयते जीवात्मनेति

महाभूतसंघातरूपं शरीरमधिष्ठानम् । कर्ता जीवात्मा । पृथग्विधं करणं समनस्कं कर्मेन्द्रियपञ्चकम् । विविधा च पृथक्चेष्टा प्राणापानादिभेदभिन्नस्य पञ्चविधस्य वायोर्विविधा वृत्तिः । अत्र कर्महेतुकलापे दैवं पञ्चमं परमात्मान्तर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः ॥ ३३ ॥

५३४-२१ **उपादानादिति** । उपादानं ग्रहणम् । श्रुतावुपदिश्यमानाज्जीवकर्तृकोपादानाच्छ्रुतौ क्रियमाणाज्जीवकर्तृकविहारोपदेशाच्च जीव एव कर्ता सिध्यतीति सूत्रार्थः । स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकामं परिवर्तत एवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तत इति श्रुतिः । परिवर्तते विहरति । प्राणानिन्द्रियाणि । अत्र प्राणान्गृहीत्वेत्युपादानमुपदिश्यते । परिवर्तत इति विहारोपदेशश्च क्रियते ॥ ३४ ॥

५३५-२ **विज्ञानमिति** । विज्ञानं जीवः । यज्ञं वैदिकीं यागक्रियाम् । तनुते करोति । कर्माणि लौकिकीः क्रियाः ॥ ३५ ॥

—११ **नैव वेति** । कस्यापि भोगाय न स्युरित्यर्थः । जीवस्य कर्तृत्वपक्षे येन जीवेन यत्कर्म कृतं तत्तस्यैव भोगप्रदं भवति नान्यस्येति नियमः संगच्छते। प्रकृतेः कर्तृत्वपक्षे तु प्रकृत्या कृतं कर्म यदि जीवस्य भोगप्रदं स्वीक्रियते तर्हि सर्वेषां भोगप्रदं स्यात् । यदि तथा न स्वीक्रियते तर्हि कस्यापि भोगप्रदं न स्यात् । न च प्रकृत्या देवदत्तशरीरद्वारा कृतं कर्म देवदत्तशरीरस्थस्यैव जीवस्य भोगप्रदमिति वाच्यम् । प्रकृतेः कर्तृत्ववादिभिः सांख्यैर्जीवानां विभुत्वाभ्युपगमेन सर्वेषां जीवानां देवदत्तशरीरस्थत्वात् । न च प्रकृत्या क्रियमाणमपि कर्मानन्तानामन्तःकरणानां मध्ये कस्याप्यन्तःकरणस्य साहाय्येन क्रियते । तथा च यत्कर्म यदन्तःकरणसाहाय्येन क्रियते तादृशान्तःकरणविशिष्टस्यैव जीवस्य तत्कर्म भोगप्रदं नान्यस्येति नियमोपपत्तिरिति वाच्यम् । सर्वव्यापिन्याः प्रकृतेः सर्वैरन्तःकरणैर्नित्यं संबन्धेन प्रकृत्येदं कर्मामुकस्यैवान्तःकरणस्य साहाय्येन क्रियत इति नियमे प्रमाणाभावात् ॥ ३६ ॥ ३७ ॥ ३८ ॥

५३६-३ **सर्वदेति** । प्रकृतेः कर्तृत्वे तस्या अचेतनाया इदं कर्म मया कर्तव्यमिति ज्ञानाभावः । तथा च साहजिकरीत्या सा कदाचित्कर्म कुर्यात्कदाचिन्न कुर्यात् । जीवस्य कर्तृत्वे तु तस्य तादृशज्ञानसत्त्वेन तेन नित्यं कर्म कर्तव्यं स्यादित्याशयः ।

—७ **यथा तक्षेति** । तक्षा 'सुतार' इति प्र. । वासिः 'वाकस' इति प्र. ।

—९ **सर्वदेति** । सर्वकारणसंनिधाने कार्यस्यावश्यंभावनियमादिति भावः । ॥ ३९ ॥ (५)

—१५ **स एवेति** । न हि राज्ञा बन्दीकृतस्य चोरस्य स्वगृहे स्थातव्यं कारागारे न गन्तव्यमिति सहस्रश उक्तेपि तयोर्विधिनिषेधयोः कथमप्युपयोगो भवति ॥ ४० ॥

५३७-७ कृतप्रयत्नेति । प्रयत्नः प्रथमप्रवृत्तिः । विहितं विधिः । प्रतिषिद्धं प्रतिषेधः । उभयत्र भावे क्तप्रत्ययः । आदिशब्देन कोपप्रसादयोस्तदनुरूपफलदानस्य च संग्रहः । कोपप्रसादावेव निग्रहानुग्रहशब्दाभ्यामुच्येते ।

—१० तदनुमतीति । अनुमतिश्च प्रवृत्तस्य प्रवर्तनम् । शोभनास्वशोभनासु वा सर्वासु क्रियासु जीवः स्वबुद्ध्यैव प्रथमं प्रवर्तते । तां प्रथमप्रवृत्तिं दृष्ट्वा पश्चादीश्वरो यथा तव मनस्यागतं तथा कुर्वित्येवमनुमतिदानेन द्वितीयादिप्रवृत्तिं कारयति । तथा च द्वितीयादिप्रवृत्तौ जीव ईश्वराधीनः । प्रथमप्रवृत्तौ तु स्वतन्त्र एव । यद्यपि प्रथमप्रवृत्तिरपीश्वरोत्पादितशरीरेन्द्रियाद्यपेक्षैव तथापि तत्रेश्वरस्यान्यथासिद्धत्वम् । शरीरेन्द्रियाद्युत्पादनरूपस्येश्वरव्यापारस्य पूर्वमेव जातत्वेन प्रथमप्रवृत्तिवेलायामनपेक्षणात् । तदानीमीश्वरस्योदासीनत्वात् । यथा कुलालोत्पादनरूपस्य कुलालपितृव्यापारस्य घटोत्पत्तिवेलायामनपेक्षणात्कुलालपितुर्घटं प्रत्यन्यथासिद्धत्वं तद्वत् ।

—१२ यथेति । चैत्रमैत्रैतदुभयस्वामिकमेकं वस्तु । तत्र चैत्रस्तद्वस्तुनः स्वीयमपि भागं परस्मै दातुं मैत्रानुमतिं विना न शक्नोति । वस्तुन उभयस्वामिकत्वात् । ततो मैत्रानुमतिं गृहीत्वा चैत्रः स्वीयं भागमुपायनत्वेन राज्ञे ददाति चेद्राजप्रसादपात्रं चैत्र एव भवति न मैत्रः । एवमीश्वरानुमत्या कर्म कुर्वन्नपि जीव एव फलभाग्भवति नेश्वरः । यच्च कदाचिल्लोके मैत्रोपि लेशतो राजप्रसादपात्रं भवति तन्मैत्रस्य राजाधीनत्व एव न त्वन्यथा । ईश्वरस्य तु कथंचिदपि कर्माधीनत्वाभावेन तस्य लेशतोपि न कर्मफलभाक्त्वमिति बोध्यम् ॥४१॥(६)

५३९-१९ औपचारिक्य इति । वस्तुतो भिन्नयोरपि जीवब्रह्मणोरात्मत्वेन ज्ञानवत्त्वेन वा धर्मेण सादृश्यादभेदमारोप्य कथंचिन्नेयाः । तत्त्वमस्यादिश्रुतिषु ब्रह्मवाचिनां तदादिशब्दानां तदधीन इत्याद्यर्थे लक्षणया वा कथंचिन्नेया इत्यर्थः । यथाग्निना सिञ्चेदिति वाक्यमग्नेर्द्रवद्रव्यत्वाभावेन सेचनकरणत्वाभावाद्योग्यतां न लभते । अतस्तदनाम्नोच्चारितं चेदप्रमाणमेव भवति । आम्नोच्चारितं त्वग्निशब्दस्य द्रवद्रव्ये लक्षणया कथंचिन्नीयते तद्वदिति भावः ।

—२१ भवेयुरिति । यथा पटैकदेशे दग्धे पटो दग्धो भवति तद्वत् ।

—२२ अंशत्वोपपत्तिरिति । यथा दारुणः कस्मिंश्चिच्छिन्ने खण्डे दग्धेपि न तद्दारु दग्धं भवति तद्वज्जीवे दुष्टेपि ब्रह्म न दुष्यतीत्यंशत्वोपपत्तिरित्याशयः ।

प्रागुक्तेति । ब्रह्मणश्छेदाङ्गीकारेऽनित्यत्वादिदोषप्रसङ्गादिति भावः ।

५४०-३ नानात्वेति । पृथगात्मानं प्रेरितारं च मत्वा । तयोरन्यः पिप्पलं स्वाद्वत्ति । ज्ञाज्ञौ द्वावजावीशानीशावित्यादिभेदप्रतिपादकश्रुतयो लोकप्रसिद्धभेदानुवादकत्वादविधायिका अन्यथासिद्धाः । तत्त्वमस्यादिश्रुतयस्तु लोकाप्रसिद्धाभेदविधायिका अनन्यथासिद्धाः । तथा च यथा प्रागुक्तरीत्या (श्रीभाष्य-

पृ. १८ प. १०) तत्त्वमस्यादिश्रुतिभिः प्रत्यक्षादिप्रमाणानि बाध्यन्ते तथा भेद-प्रतिपादकश्रुतयोपि बाध्यन्ते । मिथ्याभूतार्थोपदेशपरा भवन्तीति यावत् । बाधितं च वस्तु मिथ्याभूतमविद्यान्तर्गतमिति लोके गीयते ।

५४०–१६ ब्रह्म दाशा इति । दाशाः कैवर्ताः । दासा भृत्याः । कितवा द्यूत-कृतः । एते सर्वे ब्रह्मेवेत्यर्थः । उत्कृष्टैः सामानाधिकरण्येऽभेद आरोपित इति शङ्का जायेत । इह तु दाशकितवादिनिकृष्टसामानाधिकरण्यमभेदस्य वास्तविकत्वं सूचयति । तथा चाभेदो भेदश्चेत्युभयमपि वास्तविकमंशपक्ष एव सिध्यति । अंशश्चायं न पटैकदेश इव वस्त्वेकदेशरूपः । प्रागुक्तरीत्या (श्रीभाष्य–पृ. ५३९ प. २१) दोषप्रसङ्गात् । किं तु विशेषणविशिष्टस्य विशेषणरूपो य एकभाग-स्तद्रूपः । यथा शरीरविशिष्टस्य शरीरं तद्वत् । एतदग्रे सूत्रकृतैव (२।३।४५) वक्ष्यते । तथा च यथा शरीरगतानां कृशत्वश्यामत्वादीनां न जीवे संबन्धस्तथा जीवगतदोषाणां न ब्रह्मणि संबन्धः । अत्र च प्रभाप्रभावतोरिव जीवब्रह्मणोर-पृथक्सिद्धांशांशित्वाङ्गीकारादभेदश्रुतयः संगच्छन्ते । विशेषणवाचकशब्दानां विशेष्यपर्यन्तार्थाभिधायकत्वात् । यथा तेजस्व्यपि तेजःशब्देनोच्यते ज्योति-ष्मानपि च ज्योतिःशब्देनोच्यते तद्वत् । विशेषणविशेष्ययोर्भेदाच्च भेदश्रुतयोपि संगच्छन्ते ।

५४१–५ ब्रह्मसृज्यत्वेति । यद्यपि जीवो नाहं ब्रह्मेति ब्रह्मभिन्नतया सर्वेषां प्रत्यक्षप्रसिद्धस्तथाप्यहं ब्रह्मणा सृष्टोहं ब्रह्मणा नियमितोहं ब्रह्मणः शरीर-भूत इत्येवमादिरूपैर्भेदस्य प्रत्यक्षप्रसिद्धत्वाभावेन तादृशभेदप्रतिपादिकाः श्रुतयो नानुवादभूताः किं त्वनन्यथासिद्धा विधायिन्य एवेति न बाध्यन्त इत्याशयः ॥ ४२ ॥

५४२–१३ एकरूपत्वेपीति । अनेन जीवाद्वैतपरवाक्यानामाकारैक्यपरत्वं दर्शितम् ॥ ४३ ॥ ४४ ॥ ४५ ॥

५४३–१७ स्मरन्ति चेति । अपि स्मर्यते (२।३।४४) इति सूत्रेंशत्वमात्रे स्मृतिवचनमुक्तम् । अस्मिन्सूत्रे विशिष्टैकदेशविशेषणरूपांशत्वेपि स्मृतिवचन-मुच्यत इति भेदः (श्रु.) ॥ ४६ ॥

५४४–९ केषांचिदिति । ब्राह्मणादीनां त्रयाणामेव वेदाध्ययनाद्यनुज्ञा न शूद्राणाम् । तथा पतितरजस्वलाचण्डालादिव्यतिरिक्तानामेव दर्शनस्पर्शनानुज्ञा न पतितादीनामिति भेदो न संभवति । सर्वेषां जीवानां समानत्वादिति शङ्काशयः ।

—१८ अभिशस्तादेरिति । अयं परस्त्रियं गच्छतीत्यादिना वाक्येन यस्मिन्दोषारोपो जनैः क्रियते सोभिशस्तः ॥ ४७ ॥

५४४-१९ असंततेरिति । समन्तात्ततिर्विस्तृतिः संततिः । विभुत्वमिति यावत् । तदभावोऽसंततिरणुत्वम् । व्यतिकरः संकरः सर्वेषां भोगसाम्यम् । तदभावोऽव्यतिकरः । भोगव्यवस्थेति यावत् ॥ ४८ ॥

५४५-६ आभास इति । आभासो हेत्वाभासः । असद्धेतुरिति यावत् । अखण्डैकरसप्रकाशमात्रस्वरूपस्य ब्रह्मणः स्वरूपं निरोधीयते ब्रह्म चोपाधिभेदाद्विद्यत इति त्वदीयः पक्षो येन हेतुना त्वया साध्यते स हेतुरसद्धेतुरेव । स्वरूपतिरोधाने प्रकाशनाशप्रसङ्गात् ।

—१३ श्रुतिविरोध इति । पृथगात्मानमित्यादिश्रुतिषु भेदप्रतिपादनेनाभेदवादिनः श्रुतिविरोध इति भावः ॥ ४९ ॥

—२१ छेदासंभवादिति । पारमार्थिकैरप्युपाधिभिरुपाधिभेदहेतुभूतैरदृष्टैर्वा यदि ब्रह्मणश्छेदा भवेयुस्तर्ह्यमुकादृष्टप्रयुक्ता भोगा अमुकच्छेदस्य (जीवस्य) इति नियमः स्यात् । छेदस्तु न संभवतीति प्रदेशभेदासंभवान्नियमो न सिध्यतीति भावः ॥ ५० ॥

५४६-१ अभिसंध्यादिष्विति । अभिसंधिः संकल्पः । आदिशब्दादुद्योगानुष्ठानादिसंग्रहः । चशब्द एवार्थे । संकल्पादिभिरपि ब्रह्मणश्छेदासंभवेनामुकस्यायं संकल्प इति नियमो न संभवतीति भावः ॥ ५१ ॥

—६ सर्वप्रदेशानामिति । प्रदेशो भागः । देवदत्ते गच्छति सति तत्र केवलं शरीरमेव गच्छति न तु तादृशशरीरान्तर्भूतो ब्रह्मणो भागः शरीरेण सह गच्छति । ब्रह्मणः सर्वव्यापित्वात् । तथा च देवदत्तशरीरान्तर्भूतो यो भागो यस्मिन्स्थले देवदत्तादृष्टप्रयुक्तभोगमन्वभूत्स एव भागस्तस्मात्स्थलाद्देवदत्तशरीरेऽन्यत्र गते यज्ञदत्तशरीरे च तस्मिन्स्थले समागते सति तादृशयज्ञदत्तशरीरान्तर्भूतः सन्यज्ञदत्तादृष्टप्रयुक्तभोगभाक्स्यादिति जीवानां परस्परं भोगसंकरः स्यादेवेति भावः ।

—८ ब्रह्मण एव स्यादिति । तथा च ब्रह्मणि जीवभोगसंकरः स्यादिति भावः ॥ ५२ ॥ (७)

॥ अथ द्वितीयाध्यायस्य चतुर्थः पादः प्रारभ्यते ॥

५४७-७ किमिन्द्रियाणामिति । कार्यत्वमुत्पत्तिः । तत्र किमिन्द्रियाणां जीवस्येव ज्ञानविकासकरदेहसंबन्धरूपोत्पत्तिरथ वाकाशस्येव स्वरूपप्राप्तिरूपोत्पत्तिरिति संशय इत्यर्थः ।

—१५ प्राणा वाव ऋषय इति । अत्र प्राणशब्दः परमात्मवाची । ऋषिशब्देन सामानाधिकरण्यात् । ऋषित्वं हि द्रष्टृत्वम् । प्राणा इति बहुवचनं

त्वेकस्मिन्नपि गुरवः समागता इतिवद्बहुमानसूचकमिति सिद्धान्तः । पूर्वपक्षी तु बहुवचनस्वारस्येन प्राणशब्दस्येन्द्रियवाचित्वं मन्यते ॥ १ ॥

५४९–१ गौणीति । श्रुतेश्चेति चशब्द एवार्थे ॥ २ ॥

—४ तत्पूर्वकत्वादिति । सृष्टेः प्रागमुकं वस्त्वस्तीति निश्चयो न प्रत्यक्षप्रमाणेन भवति । असंभवात् । किं तु श्रुत्यानुमानेन च । तत्र श्रुत्येन्द्रियाणामस्तित्वं न सिध्यतीति पूर्वमुक्तम् । अनुमानविषय इदानीमुच्यते । सूत्रे वाक्शब्दो नामवाची । परमात्मव्यतिरिक्तानामाकाशादिपदार्थानां यानि नामानि तान्याकाशादिसृष्टिपूर्वकाणि । न तु सृष्टेः प्राक् । तद्वेदमिति श्रुतेः । तथा च सृष्टेः पूर्वं नाम्नामभावेन नामोच्चारणरूपस्य वागिन्द्रियकार्यस्याभावान्न तदानीं वागिन्द्रियास्तित्वमनुमीयते । कार्येण हि कारणस्यानुमानं भवति । यथा धूमेनाग्नेः । एवमेवेतरेन्द्रियाणामपि नानुमानेनास्तित्वमवगम्यते । तथा च सृष्टेः प्रागिन्द्रियाणामभावात्प्राणशब्दः परमात्मवाच्येवेति सिद्धम् ॥ ३ ॥ (१)

—१६ सप्त इम इति । सप्तेमे लोका येषु लोकेषु गुहाशयाः शरीरान्तः स्थिता निहितास्तत्तत्स्थानेषु निक्षिप्ताः सप्त सप्त प्राणा इन्द्रियाणि संचरन्तीत्यर्थः ।

—१८ पुरुषभेदेति । प्रतिपुरुषं सप्तेन्द्रियाणीति भावः ।

—२० यदा पञ्चेति । यदा योगदशायां पञ्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि मनो बुद्धिश्चेत्येवं सप्तेन्द्रियाणि बाह्यविषयेभ्यः पराङ्मुखीभूय स्वस्वरूप एवावतिष्ठन्ते तां परमां मोक्षसाधनीभूतां गतिमाहुः । अयमेव योग इति भावः । ज्ञानानीति सप्तानां विशेषणम् । ज्ञानसाधनीभूतानीति तदर्थः । ज्ञायतेनेनेति व्युत्पत्तेः । हस्तादीनां ज्ञानसाधनत्वाभावान्न तेषां वस्तुत इन्द्रियत्वम् । इन्द्रियव्यवहारस्तु तेषां गौण इति पूर्वपक्षाशयः ।

५५०–५–७ अष्टौ ग्रहा इति । चक्षुर्घ्राणं रसनं श्रोत्रं वाङ्मनस्त्वग्वस्तश्चेत्येतेष्टौ ग्रहाः । ग्रहत्वं च बन्धनहेतुत्वाद्बोध्यम् । सप्त वै शीर्षण्या इति । शीर्षण्याः शिरसि भवा मस्तकस्थाः । द्वे श्रोत्रे द्वे चक्षुषी द्वे घ्राणे वागेकेति सप्त प्राणाः । द्वाववाञ्चौ पायूपस्थावित्यर्थः । चतुर्दशेति । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेति ज्ञानेन्द्रियपञ्चकं वाक्पाणिपादपायूपस्थेति कर्मेन्द्रियपञ्चकं मनो बुद्धिरहंकारश्चित्तं चेत्यन्तःकरणचतुष्टयं चेत्येवं चतुर्दश प्रतीयन्त इत्यर्थः ॥ ४ ॥

—१३ एकादशेति । पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चेत्येकादशेत्यर्थः ।

शरीरे स्थित इति । यथा ज्ञानेन्द्रियाणि जीवेन सह शरीरान्तरं प्रतिगच्छन्ति तथा कर्मेन्द्रियाणि यद्यपि जीवेन सह न गच्छन्ति तथापि शरीरान्तरस्थिते जीवे भोगसाधनत्वमुभयेषां समानमेवेति हस्तादीन्यपि वस्तुत एवे-

न्द्रियाणि न तु तेषामिन्द्रियत्वं गौणमिति भावः । केचित्तु कर्मेन्द्रियाण्यपि जीवेन सह गच्छन्तीत्याहुः । तदाशयश्च यतीन्द्रमतदीपिकाप्रकाशे (पृ. ३९) स्पष्टीकृतोस्माभिरिति तत एव द्रष्टव्यः ।

५५०–१५ **हस्तादीनामिति** । आदिपदेन वाक्पादपायूपस्थसंग्रहः । आदानादिरित्यादिशब्देनोच्चारणगमनविसर्गानन्दसंग्रहः ।

—१७ **अध्यवसायेति** । मन एव बुद्ध्यानुगृहीतं सदध्यवसायं करोतीति बुद्धिशब्देन व्यवह्रियते । तथाहंकारेणानुगृहीतं मन एवाभिमानं करोतीत्यहंकारशब्देन व्यवह्रियते । तथा पूर्वसंस्कारविशेषानुगृहीतं मन एव चिन्तां करोतीति चित्तशब्देन व्यवह्रियत इति भावः ।

५५१–६ **अधिकेति** । इन्द्रियाणि वस्तुत एकादशैव । तत्रैकस्यैव मनसः संशयनिश्चयगर्वस्मरणरूपवृत्तिभेदेन मनो बुद्धिरहंकारश्चित्तमिति भेदचतुष्टयं गृहीत्वा चतुर्दशेन्द्रियाणीत्युक्तमिति बोध्यम् ॥ ५ ॥ (२)

—१० **त एत इति** । त एते सर्व एव प्राणा इन्द्रियाणि समाः । सर्वेषां जीवकार्यकरत्वेन साम्यमत्रोच्यते । ते च सर्वेनन्ताः । नान्तो देशकृतमर्यादा येषामित्यर्थः ।

—१४ **अणवश्चेति** । अणुत्वं च नात्र बालाग्रशतभागस्येत्याद्युक्तरीत्या जीवस्येवात्यन्ताल्पत्वम् । किं तु परिमितत्वे सत्युपलब्धिसाधनीभूतस्थूलतारहित्यम् । उत्क्रान्तिश्रवणात्परिमितत्वं सिध्यति । उत्क्रान्तिवेलायां पार्श्वस्थैरदर्शनाच्च तादृशस्थूलताराहित्यं सिध्यति ।

आनन्त्येति । कार्यबाहुल्यमानन्त्यम् । कार्यबाहुल्यविशेषणविशिष्टतयोपासनार्थमानन्त्यकथनमित्यर्थः (श्रु.) ॥ ६ ॥

—१८–५५२–१ **प्राणसंवाद इति** । इतरेन्द्रियाणामभावेप्यन्धमूकादेः शरीरं तिष्ठत्येव । प्राणस्याभावे तु न कथमपि शरीरं तिष्ठतीत्यत इतरेन्द्रियापेक्षया प्राणस्य मुख्यत्वं छान्दोग्ये प्राणसंवादे (छा. ५।१।६) निर्णीतम् । **आनीदिति** । आनीत्प्राणनमकार्षीत् । अन प्राणन इत्यस्य क्रियापदम् । स्वधया लक्ष्म्या सहेत्यर्थः । **नोत्पद्यत इति** । मुख्यप्राणो नोत्पद्यते । नित्य एव सः । एतस्माज्जायते प्राण इति श्रुतौ या प्राणस्योत्पत्तिरुच्यते सा शरीरसंबन्धरूपेति पूर्वपक्ष्याशयः । **पृथिव्यादितुल्येति** । एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति श्रुतौ पृथिव्यादिपञ्चमहाभूतानामुत्पत्तिः कथ्यते । सा चोत्पत्तिः स्वरूपप्राप्तिरूपेति तत्रैव श्रुतावुच्यमाना मुख्यप्राणस्योत्पत्तिरपि स्वरूपप्राप्तिरूपैव न शरीरसंबन्धरूपेति विज्ञायते । किं च मुख्यप्राणस्योत्पत्तिः श्रुतौ न क्वापि प्रतिषिध्यत इति मुख्यः प्राण उत्पद्यत एवेति भावः ।

५५२–५ **अवातमिति** । अनेन सृष्टेः प्राङ्मुख्यप्राणस्याभावः सिद्धो भवति । मुख्यप्राणस्य वातविशेषरूपत्वात् ।

—६ **उत्तरचिन्तेति** । उत्तरसूत्रे मुख्यप्राणसंबन्धेन कश्चिदधिको विचारः प्रदर्शयिष्यते । तथा च तत्र मुख्यप्राणस्य संबन्धार्थं श्रेष्ठश्रेत्येतन्मुख्यप्राणसंबन्धेन पृथक्सूत्रं कृतम् । मुख्यप्राणस्योत्पत्तिकथनं तु तथा प्राणा इत्यनेनैव कृतं भवति । तदेव श्रेष्ठश्रेत्यनेन केवलमनूद्यते । अत एव श्रेष्ठश्रेति नाधिकरणान्तरमिति बोध्यम् ॥ ७ ॥ (३)

—१८ **अवस्थान्तरमिति** । देहधारणयोग्यतारूपावस्थान्तरमापन्न इत्यर्थः । ॥ ८ ॥

५५३–२ **चक्षुरादिवदिति** । सहशिष्टिः सहोपदेशः ।

—९ **विशिष्याभिधानादिति** । विशिष्याभिधानमपि तत्सजातीयत्व एव भवतीति भावः ॥ ९ ॥

५५४–१ **शैथिल्याभिधानादिति** । अस्य शरीरेन्द्रियधारणादिरूपां क्रियां दर्शयतीत्यन्वयः ॥ १० ॥

—९ **मन एवेति** । एकमेव मनः कामादिवृत्तिभेदेन कामादिशब्दैर्व्यवह्रियत इति भावः ॥ ११ ॥ (४)

—१९ **वैभवेति** । सम एभिरित्यादिवचनानि मुख्यप्राणस्यैश्वर्यद्योतकान्यर्थवादभूतानीति भावः ॥ १२ ॥ (५)

—२३ **सश्रेष्ठानामिति** । मुख्यप्राणसहितानामिन्द्रियाणां ब्रह्मणः सकाशादुत्पत्तिरुक्ता । तेषामियत्ता संख्या द्वादशेत्युक्ता । इतरेन्द्रियाण्येकादशेति पूर्वं स्पष्टमेवोक्तम् । तथा च मुख्यप्राणेन सह द्वादशसंख्यार्थादेवोक्ता भवति । तेषामणुपरिमाणं चोक्तमित्यर्थः ।

५५५–३ **जीवस्य चेति** । यतश्च जीवो यथेच्छं स्वसंकल्पानुसारेणेन्द्रियाणि विषयेषु प्रवर्तयति ततश्चानुभवसिद्धमेवैतज्जीवः स्वभोगसाधनान्येतान्यधितिष्ठतीति ।

—८ **प्राणवता जीवेन संहेति** । ननु जीवो यद्यत्करोति तत्सर्वं परमात्माधीनमिति परात्तु तच्छ्रुतेः (ब्र. सू. २।३।४०) इत्यत्रोक्तम् । तथा च जीवस्य प्राणाधिष्ठानं सिद्धमेवेत्यत्र सूत्रे जीवेनेत्यर्थकं प्राणवतेति पदं व्यर्थमिति चेन्न । दृष्टान्तार्थं तदुपन्यासात् । यथा जीवस्य परमात्मसंकल्पादेव प्राणाधिष्ठानं तथाऽन्यादिदेवतानामपि प्राणाधिष्ठानं परमात्मसंकल्पादेवेति । तत्राग्निर्वाचमधितिष्ठति । आदित्यश्चक्षुरधितिष्ठति । वायुः प्राणमधितिष्ठति । दिशः श्रोत्रमधितिष्ठन्ति । ओषधिवनस्पतयो लोमान्यधितिष्ठन्ति । चन्द्रमा मनो-

धितिष्ठति । मृत्युरपानमधितिष्ठति । आपो रेतोधितिष्ठन्तीति बोध्यम् । **प्राण-विषयमधिष्ठानमिति** । मुख्यप्राणसहितेन्द्रियाधिष्ठानमित्यर्थः ॥ १३ ॥

५५६-२ **स्वरूपानुबन्धीति** । तथा चाश्व्यादीनां स्वरूपमपि परमात्मायत्तमिति किमु वक्तव्यमश्व्यादीनां प्राणाधिष्ठानं परमात्मायत्तमिति बोध्यम् ॥ १४ ॥ (६) ॥ १५ ॥

५५७-२ **वैलक्षण्यमिति** । वैलक्षण्यं च त्रिधा-वृत्त्युपलम्भवैलक्षण्यं कार्यवैलक्षण्यं प्रवृत्तिनिमित्तवैलक्षण्यं चेति । सुषुप्तौ प्राणस्य वृत्तिरुपलभ्यते । श्वासोच्छ्वाससद्भावात् । चक्षुरादीनां तु वृत्तिर्नोपलभ्यते । दर्शनाद्यनुपलम्भादिति वृत्त्युपलम्भवैलक्षण्यम् । इन्द्रियेषु केषांचिज्ज्ञानसाधनत्वं केषांचित्कर्मसाधनत्वम् । प्राणस्य तु शरीरेन्द्रियधृतिसाधनत्वमिति कार्यवैलक्षण्यम् । श्वासोच्छ्वासकर्तृत्वरूपं प्राणत्वं प्राणशब्दस्य प्रवृत्तिनिमित्तम् । तच्च मुख्यप्राण एव वर्तत इति तत्रैव प्राणशब्दप्रयोगो मुख्यः । इन्द्रियेषु श्वासोच्छ्वासकर्तृत्वं नास्त्येव । केवलमिन्द्रियाणां शरीरे स्थितिः प्रवृत्तिश्च प्राणाधीनेति प्राणसंबन्धादिन्द्रियेषु प्राणशब्दप्रयोगो गौण इति प्रवृत्तिनिमित्तवैलक्षण्यमिति बोध्यम् ॥ १६ ॥ (७)

—१० **संज्ञेति** । संज्ञा नाम । मूर्तीं रूपम् । कृप्तिः कल्पनम् । नामरूपव्याकरणमिति यावत् । त्रिवृत्कुर्वेखिवृत्करणकर्ता परमात्मा ।

—१२ **पुरस्तादिति** । द्वितीयाध्यायस्य तृतीयपाद इत्यर्थः ।

—१३ **अनन्तरमिति** । अस्मिन्पाद इत्यर्थः ।

—१४ **हिरण्यगर्भस्यैवेति** । एवशब्देन तदन्तर्यामिपरमात्मव्यावृत्तिः । किमियं प्रपञ्चव्यष्टिसृष्टिर्जीवरूपात्केवलचतुर्मुखाद्भवत्यथ वा यथा तेजःशरीरकात्परमात्मनः सकाशाज्जलसृष्टिर्जलशरीरकात्परमात्मनः सकाशात्पृथिवीसृष्टिस्तथा चतुर्मुखशरीरकात्परमात्मनः सकाशात्प्रपञ्चव्यष्टिसृष्टिर्भवतीति संशय इत्यर्थः ।

—१८ **जीवकर्तृकत्वेति** । अनुप्रवेशे व्याकरणे च जीवस्य प्रयोज्यकर्तृत्वात् ।

५५८-२ **जीवरूपेणेति** । तथा च नामरूपव्याकरणं जीवकर्तृकमिति प्रपञ्चव्यष्टिसृष्टेर्जीवरूपचतुर्मुखकर्तृकत्वं सिध्यति ।

—३ **चारेणेति** । अयमाशयः-चारेणानुप्रविश्य परसैन्यमहं संकलयानीति राज्ञः संकल्पः । अनुप्रवेशे संकलने च कर्ता राजा । अनुप्रवेशः संकलनं च वस्तुतश्चारनिष्ठमेव न तु राजनिष्ठम् । राजा तु केवलं प्रेरकः । न चास्मदर्थः कर्तृभूतो यो राजा तन्निष्ठं संकलनं नास्ति चेत्संकलयानीत्युत्तमपुरुषानापत्ति-

रिति वाच्यम्। संकलनस्य राज्ञ्यारोपेणोत्तमपुरुषप्रयोगस्य गौणत्वात्। न च प्रविश्येति क्त्वाप्रत्ययप्रयोगात्संकलनस्य यः कर्ता राजा स एव प्रवेशनक्रियायाः कर्तेत्यवगम्यते। तथा च प्रवेशनक्रियाया राजनिष्ठत्वमावश्यकम्। प्रवेशनक्रियायाः कर्तृस्थत्वात्। काश्चित्क्रियाः कर्मस्थाः। यथा घटं करोति काष्ठं छिनत्ति। अत्रोत्पत्तिर्द्विधाभवनं च न कर्तृनिष्ठम्। किं तु कर्मनिष्ठमेव। काश्चिच्च कर्तृस्थाः क्रियाः। यथा ग्रामं गच्छति गृहं प्रविशति। अत्र गमनं प्रवेशनं च कर्तृनिष्ठमेव। तथा च प्रकृते प्रवेशनस्य राजरूपकर्तृनिष्ठत्वाभावे प्रविश्येति प्रयोगानुपपत्तिरिति वाच्यम्। प्रवेशनक्रियाया राज्ञ्यारोपेण प्रविश्येति प्रयोगस्यापि गौणत्वात्। एवमेवानेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्यत्र प्रवेशनव्याकरणयोरस्मदर्थपरमात्मनिष्ठत्वाभावे व्याकरवाणीत्युत्तमपुरुषस्यानुप्रविश्येति प्रयोगस्य च गौणत्वं स्यादिति।

५५८-७ **सहयोगेति**। सहयोगे तृतीयास्वीकारे तु जीवेन सहाहं (परमात्मा) व्याकरवाणीत्यर्थेन नामरूपव्याकरणस्य परमात्मकर्तृकत्वमप्यर्थात्सिध्यतीत्याशयः।

—८ **कारकेति**। कर्तरि तृतीया कारकविभक्तिः। सहयोगे तृतीया तूपपदविभक्तिः। तत्र कारकविभक्तेर्बलवत्त्वमुपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायादिति तत्र च दीयते (पाणिनि-सू. ५।१।९६) इति सूत्रे कैयटे स्पष्टम्।

—१० **जीवस्येति**। जीवः परमात्मनोंशभूत इति परमात्मस्वरूपमेव। तथा च यद्यपि जीवेन कृतं नामरूपव्याकरणं परमात्मना कृतप्रायमेव तथापि तन्नामरूपव्याकरणं न परमात्मना साक्षादंशद्वारा वा कृतं किं त्वंशभूतेन जीवेनैव स्वातन्त्र्येण कृतम्। एतत्सूचनायैव श्रुतावनेन जीवेनेति जीवस्य पराक्त्वेन परामर्शः। इदंत्वेन भासमानत्वमेव पराक्त्वम्। तथा च यथा लोके स्वयं किंचिदकुर्वाणः कश्चिद्देवदत्तादिरनेनेत्थं कर्तव्यमिति केवलं संकल्पं करोति तथैवात्र परमात्मा संकल्पमात्रमेव करोति न तु नामरूपव्याकरणम्। अंशेन कृतमंशिना कृतप्रायमेव भवतीत्येतावता नामरूपव्याकरणस्य परमात्मकृतत्वं त्वस्तु नामेति पूर्वपक्ष्याशयः।

५५९-४ **समानकर्तृकत्वप्रतीतेरिति**। वाक्यसंदर्भस्वारस्येन यस्त्रिवृत्करणं करोति स एव नामरूपे व्याकरोतीति समानकर्तृकत्वप्रतीतेरित्यर्थः।

—५ **त्रिवृत्कृतैरिति**। अण्डोत्पादनार्थमेव त्रिवृत्करणात्। त्रिवृत्करणं नाम पृथिवीजलतेजसां त्रयाणां भूतानां मिश्रणम्। तत्र त्रिवृत्कृतपृथिव्यामर्धो भागः पृथिव्या अर्धं इतरयोर्द्वयोः। त्रिवृत्कृतजलेऽर्धो भागो जलस्यार्धं इतरयोः।

एवं तेजसः । एतत्त्रिवृत्करणं पञ्चीकरणस्योपलक्षणमित्यन्यत् । पञ्चीकरणे तु स्वस्यार्धो भाग इतरेषां चतुर्णां मिलित्वाऽर्धो भाग इति बोध्यम् ।

५५९–१२ **तत्तेज इति** । अत्र तेजःशब्देन तेजोन्तर्यामी परमात्मोच्यते । एवं ता आप इत्यत्राप्शब्देनेति भावः ।

—१७ **अक्लिष्टाविति** । अलाक्षणिकावित्यर्थः ।

—२१ **तिस्रो देवता इति** । तेजोबन्नरूपा इत्यर्थः ॥ १७ ॥

५६०–१० **अन्नमशितं त्रेधेति** । अत्र प्रागेव त्रिवृत्कृतस्य पश्चात्पुरुषेण भक्षितस्यान्नस्य पुरीषादिप्रकारत्रयेण परिणाम उपदिश्यते । प्रकारत्रये च प्रत्येकमेकं भूतमिति न विभागः । किं तु प्रकारत्रये प्रत्येकं भूतत्रयसंबन्धोस्त्येव । तथापि पुरीषमांसमनांसि पार्थिवांशाधिक्यात्पृथिवीविकारा इति व्यपदिश्यन्ते। एवं पूर्वमेव त्रिवृत्कृतस्य पश्चात्पीतस्य जलस्य परिणामभूता मूत्रलोहितप्राणा जलांशाधिक्याज्जलविकारा इति व्यपदिश्यन्ते । अस्थिमज्जावाचस्तेजोविकारा अप्येवमेवेति सिद्धान्तः । पूर्वपक्षी त्वेवं मन्यते । अत्रित्रिवृत्कृतं केवलपृथिवीरूपमेवान्नं पुरुषेण भक्षितमुदरे जलतेजोभ्यां मिश्रितं सत्त्रिधा विभक्तं भवति । इदमेव त्रिवृत्करणं पूर्वपक्षी मन्यते । तत्र भागत्रये यः स्थूलः पृथिवीरूपो भागस्तत्पुरीषं यो मध्यमो जलरूपो भागस्तन्मांसं योणुतरस्तेजोरूपो भागस्तन्मनः । एवमत्रिवृत्कृतमेव जलं पुरुषेण पीतं सदुदरे पृथिवीतेजोभ्यां मिश्रितं भवति । ततो भागत्रये जायमाने यः स्थूलः पृथिवीरूपो भागस्तन्मूत्रं यो मध्यमो जलरूपो भागस्तल्लोहितं योणुतरस्तेजोरूपो भागः स प्राणः । एवमत्रिवृत्कृतमेव भक्षितं तेज उदरे पृथिवीजलाभ्यां मिश्रितं भवति । ततो भागत्रये जायमाने यः स्थूलः पृथिवीरूपो भागस्तदस्थि । यो मध्यमो जलरूपो भागः सा मज्जा । योणुतरस्तेजोरूपो भागः सा वागिति । तथा चाण्डसृष्टेः पश्चाच्चतुर्मुखसृष्टेषु पदार्थेषु त्रिवृत्करणोपदेशान्न त्रिवृत्करणमण्डसृष्ट्यर्थं भवतीति त्रिवृत्करणं चतुर्मुखकर्तृकमिति तदेककर्तृकं नामरूपव्याकरणमपि चतुर्मुखकर्तृकमेवेत्याशयः ।

—१५ **उत्तरकालमिति** । श्रुतौ नामरूपव्याकरणोत्तरमुपदिश्यमानं त्रिवृत्करणं पाठक्रमानुरोधेन नामरूपव्याकरणोत्तरकालभाव्येव । नामरूपव्याकरणं चाण्डसृष्ट्युत्तरकालमिति नामरूपव्याकरणोत्तरं जायमानं त्रिवृत्करणं नाण्डसृष्ट्यर्थं भवतीति त्रिवृत्करणं चतुर्मुखकर्तृकमिति तदेककर्तृकं नामरूपव्याकरणमपि चतुर्मुखकर्तृकमेवेति पूर्वपक्ष्याशयः ।

५६१–५ **मांसमनसोरिति** । पृथिव्यपेक्षया जलमणु । ततोप्यणुतरं तेज इति क्रमः । तथा च पार्थिवपुरीषापेक्षयाणुत्वेन व्यपदिष्टं मांसं जलीयं स्यात् ।

मांसगताणुत्वस्य कारणगुणपूर्वकत्वात् । एवमणुतरत्वेन व्यपदिष्टं मनस्तैजसं स्यादिति भावः ।

५६१-१८ **वाक्यशेषाविरोधादिति** । पूर्वपक्षिमते त्वनुपदमेवोक्त-(विवृति-पृ. २७६ प. १६-२२) रीत्या मनःप्राणवाचां त्रयाणामपि तैजसत्वादेतद्वाक्यशेषविरोधः स्पष्ट एवेति भावः ॥ १८ ॥ १९ ॥ (८)

अथ तृतीयाध्याये प्रथमः पादः प्रारभ्यते ।

५६४-३ **तदन्तरेति** । संपरिष्वक्तः संयुक्तः । रंहति गच्छति । रहि गतौ भ्वादिः । निरूपणं प्रतिवचनम् ।

५६५—१०-२ **कर्मिणामिति** । वेत्थ यदितोधि प्रजाः प्रयन्ति (छा. ५।३।२) इति कर्मिणां गन्तव्यदेशः प्रवाहणेन पृष्टः । इतोधि इत ऊर्ध्वं प्रजा यत्प्रयन्ति तत्त्वं वेत्थ जानीषे किमिति तदर्थः । वेत्थ यथा पुनः पुनरावर्तन्ते (छा. ५।३।२) इति कर्मिणां पुनरावृत्तिप्रकारः पृष्टः । वेत्थ यथा देवयानस्य पितृयाणस्य च व्यावर्तने (छा. ५।३।२) इति देवयानपितृयाणमार्गव्यावर्तने पृष्टे । देवयानपितृयाणयोर्व्यावर्तने भेदके रूपे किं वेत्थ । केन प्रकारेण तयोर्भेद इति तदर्थः । वेत्थ यथासौ लोको न संपूर्यते (छा. ५।३।३) इत्यमुष्य लोकस्याप्राप्ता पृष्टः । अस्माल्लोकादनवरतं गच्छद्भिः पुरुषैः कस्माद्धेतोर्द्युलोको न संपूर्यते । अमुष्य लोकस्याप्राप्ता क इति तदर्थः । वेत्थेति । पुरुष इति वचः संज्ञा यासां ताः पुरुषवचसः । पञ्चम्यामाहुतौ दत्तायामुदकस्य येन प्रकारेण पुरुषो भवति तं प्रकारं त्वं वेत्थ किमित्यर्थः । अयं श्वेतकेतुं प्रति प्रवाहणेन कृतः प्रश्नः सूत्रस्थप्रश्नशब्देनाभिप्रेतः । इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति श्वेतकेतुदत्तमुत्तरं च सूत्रे निरूपणशब्देनाभिप्रेतम् ।

-१४-६ **श्रद्धां जुह्वतीति** । श्रद्धाशब्देनाप उच्यन्ते । देहारम्भिका आपो जीवेन सह द्युलोकरूपेऽग्नौ हुता भवन्ति । इयं प्रथमाहुतिः । ततस्तत्र तासामपां सोमो राजा भवति । सोमो राजाऽमृतमयदेहः । ततो द्वितीयाहुतौ सोऽमृतमयदेहः पर्जन्यरूपेऽग्नौ हुतः सन्वृष्टिरूपो भवति । ततस्तृतीयाहुतौ सा वृष्टिः पृथिवीरूपेऽग्नौ हुता सत्यन्नरूपा भवति । ततश्चतुर्थ्यामाहुतौ तदन्नं पुरुषरूपेऽग्नौ हुतं सद्वीर्यं भवति । ततः पञ्चम्यामाहुतौ तद्वीर्यं स्त्रीरूपेऽग्नौ हुतं सद्गर्भीभूय पुरुषरूपं भवतीति बोध्यम् । प्राणा इति । मुख्यप्राणा इत्यर्थः। जीवगमनस्य प्राणाधीनत्वात्प्राणाधीनः प्रक्षेपो होमत्वेनोपचरितः (श्रु.) । यद्वा प्राणा इन्द्रियाणि । तेषां होमकर्तृत्वं त्विन्द्रियार्जितकर्मणां द्युलोकादिगमनहेतुत्वाद्बोध्यम् ॥ १ ॥ २ ॥

५६७–५ **तमुत्क्रामन्तमिति** । तं जीवम् । सर्वे प्राणा इतरेन्द्रियाणि । शरीरान्निर्गच्छन्तं जीवं मुख्यप्राणोनुगच्छति । तं च मुख्यप्राणमितरेन्द्रियाण्यनुगच्छन्तीत्यर्थः । अत्रेन्द्रियाणां जीवेन सह गमनं कथ्यत इतीन्द्रियाणां देहाश्रयत्वेन देहोपि सूक्ष्मरूपेण गच्छतीति गम्यते (वे.) ।

—८ **मनःषष्ठानीति** । प्रकृतिपरिणामविशेषशरीरस्थानि मनःसहितानि पञ्च ज्ञानेन्द्रियाणि मदंशो जीवः स्वकर्मानुसारेणेतस्ततः कर्षति । यच्छरीरमवाप्नोति यच्चापि शरीरादुत्क्रामति तत्रापीन्द्रियाणामीश्वर एतानीन्द्रियाणि भूतसूक्ष्मैः सह गृहीत्वा संयाति । यथा वायुः स्वकन्दनकस्तूरिकाद्याशयात्तत्स्थानात्सूक्ष्मावयवैः सह गन्धान्गृहीत्वान्यत्र संयाति तद्वदित्यर्थः ॥ ३ ॥

—१४ **यत्रास्येति** । पुरुषस्य मरणकाले वागिन्द्रियमग्नौ लीनं भवति वायौ प्राणो लीनो भवत्यादित्ये च चक्षुर्लीनं भवतीत्यर्थः ।

—१९ **अनपियद्भिरिति** । अप्ययरहितैरित्यर्थः । न हि मरणकाले लोम्नामोषधीषु केशानां च वनस्पतिषु लयो दृश्यते । तथा च तत्रागत्य यथौषधीर्लोमानीति श्रुतेर्लोमाभिमानिदेवतौषध्यभिमानिदेवतामप्येति लोमाभिमानित्वं विहाय केवलमोषध्यभिमानिनी भवतीत्यर्थः कल्प्यते तथा तया सह पठिताया अग्नेर्वागिति श्रुतेरपि वागभिमानिनी देवताग्न्यभिमानिनीमप्येति वागभिमानित्वं विहाय केवलाग्न्यभिमानिनी भवतीत्यर्थः कल्पनीय इति भावः ॥ ४ ॥

५६८–९–१० **अन्यथेति** । अब्विषयः प्रश्नस्तस्योत्तरं च मनोवृत्तिविशेषविषयमित्यसंगतिः स्फुटैव ।

—१९ **अपामेवेति** । एवकारेण मनोवृत्तिविशेषव्यावृत्तिः । न ह्यमूर्तस्य मनोवृत्तिविशेषस्य सोमाकारेण परिणामः संभवतीति भावः ॥ ५ ॥

५६९–६ **तस्मिन्नेव वाक्य इति** । महावाक्य उत्तरत्रेत्यर्थः । छान्दोग्यपञ्चमप्रपाठकस्थतृतीयखण्ड एवेति यावत् । **सोमराजान इति** । दिव्यदेहा इत्यर्थः (श्रु.) ।

–८–१३ **अथ य इति** । ये पुरुषा ग्राम एव स्थित्वेष्टं यागादि पूर्तं खातादि दत्तं दानम् । इतिशब्दस्तज्जातीयोपवासादिकर्मान्तरपरः । यागदानहोमादीनि कर्माणि येनुतिष्ठन्ति ते धूममभिसंभवन्ति प्राप्नुवन्ति । एष इष्टादिकारी सोमो राजा स्वर्गे देवभोग्यदिव्यदेहयुक्तो भवति । एतद्देवानामन्नम् । इष्टादिकारिणामाजानसिद्धदेवकिंकरत्वादन्नत्वं भक्ष्यत्वं चोपचर्यते । संपतत्यनेन संपातः कर्मशेषः । यावत्कर्मशेषमुषित्वेत्यर्थः । यावच्छब्दः साकल्यार्थः । साकल्यं च फलप्रदानयुक्तकर्मविशेषविषयं न तु सर्वकर्मविषयम् । स पुनर्निवर्तमानोवरोहञ्जीवो योन्नमत्ति यो रेतः सिञ्चति पश्चात्तद्भवति । रेतः-

सिग्भाव औपचारिकः । रेतःसिग्योगो भवतीत्यर्थः । रेतसि प्रविष्टः सन्रेतःसिक्संयुक्तो भवतीति यावत् ।

५६९–१४ अत्रापीति । प्रकृते पूर्ववाक्येपीत्यर्थः । उभयत्र सोमराजशब्देन प्रत्यभिज्ञानादेकार्थत्वम् । अस्फुटजीवसंबन्धस्य पूर्ववाक्यस्य स्फुटजीवसंबन्धेनोत्तरवाक्येनैकार्थ्यादुक्त एवार्थ इत्यर्थः ॥ ६ ॥ ७ ॥ (१)

५७०–१८ कृतात्यय इति । कृतस्य पुण्यकर्मणोऽत्ययेऽनुभवेन नाशे सत्यनुशयवान्भुक्तशिष्टकर्मवान्निवर्तत इति श्रुतिस्मृतिभ्यामवगम्यते । स च यथेतं यथागतं चन्द्रमसः स्थानादाकाशमित्यारोहणक्रमेण । अनेवं वायुधूमाभ्रादिना प्रकारान्तरेण च निवर्तत इति सूत्रार्थः ।

५७१–५ कृत्स्नोपभोग इति । यावच्छब्दप्रतिपादितं साकल्यं फलप्रदानयुक्तकर्मविशेषविषयं न तु सर्वकर्मविषयमिति पूर्वपक्षी न मन्यते ।

—११ अभ्याश इति । अभ्यागन्तारः प्रत्यवरूढा इत्यर्थः । अभ्याङ्पूर्वादशधातोः क्विबन्ताद्बहुवचनम् । उपसर्गवशेनाशधातोः प्रत्यवरोहणार्थत्वम् । हेति प्रसिद्धौ ।

५७२–१ ततः परिवृत्ताविति । ततः स्वधर्मानुष्ठानफलीभूतसुखानुभवानन्तरं परिवृत्तिरिह लोके जन्म भवति । तस्यां च कर्मणो यः फलशेषो भोक्तव्यस्तेन जातिं ब्राह्मणादिकां विशिष्टे वा कुले जन्म रूपं कान्तिमद्वर्णं हेमादितुल्यं बलं प्रतिपक्षनिग्रहक्षमं मेधां ग्रन्थग्रहणशक्तिं प्रज्ञामर्थग्रहणशक्तिं द्रव्याणि स्वर्णादीनि धर्मानुष्ठानमितिकरणाद्यच्चान्यदेवं युक्तं तत्सर्वं प्रतिपद्यते । सर्वत्र धर्मशेषो हेतुः । ऐहिकस्य शरीरग्रहणादेरपि धर्मफलत्वात् । तस्माच्चक्रवदुभयोर्लोकयोरिह चामुष्मिंश्च सुख एव वर्तते न जातुचिद्दुःखे । सुखानुबन्धेनैव तस्यावृत्तिर्भवतीत्यर्थः ॥ ८ ॥

—१७ यान्यनवद्यानीति । अनवद्यानि कर्माणीति यागादीन्युच्यन्ते । यान्यस्माकं सुचरितानीत्याचार उच्यत इति पूर्वपक्षिणोभिप्रायः । अनवद्यानि कर्माणीति प्रत्यक्षश्रुतिसिद्धं कर्मोक्तम् । सुचरितानीति त्वाचारानुमितश्रुतिसिद्धं कर्मोक्तम् (श्रु.) । यथा गाश्चानय बलीवर्दांश्चानयेति गोबलीवर्दशब्दयोरुभयोः प्रयोगे स्त्रीपुंव्यक्तिभेदेनार्थभेदं परिकल्प्य शब्दद्वयोपपत्तिः क्रियते तथैवात्रेति सिद्धान्त्यभिप्रायः । अयमेव गोबलीवर्दन्यायः ॥ ९ ॥ १० ॥

५७३–१४ गोबलीवर्दन्यायेनेति । इदमनुपदमेवोक्तम् । सुकृतदुष्कृते एव साक्षाच्चरणशब्देन शक्त्यैव प्रतिपाद्येते इति बादरिमतम् । चरणशब्देन लक्षणया कर्म प्रतिपाद्यत इति कार्ष्णाजिनिमतमिति भेदोवगन्तव्यः ।

—१८ स्वीकृतमिति । आनर्थक्यमिति सूत्रे कार्ष्णाजिनिमतप्रतिपादितोयमंशस्तु स्वीक्रियत एवेत्यर्थः ॥ ११ ॥ (२)

५७४-१ अनिष्टादीति । एतत्प्रभृति सूत्रपञ्चकं पूर्वपक्षिणः ॥ १२ ॥

—११ संयमन इति । संयमन इति निमित्तसप्तमी । यमाज्ञयेत्यर्थः ।

—१७ अयं लोक इति । अत्रामुत्र च सुखं नास्तीत्यर्थः (श्रु.) ॥ १३ ॥ ॥ १४ ॥ १५ ॥

५७५-९ तत्रापीति । तस्य यमस्य व्यापारः प्रशासनरूपः ॥ १६ ॥

५७६-८ परिणेयमिति । निर्वाह्यमित्यर्थः ॥ १७ ॥

५७७-१ अथैतयोरिति । यानि भूतान्युक्तयोर्देवयानपितृयाणयोर्मध्ये कतरेण येन केनापि मार्गेण न गच्छन्ति नागच्छन्ति च तानीमानि भूतानि क्षुद्राणि दंशमशककीटादीन्यसकृदावर्तीनि जायस्व म्रियस्वेति भवन्ति । पुनःपुनर्जायन्ते म्रियन्त इत्यर्थः । क्रियासमभिहारे (पा. सू. ३।४।२) इति पाणिनिसूत्रेण पौनःपुन्यलक्षणक्रियासमभिहारे लोट् । पुरीमवस्कन्द (माघकाव्ये १।५१) इत्यादिवत् । भवन्तीति सामान्यार्थधातोरनुप्रयोगः । भूतानि भवन्तीति प्रथमान्तशब्देन प्रधानतया निर्दिष्टाः पापकर्माण एतच्छब्देन परामृश्यन्ते । त एव तृतीयं स्थानम् । पूर्वनिर्दिष्टब्रह्मलोकद्युलोकापेक्षया क्षुद्रजन्तुभवनादिलक्षणस्थानस्य तृतीयत्वात्तत्स्थानसंबन्धात्पापकर्माणस्तृतीयं स्थानमित्युच्यन्ते । तेन तृतीयस्थानेन पापकर्मणासौ द्युलोको न संपूर्यते न प्राप्यते । यद्वैतच्छब्देन पूर्वनिर्दिष्टो जननमरणादिभवनलक्षणो धात्वर्थ एव परामृश्यते । तस्यैव च तृतीयस्थानत्वम् । तेन तृतीयस्थानसद्भावेन तत्रैव जीवानां प्रायेण प्रचाराद्द्युलोकगन्तृणामल्पत्वाद्द्युलोको न संपूर्यत इत्यर्थः ।

—७ अवधारणाश्रवणादिति । श्रुतौ पञ्चम्यामाहुतावेवेत्येवकाराश्रवणादित्याशयः ॥ १८ ॥

—९ पुण्यकर्मणामिति । पुण्यकर्मस्वप्ययं नियमो भज्यते किं पुनः पापकर्मस्विति भावः ॥ १९ ॥

—१४ जीवजमिति । जरायुजमित्यर्थः ।

तेषूद्भिज्जस्वेदजयोरिति । तेष्वण्डजं जीवजमुद्भिज्जमित्येतेषु त्रिषु वक्ष्यमाणसूत्रोक्तरीत्योद्भिज्जशब्देन प्रतिपादितयोरुद्भिज्जस्वेदजयोरित्यर्थः । उद्भिज्जास्तरुगुल्मादयः ॥ २० ॥

—२० उद्भिज्जशब्देनेति । न तु प्रथमेनाण्डजशब्देन द्वितीयेन जीवजशब्देन वा स्वेदजसंग्रहः । अण्डजस्य जीवजस्य वा स्वेदजेन विशेषसाम्याभावात् । उद्भिज्जानां तरुगुल्मादीनां तु स्वेदजेन सह पञ्चमाहुतिनिरपेक्षत्वायोनिजत्वपापोत्तरत्वादिधर्मैर्विशेषतः साम्यमस्तीत्याशयः ॥ २१ ॥ (३)

५७८-७ आकाशादिभाव इति । आकाशादिशरीरत्वमित्यर्थः । श्रद्धा-

वस्थस्येति । यथा त्रिवृत्कृतसूक्ष्मजलशरीरकस्यामृतमयशरीरकत्वं तथैवाकाशादिशरीरकत्वमित्यर्थः ॥ २२ ॥ (४)

५७८—१६ **आकाशप्राप्तिप्रभृतीति** । अत्र प्रभृतिशब्देन वायुधूमाभ्रमेघवर्षप्राप्तिसंग्रहः ।

५७९–१ **तशब्दलोप इति** । 'दुर् निस् प्र' एतदुपसर्गत्रयपूर्वकात्पतधातोः खल्प्रत्यये ततस्तरप्प्रत्यये दुर्निष्पततरमिति भाव्यम् । तत्रैकस्य 'त' इत्यक्षरस्य छान्दसत्वाल्लोपे दुर्निष्पतरमिति भवति ॥ २३ ॥ (५)

—४ **अन्याधिष्ठित इति** । अत्यन्तदुःखभाजो लोके य उद्भिज्जव्रीह्यादिशरीराः प्राणिनो दृश्यन्ते तैः संश्लिष्टा एवैतेवरोहन्तः सूक्ष्मबीजशरीरका भवन्ति न तु त एव । अवरोहन्तः केवलं तैर्दुःखभाग्भिः प्राणिभिः संयुक्ता भूत्वा ततः पुरुषद्वारेण स्त्रीजठरं प्रविष्टाः पश्चात्सुखदुःखानुभवयोग्यं जन्म प्रतिपद्यन्त इत्येतत्सूत्रतात्पर्यम् ॥ २४ ॥

५८०–४ **अग्नीषोमीयादीति** । यज्ञे ह्यग्नीषोमादिदेवतोद्देशेन पशोर्हिंसा क्रियते । अग्नीषोमौ देवतास्येत्यग्नीषोमीयः पशुः । द्यावापृथिवी (पा. सू. ४।२।३२) इति पाणिनिसूत्रेण छप्रत्ययः । आदिशब्देनान्यदेवताकपशुसंग्रहः ।

—६ **न चात्रेति** । उत्सर्गः सामान्यशास्त्रम् । अपवादो विशेषशास्त्रम् । तयोर्विरोधे विशेषशास्त्रं सामान्यशास्त्रस्य बाधकं भवति । यथाहवनीये जुहोतीति सामान्यशास्त्रम् । तेन चाहवनीयस्य सामान्यतो होमस्थानत्वं विधीयते । पदे जुहोतीति विशेषशास्त्रम् । तेन च होमविशेषे पदस्य होमस्थानत्वं विधीयते । तथा चैकत्र होमविशेषे स्थानद्वयस्यासंभवेन विरोधात्तत्र विशेषशास्त्रं बाधकं भवति । अयमेवोत्सर्गापवादभावः । स च प्रकृते न संभवति । विरोधाभावात् । अग्नीषोमीयं पशुमालभेतेति विध्यनुसारेण पशुहिंसायाः क्रतूपकारकत्वमप्यस्तु । तस्या एव च न हिंस्यादिति निषेधानुसारेण प्रत्यवायफलकत्वमप्यस्त्वित्युभयोरेकत्र संभवादिति शङ्काशयः ।

—१० **रागप्राप्तेति** । यज्ञे पशोर्हिंसा तु न रागतः प्राप्ता किं तु विधित एवेति तादृशविधिविषयं न हिंस्यादिति निषेधविधिर्न व्याप्नोतीति यज्ञियपशुहिंसायाः प्रत्यवायफलकत्वाभावेनेष्टादिकर्म पापमिश्रं न भवतीत्याशयः ।

—२० **तेषामप्यशुद्धियुक्तत्वमिति** । नित्यकर्मादीनामपि संवत्सरपश्वालम्भनादिभिरशुद्धियुक्तत्वमित्यर्थः (श्रु.) ।

५८१–५ **संज्ञपनस्य** । मरणस्य ।

—९ **न हिंसेति** । अनर्थोदर्कव्यापारस्यैव हिंसात्वादिति भावः ।

—११ **न वा उ इति** । यज्ञे हन्यमानस्य पशोः परावृत्तौ सत्यां तत्प्रोत्साहनार्थोयं मन्त्रः । हे पशो त्वमेतदेतेन मारणव्यापारेण न वा उ सर्वथा नैव

म्रियसे । अत एव न रिष्यसि न विनश्यसि । किं तु सुगेभिः सुखेन गन्तुं शक्यैः पथिभिर्मार्गैर्देवानिदेपि देवानेव प्राप्नोपि । यत्र यस्मिंल्लोके सुकृतः पुण्यकृत एव गच्छन्ति दुष्कृतः पापिनो नापि नैव गच्छन्ति तस्मिन्नुत्तमलोके सविता देवस्त्वां दधातु स्थापयत्वित्यर्थः ॥ २५ ॥

५८२—१९ यो यो हीति । योऽन्नं भक्षयित्वा तत्परिणामभूतं रेतः सिञ्चति तत्संयुक्तोऽयमवरोहज्ञीवो भवतीति श्रुत्यर्थः ॥ २६ ॥ २७ ॥ (६)

अथ तृतीयाध्याये द्वितीयः पादः प्रारभ्यते ।

५८३–६ न तत्रेति । प्राग्व्याख्यातम् (विवृति–पृ. ८७ प. १८) ॥ १ ॥

—१८ य एष्विति । इन्द्रियेषु सुप्तेषु सत्सु यो जागर्तीत्यर्थः । अत्रेन्द्रियसंबन्धरूपलिङ्गदर्शनेन यच्छब्देन जीव एव निर्दिश्यत इति निश्चीयते ।

—२० निर्दिश्यन्त इति । ते च पुत्रादयः सांसारिकस्य जीवस्यैव लिङ्गभूताः । अतोपि यच्छब्देन जीव एव निर्दिश्यत इति निश्चीयते ॥ २ ॥

५८४–१६ कामं काममिति । णमुल्प्रत्ययान्तमेतत् । संकल्प्य संकल्प्येत्यर्थः ।

—१८ य एष्विति । एषु सर्वेषु जीवेषु सुप्तेषु निद्रां गतेषु सत्सु यः परमात्मा जागर्ति तदेव शुक्रं प्रकाशकं तद्ब्रह्म तदेवामृतमुच्यते । ननु नित्यमुक्तानाममृतान्तराणां सत्त्वात्तदेवेत्यवधारणं न संभवतीति चेत्सत्यम् । निरुपाधिकामृतत्वस्य ब्रह्मण्येव सद्भावात्तादृशामृतत्वाभिप्रायेणात्रावधारणोपपत्तेः । एतेनैतदवधारणानुरोधेन मोक्षावस्थायां मुक्तपरमात्मनोरभेद एवेति कल्पना प्रत्युक्ता । उक्तरीत्यावधारणोपपत्तेः । अभेदस्य परमं साम्यमुपैतीति श्रुतिबाधितत्वाच्च । अत्र य एष सुप्तेषु जागर्तीत्युपक्रमे तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यत इत्युपसंहारे च परमपुरुषासाधारणस्वभावप्रतीतेर्मध्ये कामं काममित्यत्रापि पुरुषपदेन परमात्मैव ग्राह्य इति भावः ॥ ३ ॥ ४ ॥

५८५–१७ देहयोगादिति । जीवस्य स्वाभाविका ये सत्यसंकल्पत्वादयो गुणास्तत्तिरोधानप्रकार एवानेन सूत्रेण प्रतिपाद्यते । वाशब्दो विकल्पार्थः । व्यवस्थितश्चायं विकल्पः । सृष्टिकाले देहयोगात्प्रलयकाले सूक्ष्माचिच्छक्तियोगात्तत्तिरोधानमिति व्यवस्था बोध्या ।

५८६–१ अल्पादपेति । एतेन नेश्वरः स्वाप्नं पदार्थजातं सृजति । तस्यात्यन्तास्थिररथादिनिर्माणे प्रयोजनाभावादित्याशङ्का निरस्ता ॥ ५ ॥

—४ सूचकश्चेति । जीवस्य स्वाप्नसृष्टिमात्रोपयोगिसत्यसंकल्पत्वाद्याविर्भावस्तदानीं स्यादिति शङ्काव्यावृत्त्यर्थमिदं सूत्रम् (श्रु.) ॥ ६ ॥ (१)

५८६–१४ तद्भाव इति । चकारोनुक्तसमुच्चयार्थः पुरीततं समुच्चिनोति । तस्य स्वप्नस्याभावः सुषुप्तिर्नाडीष्वात्मनि पुरीतति च समुच्चयेन भवति । तच्छ्रुतेः । त्रयाणां सुषुप्तिस्थानत्वश्रुतेरिति सूत्रार्थः ।

—१५ अथ यत्रेति । यत्र यदा जीवः समस्त उपसंहृतेन्द्रियग्रामोऽत एव संप्रसन्नो बाह्यविषयसंपर्कजनितकालुष्यशून्यः स्वप्नं न पश्यति तदा सुषुप्त्यवस्थायामासु नाडीषु सृप्तः प्रविष्टो भवतीत्यर्थः । अत्र नाड्यः सुषुप्तिस्थानत्वेन श्रूयन्ते ।

—१७ अथ यदेति । यदा जीवः सुषुप्तो भवति यदा किंचिन्न जानाति तदा हितानामिका द्वासप्ततिसहस्रसंख्याकाः केशसहस्रांशसूक्ष्मा नानाविधान्नरसपरिपूर्णा नाड्यो हृदयात्पुरीतत्पर्यन्तं गतास्ताभिर्नाडीभिर्गत्वा पुरीतति शेत इत्यर्थः । अत्र पुरीतत्सुषुप्तिस्थानत्वेन श्रूयते ।

५८७–१ यत्रैतदिति । हे सोम्य यदायं जीवः स्वपिति तदा सता ब्रह्मणा संपन्नो युक्तो भवतीत्यर्थः । अत्र ब्रह्म सुषुप्तिस्थानत्वेन श्रूयते ।

—८ न च कार्यभेदेनेति । ब्रह्मणः साक्षात्सुषुप्तिस्थानत्वम् । तद्द्वारा पुरीततः । तद्द्वारा च नाडीनाम् । एवं कार्यभेद इत्येकदेव त्रयाणां समुच्चयः । न तु विकल्पः । विकल्पे ह्येकस्मिन्पक्षे परिगृहीते तदान्यस्य पक्षस्य बाध एव स्वीकर्तव्यः स्यात् । स च न न्याय्यः । अबाधेनैवोपपत्तेः ॥ ७ ॥ ८ ॥ (२)

५८८–१ ब्रह्मणि संपन्नस्येति । सता सोम्य तदा संपन्नो भवतीति श्रुतौ सुषुप्त्यवस्थायां जीवस्य ब्रह्मणा संयुक्तत्वं बोध्यत इति भावः ।

—९ यद्यद्भवन्तीति । प्रजा जाग्रदशायां यद्यद्व्याघ्रादित्वं प्राप्नुवन्ति तत्तद्व्याघ्रादित्वमा भवन्त्यागत्य भवन्ति । सुषुप्तिस्थानात्परमात्मन आगत्य यथापूर्वं व्याघ्रादिभावमनुसंदधत इत्यर्थः ।

—११ नाह खल्विति । अहेत्याश्चर्ये । अयं सुप्तः । संप्रति सुषुप्तिकाले । सुषुप्त्यवस्थायामज्ञानादिदोषा अस्यां श्रुतौ प्रतिपादिताः । सुषुप्तौ सत्संपत्तिवचनस्य तात्पर्यं तु तदा शरीरेन्द्रियाधिष्ठातृत्वादिव्यापारान्तरराहित्येन ब्रह्मणि स्थितिमात्रमित्येव न त्वाविर्भूतस्वरूपत्वम् । उक्तश्रुतिविरोधात् ॥ ९ ॥ (३ ॥

५८९–९ निमित्तवैरूप्यादिति । निमित्तवैरूप्यान्न सुषुप्तिराकारवैरूप्यान्न मरणमित्यन्वयः । मूर्छाया ह्यभिघातात्यन्तानिष्टश्रवणादि निमित्तं भवति । न तत्सुषुप्तेर्निमित्तं दृश्यते । तथा मूर्छामरणयोराकारवैरूप्यं तु स्पष्टमेवोपलभ्यते । मरणेऽप्यापि प्राणस्यानुपलम्भात् ॥ १० ॥ (४)

—१८ स्थानेष्विति । अवस्थास्वित्यर्थः ।

५९०–३ आपादयन्तीति । शत्रन्तात्प्रथमाबहुवचनम् । कर्म देहसंबन्धमापादयत्सदेवापुरुषार्थजनकं भवति नान्यथेत्यर्थः ।

—८ अवर्जनीय इति । अपुरुषार्थसंबन्धो हि देहसंबन्धरूपवस्तुस्वभावायत्तः । अत एवाकर्मवश्यस्यापि परमात्मनो देहसंबन्धे जाते सत्यपुरुषार्थसंबन्धो दूरीकर्तुमशक्य इति भावः ।

५९१–२ इत्यादीति । आदिशब्देन निरवद्यं निरञ्जनम्, यः सर्वज्ञः सर्ववित्, यो मामजमनादिं च वेत्ति लोकमहेश्वरमित्यादिसंग्रहः ॥ ११ ॥

— ३ भेदादितीति । अवस्थाभेदात्परब्रह्मणोपि दोषाः स्युरिति चेन्न । यः पृथिव्यामित्यादिश्रुतौ प्रतिपर्यायं दोषासंबन्धित्ववचनादिति सूत्रार्थः । एष त आत्मान्तर्याम्यमृत इत्येकत्रैव वक्तव्ये प्रतिपर्यायं तदुक्तिस्तत्तद्वस्तुगतदोषविशेषसंबन्धराहित्यप्रदर्शनार्थेत्याशयः ।

—१७ कालभेदेनेति । अग्निर्हेमन्ते सुखाय ग्रीष्मे दुःखाय भवति तथा स्वकीयं वस्तु स्वस्य सुखाय तदेव च परस्य दुःखाय भवति । तथा च यथैकस्य विरुद्धस्वभावद्वयान्वयानुपपत्तेर्न सुखं दुःखं च वस्तुस्वभावायत्तं तथैवापुरुषार्थसंबन्धोपि न वस्तुस्वभावायत्त इति बोध्यम् ॥ १२ ॥

५९२–१३ स्वशब्देनेति । पूर्वसूत्रोदाहृतायां यः पृथिव्यां तिष्ठन्नित्यादिश्रुतावसकृदमृतत्ववचनं तत्तद्वस्तुगतदोषसंबन्धराहित्यं सूचयति । अत्रोदाहृतायां श्रुतौ तु स्पष्टमेवोच्यत इति बोध्यम् । द्वा सुपर्णेति श्रुत्यर्थः प्रागुक्तः (विवृति–पृ. ७१ प. १९) ॥ १३ ॥

५९३–११ कर्मवश्यमेवेति । ननु ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य तच्छरीरत्वेनैव वस्तुत्वात्तस्य प्रतिपादकोपि शब्दस्तत्पर्यन्तमेव स्वार्थमभिदधाति । अतः सर्वशब्दानां लोकव्युत्पत्त्यवगततत्तत्पदार्थविशिष्टब्रह्माभिधायित्वं सिद्धमिति भाष्य एव प्रागुक्तम् (श्रीभाष्य–पृ. ११३ प. २) । तथा च ब्राह्मणशब्दस्यापि ब्रह्मपर्यन्तार्थकत्वेन ब्राह्मणो यजेतेत्यादिविधिषु ब्रह्मण एवाधिकारः प्राप्नोतीति चेन्न । ब्राह्मणो यजेतेत्यादिष्वर्थानुपपत्त्या ब्राह्मणशब्दस्य जीवमात्रपर्यन्तार्थकत्वाश्रयणात् । यथा शुक्लादिशब्दानां धर्मिपर्यन्तार्थकत्वेपि घटस्य शुक्ल इत्यादावर्थानुपपत्त्या धर्ममात्रवाचकत्वं स्वीक्रियते तद्वत् ॥ १४ ॥

—१६ नेति नेतीत्यादिभिरिति । सत्यं ज्ञानमिति श्रुतावपि ब्रह्मणो ज्ञानस्वरूपत्वाभिधानेन सर्वज्ञत्वादीनामर्थो निषेधः सिध्यति । ज्ञानस्य सर्वज्ञत्वाभावात् । ज्ञातुरेव हि सर्वज्ञत्वादिकम् ।

५९४–२ वाक्यावैयर्थ्यादिति । ज्ञानस्वरूपस्यापि सर्वज्ञत्वादिकं श्रुतिप्रामाण्यादङ्गीकर्तव्यमित्याशयः ॥ १५ ॥

—१० अनन्तरमेवेति । अस्मिन्नेवाधिकरणे प्रकृतैतावत्त्वमिति सूत्रे ॥१६॥

५९५-८-१३ **यो मामिति**। न जायत इत्यजः। अनेन विकारिद्रव्यादचेतनात्तत्संसृष्टात्संसारिचेतनाच्च विसजातीयत्वमुक्तम्। संसारिचेतनस्य हि कर्मकृताच्चित्संसर्गो जन्म। अनादिमित्यनेन पदेन मुक्तात्मनो विसजातीयत्वमुक्तम्। मुक्तात्मनो ह्यजत्वमादिमत्। तस्य हेयसंबन्धस्य पूर्ववृत्तत्वात्तदर्हताऽस्ति। अतोऽनादिमित्यनेन तदनर्हतया तत्प्रत्यनीकतोच्यते। लोकमहेश्वरमिति। लोकेश्वराणामपीश्वरमित्यर्थः। **विष्टभ्येति**। इदं चिदचिदात्मकं कृत्स्नं जगत्कार्यावस्थं कारणावस्थं स्थूलं सूक्ष्मं च स्वरूपसद्भावे स्थितौ प्रवृत्तिभेदे च यथा मत्संकल्पं नातिवर्तेत तथा मम महिम्नोऽयुतायुतांशेन विष्टभ्याहमवस्थित इत्यर्थः। **मयेति**। सत्यसंकल्पेन मयाध्यक्षेणेक्षिता मदीया प्रकृतिः क्षेत्रज्ञकर्मानुगुणं सचराचरं जगत्सूयते। अनेन क्षेत्रज्ञकर्मानुगुणमदीक्षणेन हेतुना जगद्विपरिवर्तत इत्यर्थः। **उत्तम इति**। उत्तमः पुरुषस्तु पूर्वोक्ताभ्यां क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्योर्थान्तरभूतः परमात्मेत्युदाहृतः। सर्वासु श्रुतिषु परमात्मेति निर्देशादेव ह्युत्तमः पुरुषो बद्धमुक्तपुरुषाभ्यामर्थान्तरभूत इत्यवगम्यते। लोक्यत इति लोकः। तत्त्रयमचेतनं तत्संसृष्टचेतनो मुक्तश्चेत्येतत्त्रयं य आत्मतयाऽऽविश्य बिभर्ति तस्माद्व्याप्याद्धर्तव्याच्चार्थान्तरभूतः। इतश्चोक्तालोकत्रयादर्थान्तरभूतः। यतः सोव्यय ईश्वरश्च। व्ययस्वभावादीशितव्याच्चार्थान्तरभूत इत्यर्थः॥ १७॥ १८॥

५९६-११ **सप्तम्यन्तादिति**। अम्बुनीवाम्बुवदित्यर्थः॥ १९॥

५९७-१९ **हेत्वभावादिति**। एकवस्तुगतदोषाणामन्यवस्तुनि संबन्धे हि तयोर्वस्तुनोर्देशतः संनिकर्षः कालतः संनिकर्षः स्वभावतश्च संनिकर्ष इति संनिकर्षत्रयं मिलितं हेतुः। तत्र यथाम्बुसूर्ययोर्घटाकाशयोश्चैकस्मिन्संनिकर्षे द्वयोर्वा संनिकर्षयोर्विद्यमानयोरपि संनिकर्षत्रयाभावान्नैकवस्तुगतदोषाणामन्यत्र संबन्धस्तथैवात्र। परमात्मनो दोषप्रत्यनीकाकारतया तस्य पृथिव्यादिभिः सह स्वभावतः संनिकर्षाभावात्॥ २०॥

५९८-७-९ **माहारजनं वास इति**। महारजनेन रक्तं माहारजनम्। हरिद्रामहारजनाभ्यामजिति वार्तिकेन (४।२।२) अञ्प्रत्ययः। महारजनं कुसुम्भः। तेन रक्तं यद्वस्त्रं तद्वदस्य रूपमित्यर्थः। **आदेश इति**। उपदेशः क्रियत इत्यर्थः।

—१८ **प्रमाणान्तराप्रज्ञातमिति**। प्रमाणान्तरप्रसिद्धस्य निर्देशो ह्यनुवाद एव। प्रसिद्धस्य विधानायोगात्। स चानुवादो निषेधवाक्ये निषेधार्थो भवति। अप्रसिद्धस्य तु निर्देशो विधानार्थ एव। न तु तत्र निषेधार्थोनुवादः। प्रक्षालनाद्धि पङ्कस्येति न्यायेनानिर्देशस्यैव संभवात्।

—२० **तथापि तेषामिति**। यद्यपि पृथिव्यादीनां पदार्थानां स्वरूपं लोकप्रसिद्धं तथापि तेषां ब्रह्मप्रकारत्वं लोकतो न ज्ञातुं शक्यमिति तदत्र विधीयते। इतरेषां हार्दाकाशादीनां तु न स्वरूपं न च ब्रह्मप्रकारत्वं लोकतो ज्ञातुं शक्यमिति तदुभयं विधीयत इति बोध्यम्।

५९९–५ **प्रतीयमानेयत्तेति** । श्रुतौ नेति नेतीत्यत्रेतिशब्द इयत्तालक्षणप्रकारवचनः । नैवं नैवमित्यर्थः । तथा च प्रकृता मूर्तामूर्ता विशेषा न निषिध्यन्ते । किं तु तैर्विशेषैर्या ब्रह्मणीयत्ता भासते सा निषिध्यते । एतदर्थमेव सूत्रे प्रकृतैतावत्त्वमित्युक्तम् । नेति नेतीति वीप्सा त्वात्यन्तिकाभावद्योतनार्था ।

—१४ **उत्कृष्टं नास्तीति** । श्रुतौ परशब्द उत्कृष्टवाची । न त्वनया श्रुत्या सामान्यतोन्यमात्रस्य जीवस्य जडस्य च निषेधः । तथा हि सत्यन्यत्परमिति पदद्वयवैयर्थ्यापत्तेः । ब्रह्मणः सर्वोत्कृष्टत्वादेव तस्य तदनुगुणं सत्यमिति नाम श्रुतावुक्तमिति बोध्यम् ॥ २१ ॥

६००–९ **तन्निषेधासंभवादिति** । तथा च ब्रह्मणः सविशेषत्वमस्त्येवेत्युभयलिङ्गत्वं सिद्धमिति भावः ॥ २२ ॥

—१७ **अपि संराधन इति** । संराधनं सम्यक्प्रीतिकरम् । प्रीतियुक्तभजनमुपासनमिति यावत् । तत्रैवायमुपलभ्यते नान्यत्राव्यक्तत्वादिति श्रुतिस्मृतिभ्यामवगम्यत इति सूत्रार्थः ।

६०१–११ **प्रीणनमिति** । संतोषजनकमित्यर्थः ।

—१२ **अतो निदिध्यासनायेति** । ब्रह्मणः केनापि प्रमाणेनानभिव्यक्तरूपत्वात्तत्प्रकारतया प्रागज्ञातमेव जगदैश्वर्यं द्वे वाव रूपे इत्यादिश्रुत्योपदिश्यते । तथा च तस्यानुवादासंभवात्तन्नेति नेतीति न निषिध्यते किं तु प्रकृतेयत्तामात्रं निषिध्यत इति सिद्धम् ॥ २३ ॥

—१५ **प्रकाशादिवदिति** । येषां वामदेवादीनां संराधनरूपकर्मण्यभ्यासात्प्रकाशो दर्शनं संजातं तेषां दर्शने प्रकाशादिवज्ज्ञानादेरिव जगदैश्वर्यस्याप्यवैशेष्यं प्रतीयत इति सूत्रार्थः (वे. दी.) ॥ २४ ॥ २५ ॥ (५)

६०२–८ **उभयेति** । तुशब्दोवधारणे । अहेः कुण्डलभावादिवद्ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थानम् । नानात्वैकत्वरूपोभयव्यपदेशादिति सूत्रार्थः(वे. दी.) ।

—१७ **तथा प्रधानेति** । अत्र परमात्मनो रूपमेव विवृतम् । ईश्वरत्वादिकथनात् । नियाम्यत्वलक्षणविभूतित्वमेव रूपत्वमिति रूपत्वविशदीकारात्(श्रु.)।

—२२ **अहिकुण्डलन्यायेनेति** । एकद्रव्यावस्थाविशेषेत्यर्थः । द्वे वाव ब्रह्मणो रूपे इत्यादिश्रुत्योपदिष्टमचिद्वस्तुनो ब्रह्मरूपत्वं किं ब्रह्मस्वरूपस्यैवाचिद्रूपेण परिणामाद्भवत्युत परब्रह्माचिद्वस्तुनोरेकजातियोगादथ वा ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनेति पक्षत्रयम् । तत्र प्रथमे पक्षे यद्यपि भिन्नाभिन्नत्वरूपोभयव्यपदेशोपपत्तिर्भवति तथापि ब्रह्मण एव परिणामाङ्गीकारात्सदोषत्वप्रसङ्गः । द्वितीयपक्षे त्वात्मैवेदं सर्वमिति ब्रह्मस्वरूपस्यैव सर्वशब्दवाच्यत्वव्यपदेशो विरुध्यते । न हि पृथिवीजलतेजआदीनां द्रव्यत्वरूपैकजातियोगेपि जलादीनां पृथिवीशब्दव्यपदेशो दृश्यते । अतस्तृतीयः पक्ष एव समीचीन इति सिद्धान्तः ॥ २६ ॥ २७ ॥

६०३-१८ **पूर्ववद्वेति** । यथा पूर्वत्र जीवस्य ब्रह्मांशत्वमुक्तं तद्वदचिद्वस्तुनोपीति सूत्रार्थः । यथा जीवः पृथक्सिद्ध्यनर्हविशेषणतया ब्रह्मांशभूतस्तथैवाचिद्वस्त्वपीति भावः ।

—२० **उक्तदोषादिति** । अपरिणामित्वभेदश्रुतिबाधादित्यर्थः । तथा च प्रथमपक्षे दोष इत्याशयः ।

६०४-२ **ब्रह्मापीति** । भावप्रधानो निर्देशः । ब्रह्मत्वमपीत्यर्थः । क्वचिद्ब्रह्मत्वमपीत्येव पाठः । परमात्मनो जीवस्याचिद्वस्तुनश्च ब्रह्मत्वरूपैकजातियोगेपि परस्परं तेषां तादात्म्याभावेनात्मैवेदं सर्वमित्याद्यभेदप्रतिपादकश्रुतिविरोध इति द्वितीयपक्षेपि दोष एवेत्याशयः ।

—९ **प्रकाशेति** । प्रकाशादीनां चतुर्णां मण्यादिषु चतुर्षु यथासंख्येनान्वयः ॥ २८॥ २९ ॥ (६)

६०५-१५-६ **चतुष्पाद्ब्रह्मेति** । मनो ब्रह्मेत्युपासीतेत्युक्त्वा मनोरूपस्य ब्रह्मणो वाक्प्राणश्चक्षुः श्रोत्रं चेति पादचतुष्टयमुक्तम् । वागादीनां चतुर्णां मनोनियाम्यत्वान्मनःपादत्वाध्यासः । **षोडशेति** । षोडश कलाः पूर्वोक्ताः (विवृति-पृ. ४७ प. ११) यस्य तत् । उन्मानव्यपदेशः परिमितत्वव्यपदेशः ।

—१८ **संबन्धव्यपदेश इति** । पूर्वं सेतूदाहरणे केवलं सेतुशब्दनिर्देशः । संबन्धोदाहरणे तु प्रतिसंबन्धिनिर्देशसहितसेतुशब्दनिर्देश इति भेदः ॥ ३० ॥

६०६-११ **सामान्यात्त्विति** । सेतुसामान्यात्सेतुसादृश्याज्जगद्विधृतिरूपाद्ब्रह्मणः सेतुशब्दव्यपदेश इति सूत्रार्थः ॥ ३१ ॥ ३२ ॥ ३३ ॥

६०७-१७ **विवृणुते तनूं स्वामिति** । अनेनैकस्यैव प्रापकत्वं प्राप्यत्वं च गम्यते ॥ ३४ ॥

६०८-११-५ **अनन्तरमुक्तमिति** । तथा च न तस्येश इति श्रुतौ तस्येत्यनेन जगत्कारणतत्त्वस्य परमात्मन एव परामर्श इति तस्य परमात्मनः कश्चन पुरुषो नेशे नियन्तुं न समर्थः । अत एव तस्य परमात्मनो महद्यश इति नाम संपन्नम् । अत्यन्तस्वतन्त्रत्वेन तदीययशसः सर्वाधिकत्वादिति श्रुत्यर्थ इत्यन्यप्रतिषेधः सिद्धो भवति । **सर्व इति** । प्राग्व्याख्यातम् (विवृति-पृ. ९४ प. २३)। **स आप इति** । स परमात्मापो भूलोकं प्रदुधे दुग्धवान् । प्राणिनामपेक्षितं भोग्यजातं पृथिव्यां संपादितवान् । तथैवान्तरिक्षं स्वर्गश्चेतीमे उभे अपि स्थाने प्रदुग्धे । तयोरपि स्थानयोर्भोग्यं संपादितवान् । अप्शब्देन भूलोको लक्ष्यते । **अद्भ्य इति** । अद्भ्यः संभूतः पृथिव्यै रसाच्चेत्यनुवाकस्यात्र प्रदर्शनार्थमद्भ्यः संभूत इति प्रतीकं पठितम् । तथा हिरण्यगर्भः समवर्ततात्र इत्यृगष्टकस्यात्र प्रदर्शनार्थं हिरण्यगर्भ इति प्रतीकं पठितम् । तत्राद्भ्यः संभूत इत्यनुवाके वेदाहमेतं पुरुषं महान्तमित्यादिना प्रतिपादितं परमात्मनो महापु-

रुषत्वादिकमत्र तत्प्रतीकग्रहणेन सूचितम्। तस्यैव च महापुरुषस्य सर्वजगत्कारणत्वं हिरण्यगर्भ इति प्रतीकग्रहणेन सूचितम्। हिरण्यगर्भः समवर्तताग्र इत्यस्य हिरण्यगर्भश्चतुर्मुखोग्रे प्रागस्मात्परमात्मनः सकाशात्समुत्पन्न इत्यर्थः।

६०९-११ हेतुत इति। ततो यदुत्तरमिति श्रुतौ तत इत्यस्य तस्माद्धेतोरित्यर्थः। न तूत्तरतरमित्यस्यावधित्वेन तत इति निर्देश इति भावः।

—१३ उपक्रमविरोध इति। नान्यः पन्था इति वाक्यविरोधः। य एनं विदुरिति वाक्यस्य परमपुरुषेतरवेदनपरत्वं हि नान्यः पन्था इत्यनेन विरुद्धम्। यस्मात्परं नापरमित्यादिवाक्यविरोधोनन्तरोक्तिविरोधः (श्रु.) ॥ ३५ ॥

६१०-१ आयामशब्दस्तावदिति। व्याप्तिवाचिशब्दस्तावदित्यर्थः ॥ ३६ ॥ (७)

—१५ तुल्यन्यायतयेति। मुक्तिरत उपपत्तेरिति सूत्रयितव्ये फलशब्दनिर्देशेन सूत्रकारैरत्र यावत्फलविषयको विचारः कृत इति गम्यते ॥ ३७ ॥

६११-२ अन्नाद इति। अन्नद इत्यर्थः (श्रु.) ॥ ३८ ॥ ३९ ॥

—१८ यज देवपूजायामिति। इदमुपपादितम् (श्रीभाष्य-पृ. ३१४ प. १३)।

६१२-२ वायव्यमिति। अस्यार्थः प्रागुक्तः (विवृति-पृ. १९१ प. ८)।

—४ कामिन इति। ननु वायुर्वै क्षेपिष्ठा देवता इत्यादिवाक्यमर्थवादरूपम्। अर्थवादवाक्यानां च न स्वार्थे प्रामाण्यं यथादित्यो यूप इत्यादौ। तथात्रापि वायुदेवतैवैश्वर्यं ददातीति स्वार्थे प्रामाण्याभावे कथं वायुदेवतायाः फलहेतुत्वेन व्यपदेश इति चेदियं शङ्कात्र न युक्ता। अत्रार्थवादस्य स्वार्थेपि प्रामाण्यसङ्गावात्। स्वार्थस्याप्यत्र विध्यपेक्षितत्वात्। यतो वायव्यं श्वेतमालभेत भूतिकाम इति विधौ श्रुते भूतिप्राप्त्यर्थं वायुदेवतामुद्दिश्य श्वेतपश्वालम्भनं कार्यमिति तदर्थे च ज्ञाते कथमस्मात्कर्मण ऐश्वर्यं प्राप्यत इत्याशङ्कायां तत्प्राप्तिप्रकार एवानेनार्थवादेनोपदिश्यते। तथा चोपदिष्टममुं प्रकारं परित्यज्य पुण्यद्वारा फलप्राप्तिरित्यपूर्वपरिकल्पनं न युक्तिसहमिति भावः। प्रागुपपादितं (श्रीभाष्य-पृ. ३१४) चैतत्। विध्यपेक्षितार्थप्रतिपादकवाक्यानां स्वार्थे प्रामाण्यं तु मीमांसकैरप्यभ्युपेतमेव। तच्च प्रागुक्तम् (विवृति-पृ. १०८)। न च नास्माभिरपूर्वमश्रुतं परिकल्प्यते। किं तु यजेतेत्यादौ लिङादिप्रत्ययस्य वाच्यमेव तदिति वाच्यम्। यतो लिङादिप्रत्यया धात्वर्थस्य कर्तृव्यापारसाध्यतामात्रं प्रतिपादयन्ति नापूर्वम्। तस्यालौकिकत्वात्। व्याकरणकृद्भिरप्येवमेवाङ्गीकृतमिति बोध्यम्।

—१४ इष्टापूर्तमिति। प्राग्व्याख्यातम् (विवृति-पृ. २४२ प. १)। तदेवेत्यस्य ब्रह्मेत्यर्थः ॥ ४० ॥ (८)

अथ तृतीयाध्यायस्य तृतीयः पादः प्रारभ्यते ।

६१४–५ **गुणोपसंहारेति** । गुणानामुपसंहार एकत्रोक्तानां गुणानामन्यत्र चिन्तनार्थं स्वीकारः । सर्वेषां गुणानां समुच्चय इति यावत् । स च यद्यनेकश्रुतिष्वेकैव विद्योच्यते तदा भवति । यदि चानेकश्रुतिषु तत्र तत्र भिन्नैव विद्योच्यते तदा न भवति । किं तु तदानीं विकल्प एव । विकल्पश्च व्यवस्थितो यत्र ये गुणा उक्तास्तेषां तत्रैव चिन्तनमिति ।

—८ **अविशेषेति** । एकत्र श्रुतौ यदुच्यते तदेवान्यत्र यद्युच्यते न तु तत्र कश्चन विशेषः प्रतिपाद्यते तर्हि तत्पुनः कथनं व्यर्थं सदुभयत्र विधेयभेदं कल्पयति । विधेयभेदे चार्थादेव विद्या भिन्ना भवति । अग्निहोत्रं जुहोति दध्ना जुहोतीत्यत्र जुहोतीत्यस्य पुनरुक्तावपि दध्नेति विशेषप्रतिपादनाद्विधेयैक्यमित्येकमेव कर्मेति बोध्यम् ।

—१०–११ **अत एवेति** । विद्याया भिन्नत्वादेवेत्यर्थः । **तेषामिति** । यैः शिरस्यङ्गारपात्रधारणलक्षणं शिरोव्रतं यथाशास्त्रं संपादितं तेषामाथर्वणिकानामेवैतां ब्रह्मविद्यां ब्रूयादित्यर्थः ।

—१६ **सर्वेति** । सर्वेषु वेदान्तेषु प्रतीयमानमुपासनमेकमेवेत्यर्थः ।

—१८ **एकं वेति** । कर्मकाण्डे शाखान्तराधिकरणे जैमिनेः सूत्रमेतत् । संयोगस्य रूपस्य चोदनाया आख्यायाश्चाविशेषादेकं कर्मेति तदर्थः ।

६१५–५ **वेद्यैकेति** । उपासनस्य स्वरूपमुपास्येनैव निरूप्यत इत्युपास्यमेव विद्याया रूपम् । तच्चोभयत्रापि वैश्वानररूपमेकमेव ॥ १ ॥ २ ॥

६१६–१ **स्वाध्यायस्येति** । तथात्व इति निमित्तसप्तमी । तथात्वं शिरोव्रतजन्यसंस्कारभाक्त्वम् । समाचारो नाम तन्नामकग्रन्थः । अधिकारोतिदेशः । स्वाध्यायस्य शिरोव्रतजन्यसंस्कारभाक्त्वसिद्ध्यर्थं हि तस्य शिरोव्रतस्य 'आथर्वणिकानामेव तद्व्रतम्' इत्याकारो नियमो न तु विद्याभेदात् । समाचारग्रन्थे शिरोव्रतमुपदिश्य ततो व्रतान्तरे शिरोव्रतस्यातिदेशः कृतः–इदमपि वेदव्रतेन व्याख्यातमिति । वेदव्रतेनेत्यस्य शिरोव्रतेनेत्यर्थः । तत्र शिरोव्रतशब्दस्य वेदव्रतशब्देन निर्देशाच्छिरोव्रतं वेदस्य स्वाध्यायस्याङ्गभूतं व्रतं न विद्याया इति सिध्यति । तथा च यद्यपि विद्यैकैव तथापि शिरोव्रतमाथर्वणिकानामेव न तु सर्वशाखिनाम् । शिरोव्रतस्य विद्याङ्गत्वाभावात् । तद्धि स्वाध्यायस्याङ्गभूतम् । शिरोव्रतेन हि स्वाध्यायस्य संस्कारो भवति न विद्यायाः । नन्वेवं सर्वशाखिनामेकैवेयं विद्या चेत् 'तेषामेवैतां ब्रह्मविद्यां वदेत' इत्यत्र तेषां शिरोव्रतिनामाथर्वणिकानामेवेति कथमुक्तमिति चेन्न । तत्र ब्रह्मविद्याशब्देन स्वाध्यायस्य ग्रहणात् ।

६१६-११ **सवहोमा इति**। सोयं होममारभ्य शतौदनपर्यन्तं ये सप्त सवा (होमाः) विधीयन्ते तेषामाथर्वणिकैकाग्निसंबन्धित्वादाथर्वणिकैः स्वसूत्र उदितो य एकोग्निरेकर्षिसंज्ञया प्रसिद्धस्तस्मिन्नग्नौ कार्या इति यथा नियम्यते तद्वदिति भावः ॥ ३ ॥

६१७-३ **उपासनमुच्यत इति**। न तु च्छान्दोग्य इव किं तत्र विद्यते इति प्रश्नस्तदुत्तरं चोच्यते। तस्य च्छान्दोग्य उक्तत्वेन तस्य चात्रोपसंहारेण सिद्धत्वात्। तथा चापेक्षितमप्यर्थमुपसंहाराभिप्रायेणाकथयन्ती तैत्तिरीयश्रुतिर्विद्यैक्यं दर्शयति। विद्यैक्यं विनोपसंहारस्यासंभवात् ॥ ४ ॥

—८ **समाने सत्युपासन इति**। एकसंज्ञके एकफले चोपासने समान इत्यर्थः (श्रु.) ॥ ५ ॥ (१)

—१९ **द्वया हेति**। कर्माङ्गभूतोद्गातरि मुख्यप्राणदृष्टिं विधातुमियमाख्यायिका। हशब्दो वृत्तार्थस्मरणे। प्रजापतेरपत्यानि प्राजापत्याः। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः (पा. सू. ४।१।८५) इति सूत्रेण ण्यप्रत्ययः। ते च देवाश्चासुराश्चेति द्वया द्विप्रकाराः। यज्ञे उद्गीथेन साधनभूतेनासुरानल्पयाम जयामेति ते देवा अन्योन्यमूचुः। उद्गात्रा गेयस्य पञ्चविधस्य साम्नो द्वितीयो भाग उद्गीथशब्देनोच्यते। परं त्वत्रोद्गीथशब्देनोद्गाता लक्षणया गृह्यते। उत्तरत्रोद्गातुरेवाध्यस्तप्राणभावस्योपास्यत्वप्रतीतेः। त्वं न उद्गाय, उद्गात्राऽस्येष्यन्तीत्युत्तरत्र बहुकृत्व उद्गातृशब्दस्याभ्यसिष्यमाणत्वाच्च। पूर्वपक्षी त्वत्र लक्षणां न मन्यते। हन्तेति हर्षे। स चात्रासुरविजयोपायदर्शनाज्जातः। ततः 'त्वमस्माकं यज्ञे उद्गातृकर्म कुरु' इति देवैर्वाक्प्रार्थिता। वयमुद्गीथे (उद्गातरि) त्वद्दृष्टिं कुर्मस्त्वं तत्र संनिहिता भूत्वा तेन सम्यक्कर्म कारयेति वागभिमानिनी देवता प्रार्थितेत्यभिप्रायः। ततस्तद्देवानां चेष्टितमसुरैर्ज्ञात्वा सा वागश्लीलानृतपैशुन्यादिभाषणरूपपापेन संयोजिता सती देवकार्यं कर्तुमसमर्था बभूव। एवमेव प्राणश्चक्षुः श्रोत्रं मनश्चासुरैः पापेन संयोजितम्। ततो देवा इममासन्यमास्ये भवं मुख्यं प्राणमूचुः पूर्ववत्प्रार्थितवन्तः। तथेति तेनोक्ते सत्युद्गीथे (उद्गातरि) मुख्यप्राणदृष्टिस्तैः कृता। तेन चासुराः पराभवं प्रापुः। य एवं वेद उद्गातारमध्यस्तप्राणभावमुपास्ते स आत्मना भवति समीचीनेन मनसा युक्तो भवति। यश्चास्य द्विषन् एनं प्रति द्वेषं कुर्वन्पाप्मा पातकं भातृव्यः शत्रुश्च स पराभवति पराभूतो भवतीत्यर्थः।

६१८-७ **देवासुरा हेति**। संयेतिरे परस्परं युद्धं कृतवन्तः। उद्गीथमुद्गीथावयवं प्रणवमाजह्रुरसुरपराभवोपायत्वेन स्वीचक्रुः। अनेन प्रणवेन। एनानसुरान्। दोषं पातकसंयोजनम्। उद्गीथमुपासांचक्रिरे उद्गीथावयवं प्रणवं मुख्यप्राणत्वेनोपासितवन्तः। आखन्यत इत्याखणं मृत्पिण्डः। छान्दसं णत्वं

क्लीबत्वं च। स यथाश्मानं ऋत्वा प्राप्य विध्वस्तो भवति तथैवंविदि एतद्विद्यानिष्टे यः पापं कर्तुमिच्छति स विध्वस्तो भवतीत्यर्थः।

६१८-१४ वेदनेति। अत्र बृहदारण्यके छान्दोग्ये च यद्यपि विद्यादित्येवं विधिप्रत्ययो न श्रूयते तथापि वेदनस्य य एवं वेदेत्याद्यर्थवादवाक्योक्तशत्रुपराभवरूपफलसाधनत्वकथनात्तादृशवेदनविषयो विधिरर्थात्कल्प्यत इत्युद्गीथविद्याबोधकत्वं श्रुत्योः सिद्धम्।

—१५ उद्गीथेति। अर्थवादो हि स्तावकत्वेन रुचिजनकः। असता गुणेन रुचिर्न जायत इति तत्रापि तात्पर्यमस्त्येवेति तदुपपत्तिपि (१।३।२५) इत्यत्र प्रतिपादितम् (श्रु.)।

६१९-८ एवंशब्दादिति। एवंशब्दो हि पूर्वोक्तपरामर्शकः। बृहदारण्यके चोद्गातरि प्राणदृष्टिः पूर्वमुक्ता। तथैवैवंशब्देन परामृश्यते। छान्दोग्ये चोद्गीथे प्राणदृष्टिः पूर्वमुक्ता। तथैव तत्रैवंशब्देन परामृश्यत इति भावः।

—२० प्राण उदगायदिति। अत्रोदगायदिति कर्तृप्रत्ययेन यद्यप्यत्रोद्गानकर्तैव प्राणत्वेनाध्यवसित इति प्रतीयते तथाप्युपक्रमाविरोधायोद्गानकर्मभूतोद्गीथ एवात्र कर्तृत्वेन निर्दिष्ट इति निश्चीयते। यथा देवदत्तादिना कर्त्रा कृतोप्योदनः प्रयत्नविशेषमन्तरेण सुकरो बभूव तदा तत्सौकर्यं द्योतयितुं पच्यत ओदन इति प्रयुज्यते। अत्र देवदत्तादेः कर्तृत्वेन नैव विवक्षा क्रियते किं त्वोदनस्यैव तद्वत्। तथा चात्रोभयत्र कर्मण्येव प्राणदृष्टिरिति विधैक्यं सिध्यतीत्याशयः॥६॥

६२०-९ प्रणवमिति। ओंकारमित्यर्थः। अक्षरस्येति। ओंकाररूपस्येत्यर्थः।

—१७ प्रकरणभेदेनेति। छान्दोग्ये ह्युद्गीथावयवप्रकरणं बृहदारण्यके च कृत्स्नोद्गीथप्रकरणमिति भेदः।

६२१-५ न चोद्गातरीति। उद्गातर्युपास्ये ह्युद्गात्रात्ययामेत्युपक्रमे वक्तव्यम्। तदनुक्त्वोद्गीथेनात्ययामेत्युक्तमिति तद्विरोध इति शङ्काशयः।

—७ अवश्यापेक्षितत्वादिति। उद्गीथं ह्युद्गातुः कर्म। तदन्यप्रकारेणोद्गातुरुपासनस्यासंभवात्तस्यावश्यापेक्षेति भावः।

—१० यथैकस्यामिति। छान्दोग्य एव विद्याद्वयमुच्यते। तत्रोभयत्राप्युद्गीथावयवे प्रणवे परमात्मदृष्टिर्विधीयते। परं त्वेकत्र हिरण्मयत्वादिगुणयुक्तस्य परमात्मनो दृष्टिः। अन्यत्र परोवरीयस्त्वादिगुणयुक्तस्येति शाखाया उपास्यस्य दृष्टिविशेषणीभूतपरमात्मनश्चोभयत्रैक्येपि धर्ममात्रभेदाद्विद्याभेदः कृतः किमुतोपास्यभेदे सतीति बोध्यम्। वरीयसां परः परोवरीयान्। तस्य भावः परोवरीयस्त्वम्। परशब्दः सकारान्त उत्कृष्टवाची॥ ७॥

६२१-१३ संज्ञात इति । तद्विद्यैक्यम् । तुशब्द एवार्थे ।

—१५ कुण्डेति । कुण्डपायिनामयनाग्निहोत्रं मासमात्रहोमसमाप्तिकम् (श्रु.) ॥ ८ ॥

—२२ पटो दग्ध इति । पटैकदेशे दग्धेपि पटो दग्ध इति प्रयोगो भवति । तत्र पटशब्दस्य पटावयववाचित्वं दृश्यते ॥ ९ ॥ (२)

६२२-७ यो ह वा इति । ज्येष्ठत्वश्रेष्ठत्वगुणकं प्राणं यो वेद स तत्कनुन्यायेन स्वयमपि ज्येष्ठश्च श्रेष्ठश्च भवति । यथोपासते तथा भवतीति तत्कनुन्यायस्वरूपम् । ज्येष्ठत्वं वृद्धत्वम् । वृद्धशब्दादिष्ठन्प्रत्यये वृद्धस्य च (पा. सू. ५।३।६२) इति सूत्रेण ज्यादेशः । श्रेष्ठत्वं प्रशस्ततमत्वम् । प्रशस्यशब्दादिष्ठनि प्रशस्यस्य श्रः (पा. सू. ५।३।६०) इति सूत्रेण श्रादेशः । एवं फलदर्शनेन पुरुषमभिमुखीकृत्याह-प्राणो वावेति । वावशब्दोवधारणार्थः । गर्भस्थपुरुषे पूर्वं प्राणप्रवृत्तिः पश्चादिन्द्रियाणामतः प्राणस्येन्द्रियापेक्षया ज्येष्ठत्वम् । इन्द्रियव्यापाराणां सर्वदैतदधीनत्वाच्छ्रेष्ठत्वं चेति (वि. दी.) । ततो वाचो वसिष्ठत्वं चक्षुषः प्रतिष्ठात्वं श्रोत्रस्य संपत्त्वं मनस आयतनत्वं चोक्तम् । अतिशयेन वसुमान् वसिष्ठः । वाग्मी हि लोकेऽतिशयेन वसुमान्भवति । अतश्च वसुमत्तासंपादकसद्व्यवहारजनकत्वं वाचो वसिष्ठत्वम् । चक्षुषा हि समे विषमे च प्रतितिष्ठतीति प्रतिष्ठासंपादकसमविषमभूतलप्रदर्शकत्वं चक्षुषः प्रतिष्ठात्वम् । इमे सर्वे वेदाः श्रोत्रेभिसंपद्यन्त इति संपद्धेतुभूतवेदशास्त्रतदर्थश्रवणादिसंपादकत्वं श्रोत्रस्य संपत्त्वम् । स्वक्चन्दनादिविषयकज्ञानस्वरूपभोगायतनत्वं मनस आयतनत्वम् । ततः सर्वेन्द्रियाणां स्थितिर्व्यापारश्च प्राणाधीन इति तदपेक्षया प्राण एव श्रेष्ठ इत्युक्तम् । पश्चाद्वयं यत्कार्यकरणसमर्थाः स्मस्तस्य त्वदधीनत्वात्तवैतत्कार्यकरणसामर्थ्यमिति वागादिभिः प्राण एव स्वीया गुणाः समर्पिताः ।

—१९ विद्या भिद्यत इति । छान्दोग्यवाजसनेयकयोः सर्वस्यैकरूपत्वादेकैव प्राणविद्या । किं तु तस्याः सकाशात्कौषीतक्युक्ता प्राणविद्या भिन्नोत नेति संशय इति भावः ।

६२३-२ तद्विधुर इति । वसिष्ठत्वादिगुणरहित इत्यर्थः ।

—९ व्यूदिर इति । अयं छान्दोग्यपाठः । व्यूदिरे विवादं चक्रुः । विवदमाना इति बृहदारण्यके पाठः ।

—१२ विशरणमिति । स्वस्वस्थानाच्चालनमित्यर्थः ।

६२४-४ तदेव हीति । तथा च कौषीतकिश्रुतौ यद्यपि वागादीनां ये वसिष्ठत्वादयो गुणास्ते प्राणस्यैवेति शब्दतो नोक्तं तथाप्यर्थतस्तदुक्तमेवेति विद्यैक्यं सिद्धम् ॥ १० ॥ (३)

६२४–१३ आनन्दादय इति। भावप्रधानो निर्देशः। आनन्दत्वादय इत्यर्थः।

—१४ स्वरूपगुणानामिति। स्वरूपप्रतीत्यनुबन्धिगुणानामित्यर्थः (श्रु.)।

—१७ वर्तत इति। अभेदादिति पदं पूर्वसूत्रादत्र सूत्रे संबध्यत इत्यर्थः। यद्यपि पूर्वसूत्रे 'सर्वाभेदात्' इति समस्तं पदं तथापि तदेकदेशभूतमभेदादित्येवात्रानुवर्तते। अपेक्षितांशस्यैव परामर्शात्।

— १८ गुण्यपृथग्भावादिति। गुणविशिष्टस्यैव ब्रह्मत्वादित्याशयः॥११॥

६२५–२ तस्य प्रियमिति। इष्टवस्तुदर्शनजन्यं सुखं प्रियम्। तदेवानन्दमयात्मनः शिरस्त्वेन कल्पितम्। आदिशब्देन मोदो दक्षिणः पक्ष इति श्रुतेर्ग्रहणम्।

—६ अब्रह्मगुणत्वादिति। प्रियशिरस्त्वादयो गुणा हि पुरुषत्वेन कल्पिते ब्रह्मणि कल्पिताः। न तु वस्तुभूताः। ब्रह्मणो निरवयवत्वात्।

—८ उपचयापचयौ। वृद्धिक्षयरूपौ विकारौ। विकारत्वे च विनाशावश्यंभावेन सत्यं ज्ञानमिति श्रुतिविरोधः। तत्रानन्तपदेनाविनाशित्वस्य बोधनात्। आदिशब्दादस्थूलमनण्वित्यादिश्रुतिसंग्रहः॥ १२॥

—१० ब्रह्मसंबन्धिनामेवेति। वस्तुतो ब्रह्मसंबन्धिनामेव न तु प्रियशिरस्त्वादिवत्कल्पितानामित्यर्थः।

—१४ इतरे त्विति। इतरे काल्पनिकादितरे वास्तविका गुणा आनन्दादयस्त्वर्थसामान्यात्सर्वासु विद्यास्वनुवर्तन्ते। अर्थसामान्यादित्युक्त्या येषां गुणानां कारुण्यादीनामर्थसामान्यं नास्ति ते वास्तविका अपि न सर्वत्रानुवर्तन्ते। अर्थशब्देन ब्रह्मस्वरूपमुच्यते। तेन सामान्यं सादृश्यमानन्दादीनां गुणानामेव न तु कारुण्यादीनाम्। यतो वस्तुप्रतीतिकाले यथा वस्तु प्रतीयते तथा तत्समकालमेवानन्दादयः प्रतीयन्ते। तेषामर्थस्वरूपनिरूपकधर्मत्वात्। यथा लोके कस्मिंश्चित्पुरुषे दृष्टे तदैव तद्गता ह्रस्वत्वोन्नतत्वादयः प्रतीयन्ते न तु दयादाक्षिण्यादयः। कीदृशो देवदत्त इति पृष्ट इयानुन्नत इत्युन्नतत्वादयो ह्यर्थस्वरूपं निरूपयन्ति।

—१७ ते च गुणा इति। एतेनानन्त्यादुपसंहाराशक्तिश्चेति प्रागुक्तं निरस्तम्। अर्थस्वरूपनिरूपकाणां गुणानामानन्त्याभावात्॥ १३॥

६२६–१८ वेदनसिद्धय इति। उपासनोपयोगिशास्त्रजन्यज्ञानसिद्ध्यर्थमित्यर्थः। परोक्षार्थस्य बुद्धावारोपणं शिरःपक्षादिरूपणादेव हि भवति (श्रु.)।

६२७–४ एकदेशैरिति। इष्टवस्तुदर्शनजन्यं सुखं प्रियम्। तल्लाभजन्यं सुखं मोदः। लब्धस्योपभोगजन्यं सुखं प्रमोदः। अतिशयितसुखत्वेन प्रसिद्धानामप्येतेषां ब्रह्मसुखैकदेशत्वेन ब्रह्मणोऽपरिच्छिन्नसुखत्वमुक्तं भवति (श्रु.)।

६२७-५ **उपलक्षणत्वादिति** । प्रियशिरस्त्वादयो हि न ब्रह्मणो वस्तुभूता गुणाः । किं तु ब्रह्मणः सुखेन प्रतिपत्तये तज्ज्ञानसाधनत्वेन कल्पिता इति भावः ॥ १४ ॥

—९ **आत्मन इति** । निष्कलं निष्क्रियमित्यादिश्रुतिषु निरवयवत्वेन प्रसिद्धस्य परमात्मन इत्यर्थः ॥ १५ ॥

—१५ **आत्मगृहीतिरिति** । गृहीतिर्ग्रहणम् । इतरस्मिन्निवेतरवत् । सप्तम्यन्ताद्वतिः ।

—२१ **उत्तराद्वाक्यादिति** । बहु स्यामित्येवंरूपा कामना हि परमात्मन एव संभवतीति भावः ॥ १६ ॥

—२२ **अन्वयादितीति** । अन्वयो योगः ।

६२८-८ **परमात्मबुद्ध्येति** । यद्यपि वस्तुतोऽनात्मान एवान्नमयादयस्तथापि तेषु परमात्मबुद्ध्यैवात्मशब्दप्रयोगान्नायमनात्मस्वात्मशब्दप्रयोग आनन्दमयवाक्यस्यात्मशब्दार्थनिश्चायक इति भावः ॥ १७ ॥ (४)

—१३ **स होवाचेति** । वासो वस्त्रम् । आपो जलम् । किं मे वस्त्रं भविष्यतीति स प्राण इन्द्रियान्प्रत्युवाच । इन्द्रियाणि च जलमेव वस्त्रमित्यूचुः । जलमेव वस्त्रत्वेन कल्पनीयमित्यर्थः । तस्माज्जलस्य वस्त्रत्वादेवैतदिदानीमप्यशिष्यन्तो भोक्ष्यमाणाः पुरस्ताद्भोजनात्प्रागुपरिष्टाद्भोजनानन्तरं चाचमनीयेन जलेन प्राणं परिदधति । जलरूपवस्त्रेण परिधानात्प्राणो नग्नो न भवति । प्राणोपासकश्चैतादृशानग्नत्वचिन्तनेन वासो वस्त्रं लम्भुकः प्राप्ता भवत्यत एवानग्नश्च भवतीत्यर्थः ।

—१८ **तद्विद्वांस इति** । श्रोत्रिया वेदाध्ययनकर्तारः । अनं प्राणम् । ॥ १८ ॥ (५)

६३०-९ **सत्यसंकल्पत्वगुणाभेदादिति** । वशित्वं हि सत्यसंकल्पत्वस्य वितत्तिरेवेति तयोरभेदो बोध्यः ॥ १९ ॥ (६)

—१३ **तद्यत्सत्यमिति** । व्याहृतिशरीरकब्रह्मविद्येयम् । यत्प्रसिद्धं सत्यमसौ स आदित्यः । स क इत्यत्राह—य एष इति । य एषोन्तरादित्ये पुरुषो हिरण्मयः पुरुषो दृश्यते य एषोन्तरक्षिणि पुरुषो दृश्यत इति श्रुतिप्रसिद्ध इत्यर्थः । तत आदित्यमण्डलेक्षिणि च वर्तमानस्य सत्यपुरुषस्य भूरिति व्याहृतिः शिरः भुव इति बाहू सुवरिति पादौ । एतादृशशिरोबाहुपादविशिष्टत्वेन ध्यानं कर्तव्यम् । तत आदित्यमण्डलान्तर्वर्तिनः 'अहः' इत्युपनिषत् । अक्ष्यन्तर्वर्तिनश्च 'अहम्' इत्युपनिषदित्युक्तम् । उपनिषच्छब्दो रहस्यनामवाची । तस्य तस्य तत्तन्नामविशिष्टत्वेनानुसंधानं कर्तव्यमिति भावः ।

६३०–१९ उभयत्रोभे इति। आदित्यमण्डलस्थस्यापि नामद्वयविशिष्टत्वेनानुसंधानमक्षिस्थस्यापि नामद्वयविशिष्टत्वेनानुसंधानमित्यर्थः ॥ २० ॥ २१ ॥

६३१–१४ तस्यैतस्येति । यदमुष्यादित्यमण्डलस्थस्य रूपं तदेव तस्यैतस्याक्ष्यन्तर्गतस्य रूपं बोध्यमिति श्रुतावतिदेशः कृतः । विधक्ये हि गुणोपसंहारेणैव रूपप्राप्तेः सिद्धत्वादतिदेशवैयर्थ्यं स्यादतो विद्याभेदोक्तीकार्य इति भावः ॥ २२ ॥ (७)

—१८ संभृतीति । संभृतिर्धारणम् । द्युव्याप्तिः स्वर्गादिषु व्याप्तिः । समाहारद्वंद्वः । संभृत्यादिगुणजातमप्यत एव स्थानविशेषसंबन्धनियमान्नियतं सन्न सर्वत्रोपसंहार्यमिति सूत्रार्थः ।

६३२–१ ब्रह्म ज्येष्ठेति । ब्रह्म ब्रह्मणा । तृतीयायाश्छान्दसो लुक् । ज्येष्ठा ज्येष्ठानि । वीर्या वीर्याणि । उभयत्रापि प्रथमाबहुवचनस्य च्छान्दसो लुक् । नलोपः। वीर्याणि पराक्रमविशेषाः । संभृतानि धृतानि । ब्रह्मणा ज्येष्ठानि वीर्याणि धृतानि तद्वीर्यविहतिर्नास्ति । तच्च ब्रह्माग्र इन्द्रादिजन्मनः प्राक् दिवं स्वर्गमाततान व्याप्तवत् । ब्रह्म हि सर्वदा सर्वलोकव्याप्तम् । तादृशं सर्वेषां भूतानां प्रथममाविर्भूतम् । कालापरिच्छिन्नमिति यावत् । तादृशेन ब्रह्मणा स्पर्धितुं कः क्षमते न कोपीत्यर्थः ।

—१५ अशक्योपसंहारा इति । चिन्तयितुमशक्या इत्यर्थः । पृथिव्यपेक्षया ज्यायस्त्वं भूताकाशवन्महत्त्वं चेत्येवमादीनां गुणानामल्पस्थानविषयासु शाण्डिल्यादिविद्यासु चिन्तनं न संभवति । स्थानभेदेन विरोधात् । तथा च श्रुतौ तासु विद्यासु तेषां गुणानां कथनं न तद्गुणविशिष्टत्वेन ब्रह्मचिन्तनार्थं किं तूपास्यस्य ब्रह्मणः केवलं माहात्म्यप्रदर्शनार्थमेवेति बोध्यम् ॥ २३ ॥ (८)

—१८ पुरुषविद्यायामपीति । पुरुषविद्यायामप्युभयत्र रूपभेदाद्विद्याभेदः । इतरे केचन गुणा यथैकस्यां शाखायामाम्नातास्तेन प्रकारेण तेषां शाखान्तरेऽनाम्नानात् । प्रकारान्तरेण कथनं हि विद्याभेदं साधयतीति सूत्रार्थः ।

—१९ तस्यैवमिति । ज्ञानिनो यज्ञस्यात्मैव यजमानः । श्रद्धैव यजमानपत्नी । शरीरमेवेध्मम् । उर एव वेदिः । लोमान्येव बर्हिः । अत्र पुरुषयज्ञे आत्मादय एव यजमानादित्वेन कल्पिताः ।

—२१ पुरुष इति । दीर्घायुष्ट्वफलिका पुरुषविद्येयम् । पुरुष एव यज्ञः । तस्य षोडशोत्तरशतवर्षपरिमिते पुरुषायुषे यान्याद्यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनम् । ततश्चतुश्चत्वारिंशद्वर्षाणि माध्यंदिनं सवनम् । ततोष्टाचत्वारिंशद्वर्षाणि तृतीयसवनम् । अस्या विद्यायाः फलं षोडशं वर्षशतं जीवतीति । षोडश वर्षाण्यधिकान्यस्मिन् शते तच्छोडशम् । तदस्मिन्नधिकम् (पा. सू. ५।२।४५)

इति सूत्रेण डप्रत्ययः। षोडशाधिकं वर्षशतं जीवतीत्यर्थः। स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षा इत्यस्य यज्ञस्य दीक्षोक्ता। अशनाया-(अशिशिषा-) पिपासारत्यभावानां दुःखात्मकत्वेन दीक्षात्वकल्पनम्।

६३२-२५ **फलसंयोगाश्रवणादिति**। यद्यपि पुरुषविद्याया उपरिष्टाद्ब्रह्मणो महिमानमाप्नोतीति फलं श्रूयते तथापि केवलपुरुषविद्याया ब्रह्मविद्यात्वाभावाद्ब्रह्मप्राप्तिरूपं फलमयोग्यत्वात्पुरुषविद्यासंबन्धमनवाप्य पूर्वानुवाकोक्तब्रह्मविद्ययान्वितं भवतीत्यभिप्रायेण फलसंयोगाश्रवणादित्युक्तम् (श्रु.)।

६३३-१० **अन्यथेति**। तैत्तिरीयकेन्यथा कृतमित्यर्थः। छान्दोग्ये ह्यात्मनो यजमानत्वं श्रद्धायाः पत्नीत्वं शरीरस्येध्मत्वमित्यादि न कृतं तैत्तिरीयके कृतमिति भावः।

—११ **ब्रह्मणे त्वेति**। महसे ब्रह्मणे ज्योतिःस्वरूपब्रह्मतत्त्वाभिव्यक्त्यर्थं त्वा त्वां सर्वान्तर्यामिणं परमात्मानं भजामीति शेषः। एवं परमात्मानं स्तुत्वा तत ओमित्युच्चारयन्नात्मानं युञ्जीतात्मानुसंधानं कुर्यादित्यर्थः ॥२४॥ (९)

६३४-२ **शुक्रमिति**। अभिचारकर्मणि देवताप्रार्थनार्थो मन्त्रोयम्। प्रविध्येति विदारयेत्यर्थकं क्रियापदं लोप्तमध्यमपुरुषैकवचनान्तम्। हे देव मच्छत्रोः शुक्रं तेजिष्ठमङ्गं विदारय हृदयं च विदारयेत्यर्थः। हे सवितर्देव यज्ञं प्रसुवानुजानीहीति देव सवितरित्यस्यार्थः। सूर्यवरुणादयः शं सुखं कुर्वन्त्विति शं नो मित्र इत्यस्यार्थः।

—७ **महाव्रतब्राह्मणमिति**। महाव्रतरूपकर्मप्रतिपादकं ब्राह्मणमित्यर्थः। एवं प्रवर्ग्यब्राह्मणमित्यस्य प्रवर्ग्यरूपकर्मप्रतिपादकं ब्राह्मणमित्यर्थः।

—१६ **श्रुतिलिङ्गेति**। एतत्स्वरूपं प्रागुक्तम् (विवृति-पृ. १८ प. २०)। तत्र श्रुत्यादीनां षण्णां मध्ये कयोरपि द्वयोरेकत्र संनिपाते पूर्वं प्रबलमिति पूर्वमीमांसायामुक्तत्वात्प्रकरणापेक्षया श्रुत्यादीनां बलवत्त्वाच्छुक्रमित्यादीनां मन्त्राणां कर्मसु विनियोगोवगम्यते। तथा च न तदर्थमेतदधिकरणारम्भस्तथापि शं नो मित्र इत्यादिमन्त्राणां विद्याङ्गत्वाभावसिद्ध्यर्थमधिकरणारम्भः। सूत्रार्थस्त्वित्थम्-यथा वेधाद्यर्थभेदाच्छुक्रं प्रविध्येत्यादिमन्त्राणां न विद्याङ्गत्वं तथा सत्यं वदिष्यामि तेजस्वि नावधीतमस्त्वित्यध्ययनसंबन्धरूपार्थभेदान्न शं नो मित्र इत्यादिमन्त्राणां विद्याङ्गत्वमिति। तथा चात्र शं नो मित्र इत्यादिमन्त्रा एवैतदधिकरणविषयीभूता इति बोध्यम्। एतेषां मन्त्राणामुपनिषद्भिः सहपाठस्तूपनिषदामिवैतेषां मन्त्राणां विद्याङ्गत्वमित्यभिप्रायेण न कृतः। किं तूपनिषदामिवैतेषां मन्त्राणां दिवा कीर्त्यत्वमरण्येनुवाक्यत्वं चेत्येतदभिप्रायेण कृतः। दिवा कीर्त्यत्वं दिवैव कीर्तनीयत्वं न रात्रौ। अरण्येनुवाक्यत्वमरण्य एवानुवचनयोग्यत्वं न गृह इति बोध्यम्॥ २५॥ (१०)

६३५-१८ विधूय पापमिति । अत्र पापशब्दः पुण्यस्याप्युपलक्षकः । अस्यां छन्दोगश्रुतौ तथा विद्वानित्याथर्वणिकश्रुतौ च पुण्यपापयोः केवलं ज्ञानिकर्तृकत्यागमात्रमुच्यते न तु तयोरन्येनोपादानमुच्यते । तस्य पुत्रा इति शाट्यायनिश्रुतौ च केवलमुपादानमुच्यते न तु त्यागः । तत्सुकृतेति कौषीतकिश्रुतौ तूभयमुक्तम् ।

६३६-८ सर्वविद्याङ्गमास्येयमिति । सर्वब्रह्मविद्याम्वपेक्षणीयमित्यर्थः ।

—९ प्रहीणविषयत्वादिति । प्रहीणं त्यक्तम् । उपायनमन्यत्र प्रवेशः । त्यक्तस्य कर्मणोन्यत्र क्वचित्प्रवेश आवश्यक एवेत्युपायनमप्यवश्यं भावीति भावः ।

—१० तच्चिन्तनं चेति । यथा चिन्तनं तथा फलप्राप्तिरिति प्रहाणोपायनचिन्तनं विधीयत इति बोध्यम् ।

—१३ विकल्पेरन्निति । यस्यां शाखायां यदुक्तं तत्र तावन्मात्रस्यैव चिन्तनमिति व्यवस्थितौ विकल्पः । उपसंहारः समुच्चयः ।

६३७-२ प्रदर्शनार्थमिति । उपायनस्यापि प्रदर्शनार्थमित्यर्थः ।

—३ उपायनशब्दशेषत्वादिति । उपायनशब्दशब्दस्य शेषत्वशब्देन षष्ठीतत्पुरुषः । न तु षष्ठीतत्पुरुषात्त्वप्रत्ययः । तथा सति हानेरुपायनशेषत्वमित्यर्थः स्यात् । स च न योग्यः । उपायनस्य मुख्यत्वाभावात् । ज्ञानिनो हि मुख्यत्वेन पुण्यपापहानेरेवापेक्षितत्वात् । एवं च पुण्यपापोपायनस्य हान्यपेक्षत्वेन शाखान्तरस्थस्याप्युपायनवाक्यस्य शाखान्तरस्थहानिवाक्यशेषत्वेन वाक्यद्वयेनैकार्थविधानात्समुच्चय इति बोध्यम् ।

—८ कुशा वानस्पत्या इति । एतत्सामान्यवाक्यम् । अत्र कुशानां वनस्पतिविशेषसंबन्धित्वस्याप्रतीतेः । कुशा औदुम्बर्य इति विशेषवाक्यं तु सामान्यवाक्यस्य शेषभूतम् । कुशाः शङ्कवः । कुशाशब्दः स्त्रीलिङ्गः ।

—१२ आविशेषेणेति । देवच्छन्दसः पूर्वत्वं वासुरच्छन्दसः पूर्वत्वमिति विशेषस्य देवासुराणां छन्दोभिरिति सामान्यवाक्यादप्रतीतेः ।

१४ हिरण्येनेति । षोडशिनः पात्रविशेषस्य स्तोत्रं गानविशेषविशिष्टोच्चारणमुपाकरोति प्रस्तौतीत्यर्थः । एतत्सामान्यवाक्यम् । कालविशेषाकथनात् । समयाविप्रकर्षेति । ईषदुदित इत्यर्थः ।

६३८-१ अपि त्विति । अष्टदोषग्रस्तत्वाद्विकल्पो न न्याय्यः । तथा च नानुयाजेषु ये यजामहं करोतीति वाक्यं न स्वतन्त्रतया निषेधकम् । किं तु वाक्यशेषत्वाङ्गीकारेण विधीनामेकदेशः स्यात् । तत्रानूयाजेनैव नञ्संबध्यते । तथा च पर्युदासन्यायेनानूयाजव्यतिरिक्तेषु यागेषु ये यजामहः कर्तव्य इति फलितमित्यनूयाजेषु न विधिर्नापि प्रतिषेध इति विकल्पाभावः सिद्ध इति तत्सूत्रतात्पर्यम् ।

६३८-५ अविशेषपुनः श्रवणत्वेनेति । यद्यपि कौपीतकिव्यतिरिक्तश्रुतौ हानोपादानयोरन्यतरदेकमेव निर्दिष्टं कौपीतकिश्रुतौ तूभयमित्यस्त्येव विशेषस्तथाप्यन्यतरोच्चारणेपि तदितरस्योक्तन्यायेनावश्यप्राप्तत्वादार्थमुभयोच्चारणमस्त्येवेत्यविशेषो बोध्यः ॥ २६ ॥ (११)

—१५ ताण्डिनः । छन्दोगाः ।

६३९-७ तरितव्यभोगाभावादिति । प्राप्तव्यभोगाभावादित्यर्थः । तृधातुः प्राप्तिवाचकः ॥ २७ ॥

—१६-७ अर्थस्वाभाव्यादिति । पश्चात्प्राप्तव्यभोगाभावेन सुकृतदुष्कृतहानरूपार्थस्य स्वभावतो देहवियोगकाल एव जायमानत्वादित्यर्थः । श्रुतेरिति । देहवियोगकाले सुकृतदुष्कृतहानिर्भवतीत्येतदर्थप्रतिपादिकायाः कौपीतकिव्यतिरिक्तश्रुतेरित्यर्थः । पदानामिति । कौपीतकिश्रुतिस्थावान्तरवाक्यानामित्यर्थः । अवान्तरवाक्यानि हि महावाक्यापेक्षया पदस्थानीयान्येवेति पदानामित्युक्तिरिति बोध्यम् ॥ २८ ॥ २९ ॥

६४०-१० उपपन्न इति । तच्छब्देन कर्मलभ्यः प्राकृतदेहः परामृश्यते । तल्लक्षणस्तज्जातीयो योर्थोऽकर्मलभ्योऽप्राकृतदेहस्तदुपलब्धेर्देहवियोगकाले सर्वकर्मक्षय उपपन्न इत्यर्थः ।

—१७ उपलभ्यत इति । न हि देहसंबन्धं विना जक्षन्क्रीडन्नित्याद्युपपद्यत इत्याशयः ।

—२० विद्या हीति । यथा पापं स्वफलभूतदुःखभोगाय नरकप्राप्तिहेतुभूतं वपुर्दिशति यथा वा पुण्यं स्वफलभूतसुखोपभोगाय स्वर्गप्राप्तिहेतुभूतं वपुर्दिशति तथा ब्रह्मविद्यापि स्वफलभूतब्रह्मप्राप्तिहेतुभूतं सूक्ष्मशरीरं स्थापयतीत्यर्थः (श्रु.)।

६४१-२ यथा लोक इति । येन हेतुना यत्कार्यमुत्पन्नं तेनोत्पन्नेन कार्येण तस्मिन्हेतौ पूर्णत्वेन साधितेपि तस्य कार्यस्य कार्यान्तरार्थं स्थितिर्भवतीत्यत्र दृष्टान्तोयम् ॥ ३० ॥ ३१ ॥ (१२)

६४२-८-१२ उपकोसलादिष्विति । आदिशब्देन पर्यङ्कविद्यापञ्चाग्निविद्यादहरविद्याग्रहणम् । सर्वेषामिति । मधुविद्याशाण्डिल्यविद्यापोडशकलविद्यावैश्वानरविद्यावतामपीत्यर्थः । ये चेति । छान्दोग्ये पञ्चाग्निविद्योपासकानामर्चिरादिगतिमुक्त्वान्येषामपि ब्रह्मविद्योपासकानामर्चिरादिगतिर्भवतीति ये चेति वाक्ये प्रतिपाद्यते । अत्र श्रद्धाशब्दो द्वितीयान्तः । द्वितीयायाश्छान्दसो लुक् । पुरस्कृत्येत्यध्याहारः । तपःशब्दो ब्रह्मवाची । ये चेमेरण्ये स्थित्वा श्रद्धां पुरस्कृत्य ब्रह्मोपासते तेषामप्यर्चिरादिगतिर्भवतीत्यर्थः । श्रद्धां सत्यमुपासत इति श्रुतावपि सत्यशब्दो ब्रह्मवाचीति सिद्धान्तः । पूर्वपक्षिणा तु तपःसत्यशब्दयोर्ब्रह्मवाचकत्वमजानानेन 'प्रमाणाभावाच्च' इत्युक्तम् ।

६४२–१५ **गमने हि सतीति**। सूत्रेऽनियमः सर्वेषामित्युत्तरं हिशब्दाध्याहार इति भावः।

६४३–१२ **एवंजातीयका इति**। तयोर्ध्वमायन्नमृतत्वमेति सूर्यद्वारेण ते विरजाः प्रयान्तीत्यादयः श्रुतयः 'क्रमात्ते संभवन्त्यर्चिरहः शुक्लं तथोत्तरम्। अयनं देवलोकं च सवितारं सवैद्युतम्॥ इत्यादयः स्मृतयश्चात्र विवक्षिताः॥ ३२॥ (१३)

६४४–३ **प्रपञ्चप्रत्यनीकतास्वरूपा इति**। प्रपञ्चप्रत्यनीकं ब्रह्म। तस्य प्रपञ्चप्रत्यनीकत्वरूपस्वभावेन निरूपका अस्थूलत्वादिधर्मा इत्यर्थः (श्रु.)।

—१३ **सामान्यतद्भावाभ्यामिति**। सामान्यं साधारण्यम्। तेषां भावस्तद्भावः। तेषामस्थूलत्वादीनां भावो ब्रह्मस्वरूपप्रतीतावन्तर्भावः।

—१६ **प्रत्यगात्मन्यपीति**। जीवात्मन्यपीत्यर्थः।

—१८ **असाधारणमिति**। जीवव्यावृत्तमित्यर्थः।

—२१ **अस्थूलत्वादिविशेषितेति**। न चास्थूलत्वादीनां धर्माणामभावरूपत्वान्न धर्मिस्वरूपज्ञानोपायत्वमिति वाच्यम्। भावान्तरस्यैवाभावशब्दार्थत्वात्। निरूपितं चैतद्यतीन्द्रमतदीपिकाप्रकाशे–(पृ०३६)ऽस्माभिः। तथा चास्थूलत्वं स्थूलत्वादिविरोधिशब्दाभिलप्यः सूक्ष्म आकार इति न दोषः। अत एव श्रुत्यन्तरेऽस्थूलत्वधर्मः सुसूक्ष्मशब्देनोक्तः।

६४५–३ **जामदग्न्येति**। जमदग्निना मुहुरनुष्ठितं चतूरात्रं नाम कर्म। तत्र पुरोडाशद्रव्यकोपसदिष्टयङ्गभूतो यः सामवेदपठितो मन्त्रस्तस्य सामवेदपठितत्वेनोच्चैर्गानं प्राप्तम्। उच्चैः साम्नेति वचनात्। परं तु यजुर्वेदोक्तोपसत्कर्मशेषत्वेन तदनुवर्तित्वादुपांशु प्रयुज्यते। उपांशु यजुषेति यजुष उपांशुत्वविधानात् (श्रु.)।

—६ **गुणमुख्येति**। व्यतिक्रमो विरोधः। याजुर्वेदिकमाधानम्। तस्य सामवेदे वारवन्तीयं गायतीत्यङ्गविधिः। तत्र सामविधिनिबन्धनस्योच्चैर्ङ्गस्यानुष्ठानमिति प्राप्ते साङ्गस्याधानस्य यजुर्वेदविहितत्वात्प्रधानानुसारेणोपांशुत्वमेव बलवदिति सिद्धान्तः॥ ३३॥ ३४॥ (१४)

६४६–१ **अन्तरेति**। भूतानां पञ्चमहाभूतानां ग्रामः संघातः पाञ्चभौतिको देहस्तद्व्यन्यः स्वात्मा स्वमेवात्मा जीवात्मा तस्य तद्विषयक एव अन्तरा 'य आत्मा सर्वान्तर' इत्युपस्तप्रश्नः। अन्यथा प्रतिवचनभेदानुपपत्तिरिति चेन्नैवम्। किं तूपस्तप्रश्नोपि परमात्मविषयक एव। यथैकस्यामेव सद्विद्यायां सदुपदेशे प्रक्रान्ते प्रश्नः प्रतिवचनं चासकृदृश्यते तद्वदिति सूत्रार्थः।

—३ **यत्साक्षादिति**। अपरोक्षादित्यस्यापरोक्षमित्यर्थः। सुपां सुलुक् (पा. सू. ७।१।३९।) इति पाणिनिसूत्रेण प्रथमाया आदादेशः। अपरोक्ष-

त्वं नाम सर्वदेशकालसंनिहितत्वम् । देशकालसंनिकर्षे ह्यापरोक्ष्यदर्शनात् । साक्षादव्यवधानेनागौणं मुख्यमिति यावत् । यदपरोक्षं मुख्यं ब्रह्म सर्वान्तर आत्मा च तादृशं वस्तु मे व्याचक्ष्व विविच्याचक्ष्व प्रदर्शयेत्युपस्तस्य याज्ञवल्क्यं प्रति प्रश्नः । यः प्राणेन साधनभूतेन प्राणिति । प्राणापानादिव्यापारकर्ता यः स परमात्मेत्युत्तरम् । अत्र प्राणादीनां करणतया निर्देशादात्मनस्तद्व्यतिरेकः सिद्धः । परं त्वेतादृशः किं जीव एव परमात्मोत तदन्य इत्यनिश्चयादतुष्टेनोपस्तेन पुनः पृष्टो याज्ञवल्क्य आह—न दृष्टेरिति । द्रष्टारं श्रोतारं मन्तारं विज्ञातारमित्यत्र धात्वर्थः कृतिमात्रम् । दृष्टेः कर्तारमित्यर्थः । द्रष्टारमिति यावत् । यथा पाकं पचतीत्यत्र पचतीत्यस्य करोतीत्यर्थस्तद्वत् । द्रष्टारं जीवं परमात्मत्वेन न पश्येः किं तु द्रष्टुः श्रोतुर्मन्तुर्विज्ञातुश्च जीवादन्य एव त आत्मा सर्वान्तरः । अतः परमात्मनः सकाशादन्यद्व्यतिरिक्तं जीवजातमार्तं दुःखीति सिद्धान्ते श्रुत्यर्थः । पूर्वपक्षी त्वियं श्रुतिर्जीवात्मपरेति मन्यते । जाग्रदवस्थायां प्राणनादिकर्तृत्वस्य जीवात्मनि प्रसिद्धत्वात् । सर्वान्तरत्वस्य च देहान्तरत्वेनोपपत्तेः ।

६४८–५ **निरुपाधिकमिति** । जीवस्य हि प्राणनकर्तृत्वं कर्मानुगुणदेहेन्द्रियादीनामधिष्ठातृत्वेन जागृतौ स्वप्ने च दृश्यत इति तत्सोपाधिकमिति बोध्यम् ॥ ३५ ॥

६४९–२० **तस्मादिति** । यस्माद्वैराग्यमावश्यकं तस्माद्ब्राह्मणः, ब्रह्म वेदस्तमधीते ब्राह्मणः । जातिपरो वा ब्राह्मणशब्दः । पण्डा ऊहापोहक्षमा धीः । सा संजातास्येति पण्डितः । तस्य कर्म पाण्डित्यमौपदेशिकार्थाधिगमरूपं विवेकं निर्वेदविरक्तिफलकं निर्विद्य लब्ध्वा बाल्येन स्वमाहात्म्यानाविष्करणलक्षणबालस्वभावेन युक्तः सन्ब्रह्मणि तिष्ठासेत्तन्निष्ठां लभेतोपासीतेति यावत् (वि.दी.)।

६५०–१० **सर्वान्तरात्मत्वमेवेति** । परस्परव्यतिहारेणोभयत्रापि सर्वान्तरात्मत्वगुणविशिष्टमेव ब्रह्मोपास्यमिति रूपभेदाभावाद्विद्याभेदो नेत्याशयः ।

—१९ **व्यावृत्तिप्रतीतिसिद्ध्यर्थमिति** । व्यावर्तकधर्मभूयस्तया व्यावृत्तिबुद्ध्यतिशयार्थमित्यर्थः (श्रु) । प्राणनहेतुत्वधर्मेण यद्यपि परमात्मनि जीवाद्व्यावृत्तिबुद्धिरुत्पद्यते तथापि सा बुद्धिर्दृढा न भवति । जीवात्मन्यपि प्राणनहेतुत्वधर्मस्य सोपाधिकस्य संभवात् । कहोलप्रश्नप्रतिवचनगताशनायाद्यतीतत्वधर्मेण तु परमात्मनि जीवाद्व्यावृत्तिबुद्धिर्दृढा भवति । अशनायाद्यतीतत्वस्य जीवात्मनि कथमप्यसंभवादिति बोध्यम् ॥ ३६ ॥

६५१–६–७ **यथा सोम्येति** । हे सोम्य यथा मधुकृतो मधुकरमक्षिका मधु निस्तिष्ठन्ति निष्पादयन्ति । अनेकपुष्परसान्मधुत्वमापादयन्ति । ते च मधुभावं गता रसा अहममुकवृक्षस्येति विवेकं न लभन्ते । तथा सुषुप्तौ प्रजाः

सति संपद्यापि वयं सति संपन्ना इति विवेकं न लभन्ते । ज्ञानिनस्तु नैवम् । किं तु तत्तेजः परस्यां देवतायां प्रशाम्यतीति भावः । **उपपाद्यत इति** । प्रश्नप्रतिवचनमुखेन प्रतिपाद्यत इत्यर्थः (श्रु.) ।

६५१–११ **केचिदिति** । शंकराचार्या इत्यर्थः ।

—१३ **तत्र पूर्वेणेति** । व्यतिहार इति सूत्रेणेत्यर्थः । जीवेश्वरयोरन्योन्यानुवादेनान्योन्यात्मकत्वरूपव्यतिहारोयमाध्यानायाम्नायते । इतरवत् । यथेतरे सर्वात्मत्वादयो गुणा आध्यानायाम्नायन्ते तद्वत् । तथा हि विशिंषन्ति समाम्नातार उभयोच्चारणेन त्वमहमस्म्यहं च त्वमसीति तन्मते सूत्रार्थः ।

६५२–३ **स यो हेति** । उपास्यप्रसिद्ध्यर्थो हशब्दः । एतच्छब्देन बुद्धिस्थमुपास्यं परामृश्यते । यक्षं पूज्यं प्रथमजं भौतिकानां मध्ये प्रथमं जातं महत्सत्यं ब्रह्म हिरण्यगर्भाख्यं वेद उपास्त इत्यर्थः ।

—७ **उत्तरवाक्य इति** । तद्यत्सत्यमसावित्यत्रेत्यर्थः ॥ ३७ ॥ (१५)

६५३–२ **अथ यदिदमिति** । व्याख्यातं प्राक् (विवृति पृ. १८५ प. ९)

—८ **अपहतपाप्मत्वादीति** । पाप्मशब्दः पातकवाची । पातकरहितत्वं जरारहितत्वं मृत्युरहितत्वं शोकरहितत्वं बुभुक्षारहितत्वं पिपासारहितत्वं सत्यकामत्वं सत्यसंकल्पत्वं चेत्यष्टौ गुणाश्छान्दोग्य उक्ताः ।

—११ **रूपभेदादिति** । छान्दोग्यश्रुतावाकाशशब्दः परमात्मवाचीति पूर्वपक्षी न मन्यते । तथा च च्छान्दोग्ये भूताकाशस्योपासना वाजसनेयके त्वाकाशे शेत इत्युक्तेराकाशे शयानस्येति धर्मिभेदः । किं च च्छान्दोग्येपहतपाप्मत्वादयो धर्मा उक्ताः । वाजसनेयके तु वशित्वादय इति धर्मभेदश्चेति रूपभेदो बोध्यः ।

६५४–४ **सुषिरशब्देति** । सुषिरं बिलम् । अन्ये त्वत्र नाकाशशब्दस्य भूताकाशवाचकत्वम् । किं तु जीववाचकत्वम् । य एषोन्तर्हृदय आकाशो जीवात्मा तत्र शेते तदन्तरात्मतया वर्तत इत्यर्थमाहुः ॥ ३८ ॥

—१३ **निर्विशेषत्वप्रतीतेरिति** । तथा च वाजसनेयके निर्गुणोपासना । छान्दोग्ये तु सगुणोपासनेति रूपभेदाद्विद्याभेदः । यद्यपि च्छान्दोग्योक्ता अपि गुणा न पारमार्थिकास्तथापि कल्पितगुणविशिष्टवस्त्वेनैव तत्रोपासनं स्वरूपाभिव्यक्तिरूपफलविशेषप्राप्त्यर्थमभिधीयत इति पूर्वपक्ष्याशयः । यद्वोभयत्र निर्गुणोपासनमेवेति विद्यैक्यमास्तां नाम । परं तूभयत्र कामादिगुणानामैक्याद्विद्यैक्यमिति पूर्वसूत्रे यत्सिद्धान्तिनोक्तं तन्न संभवतीति पूर्वपक्ष्याशयोत्र बोध्यः।

—२० **प्रमाणान्तराप्रतिपन्नानामिति** । प्रमाणान्तराविदितानां श्रुत्येकसमधिगम्यानां गुणानां न निषेधार्थमनुवादः किं तु तत्तद्गुणविशिष्टरूपेणोपासनार्थं विधानमेवेति भावः ।

६५६-२ **अग्राह्य इति** । ग्राह्यवस्तुविजातीयोत एव न गृह्यत इत्यर्थः ।

—७ **नास्येति** । अस्य शरीरस्य जरयैतद्ब्रह्म न जीर्यति । तथास्य शरीरस्य वधेनैतद्ब्रह्म न हन्यत एतत्सत्यं दहराख्यं ब्रह्म । पुरमिव पुरम् । भोग्यभोगस्थानभोगोपकरणभोक्तृवर्गादिशालित्वात् । अस्मिन्ब्रह्मणि काम्यन्त इति कामाः कल्याणगुणाः समाहिता इत्यर्थः ॥ ३९ ॥

—१४ **सांसारिकेति** । पितृलोकप्राप्तिरूपफलस्य संसारावस्थायां भोगयोग्यत्वेन तत्फलस्य सांसारिकफलत्वात्तादृशफलकामनयोपासनं कुर्वन्मुमुक्षुर्न भवितुमर्हतीति तस्यामुपासनायामुक्तानां गुणानां मुमुक्षुक्रियमाणोपासनासु नोपसंहार इत्याशयः ।

६५७-१ **उपसंपत्तेरेवेति** । तथा च नैतत्पितृलोकप्राप्तिरूपं फलं सांसारिकं किं तु मुमुक्षुभोगयोग्यमेवात्र प्रतिपाद्यत इति भावः ॥ ४० ॥ (१६)

—१० **तन्निर्धारणेति** । निर्धारणं निश्चयेन चेतसो धारणमुपासनम् । पृथक्, हि, अप्रतिबन्ध इति पदच्छेदः । तस्योद्गीथोपासनस्यानियमः । कुतः । श्रुतावनियमस्य दर्शनात् । हि यतोस्योद्गीथोपासनस्याप्रतिबन्धरूपं पृथगेव फलमस्तीति सूत्रार्थः ।

—१२ **ओमित्येतदिति** । उद्गीथमुद्गीथभक्त्यवयवभूतमोमित्येतदक्षरमुपासीतेति कर्माङ्गभूतोङ्काराश्रयमुपासनं विधीयते । तच्चोपासनं स्वाश्रयद्वारा कर्माङ्गम् । उद्गीथस्य कर्माङ्गत्वेन तद्द्वारा तदाश्रितोपासनस्यापि कर्माङ्गत्वात् । अङ्गभूतस्य चाङ्गिफलेनैव फलवत्त्वात्तस्य पृथक्फलराहित्येपि तदनुष्ठानमुपपद्यते । एतदेव निरूढानुष्ठानानीत्यनेनोच्यते । निरूढमुपपत्तिमत् । न चास्योपासनस्य यदेव विद्ययेति वाक्ये वीर्यवत्तरत्वरूपं फलं श्रूयत इति वाच्यम् । यदेव विद्ययेति वाक्यस्यार्थवादवाक्यत्वेन प्रशंसामात्रपरत्वात् । न हि तद्विधिवाक्यं भवितुमर्हति । विधिप्रत्ययाश्रवणात् । भवतीत्यादिवर्तमाननिर्देशात् । यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यत्र वाक्ये स्वनिन्दाबोधकवाक्यश्रवणाभावः पर्णमयत्वस्य न पृथक्फलं भवितुमर्हति । तद्वाक्यस्योक्तरीत्यार्थवादवाक्यत्वेन प्रशंसामात्रपरत्वात् । अग्नौ घृतादिप्रक्षेपसाधनीभूतं पात्रं जुहूशब्देनोच्यते । पर्णता पर्णमयत्वम् । तच्च स्वाश्रयभूतजुहूद्वारा कर्माङ्गम् । तद्वदेवात्र बोध्यम् । यदेव विद्ययेत्यत्र विद्याशब्देनोपासनमुच्यते । श्रद्धाशब्देनास्तिक्यबुद्धिरुच्यते । उपनिषच्छब्देनोपनिषज्जन्यं ब्रह्मात्मकत्वज्ञानमुच्यते । कर्मणो वीर्यवत्तरत्वं नाम प्रबलकर्मान्तराप्रतिबद्धफलकत्वम् ।

६५८-३ **रात्रिसत्रन्यायेनेति** । अर्थवादोक्तमपि फलं विध्यपेक्षितं स्वीकार्यमित्यभ्युपगमयितुं रात्रिरात्रन्यायेनेत्युक्तम् (श्रु.) । रात्रिसत्रन्यायस्वरूपं तु प्रागुक्तम् (विवृति-पृ. १०८ प. ८) ।

—९ गोदोहनादिवदिति । गोदोहनेन पशुकामस्य प्रणयेदिति विधिः । गोदोहनं गोदोहनाश्रयीभूतं पात्रम् । तेन पात्रेण जलानयनं यज्ञे विधीयते । परं तु पशुकामनायां सत्याम् । असत्यां तु पशुकामनायामन्यसाधनेन जलानयनेपि न यज्ञहानिः । अतो यज्ञे गोदोहनस्य नियमेनोपसंहारो नास्तीति भावः ॥ ४१ ॥ (१७)

—१३ कामानिति । कल्याणगुणानपहतपाप्मत्वादीनित्यर्थः ।

—१७ दहराकाशस्येति । दहराकाशशब्दवाच्यस्य परमात्मन इत्यर्थः । तत्र परमात्मन उपासन आनन्दत्वादिविशिष्टस्य परमात्मस्वरूपस्य चिन्तनम् । गुणानामुपासने त्वपहतपाप्मत्वादिगुणाष्टकचिन्तनम् । तत्र गुणचिन्तनं गुणिचिन्तनं विना कर्तुमशक्यमिति गुणचिन्तनात्पूर्वं गुणचिन्तनाङ्गभूतं यद्गुणिचिन्तनं कर्तव्यं तत्पूर्वप्रतिपादितपरमात्मोपासने कृतात्परमात्मस्वरूपचिन्तनादन्यदेव कर्तव्यमथ वा तेनैव सिद्धमिति संशये तेनैव सिद्धमिति पूर्वपक्षः । प्रथमोपासनायामुपास्यं यत्परमात्मस्वरूपं तस्यैव द्वितीयोपासनायां गुणाश्रयत्वात्स्वरूपचिन्तनार्थं गुणचिन्तनार्थं चैकदैव तस्यानुसंधातुं शक्यत्वात् ।

६५९–४ भिन्नत्वादिति । यथैको घट एव 'घटपट' एतदुभयसमुदायो न भवतीत्येकघटस्वरूपापेक्षया समुदायो भिन्नस्तथा द्वितीयोपासनायां चिन्तनीयो यो गुणगुणिसमुदायः स प्रथमोपासनायां चिन्तनीयात्केवलपरमात्मस्वरूपाद्भिन्न एवेत्यर्थः ।

—७ यथेन्द्रायेति । यद्यप्येक एवेन्द्रो राजत्वाधिराजत्वस्वाराजत्वरूपगुणत्रयविशिष्टस्तथापि गुणभेदेन तत्तद्गुणविशिष्टस्येन्द्रस्य भिन्नत्वात्त्रिवारं प्रदानं क्रियते तद्वदित्याशयः ।

—१० नानेति । विशेष्यस्यैकत्वेपि राजादिगुणभेदेन देवतापृथक्त्वात्प्रदानानि नाना भिद्येरन्नेवेति तत्सूत्रार्थः ॥ ४२ ॥ (१८)

—१५ सहस्रशीर्षमिति । परविद्याप्रकरणेषु तत्र तत्र शिवशंभुपरब्रह्मपरज्योतिःपरतत्त्वपरमात्मादिशब्दनिर्दिष्टस्य वस्तुनो नारायणत्वमनेन नारायणानुवाकेन प्रतिपाद्यत इति सिद्धान्तः । पूर्वपक्षी त्वस्यानुवाकस्य पूर्वप्रतिपादितदहरविद्याशेषत्वं मन्यते । विश्वाक्षत्वं सर्वविषयकसाक्षात्कारवत्त्वम् । विश्वशंभुत्वं सकलजगत्क्षेमकरत्वम् ।

६६०–३ दहरमिति । उपास्यतया संनिहितस्य परस्य ब्रह्मणः पुरभूतं यदुपासकशरीरं तन्मध्ये संस्थितं दहरमल्पं विपाप्मं निरस्तपापं परमात्मनो वेश्मभूतं यद्धृदयपुण्डरीकं तत्रापि शोकरहितं यदल्पं गगनवदपरिच्छेद्यं ब्रह्म तत्तस्मिन्नन्तश्च यत्तदुभयमुपासितव्यमित्यर्थः ।

—९ उपोद्बलयतीति । दहरविद्यायां हृदयपुण्डरीकमध्यस्थस्यैवोपास्यत्वादिति भावः ।

—१९ श्रुतिलिङ्गेति । श्रुतिलिङ्गादीनां स्वरूपं प्रागुक्तम् (विवृति-पृ. १८ प. २०) । श्रुत्यादीनां षण्णां विनियोजकप्रमाणानां मध्ये कयोरपि विरुद्धयोर्द्वयोः समवाय एकत्र संनिपात उत्तरोत्तरं दुर्बलम् । पूर्वेणोत्तरस्य बाध इति यावत् । कुतः । अर्थस्य विनियोगस्य विप्रकर्षाद्विलम्बात् । उत्तरप्रमाणं हि पूर्वप्रमाणं कल्पयित्वैव विनियोजकं भवति । यथा कदा चन स्तरीरसीत्यस्या ऋचो लिङ्गेनेन्द्रोपस्थाने विनियोगः प्राप्तः । ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति श्रुत्या गार्हपत्योपस्थाने विनियोगः प्राप्तः । इन्द्रलिङ्गेन हि ' अनयेन्द्रमुपतिष्ठते ' इति श्रुतिं कल्पयित्वेन्द्रोपस्थानाङ्गत्वं वाच्यम् । ततः पूर्वमेवैन्द्र्या गार्हपत्यमिति प्रत्यक्षश्रुत्या झटिति गार्हपत्योपस्थाने विनियोग इति श्रुतिर्लिङ्गात्प्रबला भवति । एवमितरेष्वप्यूह्यम् ।

६६१-४ तद्वचनोपपत्तेरिति । ऐतदात्म्यमिदं सर्वमिति सामान्येन निर्दिष्टस्य तत्त्वमसीति विशेष उपसंहारवत्सकलपरविद्योपास्यतयाभिहितस्य नारायणस्य प्रकृतदहरविद्योपास्यतयोपसंहारे दोषाभावात् (वि. दी.) ।

—७ कृत्प्रत्ययेनेति । उपासितव्यमित्यत्र तव्यप्रत्ययस्य कृदिति संज्ञा । स च प्रत्ययः कर्मार्थक इति तेन प्रत्ययेन कर्माभिहितं भवति । यत्र च कर्म प्रत्ययेनोक्तं भवति तत्र कर्म प्रथमान्तमेव न तु द्वितीयान्तम् । यथा ग्रामो गम्यत इति । कर्मणि द्वितीया (पा. सू. २।३।२) इति पाणिनिसूत्रेण या द्वितीया विधीयते सा प्रत्ययेनानुक्ते कर्मण्येव विधीयते । यथा ग्रामं गच्छतीति । अत्र तिप्प्रत्ययः कर्त्रर्थको न तु कर्मार्थकः । तथा चोपासितव्यमित्यस्य तदिति प्रथमान्तमेव कर्म भवितुमर्हतीति सहस्रशीर्षमिति द्वितीयान्तस्योपासितव्यमित्यत्र नान्वयः । न च द्वितीयायाः प्रथमार्थकत्वात्स्यादेवान्वय इति वाच्यम् । तस्मिन्यदन्तस्तदुपासितव्यमित्यत्र स्ववाक्य एव तच्छब्दस्य कर्मबोधकस्य सत्त्वेनोपासितव्यमित्यस्य कर्मांशे निराकाङ्क्षत्वात् । सहस्रशीर्षमिति वाक्यस्यापि सर्वस्मात्परत्वप्रतिपादनेन क्रियांशे निराकाङ्क्षत्वाच्च ॥ ४३ ॥ (१९)

—१७ पूर्वविकल्प इति । क्रियाशब्देन क्रियामयक्रत्वङ्गभूतत्वं लक्ष्यते । मनश्चिदादयः क्रियामयक्रत्वङ्गभूताः प्रकरणात् । पूर्वप्रकृतेनेष्टकचितेनाव्यभिचरितक्रतुसंबन्धिनोपस्थितक्रतुगृहीतत्वेन तदङ्गभूताः । एषां चाग्नित्वात्तेन पूर्वेणेष्टकचितेन विकल्पः । विद्यारूपाणामप्येषां क्रियामयक्रत्वङ्गभावो न विरुध्यते । द्वादशाहाङ्गभूतमानसग्रहवदिति सूत्रार्थः (वे. दी.) ।

—१९ मनश्चित इति । मनसा चितः संपादिता मनश्चितः । मनसा कल्पिताः । मनोवृत्तिरूपा इति यावत् । एवं वाक्चिदादयोपि वागादिवृत्तिरूपा

एव बोध्याः । प्राणशब्देन घ्राणं गृह्यते । कर्मशब्देन कर्मेन्द्रियं हस्तादि गृह्यते । अग्निचित इत्यत्राग्निशब्देन त्वगिन्द्रियं गृह्यते ।

६६१–२१ सांपादिकत्वेनेति । कल्पितत्वेनेत्यर्थः । विद्यारूपा ज्ञानमयाः । अध्वर्यधिकरणकहविःप्रक्षेपादिव्यापाररूपो यो लोकप्रसिद्धः क्रतुः स क्रियामयक्रतुः । क्रियारूपाः क्रियामयक्रतुसंबन्धिनः । अध्वर्यधिकरणकहविःप्रक्षेपादिव्यापारं विनैव केवलं तत्तत्पदार्थभावनया यः क्रतुः संपाद्यते स विद्यामयक्रतुः । विद्यारूपा विद्यामयक्रतुसंबन्धिनः ।

६६२–३–६ चित्याग्नित्वेनेति । इष्टकाभिर्मनोवृत्त्यादिभिर्वा योग्निश्चीयते स चित्यः । तादृशस्य चाग्नेः क्वचित्कतौ चयनसाफल्यार्थं प्रवेश आवश्यकः । संपादितानां कल्पितानाम् । (इष्टका विटा इति प्र.) । क्रतुविध्यभावादिति । मनसैवाधीयन्तेत्यादिवाक्येषु लिङ्लोट्तव्यदादेर्विधिप्रत्ययस्याश्रवणादिति पूर्वपक्ष्याशयः । क्रियामयेति । इष्टकाभिश्चितस्याग्नेर्लोके क्रियामयक्रतावश्यं प्रवेशो दृश्यत इति भावः ।

—१० यथा द्वादशाह इति । द्वादशसंख्याकैरहोभिर्जायमानस्य यज्ञस्य द्वादशाहेति संज्ञा । तादृशयज्ञस्याद्यन्तदिवसद्वयं त्यक्त्वा मध्यस्थदशरात्रस्य यद्दशममहस्तच्चार्थात्प्रथमदिवसादारभ्यैकादशं भवति तदविवाक्यशब्देनोच्यते । न विविधानि वाक्यानि यस्मिंस्तदविवाक्यम् । तस्मिन्नहनि पात्रग्रहणादिक्रियाणां मानसत्वेन ऋत्विजां विविधवाक्योच्चारणाभावात् । विवाक्य इति वा पदच्छेदः । विगतानि वाक्यानि यस्मिन्निति वार्थः । तस्मिन्नहनि मानसग्रहस्य मनसा कल्पितस्य सोमपात्रविशेषस्य ग्रहणासादनादि सर्वं मनसैव निष्पाद्यते कल्प्यते । ग्रहणं सोमपात्रस्योपादानम् । गृहीतस्य पात्रस्य स्वस्थाने स्थापनमासादनम् । स्तोत्रं स्तुतिः । शस्त्रं शंसनम् । हुतशेषादानं प्रत्याहरणम् । भक्षणं हुतशेषभक्षणम् ॥ ४४ ॥

—१४ क्रियारूपत्वमिति । स्वरूपेण ज्ञानमयानामेव सतामेषामग्नीनां क्रियामयक्रत्वङ्गत्वमवगम्यत इत्यर्थः ॥ ४५ ॥

—२१ विद्यैवेति । विद्याशब्देन विद्यामयक्रत्वङ्गभूतत्वं लक्ष्यते ।

६६३–९ दृश्यत इति । एषां मनश्चिदादीनां शेष्यङ्गिभूतः । यस्मिन्क्रतावेषामग्नीनां प्रवेशः स विद्यामयः क्रतुरत्रैव दृश्यत इत्यर्थः । मनसैवाधीयन्तेत्यादिवाक्येषु विधिप्रत्ययाश्रवणेपि विधिः कल्पनीयः । एतच्चोत्तरत्र (सू. ४८) स्फुटीभविष्यति । एतेन स्वदेशे क्रतुविध्यभावादिति पूर्वपक्षिणोक्तं (श्रीभाष्य–पृ. ६६२ प. ४) निरस्तम् ॥ ४६ ॥

६६४–२ बलीयस्त्वेनेति । इदं प्रागुक्तम् (विवृति–पृ. ३०४ प. ३) ।

६६४-५ विद्ययेति । एवंविद एवं विदुषो मनुष्यस्याग्नयो विद्ययैव चिता भवन्तीत्यर्थः ।

—७ तान्हैतानिति । अपि स्वपत इत्यस्य निद्रितायापीत्यर्थः । यद्यपि विद्यामयक्रतुमान्मनुष्यो निद्रितो भवति तथापि तदर्थं सर्वाणि भूतानि विचिन्वन्ति । अग्निकुण्डरचनां कुर्वन्तीत्यर्थः ॥ ४७ ॥

६६५-१२ दृष्ट्वेति । यथा यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीत्यत्र विद्यया करोतीत्यस्य ज्ञानपूर्वकं कर्म कर्तव्यमित्यर्थस्वीकारेण विधिः कल्प्यते । अन्यथा विद्यापूर्वककर्मकरणस्य विध्यभावेन वीर्यवत्तरं भवतीति श्रुतस्य फलस्य हानप्रसङ्गात् । तथात्राप्यनुबन्धादीनां हानप्रसङ्गाद्विधिः कल्प्यत इति भावः ।

—१५ यत्फलमिति । फलकामनया कृतं चेदेतत्फलम् । अन्यथा तु मुक्तिरेव फलम् (श्रु.) ॥ ४८ ॥

६६६-१ स एष इति । एतस्मिन्सूर्यमण्डले यः पुरुषः स मृत्युर्मृत्युवदित्यर्थः । अत्र सूर्यमण्डलस्थपुरुषे मृत्युगतसर्वहरत्वमात्रमतिदिश्यते न तु मृत्युलोकापत्तिरप्यतिदिश्यते ॥ ४९ ॥

—१३ अयं वावेति । अयं भूलोक एवाग्निः । अत्राग्नित्वेन भूलोकः कल्प्यते । तस्याग्नेरापः समुद्राः परिश्रिताः परिस्तरणभूताः । भूलोकं पृणानं पूरयन्तमेनमग्निं यो वेद तस्यैतत्सर्वमभिसंपद्यत इत्यर्थः । अत्र वाक्ये विद्यैव विधीयते न कर्म । तथा चाग्निरहस्यग्रन्थे क्रियाया एव विधानमिति नियमाभावान्मनश्चित्याद्यभिधायिनः शब्दस्य विद्यामयाग्निप्रतिपादकत्वमवगम्यत इति भावः ।

—१८ एवं तर्हीति । विद्यामयाश्चेद्बृहदारण्यक एव वक्तव्या नाग्निरहस्यग्रन्थ इति शङ्काशयः ॥ ५० ॥ (२०)

६६७-३ एक इति । इदं पूर्वपक्षसूत्रम् । कर्तृत्वादिविशिष्टमेव जीवात्मनः स्वरूपमनुसंधेयमित्येके मन्यन्ते । कुतः । शरीरे वर्तमानस्योपासकस्य जीवात्मनस्तथाभावादिति सूत्रार्थः ।

—६ परमात्मात्मकत्वेनेति । परमात्मात्मा यस्यैतादृशरूपेणेत्यर्थः ।

—१३ न हीति । यथा स्वर्गादिफलानुभवदशायामुपासकस्य यादृशं रूपं तस्य रूपस्य यज्ञादिसाधनानुष्ठानदशायामनुसंधानाभावेपि साधनानुष्ठानं भवति तत्फलानुभवश्च भवति तथेहापीति भावः ।

—१७ यथाक्रतुरिति । क्रतुशब्द इच्छावाची । इच्छानुरूपं फलमिति विशेषवचनार्थः । तथा च परविद्याफलरूपमोक्षावस्थायां जीवात्मनोपहतपाप्म-

त्वादिस्वरूपत्वेन तदनुरूपयैवेच्छया साधनावस्थायां भवितव्यमिति परविद्याप्रतिपादितोपासनाकालेपहतपाप्मत्वाद्याकार एवानुसंधेय इति शङ्काशयः । यद्यपीच्छानुरूपं फलं तथापि सोपासकस्येच्छा न स्वविषया । किं नूपास्यविषया । तथा च फलानुभवावस्थायामनुभवविषयं साधनावस्थायामनुसंधानविषयं चोपास्यस्य स्वरूपमेकमेवास्तु नाम । उपासकस्वरूपस्य तु तयोरवस्थयोर्भिन्नत्वेपि न क्षतिरित्युत्तराशयः । अत्रोपास्यस्य ब्रह्मणः स्वरूपं न जीवरूपशरीरविशिष्टं किं तु केवलमिति पूर्वपक्षी मन्यते ॥ ५१ ॥

६६८–२२ व्यतिरेक इति । न जीवेन स्वस्य कर्तृत्वादिविशिष्टं रूपमनुसंधेयम् । किं तु सांसारिकस्वरूपान्मुक्तस्वरूपस्य यो व्यतिरेकोपहतपाप्मत्वादिः सोनुसंधेयः । कुतः । व्यतिरिक्तस्वरूपप्राप्तेस्तद्भावभावित्वात् । तस्य तथाविधोपासनस्य भावेनास्तित्वेन भावित्वाद्व्यतिरिक्तस्वरूपप्राप्तेरस्तित्वात् । यथोपास्यब्रह्मस्वरूपोपलब्धिर्विहिता यथावस्थितब्रह्मस्वरूपविषया तथा तच्छरीरभूतस्वात्मोपलब्धिरपि यथावस्थितात्मस्वरूपविषयेति सूत्रार्थः ॥ ५२ ॥ (२१)

६६९–२ ओमित्येतदिति । उद्गीथशब्दो लक्षणयोद्गीथावयववाची । उद्गीथावयवभूतमोमित्येतदक्षरमुपासीतेत्यर्थः । हिंकारप्रस्तावोद्गीथप्रतिहारनिधनरूपेण पञ्चविधं साम । तत्र क्रमेण पृथिव्यादिलोकदृष्टिः कर्तव्या । पृथिवी हिंकारोग्निः प्रस्तावोन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमिति लोकेष्विति श्रुतेरर्थः । उक्थं कर्माङ्गं शस्त्रमिति वीप्सया यत्प्रजा वदन्ति तदिदमेव येयं पृथिवीत्युक्थे पृथिवीदृष्टिः कर्तव्येत्युक्थमुक्थमिति श्रुतेरर्थः । कर्माङ्गभूतेष्वेतल्लोकदृष्टिः कर्तव्येत्ययं वेति श्रुतेरर्थः ।

—२१ संनिहिता इति । बुद्धिस्था इत्यर्थः ।

सर्वशाखेति । एतन्न्यायस्वरूपं प्रागुक्तम् (विवृति–पृ. २५ प. २५) ॥५३॥

६७०–४ जातीति । अग्नीषोमीयपशोरजत्वजातिरेकस्यां शाखायामुपदिष्टाप्यन्यत्र सैव गृह्यते । एवं गुणादिपूह्यम् ॥ ५४ ॥ (२२)

—१३ द्यौर्मूर्धेति । वैश्वानरस्य परमात्मनो मस्तकत्वेन स्वर्गलोकः कल्पितः । एवमादित्यादयश्चक्षुराद्यवयवत्वेन कल्पिताः । बस्तिर्मूत्रस्थानम् ।

—२२ अत्त्यन्नमिति । अत्ति अन्नमिति च्छेदः । अन्नप्राप्तिः प्रियवस्तुदर्शनं ब्रह्मतेजःप्राप्तिश्चात्र मूर्धोपासकस्य फलत्वेनोच्यते ।

६७१–५ परत्रेति । पूर्वपक्षिसंमतं व्यस्तोपासनमेव वैश्वानरविद्याप्रतिपादकश्रुतौ विवक्षितं चेत्कथं समस्तस्योपसंहार इत्याशङ्काया उत्तरमेतत्पूर्वपक्षिणः ।

—१२ न चैतावतेति । व्यस्तोपासनं समस्तोपासनं चेत्युपासनद्वयविधाने श्रुतेस्तात्पर्यं चेद्वाक्यभेदः स्यादिति न वाच्यम् । समस्तोपासनस्यैव मुख्यत्वेन विवक्षितत्वात् । व्यस्तोपासनस्य च प्रासङ्गिकत्वात् ।

६७२–३ **प्राचीनशाल इति** । प्राक् (अ. १ पा. २ सू. २५) द्रष्टव्यमेतत् ।

—१९ **मूर्धा त इति** । वैश्वानरस्य मूर्धत्वेन कल्पितो यो द्युलोकरूपोवयवस्तस्य वैश्वानरबुद्ध्योपासकं प्राचीनशालं प्रत्यश्वपतिर्वदति मत्समीपे नागत्य वैश्वानरमूर्धावयवभूते कृत्स्नवैश्वानरबुद्धिं कुर्वतस्तव विपरीतविद्यावशान्मूर्धपातरूपोनर्थः स्यादतः साध्वकार्षीस्त्वं यतो मामागतोसीति । तथा वैश्वानरस्य चक्षुष्ट्वेन कल्पितो य आदित्यस्तस्य वैश्वानरबुद्ध्योपासकं सत्ययज्ञं प्रत्यश्वपतिना विपरीतविद्यावशादन्धत्वरूपोनर्थ उक्तः ॥ ५५ ॥ (२३)

६७३–१४ **अत्रैवेति** । अस्मिन्नधिकरणे सिद्धान्तितं सद्विद्याद्यनेकविद्यानां परस्परभेदं स्वीकृत्यैव पूर्वं (३।३।१) प्रतिविद्यं शाखादिभेदेनावान्तरभेदोस्ति नास्तीति विचारः कृत इति भावः ।

२१ **शब्दान्तरादिभिरिति** । विधेयं साङ्गं प्रधानं कर्म । अनुबन्धास्तदेकदेशा धात्वर्थादयः । शब्दादयोनुबन्धभेदहेतुत्वेन प्रधानविधेयभेदहेतव इत्यर्थः (श्रु·) ।

यद्यपीति । वेदोपासीतेत्यादिशब्दानां भेदाद्विद्याभेदो न भवति । तेषां शब्दानां प्रत्ययावृत्तिरूपैकार्थाभिधायकत्वात् । न च विषयभेदेन प्रत्ययभेद इति वाच्यम् । सर्वत्र विषयस्य ब्रह्मण एकत्वादिति शङ्काशयः ।

६७४–४ **प्रतिप्रकरणमिति** । तथा च प्रकरणभेदादपि विद्याभेद इति भावः ॥ ५६ ॥ (२४)

६७५–९ **सर्वाश्च विद्या इति** । एतेन काश्चिद्विद्या अविद्यानिरसनार्थाः काश्चिच्च ब्रह्मप्राप्त्यर्था इत्येवं फलद्वैविध्येन विद्याद्वयसमुच्चयः स्यादित्यपास्तम् ॥ ५७ ॥ ५८ ॥ (२५)

६७६–१० **न ह्यत्रेति** । यद्यस्याङ्गं तत्तत्र नियमेनोपादेयम् । गोदोहनस्य तु यज्ञाङ्गत्वं नास्ति । गोदोहनेन पशुकामस्येति स्ववाक्य एव पशुकाम इति फलश्रवणात् । अङ्गस्याङ्गप्यपेक्षया पृथक्फलसाधनत्वाभावात् । पशुकामनायामेव गोदोहनस्योपादेयत्वेन नियमेनोपादेयत्वाभावाच्च । प्रकृते त्वोमित्येतदक्षरमुद्गीथमुपासीतेति स्ववाक्ये फलं न श्रूयत इत्युपासनाया यज्ञाङ्गत्वं स्ववाक्यादवगम्यते । ततः पश्चाद्वाक्यान्तरे यद्यपि वीर्यवत्तरत्वरूपं फलं श्रूयते तथापि न तेन पश्चात्प्रतीतेन प्रथमतः प्रतीतस्याङ्गत्वस्य बाधः । प्रत्युत प्रथमप्रतीतेनाङ्गभावेन विरोधात्फलश्रुतेरेव प्रशंसामात्रपरत्वं स्यादिति पूर्वपक्ष्याशयः ।

—१७ **अपापेति** । प्रागुक्तम् (विवृति–पृ. ३०२ प. २४) ॥ ५९ ॥

६७७–२ **गोदोहनेनेति** । गोदोहनेनेति वाक्ये हि पशुकामस्य गोदोहनेधिकारान्तरं श्रूयते । यज्ञे यस्याधिकारस्तस्य पशुकामना स्याच्चेद्गोदोहनेधिकार इत्येतदधिकारान्तरम् । अतस्तद्वाक्यस्य विशेषाधिकारिप्रतिपादन एव तात्पर्यं न गोदोहनस्य यज्ञाङ्गत्वप्रतिपादने । तद्वत्प्रकृतवाक्येधिकारान्तरं न श्रूयत इत्युपासनाया यज्ञाङ्गत्वप्रतिपादन एव प्रकृतवाक्यतात्पर्यमवश्यमभ्युपेयम् ॥ ६० ॥

—४ **समाहारादिति** । समाहारः समाधानम् । होतुर्यः प्रणवः स उद्गातुरुद्गीथ इति च्छान्दोग्ये प्रणवोद्गीथयोरैक्यविधिरस्ति । तादृशैक्यचिन्तनस्यैतत्फलं भवति । यत्प्रणवोच्चारणरूपे होतृकर्मणि निर्दोषे जाते सदोषमपि जातमुद्गीथरूपमुद्गातुः कर्म निर्दुष्टं भवति । उद्गीथस्य सदोषत्वमुपासनारहितत्वेन बोध्यम् । तथा चोपासनाया अभावे प्रायश्चित्तमिव विधीयमानमैक्यचिन्तनमुपासनाया अवश्यकर्तव्यतां बोधयति । अतश्चैक्यचिन्तनेन कृतं समाधानमेवोपासनाया यज्ञाङ्गत्वे लिङ्गमित्याशयः । होतृषदनादिति श्रुतेरयमर्थः । होतुः सदनं स्थानम् । होता यत्रस्थः शंसति तद्धोतृषदनम् । तेन च हौत्रं कर्म लक्ष्यते । ततः सम्यगनुष्ठितादुरुद्गीथं प्रमादाज्जायमानं सदोषं यदुद्गानं तदैक्यचिन्तनेन होतानुसमाहरति समादधातीति ॥ ६१ ॥

—९ **गुणेति** । गुणशब्देनोपासनाश्रयभूतः प्रणवो गृह्यते । अप्रधानवाची हि गुणशब्दः । उपासनाश्रयस्य प्रणवस्योपासनापेक्षयाऽप्राधान्यात् ।

—१०–२ **तेनेयमिति** । एतदेवं विद्वानक्षरमुपास्त इति प्रकृतस्य सोपासनप्रणवस्य तच्छब्देन परामर्शः । तेन सोपासनेनोंकारेण त्रयी विद्या वेदत्रयविहितं कर्म प्रवर्तते । अध्वर्युकर्तृकाश्रावणस्य होतृकर्तृकशंसनस्योद्गातृकर्तृकोद्गानस्य चोंकारपूर्वकत्वादित्यर्थः । **समाहार इति** । समाहारोनुवृत्तिः । सोपासनप्रणवानुवृत्त्योपासनानुवृत्तिर्गम्यते । यतश्चानुवृत्तिरपि न केवलस्य प्रणवस्यातः प्रणवोपासनयोर्नियमेन सहभावोवगम्यत इति भावः । अथ वा गुणस्य प्रणवगुणत्वेनावगतस्योपासनस्य वेदत्रयसाधारण्यश्रवणेन प्रणवोपासनयोः सहभावनियमदर्शनादुपासनस्य नियमेनोपादानमिति सूत्रार्थः । सहभावनियमश्च पूर्ववदेव तच्छब्देनोपासनाविशिष्टप्रणवपरामर्शाद्बोध्यः ॥ ६२ ॥

६७८–५ **प्रतिपाद्यत इति** । यदेव विद्ययेति तृतीयाश्रुत्या विद्यायाः साक्षात्फलसाधनत्वं प्रतिपाद्यते । उपासनस्योद्गीथाङ्गत्वं न साक्षात्प्रतिपाद्यते । किं तु केवलमोमित्येतदक्षरमुद्गीथमुपासीतेति वाक्येन वाक्यस्वभावसिद्धत्वात्कल्प्यते । तथा च यत्राङ्गभावस्य न किंचिद्बाधकं तत्र तत्कल्प्यतां नाम । यथा पर्णतायाः जुह्वङ्गत्वम् । स्ववाक्ये फलश्रवणं वाक्यान्तरे साक्षात्प्रतिपादितं फलसाधनत्वं चेत्येतदन्यतरद्बाधकम् । उभयविधस्यापि बाधकस्या-

भावात्पर्णताया जुह्वङ्गत्वमस्ति। तथा च यथा गोदोहनवाक्ये स्ववाक्ये फलश्रवणमङ्गत्वस्य बाधकं तथा प्रकृते यदेव विद्ययेति साक्षात्प्रतिपादितं फलसाधनत्वमङ्गत्वस्य बाधकमिति भावः।

६७८-१२ अधिकारान्तरमितीति। एतेन पूर्वपक्षिणा प्रागुक्तं (श्री. भाष्य-पृ. ६७७ प. २) निरस्तम्॥ ६३॥

६७९-३ अनियमे सतीति। उद्गीथाद्युपासनस्य नियमे तु तेनैव क्रतुफलाप्रतिबन्धरूपफलसिद्धौ सत्यां क्रतुफलाप्रतिबन्धाय ब्रह्मकर्तृकरक्षणस्यानावश्यकत्वं स्पष्टमेव।

—४ प्रायिकत्वमिति। यत्र क्रतावादावेव फलकामनयोद्गीथोपासनं संकल्पितं तादृशक्रतुविषयमिति भावः॥ ६४॥ (२६)

अथ तृतीयाध्यायस्य चतुर्थः पादः प्रारभ्यते।

६८०-३ पुरुषार्थ इति। अतःशब्देन विद्या परामृश्यते। विद्यायाः पूर्वपादे प्रस्तुतत्वात्। इदं च सिद्धान्तिनः सूत्रम्। एतदुत्तरं षट्सूत्राणि पूर्वपक्षिणः। ततः पुनः सिद्धान्तिनः सूत्राणि त्रयोदश॥ १॥

—१७ शेषत्वादिति। तत्त्वमसीत्यादिना सामानाधिकरण्येन ब्रह्मण एव यज्ञादिकर्मसु कर्तृत्वावगमात्तादृशकर्तृसंस्कारद्वारेण विद्याया यज्ञादिकर्मशेषत्वाद्विद्यातः पुरुषार्थवचनमर्थवादमात्रम्। यथान्येषु द्रव्यसंस्कारादिष्विति जैमिनिराचार्यो मन्यत इति सूत्रार्थः।

६८१-५ द्रव्येति। यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यपापश्लोकश्रवणफलार्थं पर्णताविधिरिति प्राप्ते जुहूद्वारा ऋत्वङ्गत्वसंभवेन कामपदाश्रवणेन च न फलविधिः। अतो न स पापमित्यादिरर्थवादः। एवमन्यत्राप्यङ्गे फलश्रुतिरर्थवाद इति तत्सूत्रतात्पर्यम्।

—१६ चेतनाचेतनेति। यदि तत्त्वमस्यादिश्रुतौ जीवब्रह्मैक्यप्रतिपादनात्सामानाधिकरण्योपपत्तिः क्रियते तर्हि सा चेतनविषये स्यान्नाम। अचेतनविषये तु न स्यादेवेत्यचेतनसामानाधिकरण्यं ब्रह्मणस्तत्तदात्मतयावस्थितिमूलकमेवाङ्गीकार्यम्। तदनुरोधाच्चेतनसामानाधिकरण्यमपि तथैव न तु स्वरूपैक्यमूलकम्। ब्रह्मणो जीवान्तर्यामित्वादेव च य आत्मनि तिष्ठन्निति श्रुतिः संगच्छते।

—२२ लिङ्गैरिति। लिङ्गानि चानुपदमेव (३।४।३) वक्ष्यन्ते। तानि च लिङ्गानि विद्यायाः कर्माङ्गत्वबोधकानि। कर्माङ्गत्वं च कर्तृसंस्कारद्वारेणैव

वाच्यम् । अन्यथाऽसंभवात् । विद्यया कर्तृसंस्कारश्च जीवब्रह्मणोः स्वरूपैक्य एव संभवति । जीवब्रह्मणोर्भेदे विद्याविषयस्य ब्रह्मणो यज्ञादिकर्तृत्वाभावात् । तथा च लिङ्गोपबृंहणेन तत्त्वमसीति सामानाधिकरण्यं स्वरूपैक्यपरमेवेत्यवसीयत इत्याशयः ।

६८२–४ साधारणत्वेनेति । असाधारणस्यैवाङ्गत्वाल्लौकिकवैदिकसाधारणस्य कर्तुर्यज्ञादिकर्माङ्गत्वाभावः । कर्तुरेव कर्माङ्गत्वाभावे तद्द्वारा कर्माङ्गत्वं विद्यायाः सुतरां न संभवतीति भावः ।

—५ देहाद्व्यतिरिक्तत्वेपीति । विद्याविषयीभूतश्चात्मा देहाद्यतिरिक्त एवेति तादृशस्यात्मनो यज्ञादिकर्मासाधारणत्वेनाङ्गत्वात्तद्द्वारा विद्यायाः कर्माङ्गत्वं सुवचमित्याशयः ॥ २ ॥

—१३ तद्विज्ञानायोपगतानिति । अनेनात्र विद्यायाः प्रसङ्गः सूचितः । तथा च विद्यायाः प्रसङ्गेपि कर्मणोनुष्ठानदर्शनात्कर्मणः प्राधान्यं सिध्यति ॥ ३ ॥

६८३–३ विद्यया करोतीति । विद्यापूर्वकं कर्म करोतीत्यर्थः । अत्र विद्ययेति तृतीयया विद्यायाः कर्माङ्गत्वं गम्यते ।

—६ बलीयसीति । प्रागुक्तम् (विवृति–३०४ प. ३) ॥ ४ ॥

—९ तमिति । समन्वारम्भणं स्पर्शः । संबन्ध इति यावत् । तं देहाद्देहान्तरं गच्छन्तं जीवं विद्याकर्मणी स्पृशत इत्यर्थः ॥ ५ ॥

—१४–६ आचार्यकुलादिति । गुरोः कर्मातिशेषेण कर्मावशिष्टकालेन गुरुशुश्रूषानवरुद्धेन कालेनाचार्यकुलाद्वेदमधीत्याभिसमावृत्य समावर्तनं कृत्वा गुरुकुलान्निवृत्य न्यायतो दारानाहृत्य कुटुम्बे स्थित्वा शुचौ देशे स्वाध्यायमधीयानो गार्हस्थ्यविहितकर्माणि कुर्वाण इत्यर्थः । अध्ययनवत इति । अध्ययनं चार्थावबोधपर्यन्तमेवेति प्रागुक्तत्वेन (श्रीभाष्य–पृ. ३ प. १६) विद्यावतः कर्मविधानं सिध्यति । वेदशिरोभूतोपनिषदर्थज्ञानस्यैव विद्यात्वादिति पूर्वपक्ष्याशयः । सिद्धान्ते त्वर्थज्ञानाद्विद्या भिन्नैवेति बोध्यम् ॥ ६ ॥

—२२–४ कुर्वन्नेवेह कर्माणीति । अत्र कर्मपदेन फलसाधनभूतं स्वतन्त्रं कर्म गृह्यत इति पूर्वपक्ष्याशयः । तादृशकर्मणश्च ज्ञानेन विरोधात्कुर्वन्नेवेत्यनेन ज्ञानाद्यावृत्तिः सिध्यतीति बोध्यम् । अवगम्यत इति । कृत्स्नस्यायुषः क्रतुशेषत्वात्तन्मध्ये प्राप्तमन्यत्सर्वं तस्य शेषभूतमिति कर्मण एव फलमवगम्यत इत्यर्थः (श्रु.) ॥ ७ ॥

६८४–९ अशुद्धे शुद्धेपीति । बद्धे मुक्ते च जीवात्मन्यसंभावनीया येनन्ता गुणास्तदाकरस्येत्यर्थः ।

६८५-९ गन्धोपि नास्तीति । तथा च विद्याविषयस्य परमात्मनो यज्ञादिकर्तृत्वाभावेन विद्यायाः कर्माङ्गत्वासंभवाद्विद्यातः पुरुषार्थवचनं नार्थवाद इति बोध्यम् ॥ ८ ॥

—१३ तुल्यमिति । यथा विद्यायाः कर्माङ्गत्वसाधकं ब्रह्मविदां कर्मानुष्ठानं दृश्यते तथा विद्यायाः कर्मानङ्गत्वसाधकं ब्रह्मविदां कर्माननुष्ठानमपि दृश्यते । अतो ब्रह्मविदां कर्मानुष्ठानदर्शनमनैकान्तिकमनियतमित्यर्थः ॥ ९ ॥

६८६-१० न हीति । यत्करोति तद्विद्ययेति यदि संबन्धः स्यात्तदा विद्याया अङ्गत्वं विधीयेत । न हि तथा विधीयते । किं तु यदेव विद्यया करोतीति विद्यापूर्वकं कर्म प्रसिद्धवन्निर्दिश्य वीर्यवत्तरत्वं विधीयते । तथा प्रसिद्धिश्रोद्गीथाद्युपासनानां कर्माङ्गभूतत्वेन तत्र वर्तत इति संनिहितोद्गीथविद्याविषयैव यदेव विद्ययेति श्रुतिरिति भावः ॥ १० ॥ ११ ॥

६८७-४ आधानवदिति । यथाग्नीनादधीतेत्यत्राधानेनाग्नेः संपाद्यत्वमात्रमुक्तं न तु तस्योत्तरक्रतौ विनियोग उच्यते तथात्रापीत्यर्थः (श्रु.) ॥१२॥१३॥

६८८-६ ईशावास्यमिति । ईश्-शब्दस्तृतीयान्तः । ईशा ईश्वरेण । ईशेनेश्वरेणावास्यमिति समासो वा ॥ १४ ॥

—१२ कामकारेणेति । अत्र सूत्रे गार्हस्थ्यत्यागमधीयत इत्यध्याहारः ॥ १५ ॥

६८९-३ अधीयत इति । भिद्यत इति श्रुतौ क्षीयन्त इति पदेन कर्मोपमर्दोर्थतोधीत इति भावः ॥ १६ ॥

—१३ त्रयो धर्मस्कन्धा इति । धर्मस्कन्धा धर्माश्रयाः ॥ १७ ॥

६९०-७ अन्यार्थमिति । ब्रह्मोपासनस्तुत्यर्थमित्यर्थः (श्रु.) ।

ये चेम इति । यद्यप्यत्रारण्ये तप उपासत इत्युक्त्योर्ध्वरेतस आश्रमाः प्रतिपाद्यन्ते तथापि नात्र तेषां विधानम् । किं तु तेर्चिषमभिसंभवन्तीति देवयानमार्गस्यैवेति भावः ॥ १८ ॥

—२१ सर्वैः शब्दैरिति । तथा च गार्हस्थ्याश्रमस्यैवात्र संकीर्तनं नाश्रमान्तराणाम् । संकीर्तनाभावे च प्राप्तिपूर्वकत्वं प्रत्याशा दूरोत्सारितैवेति शङ्काशयः ।

६९१-१ परिहरति-त्रय इति । एकस्य गार्हस्थ्याश्रमस्यैवात्र संकीर्तनमित्याग्रहे विभागत्रयानुपपत्तिः स्फुटैव ।

—२२ ये चेम इति । यद्यप्यत्र श्रुतौ देवयानस्यैव विधानं तथापि तदर्थं योत्र वानप्रस्थपारिव्राज्ययोराश्रमयोर्ये चेत्यनुवादः कृतस्तस्य प्राप्तिपूर्वकत्वाद्विधानमवश्यमङ्गीकरणीयम् । तथा च पूर्वपक्षिणा ये चेत्यादि प्रागुक्तं (श्रीभाष्य-पृ. ६९० प. ७) निरस्तमिति भावः ॥ १९ ॥

६९२–८ यथा दिष्टेति । महापितृयज्ञे प्रेताग्निहोत्रे च स्रुचि प्रक्षिप्तं हविराहवनीयं प्रति यदा नीयते तदा तस्य हविषोधस्तात्समिधं धारयन्ननुद्रवेदिति विहिताधोधारणस्तावकतयोपरि हि देवेभ्यो धारयतीत्यस्य वाक्यस्यैकवाक्यत्वभानेपि दैवे होमे स्रुग्दण्डोपरि समिद्धारणे विधिरेवायमपूर्वत्वादाश्रीयत इति भावः ।

—१० विधिस्त्विति । मृताग्निहोत्रे श्रूयते । अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीति । तत्रोपरिधारणमनुवादः । हविष आच्छादनस्याचारप्राप्तत्वादिति प्राप्त आच्छादनासमर्थत्वात्स्रुग्दण्डे समिधमुपसंगृह्येति च श्रवणेनाच्छादनासंभवादप्राप्ते विधिरिति सिद्धान्त इति तत्सूत्रतात्पर्यम् ।

—१६ ऋणश्रुतिरिति । त्रिभिर्ऋणैर्ऋणवान् जायत इत्यृणश्रुतिः । यावज्जीवमग्निहोत्रं जुहुयादिति यावज्जीवश्रुतिः । वीरहा वा एष देवानां योग्निमुद्वासयत इत्यपवादश्रुतिः ।

—१९ स्वस्वाश्रमेति । तथा च स खल्वेवं वर्तयन्यावदायुषमित्यादिका आश्रमविशेषधर्मानुवृत्तिपराः श्रुतयोपि तत्तदाश्रमिणां तत्तद्धर्मानुवृत्तिपरा न त्वाश्रमान्तरधर्माणां ब्रह्मविद्याङ्गत्वविरोधिन्य इति व्यासार्यैरुक्तम् ॥ २० ॥ (१)

६९३–२ स एष इति । भूतानां पृथिवी रसः । पृथिव्या भूताधारत्वात् । पृथिव्या आपो रसः । जलस्य पृथिवीप्रकृतिभूतत्वात् । अपामोषधयो रसः । ओषधीनां जलपरिणामत्वात् । ओषधीनां पुरुषो रसः । पुरुषस्यौषधिपरिणामभूतान्नपरिणामत्वात् । पुरुषस्य वाग्रसः । वाचः पुरुषोपकारकत्वात् । वाच ऋग्रसः । वाङ्मु ऋचो गम्भीरार्थकत्वात् । ऋचः साम रसः । साम्नो गीतिसारत्वेनर्क्षु प्राधान्यात् । साम्न उद्गीथो रसः । उद्गीथ ओंकारः । साममध्ये तस्य विशेषश्राव्यत्वात् । स एष ओंकारः पृथिव्यादीनामुत्तरोत्तररसानामतिशयितरसः । परस्य ब्रह्मणोर्ध स्थानमर्हतीति परार्ध्यः । ब्रह्मवदोंकारस्याप्युपास्यत्वात् । छन्दसि च (पा. सू. ५।१।६७) इति सूत्रेण परार्धशब्दाद्यप्रत्ययः । स च पृथिव्यादिक्रमेणाष्टम इति श्रुत्यर्थः ।

—५ अत्र प्रतिपादितमिति । एतदधिकरणसिद्धान्तं गृहीत्वैव प्राक् (३।३।४१) तत्संबन्धिविचारः कृत इत्यर्थः ।

—१० इयमेवेति । पृथिव्येवेत्यर्थः । अत्र यथा जुह्वाः पृथिवीत्वं स्वर्लोकस्य चाहवनीयत्वं प्रतिपादितं स्तुतिपरं भवति तद्वत् ।

—१५ न हीति । तथा च प्रमाणान्तरप्राप्तगुणानुवादेनेयं स्तुतिर्न संभवति । गुणस्यान्यतोप्राप्तत्वात् । अप्राप्तगुणविधानेनापीयं स्तुतिर्न संभवति ।

विधिप्रत्ययाश्रवणात् । उद्गीथादौ रसतमत्वादिकत्वस्यायोग्यत्वादयोग्यार्थस्य च विधातुमशक्यत्वात्तद्विधानेन स्तुत्यनुपपत्तेश्च ॥ २१ ॥

६९४-३ **भावशब्दाच्चेति** । भावः क्रिया । तद्वाचकः शब्दश्चात्र विधिप्रत्ययवुक्तो विवक्ष्यते । पूर्वसूत्र उद्गीथादिविधेरभाव उक्तः । अत्र सूत्रे तूपासनविधेः सद्भाव उच्यत इति बोध्यम् ॥ २२ ॥ (२)

—८ **पारिप्लवार्था इति** । पारिप्लवो नाम यज्ञ ऋत्विग्भिः क्रियमाणमाख्यानशंसनम् ।

—११ **विद्याविशेषेति** । विद्याविधेः स्तावकतया शेषभूतानीत्यर्थः । आख्यानेषु हि विद्यायां लोकानां प्ररोचनाय विद्यामाहात्म्यं प्रतिपाद्यत इति तेषां स्तावकत्वम् ॥ २३ ॥

—२० **तथा चेति** । उपबन्धोन्वयः ।

६९५-२ **यथेति** । हिरण्यदक्षिणात्ववाक्येनैकवाक्यतयान्वयात्सोरोदीदित्येवमादेः कर्मविध्यर्थत्वमित्यर्थः (श्रु.) ॥ २४ ॥ (३)

—५ **अत एवेति** । अत एवोर्ध्वरेतःस्वाश्रमेषु विद्यावत्त्वश्रुतेरेव विद्याग्न्याधानाद्यनपेक्षेति सूत्रार्थः ॥ २५ ॥ (४)

—२२ **न प्रतिपादयतीति** । श्रुतौ यज्ञेन विदन्तीति यद्युच्येत तर्हि यज्ञादीनां ज्ञानसाधनत्वमवगम्येत । श्रुतौ तु विविदिषन्तीत्युच्यते । तत्र चेच्छार्थकसन्प्रत्ययस्य प्रयोगाद्यज्ञादीनां ज्ञानेच्छासाधनत्वमवगम्यते न तु ज्ञानसाधनत्वमिति पूर्वपक्ष्याशयः ।

—२३ **कर्मापेक्षैवेति** । सूत्रे चशब्दोवधारणार्थ इति भावः । सूत्रार्थः प्रागुक्तः (विवृति—पृ. १० प. ४)। यद्यपि श्रुतौ विविदिषन्तीत्युच्यते न तु विदन्तीति तथापीच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमेव यज्ञादिकर्मसाधनकमित्यवगम्यत इति भावः ॥ २६ ॥ (५)

६९७-१० **आन्तरेति** । मनःप्रवृत्तिपूर्वकहस्तपादादीन्द्रियव्यापाररूपं हि यज्ञादि कर्म । तदनुष्ठानं च विद्यासाधनत्वेन गृहस्थैरवश्यं कर्तव्यमिति तदानीमिन्द्रियादिव्यापारविरतिरूपशमाद्यनुष्ठाने गृहस्थस्य सामर्थ्यमेव नास्तीति न गृहस्थानां विद्यार्थं शमाद्यनुष्ठानम् । यद्यपि श्रुतौ शमादीनां विद्यायां विनियोगः प्रतिपाद्यते तथापि स ऊर्ध्वरेतःसु कर्मरहितेषु भविष्यतीति पूर्वपक्ष्याशयः ।

—१५ **चित्तसमाधानेति** । विद्याया एकाग्रतानिष्पाद्यत्वाच्छमादिभिरेव विद्यानिष्पत्तिः । यज्ञादिविहितकर्माण्यपि पापक्षालनद्वारेणैकाग्रतामापाद्यैव विद्यासाधनभूतानि भवन्तीति बोध्यम् ॥ २७ ॥ (६)

६९८–५ **न ह वा अस्येति** । प्राणविद्यानिष्ठस्याभक्ष्यभक्षणदोषो नास्तीति श्रुत्यर्थः। यतश्चाल्पशक्तेः प्राणविद्यानिष्ठस्यायं दोषो नास्ति ततोतिशयितशक्तेर्ब्रह्मविदः स दोषो नास्त्येवेति सिद्धं भवतीति पूर्वपक्ष्याशयः।

—१४–९ **मटचीहतेष्विति** । मटच्यश्मवृष्टिः । इभ्यो हस्तिपः । इभं हस्तिनमर्हतीति व्युत्पत्तेः। दण्डादिभ्यो यः (पा. सू. ५।१।६६) इति पाणिनिसूत्रेण यप्रत्ययः । कुल्माषो माषविशेषः । **अनुपानप्रतिग्रहमिभ्येनार्थितः** । जलं गृहाणेतीभ्येन प्रार्थितः ॥ २८ ॥

६९९–८ **अबाधाच्चेति** । पूर्वसूत्रे ब्रह्मविदश्चाक्रायणस्याचारः प्रदर्शितः। अत्र सूत्रे तु ब्रह्मविद्विषयकं वचनमेव प्रदर्श्यत इति बोध्यम् ॥ २९ ॥ ३० ॥

७००–२ **तस्माद्ब्राह्मण इति** । ब्राह्मणोत्राविद्वान्वा प्राणविद्यानिष्ठो वा ब्रह्मविदग्रेसरो वा गृह्यते । ब्राह्मणशब्देन सामान्यतो ब्राह्मणत्वजातिविशिष्टस्याभिधानात् । ब्रह्मविदामनापद्यपि सर्वान्नानुमतौ त्वेतद्विरोधः स्पष्ट एवेति भावः ॥ ३१ ॥ (७)

—८ **नित्यानित्येति** । अग्निहोत्रादिकर्मणो यावज्जीवमनुष्ठानं क्रियमाणं नित्यम् । मोक्षेच्छया विद्योत्पत्त्यर्थं तु कदाचित्क्रियमाणमनित्यम् । अतो नित्यानित्यसंयोगविरोध इत्यर्थः ॥ ३२ ॥

—१८ **विनियोगेति** । अङ्गत्वबोधको विधिर्विनियोगः । स चात्रैकस्यैव कर्मणो यावज्जीवमिति तमेतमिति च पृथक्पृथगुपलभ्यत इति न नित्यानित्यसंयोगविरोधः । यथाग्निहोत्रादिकर्मणो जीवन्मनुष्योधिकारी भवतीति नित्यत्वम्। स्वर्गकामोधिकारी भवतीति च कदाचित्क्रियमाणतयाऽनित्यत्वम् । परं तु यावज्जीवमग्निहोत्रं जुहोत्यग्निहोत्रं जुहुयात्स्वर्गकाम इति पृथक्पृथग्विनियोगान्न विरोधस्तद्वत् ॥ ३३ ॥

७०१–४ **न कर्मेति** । तथा च न ज्ञानार्थिनः कर्मद्वयानुष्ठानमिति बोध्यम् ॥ ३४ ॥ ३५ ॥ (८)

—१६ **आश्रमधर्मेति** । आश्रमधर्मरूपेतिकर्तव्यता यस्यास्तत्त्वादित्यर्थः । **विद्योपासना** । सा च कथं कर्तव्येत्याकाङ्क्षायामाश्रमधर्मैः पापं प्रक्षाल्य चित्तैकाग्र्यं संपाद्य कर्तव्येति विद्याया आश्रमधर्मैतिकर्तव्यताकत्वं बोध्यम् ।

७०२–६ **अनैकान्तिकानामिति** । अनियतानामित्यर्थः । दानादयो ह्यमुकाश्रम एव कर्तव्या इति न नियताः ॥ ३६ ॥ ३७ ॥

—१७ **विशेषेति** । विशेषैरनुग्रह इति समासः ।

—१९ **तपसेति** । कायक्लेशादिलक्षणेन तपसा स्त्रीसङ्गराहित्यलक्षणेन ब्रह्मचर्येणास्तिबुद्धिलक्षणया श्रद्धया प्रत्यगात्मविद्यया परमात्मानमुपास्स्वेत्यर्थः ॥३८॥

७०३-४ भूयोधर्मकेति । भूयोधर्मकानुष्ठानसामर्थ्ये सत्यपि यद्यल्पधर्मकानुष्ठानं क्रियते तदा न तद्भूयोधर्मकमिव कार्यं करोति । असामर्थ्ये त्वल्पधर्मकमपि भूयोधर्मकमिव कार्यं करोत्येवेति बोध्यम् ।

—७ निवृत्तेति । आपत्तेर्लक्षणमेतत् । ब्रह्मचर्यान्निवृत्तत्वाद्ब्रह्मचर्याश्रमाभावो बोधितः । मृतभार्यत्वात्पुनर्दाराणामलाभाच्च गार्हस्थ्याश्रमाभावो बोधितः । वैराग्यानुदयाच्च पारिव्राज्याभावो बोधितः । इह जन्मनि यद्विषयवैतृष्ण्यं तदभावोत्रावैराग्यशब्देनोच्यते । यच्च लोकान्तरजन्मान्तरभोगनैरपेक्ष्यरूपं विद्योपयोगि वैराग्यं तदस्त्येवेत्यनाश्रमिण आपत्तौ विद्याधिकारः सिद्धान्ततो न विरुध्यत इति बोध्यम् ॥ ३९ ॥ (९)

—११ नैष्ठिकेति । नैष्ठिको ब्रह्मचारिविशेषः । वैखानसो वानप्रस्थः । परिव्राजकः संन्यासी । तेषामाश्रमास्तेभ्य इत्यर्थः ।

७०४-१-३ तृतीय इति । त्रिविधब्रह्मचारिमध्ये तृतीयो नैष्ठिक इत्यर्थः । अत्रात्यन्तमवसादयन्नित्यनेन नैष्ठिकस्य ब्रह्मचर्याश्रमात्प्रच्यवो नास्तीति सूचितम् । अरण्यमिति श्रुतौ न पुनर्नेयादित्यनेन वानप्रस्थाश्रमात्पुनरावृत्तिर्नास्तीति सूचितम् । संन्यस्येति श्रुतौ न पुनरावर्तयेदित्यनेन संन्यासाश्रमात्प्रच्यवो नास्तीति सूचितम् ॥ ४० ॥

—७ अधिकारलक्षण इति । लक्षणशब्दोध्यायवाची । पूर्वमीमांसायां षष्ठेधिकाराध्याय इत्यर्थः । तत्रावकीर्णिपशुश्च तद्वत् (जै. सू. ६।८।२४) इति सूत्रितम् । अवकीर्णी भ्रष्टब्रह्मचर्यः । तेन निर्ऋतिदेवतामुद्दिश्य गर्दभपश्वालम्भनं कार्यमिति तस्य प्रायश्चित्तमुक्तम् ।

—११ न चेति । अनुमीयतेनेनेत्यनुमानं स्मृतिः । स्मृतिर्हि स्वार्थबोधकश्रुत्यनुमानेनैव प्रमाणभूता भवति ॥ ४१ ॥

—२० उपपूर्वमिति । पूर्वपक्षसूत्रमेतत् । भ्रष्टब्रह्मचर्यस्य प्रायश्चित्तेन ब्रह्मविद्याधिकारोस्तीति पूर्वपक्ष्याशयः ॥ ४२ ॥

७०५-१३ न संभवतीति । तस्य प्रायश्चित्तं तु परलोकगमनप्रतिबन्धनिवारकं भविष्यतीति भावः ॥ ४३ ॥ (१०)

—२० स्वामिन इति । स्वामिनो यजमानस्योद्गीथाद्युपासने कर्तृत्वं न ऋत्विजः । यजमानस्यैव फलश्रवणादित्यात्रेयो मन्यत इति सूत्रार्थः । पूर्वपक्षसूत्रमेतत् ।

७०६-४ न च गोदोहनादिवदिति । प्रणयनस्याध्वर्युकर्तृकत्वात्तदाश्रयस्य गोदोहनस्योपादानं यजमानेन फलाश्रयभूतेनापि कर्तुमशक्यम् । अत्र तु शक्य-

त्वात्फलाश्रय एव कर्तेत्यर्थः (श्रु.)। गोदोहनं गोदोहनाधारः पात्रविशेषः। अधिकरणे ल्युट्। तेन पात्रेण जलानयनं प्रणयनम् ॥ ४४ ॥

७०६–१७ शक्तयशक्ती इति। गोदोहनोपादानस्यार्त्विक्कर्तृकत्वं न यजमानस्याशक्तिमूलकं किं त्वृत्विक्परिक्रयमूलकम्। तथा चोद्गीथाद्युपासने यजमानस्य शक्तावप्यृत्विक्परिक्रयसद्भावादृत्विक्कर्तृकत्वमेवोद्गीथाद्युपासनस्येति भावः।

—१८ ऋत्वधिकृताधिकारत्वादिति। क्रतौ योधिकृतस्तस्यैवोपासनेधिकारस्तत्त्वादित्यर्थः।

७०७–२ ऋत्विक्कर्तृकत्वाश्रवणादिति। दहराद्युपासनानां कर्माङ्गत्वाभावादिति भावः। प्रयोक्तरि कर्तरि। फलिकर्तृकत्वं फलाश्रयकर्तृकत्वम् ॥ ४५ ॥ (११)

—७ तस्मादिति। श्रुतेरर्थः प्रागुक्तः (विवृति–पृ. ३०० प. १८)। बाल्यं चेत्यादेस्त्वयमर्थः–बाल्यं पाण्डित्यं च निर्विद्य लब्ध्वा मुनिः स्यान्मननशीलः स्यात्। स्यादित्यध्याहारः। ध्यानविच्छेददशायामप्यत्यन्तविषयोन्मुखत्वराहित्याय शुभाश्रयवस्तुसंशीलनं कार्यमिति यावत्। एतदेवात्र मननमुपासालम्बनभूतस्य शुभाश्रयस्य वस्तुनः पुनः पुनः संशीलनं भावनारूपम्। उपास्यवस्तुविषयाभ्यास इति यावत्। एतदेव प्रकृष्टमननमुच्यते। न तु मन्तव्य इति विहितं श्रवणप्रतिष्ठार्थं मननमत्र गृह्यते। तस्य पाण्डित्यशब्देनोक्तत्वादिति सिद्धान्तः। पूर्वपक्षिमते तु पाण्डित्यशब्देनोक्तमेव मननं मुनिरित्यनेन गृह्यते। अत एव च मुनिरिति न विधिः किं त्वनुवादः। स्यादिति च नाध्याहारः।

—१३ सहकार्यन्तरेति। विधीयत इति विधिरिति व्युत्पत्त्या विधानविषयीभूतमर्थः। तच्च यज्ञादि कर्म। आदिशब्दाच्छमादिसंग्रहः। अन्यत्सहकारि सहकार्यन्तरम्। तच्च तद्विधिश्चेति कर्मधारयः। तद्वतो विद्यावतः। यथा विद्यावतो यज्ञादि विद्यायाः सहकारि विधानविषयीभूतं भवति तथा विद्याया अन्यत्सहकारि पक्षेण तृतीयं प्रकृष्टमननरूपं मौनमपि विधानविषयीभूतं भवति। यद्यपि बाल्यमेकम्। पाण्डित्यं च द्वितीयम्। तदेव च चिन्तनरूपं मौनमिति द्वितीयमेव मौनं न तु तृतीयं तथापि मौनशब्दस्य प्रकृष्टमननरूपोर्थो गृह्यत इति पक्षे तत्तृतीयं भवति। अयमेव मौनशब्दस्य प्रसिद्धोर्थः। मुनेर्भावो मौनम्। मुनिश्च प्रकृष्टमननकर्ता व्यासादिरेव प्रसिद्ध इति बोध्यम् ॥ ४६ ॥

७०९–१० अभिसमावृत्येति। अभिसमावृत्य समावर्तनं कृत्वा गुरुकुलान्निवृत्य न्यायतो दारानाहृत्य कुटुम्बे स्थित्वा गार्हस्थ्यविहिते कर्मणि निष्ठितः शुचौ देशे स्वाध्यायादि नित्यकर्म कुर्वाण एवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न ततः पुनरावर्तत इत्यर्थः। अत्र किमर्थं गृहस्थाश्रमेणैवोपसंहारः कृतो नाश्रमान्तरेणेति शङ्काशयः ॥ ४७ ॥

७१०-६ **मौनवदिति** । यथा कुटुम्बे शुचौ देश इति श्रुतौ गृहस्थधर्मेणोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थस्तथा ब्राह्मणः पुत्रैषणाया इति श्रुतौ संन्यासाश्रमधर्मोपदेशोपि सर्वाश्रमधर्मप्रदर्शनार्थः । कुतः । ब्रह्मविद्याप्रकरणे यथा संन्यासाश्रमधर्मस्य भिक्षाचरणपूर्वकस्य मौनस्योपदेशः क्रियते तथेतरेषामाश्रमधर्माणामप्युपदेशादिति सूत्रार्थः ।

—११ **उपपादितश्चेति** । अनुष्ठेयं बादरायण इति सूत्रे (३।४।१९) इति शेषः ॥ ४८ ॥ (१२)

७११-१ **कामचारादिकमिति** । बालो ह्यनुपनीतो यथेच्छं निषिद्धमपि वस्तु सेवत इति विदुषापि तथैव कर्तव्यमथ वा दम्भादिरहितत्वम् । दम्भादिरहितत्वं च स्वविद्यामाहात्म्यस्याप्रकटीकरणम् ।

—३ **नियमशास्त्राणीति** । ब्राह्मणः सुरां न पिबेदित्यादिनिषेधशास्त्राणि विद्वद्विषये बाल्येन तिष्ठासेदिति विशेषविधिना बाध्यन्त इति तानि निषेधशास्त्राण्यविद्वद्विषयकाण्येवेति पूर्वपक्ष्याशयः ॥ ४९ ॥ (१३)

—१४ **तत्राभ्युदयफलेति** । मुक्तिफला त्वग्रिमसूत्रे विचार्यत इति बोध्यम् ।

—१९ **विलम्बहेत्वभावादिति** । पुण्यकर्मानन्तरं फलप्राप्तौ जायमानायां मध्ये किंचिदपि प्रतिबन्धकं नास्त्येवेति पूर्वपक्षी मन्यते । प्रतिबन्धकसंभवोस्तीति सिद्धान्तिमतम् । अत एवोद्गीथविद्यायुक्तस्य कर्मणः फलप्राप्तौ जायमानायां प्रतिबन्धो न भवतीति श्रुतौ प्रतिपाद्यते । सर्वत्रैव प्रतिबन्धाभावे तु विशेषतस्तत्र प्रतिबन्धाभावोक्तेरसंगतिः स्यात् ॥ ५० ॥ (१४)

७१२-१४ **प्रबलत्वादिति** । मुक्तिफलविद्यासाधनीभूतस्य कर्मणो भगवत्प्रीत्यतिशयजनकत्वेन प्रबलत्वमिति शङ्काशयः । पूर्वकृतानां ब्रह्मविदपचाराणां ततोपि प्रबलत्वमित्युत्तराशयः ॥ ५१ ॥ (१५)

अथ चतुर्थाध्यायस्य प्रथमः पादः प्रारभ्यते ।

७१३-३ **आवृत्तिरिति** । सूत्रार्थः प्रागुक्तः (विवृति-पृ. १३ प. २०) ।

—५-७ **ब्रह्मविदिति** । आसु श्रुतिषु विद्धातुः केवलज्ञानार्थक इति पूर्वपक्षी मन्यते । उपासनार्थक इति सिद्धान्ती मन्यते । **ब्रह्मैव भवतीति** । अत्र न मुक्तस्य ब्रह्मणा सहैक्यं प्रतिपाद्यते । किं तु सादृश्यम् । ब्रह्मसदृशो भवतीत्यर्थः । सादृश्यं च भेदकाकारप्रहाणकृतम् ।

—१२ **अवघातादिवदिति** । यथा तुषनिवृत्तिपर्यन्तं तण्डुलावघातः क्रियते तथा ब्रह्मणः प्रत्यक्षज्ञानपर्यन्तं श्रवणं कर्तव्यमिति शङ्काशयः ।

७१४–२ भाति चेति । इयं श्रुतिर्यस्तद्वेदेति च श्रुतिः प्राक् (विवृति–पृ. १३ प. २६, पृ. १४ प. ४) व्याख्याता ॥ १ ॥

७१५–१ तद्रूपेति । ध्येयस्वरूपज्ञाने चैकाकारा या ध्येयेतरसंबन्धरहिता संततिस्तद्ध्यानम् । ध्येयस्वरूपप्रत्ययैकतानता ध्यानमिति यावत् । तच्च यमनियमासनप्राणायामप्रत्याहारधारणारूपैर्ध्यानात्पूर्वैः षड्भिरङ्गैर्निष्पाद्यत इत्यर्थः । यमादीनां स्वरूपं प्रागुक्तम् (विवृति–पृ. ६५ प. ३३) ॥ २ ॥ (१)

—११ यथावस्थितमिति । जीवब्रह्मैक्यत्वेनावस्थितं भिन्नत्वेनैवोपास्यमित्यर्थः ।

—१६ आत्मेत्येवेति । आत्मशरीरशब्दौ हि ससंबन्धिकार्थप्रतिपादकौ । यस्य य आत्मा तत्तस्यात्मनः शरीरम् । यस्य यच्छरीरं स तस्य शरीरस्यात्मेति । जीवश्च ब्रह्मणः शरीरभूत इति जीवेन स्वस्यात्मनेत्येवंरूपेण ब्रह्मोपास्यमिति भावः ।

७१६–७ तज्ज्ञत्वादिति । इदं जीवजडस्वरूपं जन्मपरमात्मनः सकाशादेव जायते । परमात्मन्येव लीयते । परमात्मनैव चेष्टते । परमात्मनैवास्य नियमनं क्रियते । परमात्मन एव चेदं शरीरमिति परमात्मनः सर्वनिरूपितात्मत्वं सिध्यति ।

—१० अहमित्येवेति । यथा मनुष्यशब्दवाच्यस्य शरीरस्य जीवप्रकारतैकस्वभावतया प्रकारिणि जीवे मनुष्य इति बुद्धेर्मनुष्यशब्दस्य च पर्यवसानं तथाहंशब्दवाच्यस्य जीवस्य परमात्मप्रकारतैकस्वभावतया प्रकारिणि परमात्मन्यहमिति बुद्धेरहंशब्दस्य च पर्यवसानं युक्तम् ।

—११ सर्वबुद्धीनामिति । यद्यप्यहंशब्दवाच्यस्य जीवस्य परमात्मशरीरत्वेनाहंशब्दस्य ब्रह्मणि पर्यवसानेहं वै त्वमसीत्यस्य वाक्यस्योपपत्तावपि त्वं वाहमस्मीति वाक्यं नोपपद्यत इति परस्परव्यतिहारोनुपपन्नस्तथाप्यहंत्वमादिसर्वशब्दानां ब्रह्मरूपैकवस्तुनिष्ठत्वेन कस्यापि शब्दस्य केनापि शब्देनोच्यमानं सामानाधिकरण्यं न विरुध्यत इति त्वं वाहमस्मीति वाक्यस्योपपत्तिरित्याशयः ।

—१४–५ एवं चार्थेति । जीवब्रह्मणोरेकत्वप्रतिपादकश्रुतेः पृथक्त्वप्रतिपादकश्रुतेश्च तात्पर्यभेदेन विरोधो नास्तीत्यनेन ग्रन्थेनोच्यते । अकृत्स्न इति । अकृत्स्नोऽपूर्णः । गुणमात्रपरत्वे च न पूर्तिः । विशिष्ट एव पूर्णः । ईदृशापूर्तिवचनं गुणगुणिभेदे सत्येवोपपद्यत इत्यर्थः (श्रु.) ॥ ३ ॥ (२)

७१७–९ प्रतीकोपासनेष्विति । अब्रह्मणि ब्रह्मदृष्ट्योपासनं प्रतीकोपासनम् । प्रतीकशब्दोऽङ्गपर्यायः । अङ्गे हि राजपुरुषादावङ्गिदृष्ट्या स्वागतादिकं यथा क्रियते तथैवात्रेति बोध्यम् ॥ ४ ॥

७१७-१८ ब्रह्मैवोपास्यमिति । ब्रह्मण्येव मनोदृष्टिः कर्तव्या न तु मनसि ब्रह्मदृष्टिरिति पूर्वपक्ष्याशयः । ब्रह्मण उपास्यत्वे तु तस्यात्मत्वेनानुसंधानमावश्यकमेव ।

७१८-४ अभ्युदयायेति । किं च मनो ब्रह्मेति वाक्ये मनसः प्राथम्येनोद्देश्यत्वबोधनान्मनस्येव ब्रह्मदृष्टिरिति मन एवोपास्यम् । तदुक्तं यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमिति । यद्यपि मनआदीनामचेतनानामल्पशक्तीनामुपास्यत्वाश्रयणमन्याय्यं तथापि तदभिमानिदेवतानामुपास्यत्वाश्रयणमन्याय्यं न भवतीति भावः ॥ ५ ॥ (३)

—११ अफलेभ्य इति । अफलसाधनेभ्य इत्यर्थः । किं च य एवासौ तपतीति वाक्येदःशब्दवाच्यस्यादित्यस्योद्गीथापेक्षया प्राथम्यात्तस्यैव य इति यच्छब्दयोगाच्चोद्देश्यत्वमवगम्यत इत्यादित्य एवोद्गीथदृष्टिरिति पूर्वपक्ष्याशयः ।

—१६ अतस्तदृष्टिरिति । तथा च य एवासौ तपतीति वाक्य उद्गीथस्यैवोद्देश्यत्वम् । यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमिति तु प्रायोवादो न तु नियमः । अत एव वृद्धिरादैच् (पा. सू. १।१।१) इति पाणिनिसूत्रे वृद्धिशब्दस्य प्राथम्येपि नोद्देश्यत्वमिति बोध्यम् ॥ ६ ॥ (४)

७१९-३ स्थितिगत्योरिति । यथासीनस्योपविशतः पश्चार्धः कटिपश्चाद्भागो भूमौ स्पृष्टो भवति तथा तिष्ठतो न भवति । स्थितिर्हि केवलपादतलाभ्यां भूमिमवलम्ब्योर्ध्वमवस्थानम् । तत्र पश्चार्धधारणे प्रयत्नो भवत्येव । गतौ तु प्रयत्नः स्पष्ट एव ॥ ७ ॥

—६ ध्यानादिति । भावप्रधानो निर्देशः । ध्यानत्वादित्यर्थः ॥ ८ ॥

—१३ ध्यायन्तीवाप इति । कूपादिगतं स्थिरं जलमत्राप्शब्देन गृह्यते । नद्यादिगतस्य जलस्याचलत्वासंभवात् ॥ ९ ॥ १० ॥

७२०-५ यत्रैकाग्रतेति । न चास्य सूत्रस्य प्रकृतेनासीनाधिकरणेन संबन्धो नास्तीति वाच्यम् । आसनसहपठितो देशादिरप्येकाग्रतासिद्ध्यर्थमपेक्ष्यते किं पुनरासनमित्याशयेनैतत्सूत्रप्रणयनात् ॥ ११ ॥ (५)

—११ आ प्रयाणादिति । आवृत्त्यधिकरणे (४।१।१) वेदनस्यासकृदावृत्तिः कर्तव्येति निर्णीतम् । सा चावृत्तिरेकस्मिन्नेवाहनि कर्तव्याथ वा मरणपर्यन्तमिति विचारोत्र क्रियते ॥ १२ ॥ (६)

—७२१-१ उत्तरपूर्वाघयोरिति । उत्तरस्य ब्रह्मसाक्षात्कारावस्थोपासनलाभानन्तरकालभाविनोघस्यपापस्यासंभवादश्लेषोऽसंबन्धः पूर्वकृतस्य च पापस्य विनाशः श्रुतौ प्रतिपाद्यत इत्यर्थः ।

७२१-४ **तस्यैवेति** । पदवित् तमिति च्छेदः । पदं ब्रह्मस्वरूपम् । तद्वेत्तीति पदवित् ।

—१३ **शास्त्रविरोधादिति** । तथा च पूर्वपापविनाशो नोपपद्यते । यद्यपि ब्रह्मविद्याप्राप्त्युत्तरं कामकृतं पापं न संभवति तथाप्यकामकृतस्य संभवात्तद्भोगस्य चावश्यकत्वात्तदश्लेषोपि नोपपद्यत इति पूर्वपक्ष्याशयः ।

—१८ **विद्यास्तुत्यर्थवाद इति** । एवविदि पापं कर्म न श्लिष्यत इति श्रुतिरर्थवादभूतेति न तस्याः स्वार्थे तात्पर्यं किं तु विद्याप्रशंसायामेवेति न विद्यया पापनाशो भवतीति पूर्वपक्ष्याशयः ।

७२२-४ **फलजननशक्तीति** । ईश्वरस्य या पापकर्मकर्तृयप्रीतिः सैवात्र शक्तिशब्देनोच्यते । सा चाप्रीतिः पूर्वमुत्पन्ना चेद्विद्यया विनश्यति । विद्योत्पत्त्यनन्तरं त्वप्रीतिर्नैवोत्पद्यते । तथा चाप्रीतौ सत्यामेव नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति वचनस्य प्रवृत्तिः । यथानन्नभुङ् जीवतीत्युक्ते येषामन्नभोजनयोग्यता तादृशानां मनुष्यादीनां प्राणिनामेवान्नभोजनाभावे जीवनाभावः प्रतिपाद्यते न तु वाताशनानां सर्पाणाम् । तथा फलोपभोगयोग्यतावत्कर्मवत्स्वेव नाभुक्तमित्यस्य प्रवृत्तिर्न त्वन्यत्रेति बोध्यम् ।

—१० **वैदिकेति** । वैदिककर्मायोग्यतायावासनायाः प्रत्यवायस्य च हेतुभूता या शक्तिरीश्वरस्याप्रीतिस्तदुत्पत्तिर्न भवतीत्यर्थः । वासना चैकस्मिन्पापकर्मणि कृते तत्सजातीयान्यकर्मारम्भरुचिः । अत्राहुः श्रुतप्रकाशिकाकाराः—ननु पूर्वं शरीरपातानन्तरं कर्मक्षय उक्तः । अत्र तूपासनारम्भे कर्मप्रहाणमुक्तं कथमिहोपपद्यते । उच्यते । उपासनारम्भसमाप्योर्भगवत्प्रीतिविशेषाभिप्रायत्वादधिकरणद्वयाविरोधः । उपासनारम्भप्रीतः परमात्मा तत्समाप्तावुपासकस्याघं क्षयिष्यामीति संकल्पयति । समाप्तौ तु नाशितमिति संकल्पयति । अतोधिकरणद्वयार्थ उपपन्न इति ।

—१७ **प्रामादिकविषयमिति** । प्रमादेनानवधानतया कृतं कर्म प्रामादिकम् । अकामकृतमिति यावत् । तादृशकर्मविषयमित्यर्थः । विद्याप्राप्तौ सत्यां कामतः पापकर्मण्यप्रवृत्तेः । दुश्चरिताद्विरतौ सत्यामेव विद्योत्पत्त्यभ्युपगमात् । तथा च श्रुतिः—

> नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
> नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् (का.२।२४)॥ इति ॥१३॥(७)

७२३-५ **सुकृतस्यापीति** । यथा विद्यायाः शास्त्रीयत्वं तथा सुकृतस्यापीति विद्यासुकृतयोरविरोधः । विद्याफलवत्सुकृतफलस्येष्टत्वदर्शनाच्चाविरोध इति विद्यया सुकृतस्याश्लेषविनाशौ न स्यातामित्यधिकाशङ्कानिरासार्थमेतदधिकरणमित्यर्थः ।

७२३-९ **शरीरपाते त्विति** । विद्यानुगुणवृष्ट्यन्नादिदृष्टफलकानि सुकृतकर्माणि तिष्ठन्ति चेत्तानि शरीरपातानन्तरं नश्यन्तीत्यर्थः ॥ १४ ॥ (८)

—१७ **कुलालचक्रेति** । यथा दण्डेन चक्रे संस्कारमुत्पाद्य भ्राम्यमाणे सति ततस्तद्दण्डनाशेपि यावत्संस्कारं चक्रं भ्रमति तथा कर्मणा स्वकार्ये देहादौ संस्कारमुत्पाद्य प्रारब्धे सति तत्तत्कर्मनाशेपि यावत्संस्कारं तत्कार्यं स्यादेव । ननु पुण्यपापकर्मणी स्वर्गनरकादिसाधनीभूतभगवत्प्रीत्यप्रीती उत्पाद्य फलं जनयतः । तत्र च तादृशप्रीत्यप्रीतिरूप एव संस्कारो नातिरिक्तः । अनुपलम्भात् । एवं च विद्यया तादृशप्रीत्यप्रीत्योर्विनाशे संस्काराभावेन देहस्थितेरनुपपत्तिः । अतस्तदर्थं प्रारब्धकर्मावश्यकमेवेति चेत्सत्यम् । संस्कारस्य तादृशप्रीत्यप्रीतिव्यतिरिक्तत्वमिति पूर्वपक्षिणोभिमानेन प्रीत्यप्रीतिविनाशेपि संस्कारसत्त्वेन देहस्थितेरुपपत्तेः ।

७२४-२ **शरीरपातेति** । उत्पन्नायामपि विद्यायां यावच्छरीरं तिष्ठति तावन्मोक्षो न भवतीत्यर्थः ॥ १५ ॥ (९)

—९ **तत्फलस्याश्लेषादिति** । नित्यनैमित्तिककर्मणः फलं विद्याव्यतिरिक्तं पूर्वपक्षी मन्यते । सिद्धान्ती तु विद्यैव तत्फलमिति मन्यते । न चोत्पन्नायां विद्यायां पश्चात्कृतस्याग्निहोत्रादिकर्मणो विद्यारूपं फलं न संभवतीति वाच्यम् । पूर्वमुत्पन्नायामेव विद्यायां तेन कर्मणा कश्चिदतिशय उत्पद्यत इति तत्तदतिशयविशिष्टविद्याया अग्निहोत्रादिकर्मफलत्वसंभवात् ॥ १६ ॥

—२० **यदीति** । विद्यावतः सुकृतं तत्सुहृदो गृह्णन्तीति यच्छ्रुतौ प्रतिपाद्यते तन्नोपपद्यते । सुहृद्ग्राह्यसुकृताभावात् । यच्चाग्निहोत्रादिकर्म तद्विद्योत्पत्त्यर्थं तस्यैवावश्यकम् । सुकृतान्तरं तु प्रायोनुभवेन विनष्टमेव । किंचिच्च विद्यावतैव सद्योनुभूयते । एवमेव विद्यया सुकृतस्याश्लेषविनाशावपि नोपपद्येते । तथाविधसुकृताभावात् । द्विषन्तो दुष्कृतं गृह्णतीति तूपपद्यत एव । विद्योत्पत्त्यनन्तरभाविनः प्रमादकृतस्य दुष्कृतस्य सत्त्वादिति शङ्काशयः ।

७२५-६ **साधुकृत्येति** । वृष्ट्यन्नाद्यर्थितया विदुषानुष्ठिता कारीरीष्ट्यादिसाधुकृत्यानन्तास्त्येवेत्यर्थः ॥ १७ ॥ १८ ॥ (१०)

—१८ **विद्यायोनीति** । यस्मिञ्छरीरे विद्यमाने विद्योत्पद्यते तद्विद्यायोनि शरीरम् ।

७२६-९ **देहावधिनियमाश्रवणादिति** । धूत्वा शरीरमकृतं कृतात्मेति श्रुतौ शरीरमित्येकवचनं तु जात्यभिप्रायं विधूय पापमितिवदिति बोध्यम् ॥ १९ ॥ (११)

अथ चतुर्थाध्यायस्य द्वितीयः पादः प्रारभ्यते ।

७२७-६ **प्रयत इति** । देहं त्यजत इत्यर्थः ।

—१५ **तत्राह शब्दाच्चेतीति** । तथा च यद्यपि दर्शनं सिद्धान्तिपूर्वपक्षिणोरुभयोरपि समानमेव तथापि पूर्वपक्षिणा वाङ्मनसीति श्रुतौ वाक्शब्दस्य लक्षणया वाग्वृत्तिरूपोर्थः स्वीकृत इति वाक्शब्दः स्वरसतो नोपपद्यते । तथा च शब्दस्वरसानुकूल्यपूर्वकदर्शनमेक एव हेतुः सूत्रे दर्शनाच्छब्दादिति पदद्वयेन निर्दिष्ट इति बोध्यम् ॥ १ ॥

७२८-५ **वाचमन्विति** । वाचः पश्चादित्यर्थः । **तस्मादुपशान्ततेजा इति** । यदा पुरुष उपशान्ततेजा मुमूर्षुर्भवति तदा मनसि संपद्यमानैरिन्द्रियैः सह पुनर्भवं शरीरान्तरं प्रतिपद्यत इत्यर्थः ॥ २ ॥ (१)

—११ **अधिकाशङ्केति** । पूर्वपक्षी तु मनसोन्नकार्यत्वं प्राणस्य च जलकार्यत्वं मन्यते । मनः प्राणे संपद्यत इति श्रुतौ प्राणशब्देन लक्षणया प्राणकारणीभूतं जलमुच्यते । संपद्यत इत्यस्य लीयत इत्यर्थः । न तु संयुज्यत इति । तथा च मनः स्वकारणीभूतान्नद्वारा तादृशान्नकारणीभूते जले लीयत इत्यर्थः । अन्नस्य पृथिवीरूपत्वात्पृथिव्याश्च जलकार्यत्वादन्नकारणत्वं जलस्य स्पष्टमेव । एतदेव च ता अन्नमसृजन्तेति श्रुतेस्तात्पर्यमिति पूर्वपक्ष्याशयः ।

—२० **आप्यायनमिति** । पोषणमित्यर्थः ॥ ३ ॥ (२)

७२९-१ **सोध्यक्ष इति** । उपगमः संबन्धः ॥ ४ ॥ (३)

—२१ **पृथिवीमय इति** । पृथिवीसंयुक्तोप्संयुक्तस्तेजःसंयुक्त इत्यर्थः ॥ ५ ॥ ६ ॥ (४)

७३०-१६ **समानेति** । सृतिर्गतिः । अनुपोष्यादग्ध्वा । उषदाह इति धातुः । गत्युपक्रमपर्यन्तं विदुषोप्युत्क्रान्तिरविद्वत्तुल्यैव । न तु तस्यानुत्क्रम्यैव ब्रह्मप्राप्तिर्भवति । विदुषोर्चिरादिमार्गश्रुतेः । यच्चाथ मर्त्योऽमृतो भवतीत्यमृतत्वमुच्यते तन्न ब्रह्मप्राप्तिरूपम् । किं तु शरीरादिसंबन्धमदग्ध्वैव यादृशं संभवेत्तादृशं ग्राह्यमिति सूत्रार्थः ।

—२० **यदा सर्व इति** । तथा च विदुषोत्रैव ब्रह्मप्राप्तिर्न तु शरीरान्निष्क्रमणपूर्वकमर्चिरादिमार्गेण गत्वा ब्रह्मप्राप्तिरिति पूर्वपक्ष्याशयः ।

७३१-४ **शतमिति** । हृदयमध्ये नाड्य एकाधिकशतसंख्याकाः सन्ति । तास्वेका मूर्धस्थानं गता । तया विद्वानूर्ध्वं गच्छन्नमृतत्वं प्राप्नोति । अन्या नाड्यो विष्वग्विवतता अविदुषामुत्क्रमणार्था भवन्तीति श्रुत्यर्थः ॥ ७ ॥

७३२-५ **धूत्वेति** । त्यक्त्वेत्यर्थः । तथा चैतावत्कालपर्यन्तं शरीरसंबन्धरूपः संसारो वर्तत एवेत्युत्क्रान्तेः प्रागमृतत्वं न संभवति । अतस्तदमृतत्वं गौणमेवाश्रयणीयमिति भावः ॥ ८ ॥

७३२-८ विदुष इति । विदुषोपि संसारबन्ध उत्क्रान्तेः प्राग्विशेषेण दग्धो न भवतीत्यर्थः ॥ ९ ॥

—१८ न बन्धोपमर्देनेति । एतेनाथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति श्रुत्यनुरोधाज्जीवन्मुक्तिरङ्गीकुर्वन्तः परास्ताः । जीवन्मुक्तिखण्डनार्थवेदं सूत्रं सूत्रकृद्भिः प्रणीतम् । श्रुतौ विदुषोप्युत्क्रान्तिबोधनेनार्चिरादिमार्गकथनेन च जीवन्मुक्तेरसंभवादित्याशयः ॥ १० ॥

—१९ अस्यैवेति । अस्य सूक्ष्मशरीरस्यैव विद्यमानत्वोपपत्तेश्च न देहबन्धोपमर्देनामृतत्वम् । यतः क्वचिदृष्मोपलभ्यते स च सूक्ष्मदेहस्य गुणो न स्थूलस्य । तथा सति सर्वत्रोपलम्भप्रसङ्गादित्यर्थः ॥ ११ ॥

७३३-९-१९ स एता इति । तेजोमात्राः सूक्ष्मभूतानि । हृदयमेवान्ववक्रामति हृदयान्निष्क्रामति । अथाकामयमान इति । अकामयमानः पुत्रैषणारहितः । अकामो वित्तैषणारहितः । निष्कामो विषयैषणारहितः । न तस्य प्राणा उत्क्रामन्तीत्यत्रामुकवस्तुनः सकाशादित्यपादानं न निर्दिश्यते । तथा च तत्र किमपादानमित्याकाङ्क्षायां जीव एवापादानमिति जीवात्सकाशात्प्राणा नोत्क्रामन्ति शरीरात्तूत्क्रामन्त्येवेति सिद्धान्तः । पूर्वपक्षी तु शरीरमेवापादानं मन्यते ।

७३४-२ अत्रैवेति । अत्रैव शरीरे लीयन्ते । आध्मातो वायुना पूरितः सन्नुच्छ्वयत्युच्छूनो भवतीत्यर्थः ।

—९ शङ्कते-तस्येति षष्ठ्येति ।

—१४ अपादानमेव विशेष इति । यद्यपि तस्येति पदेन प्राणेषु जीवसंबन्धो बोध्यते तथापि तस्येति पदस्य फलं नास्ति । यदि प्राणानां जीवव्यतिरिक्तेन केनचिद्वस्तुना सह संबन्धः स्यात्तर्हि तद्व्यावृत्तये तस्येति पदं सफलं स्यात् । तथा च श्रुतौ जीवस्यापादानत्वेन बोधार्थमेव तस्येति तस्मादित्येतत्तात्पर्यकं निर्दिष्टम् । तस्मादित्यपादानस्य विशेषरूपम् । तस्येति तु सामान्यरूपमिति बोध्यम् ।

—१८ शङ्कते-शारीरादिति ।

—२० शरीरवियोगकाल इति । प्रारब्धकर्महेतुकचरमशरीरवियोगकाल इत्यर्थः (श्रु.) ।

७३५-५ अयमेवेति । तस्य तावदेव (श्रीभाष्य-पृ. ७३४ प. १९) इत्यादिग्रन्थेनोक्त इत्यर्थः ।

—७ ग्रहातिग्रहरूपेणेति । कति ग्रहाः कत्यतिग्रहा इत्यार्तभागस्य प्रश्नः ।

अष्टौ ग्रहा अष्टावतिग्रहा इति याज्ञवल्क्यस्योत्तरम् । गृह्णाति स्वानुरोधेन जीवं वर्तयतीति ग्रहशब्देनेन्द्रियमुच्यते । ग्रहमतिक्रान्तोतिग्रहो विषयः । इन्द्रियस्य ग्रहत्वं विषयास्तित्व एव नान्यथेति विषयस्यातिग्रहत्वम् । प्राणवाग्जिह्वाचक्षुः-श्रोत्रमनोहस्तत्वचो ग्रहाः । अपाननामरसरूपशब्दकामकर्मस्पर्शा अतिग्रहाः । पुनःप्रश्नः–मृत्युः कस्यान्नम् । उत्तरम्–सर्वदाहकत्वादग्निर्मृत्युः । स जलस्यान्नम् । तस्य जलनाश्यत्वात् । एतज्ज्ञानेन मृत्युजयो भवति । यथा ज्ञानिनो मोक्षे मृत्युजयस्तथा नायम् । किं त्वग्निरूपमृत्युजयः । अग्नेर्जलनाश्यत्वमिति ज्ञाने जाते जलसहायेनाग्निर्जितो भवति । प्र०म्रियमाणस्य प्राणपरित्यागो भवति न वा । उ० न भवति । यथा स्थूलदेहो मुञ्चति तथा प्राणा न मुञ्चन्तीत्यर्थः । प्र० म्रियमाणं पुरुषं किं न जहाति । उ० नाम । कीर्तिरित्यर्थः । प्र० क्वायं तदा पुरुषो भवति । उ० कर्मानुसारेण गच्छति ॥ १२ ॥

७३५–१७ ऊर्ध्वमेक इति । तेषां हृदयस्थानां रश्मीनां (नाडीनाम्) ऊर्ध्वमेको रश्मिः स्थितः । यश्च सूर्यमण्डलं भित्त्वा हिरण्यगर्भलोकमतिक्रम्य स्थितः । तेन रश्मिना मार्गेण परां गतिं परं गन्तव्यं ब्रह्म यातीत्यर्थः ॥ १३ ॥ (५)

७३६–५ स्वकार्यायेति । एकां योनिं त्यक्त्वा कर्माद्यनुसारेणान्यां योनिं प्राप्स्यमानस्य जीवस्य प्राप्स्यमानयोन्यनुरूपशरीररूपेण परिणामार्थं तानि भूतसूक्ष्माणि सद्य एव गच्छन्त्यथ वा मध्ये कंचित्कालं परमात्मनि स्थित्वा पश्चाद्गच्छन्तीति संशय इति भावः ॥ १४ ॥ (६)

—१६ अविभागरूपेति । संयोगरूपेत्यर्थः ।

७३७–१–२ अनुषक्तस्येति । वाङ्मनसि संपद्यत इति श्रुतौ संपद्यत इति पदं पृथग्व्यवहारानर्हसंसर्गवाचकम् । तदेव पदं तेजः परस्यामिति वाक्ये संबध्यमानं तदर्थस्यैव वाचकं न तु लयरूपस्यान्यार्थस्य । अर्थभेदे प्रमाणाभावात् । अभिधानवैरूप्यमर्थभेदः । कारणापत्तीति । देहिनो विश्रान्तिर्द्विधा–प्रलये सुषुप्तौ च । यथा भारवाहकस्य भारं त्यक्त्वा विश्रान्तिस्तद्वदाद्या । यथा च भारवाहकस्य सभारस्यैव यष्ट्याद्याश्रयेण विश्रान्तिस्तद्वद्द्वितीया । प्रकृते चेतरयोनिप्राप्तेः प्राक्परमात्मसंयोगरूपा या विश्रान्तिः सा सुषुप्तिवत्यैवेति तदानीं सूक्ष्मभूतानां कारणे परमात्मनि लयस्य प्रयोजनं नास्ति । किं च लयश्चेत्पुनरव्यक्तमहदहंकाराकाशादिक्रमेण सृष्टेरावश्यकत्वम् । सृष्टिश्च प्रकृतश्रुतावग्रे नोक्तेति लयोपि नैव भवतीति बोध्यम् ॥ १५ ॥ (७)

६३८–३ हार्देनेति । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः (म. ना. १३।२) । सर्वस्य चाहं हृदि संनिविष्टः (गी. १५–५) इति श्रुतिस्मृत्युक्तप्रकारेण हृदयेन्तर्यामितयावस्थितेन परमपुरुषेणेत्यर्थः ॥ १६ ॥ (८)

७३९-१ रश्मिसंभव इति । न चान्धकारासंभव इति वाच्यम् । सूक्ष्मरश्मिसद्भावाङ्गीकारेणादोषात् ।

—३ तद्यथेति । यथा विस्तीर्णो महापथो ग्रामद्वयप्रतिष्ठितो भवति तथादित्यस्य रश्मयो लोकद्वयानुप्रविष्टा भवन्ति । प्रतायन्ते विस्तृता भवन्ति । ताः रश्मयः । सृप्ताः संबद्धाः । ते रश्मयः । रश्मीनामुभयलिङ्गत्वात्ता इति त इति च निर्देश इति भावः ॥ १७ ॥ (९)

—१७ दिवा चेति । एतद्वचनमविद्वद्विषयमिति सिद्धान्तः । पूर्वपक्षी तु विद्वद्विषयमप्येतद्वचनं मन्यते ।

७४०-५ चरमदेहेति । नन्वप्रशस्तकालमृतस्य ब्रह्मप्राप्तियोग्यत्वाभावादप्रशस्ते काले त्यक्तो देहो न चरम इति चेन्न । अथ यो दक्षिणे (म. ना. ८०) इति श्रुतौ दक्षिणायने मृतस्यापि ब्रह्मप्राप्तेरुक्तत्वात् । तथा च विदुषो मरणे सर्वोपि कालः प्रशस्त एवेति दिवा चेत्यादिवचनमविद्वद्विषयकमेवेति बोध्यम् ॥ १८ ॥ (१०)

—१४ तेषां यदेति । तेषां कर्मिणां यदा तत्कर्म पर्यवैति परिक्षीणं भवति तदैतमेव येनाध्वना गतास्तमेवाध्वानं पुनर्निवर्तन्त इति सिद्धान्ते श्रुत्यर्थः । पूर्वपक्षिमते तु तेषामित्यनेन ज्ञानिनामपि परामर्शः । तच्छब्देन च न विशेषतः कर्मणः परामर्शः । किं तु सामान्यतश्चन्द्रगमननिमित्तस्येति । तथा चास्याः श्रुतेर्दक्षिणायनमृतविद्वद्विषयकत्वमपि संभवति ।

७४१-३ अनिवार्येति । तथा चाविद्वांसो ये केवलकर्मिणस्तद्विषयकमेव पुनरावृत्तिवचनमिति बोध्यम् ॥ १९ ॥

—१८ योगिन इति । अग्निर्ज्योतिरित्यनेन दिवसादिर्मरणकालोऽनावृत्तिहेतुभूत इति न प्रतिपाद्यते । तथैव धूमो रात्रिरित्यनेन रात्र्यादिर्मरणकालः पुनरावृत्तिहेतुभूत इति न प्रतिपाद्यते । कालवाचकानामहःशुक्लादिशब्दानां रात्र्यादिशब्दानां च तत्तत्कालाभिमानिदेवतापरत्वात् । उपक्रमे यत्र काल इत्यस्य कालाभिमानिदेवताप्रदर्शिते यस्मिन्मार्गे इत्यर्थः । तं कालमित्यस्यापि कालाभिमानिदेवताप्रदर्शितं तं मार्गमित्यर्थः । मार्गप्रदर्शकदेवतासु मध्ये कालाभिमानिदेवतानां बाहुल्येन कालाभिमानिदेवताप्रदर्शित इत्युक्तम् । तथा च काल इत्युक्तिर्भूयस्त्वाभिप्राया । तेनाग्न्यादीनां केषांचित्कालाभिमानित्वाभावेपि न क्षतिः । एवं चाग्निर्ज्योतिरित्यनेनाग्न्यादिर्देवयानमार्गोऽनावृत्तिहेतुभूत इति प्रतिपाद्यते । देवयानमार्गे चाग्न्यादयो देवताः केवलं मार्गं दर्शयन्ति । अयं मार्गो मुमुक्षुणानुसंधातव्य इत्यग्निर्ज्योतिरिति वचनस्य तात्पर्यम् । एवमेव धूमो रात्रिरित्यनेन धूमादिः पितृयाणमार्गः पुनरावृत्तिहेतु-

भूत इति प्रतिपाद्यते । तत्रापि धूमाद्यभिमानिन्यो देवताः केवलं मार्गं दर्शयन्ति। अयं मार्गं ऐश्वर्यार्थिना कर्मिणानुसंधातव्य इति धूमो रात्रिरिति वचनस्य तात्पर्यम् । तथा च रात्रौ कृष्णपक्षे दक्षिणायने वा मृतस्यापि विदुषोऽग्यादयो देवता मार्गं प्रदर्शयन्ति । अविदुषस्तु कर्मिणो दिवसे शुक्लपक्ष उत्तरायणे वा मृतस्यापि धूमादिदेवता मार्गं प्रदर्शयन्ति ।

७४२–६ **कालाभिमानीति** । आतिवाहिका मार्गप्रदर्शिका याः कालाभिमानिन्यो देवतास्तद्वाचकः कालशब्द इत्यर्थः ॥ २० ॥ (११)

अथ चतुर्थाध्यायस्य तृतीयः पादः प्रारभ्यते ॥

७४३–६–१४ **यथेति** । यथा कमलपत्र उदकं न संयुज्यते तथा ब्रह्मविदि प्रमादेन जातमपि पापं कर्म न संयुज्यते । पापशब्देनात्र सुकृतमपि गृह्यते । अस्मिन्ब्रह्मविदि तत्पुत्रादयो यदि शवदहनादिकर्म कुर्वन्ति यदि वा न कुर्वन्त्युभयथापि ते ब्रह्मविदोर्चिषमेवाभिसंभवन्ति । अर्चिरहरादिशब्देन तत्तदभिमानिदेवताग्रहणम् । आपूर्यमाणपक्षः शुक्लपक्षः । आदित्यो यान्षण्मासानुदङ्केति तान्मासान् । उत्तरायणमिति यावत् । देवैरातिवाहिकैर्नीयमानः पन्था देवपथः । ब्रह्मप्रापकः पन्था ब्रह्मपथः । एतेन मार्गेण प्रतिपद्यमाना इमं घोरं घटीयन्त्रवज्जननमरणाद्यावर्तकं मनुष्यादिशरीरोपलक्षितं संसारं पुनर्न प्रतिपद्यन्त इत्यर्थः ।

—१५ **रश्मिभिरिति** । सूर्यरश्मिभिरित्यर्थः ।

७४४–५ **तस्मै स इति** । स वायुस्तस्मै ब्रह्मविदे विजिहीते मार्गप्रवेशाद्ब्रह्मविदोवयवानूर्ध्वं निःसारयति । विजिहीर्षते इति वा पाठः । विहर्तुमिच्छतीति तदर्थः । आडम्बरं वाद्यविशेषः । डम्बरस्येति वा पदच्छेदः । तस्यापि स एवार्थः ।

—१७ **प्रत्यभिज्ञानादिति** । अर्चिरादिमार्गान्तर्भूतादित्यादीनां सर्वत्र दर्शनात्स एवायं मार्ग इति प्रत्यभिज्ञानं भवति ।

७४५–२ **अल्पान्तर इति** । ईषद्भेदेनेत्यर्थः ॥ १ ॥ (१)

—५ **वायुमिति** । अर्चिरादिमार्गश्च–अर्चिः अयमेवाग्निलोकः १ दिवसः २ शुक्लपक्षः ३ उत्तरायणम् ४ संवत्सरः ५ देवलोकः अयमेव वायुः ६ आदित्यः ७ चन्द्रमाः ८ वैद्युतः पुरुषः ९ वरुणः १० इन्द्रः ११ प्रजापतिः १२ ब्रह्म १३ इति । यद्यप्येषु केचित्क्वचिच्छ्रुतौ न निर्दिष्टास्तथापि ये यत्रानिर्दिष्टास्ते तत्रोपसंग्राह्या अन्यश्रुत्यनुरोधादिति सिद्धान्तः । अयमेव सिद्धान्तोस्मिन्सूत्रे तडितोधीत्युत्तरसूत्रे च प्रतिपाद्यते । अस्मिन्नधिकरणे पूर्वपक्षी तु वायुर्भिन्नो देवलोकश्च भिन्न इति मन्यते ।

७४६-३ **तत्र कौषीतकिनामिति** । यदि कौषीतकिश्रुतावर्चिरुत्तरं वायुलोकस्य पाठेन तादृशपाठकमानुरोधेनार्चिरुत्तरं दिवसात्प्राग्वायुलोकः संगृह्यते तर्हि वायुलोकात्सकाशाद्दिवसगमने गन्तुरूर्ध्वगतिर्न स्यात् । वायुलोकात्सकाशादादित्यगमने त्वादित्यस्योर्ध्वमवस्थानेन गन्तुरूर्ध्वगतिः स्यादेव । उर्ध्वगतिपूर्वकादित्यगमनं च स्पष्टमेव बृहदारण्यके कथ्यते स ऊर्ध्वमाक्रमते स आदित्यमागच्छतीति । तथा च कौषीतकिश्रुतावर्चिरुत्तरं पठितोपि वायुलोको दिवसाद्यनन्तरमादित्यलोकात्प्राक्संग्राह्य इति भावः ।

—१० **अनर्थान्तरत्वेनेति** । अभिन्नत्वेनेत्यर्थः । देवलोकं सन्तमित्यस्य देवलोकरूपमित्यर्थः ।

—१२ **ऊर्ध्वशब्देनेति** । स वायुगत ऊर्ध्वमाक्रमते स आदित्यमिति श्रुत्यनुरोधात्संवत्सराद्वायुद्वारादित्यगतिः सिध्यति । देवलोकादादित्यमिति पञ्चम्यनुरोधाच्च संवत्सरादेवलोकद्वारादित्यगतिः सिध्यति । तथा चार्चिरादिमार्गे संवत्सरानन्तरमादित्यं प्रति प्रकारद्वयेन गमनं सिद्धमिति गत्रा यथेष्टं गतव्यमिति पूर्वपक्ष्याशयः ॥ २ ॥ (२)

७४७-१६ **श्रुतिक्रमोपरोधादिति** । अर्चिषोहरिति श्रुतिक्रमेणावरुद्धत्वान्मध्ये कस्यचिदन्यस्य प्रवेशो न भवति । अन्तेपि प्रवेशो न भवति । चरमस्य वैद्युतपुरुषस्य ब्रह्मगमयितृत्वश्रवणात् । तथा च सर्वत्रावकाशाभावः सिद्ध इत्याशयः ।

७४८-५ **प्रसिद्ध इति** । विद्युतो मेघोदरस्थजलवर्तित्वाद्वरुणस्य च जलाभिमानित्वात्तयोः संबन्धः प्रसिद्धः । ननु तडित उत्तरमेव वरुण इति कुतः । संबन्धस्योभयत्राविशेषात् । तथा च तडितः पूर्वमपि वरुणो निवेशयितुमर्हतीति चेन्न । मेघेषु हि विद्युत्स्फुटतरं दृश्यते न तथा जलमिति तडित ऊर्ध्वं जलस्थितिरनुमीयते । तदनुरोधेनार्चिरादिमार्गे पूर्वं तडित्पुरुषस्ततो जलाभिमानी वरुण इत्यस्यैव क्रमस्य योग्यत्वादिति बोध्यम् ॥ ३ ॥ (३)

—१४ **भोगभूमय इति** । भोगस्थानानीत्यर्थः । अतिवोढार इत्यस्य मार्गदर्शका इत्यर्थः ।

७४९-३ **एतेषामनभिधायित्वादिति** । एतेषामहरादिशब्दानां योर्थस्तस्य मार्गचिह्नत्वं नास्ति । अन्यानि च मार्गचिह्नानि । तद्वाचकत्वमेतेषां शब्दानां नास्तीत्यर्थः ।

—५ **लोकत्ववचनादिति** । लोकशब्दस्य भोगस्थानरूपेर्थे प्रसिद्धत्वादिति भावः ।

—१३ **वदन्तीति** । यथा पृथिव्यब्रवीदित्यत्राचेतनायाः पृथिव्या भाषणा-

संभवेपि पृथिव्यभिमानिदेवतायाश्चेतनाया भाषणं संभवतीति व्यवस्थापितं (श्री-भाष्य–पृ.४०६ प.१०) तथैवात्राचेतनानामर्चिरादीनां गमयितृत्वासंभवेप्यर्चिराद्यभिमानिदेवतानां चेतनानां गमयितृत्वमुपपद्यत इति बोध्यम् ॥ ४ ॥ ५ ॥ (४)

७५०–६ **अर्चिरादिरिति** । विदुषो मार्गप्रदर्शकोर्चिरादिर्वैद्युतपुरुषान्तः समुदाय इत्यर्थः ।

—८ **कार्यमिति** । कार्यमित्यस्य व्याख्या हिरण्यगर्भमिति । हिरण्यगर्भो ब्रह्मदेवः । हिरण्यगर्भोपासकान्हिरण्यगर्भं प्रति नयत्यथ वा परब्रह्मोपासकान्परं ब्रह्म प्रति नयत्यथ वा परब्रह्मोपासकाञ्जीवोपासकांश्चेत्युभयविधानपि परं ब्रह्म प्रति नयतीति कोटित्रयात्मकः संशयः । जीवोपासकाश्च त उच्यन्ते ये भूत-सूक्ष्मव्यतिरिक्तं ज्ञानैकस्वरूपं नित्यं निर्विकारं जीवात्मानं ब्रह्मात्मकत्वेन (ब्रह्म अन्तर्यामितया आत्मा यस्य तत्त्वेन) रूपेणोपासते । यथा पञ्चाग्निविद्योपासकाः । तत्र हिरण्यगर्भोपासकानेव नयतीति बादरेः पूर्वपक्षः । परब्रह्मोपासकानेव नयतीति पक्षान्तरं जैमिनेः । ते च परब्रह्मोपासका द्विविधाः–परस्मिन्ब्रह्मणि परब्रह्मदृष्ट्योपासकाः प्रतीकालम्बनाश्च । ये ब्रह्मचिह्नभूतान्नामादीन्ब्रह्मदृष्ट्योपासते ये च नामादीन्ब्रह्मचिह्नदृष्ट्यैवोपासते त उभयविधा अपि प्रतीकालम्बना उच्यन्ते । प्रतीकं चिह्नमालम्बनमुपासनाश्रयो येषां ते प्रतीकालम्बनाः । सिद्धान्तभूतो बादरायणपक्षस्तु प्रतीकालम्बनव्यतिरिक्तब्रह्मोपासकाञ्जीवोपासकांश्चेत्युभयविधान्नयतीति ।

—१६ **परिच्छिन्नेति** । परिच्छिन्नः परिमितो यो देशो ब्रह्मदेवस्य लोकस्तन्मध्यवर्ती प्राप्यभूतो यो ब्रह्मदेवस्तत्प्राप्त्यर्थमित्यर्थः ॥ ६ ॥

—२० **लोकशब्देनेति** । यदि परं ब्रह्मैव गन्तव्यं स्यात्तदा ब्रह्म गमयतीत्येव वक्तव्यं न तु ब्रह्मलोकानिति । लोकाश्च हिरण्यगर्भस्य प्रसिद्धा एव । न च लोकशब्दोक्तावपि ब्रह्मैव लोक इति कर्मधारयेण ब्रह्मैव गन्तव्यं सिध्यतीति वाच्यम् । तथा सति लोकानिति बहुवचनासंगतेः । परब्रह्मण एकत्वात् । तथा च लोकशब्देन बहुवचनेन चेत्यस्य बहुवचनान्तलोकशब्देनेत्यर्थः फलितः ।

७५१–१ **प्रजापतेरिति** । प्रजापतेः सभास्थानभूतं वेश्माहं प्रपद्य इत्युपासकः स्वमनस्यभिसंधत्त इत्यर्थः । अत्र प्रजापतिशब्दो ब्रह्मदेवार्थको न तु परब्रह्मार्थक इति पूर्वपक्षी मन्यते ॥ ७ ॥

—६ **निर्देष्टव्यमिति** । ब्रह्मदेवार्थकस्य ब्रह्मशब्दस्य पुँल्लिङ्गत्वादिति भावः ।

—९ **ब्रह्मशब्देनेति** । नपुंसकलिङ्गब्रह्मशब्देनेत्यर्थः ॥ ८ ॥

—१९ **कार्यात्यय इति** । अत्ययो नाशः ।

७५२-४ **परामृतादिति** । ल्यब्लोपे पञ्चमी । यथा प्रासादात्प्रेक्षत इत्यत्र प्रासादमारुह्य प्रेक्षत इत्यर्थस्तथात्र परामृतं ब्रह्म प्राप्य परिमुच्यन्तीति पूर्वपक्षे श्रुत्यर्थः ॥ ९ ॥

—९ **ब्रह्मणा सहेति** । प्रतिसंचरः प्रलयः ॥ १० ॥

—१४ **पक्षान्तरपरिग्रहेणेति** । उक्तपक्षात्पक्षान्तरेण न तु सिद्धान्तपक्षेण ।

७५३-१ **यथा हीति** । नित्यत्वेपि कालविशेषापेक्षावत्सर्वगतत्वेपि देशविशेषापेक्षा युक्तेति भावः (श्रु.) ।

—८ **निषादस्थपतीति** । निषादस्थपतिं याजयेदिति वचने यदि निषादानां स्थपतिरिति तत्पुरुषसमासोङ्गीक्रियते तदा तस्य समासस्य व्यधिकरणत्वेन पदार्थद्वयबोधकत्वाद्गौरवं स्यादतो लाघवादेकपदार्थबोधकः समानाधिकरणः कर्मधारयसमासोङ्गीकृतः । अयमेव निषादस्थपतिन्यायः ।

—१० **अदितिः पाशानिति** । यथात्रैकस्मिन्नेव पाशे बहुत्वारोपाद्बहुवचनोपपत्तिस्तद्वत् ।

—१२ **नात्यन्तायेति** । अत्यन्तायेत्यस्यात्यन्तमित्यर्थः । परस्य ब्रह्मणो लोका अत्यन्तं न सन्तीति न किं तु सन्त्येवेत्यर्थः ॥ ११ ॥

—१६ **समुत्थायेति** । अत्रोत्थायोपसंपत्तिवचनेन देवयानमार्गेण ब्रह्मप्राप्तिः सिध्यति (श्रु.) ॥ १२ ॥

७५४-२ **परस्मिन्नेवेति** । प्रजापतेरित्यत्र प्रजापतिशब्दः परब्रह्मार्थक इति भावः ।

—३ **यशोहमिति** । यशःशब्देन लक्षणयात्मोच्यते । आत्मनो यशःसाधनत्वात् । अहंशब्दश्च स्वान्तर्यामिपरमात्मपरः । ब्राह्मणानामात्मास्मीत्यर्थः ।

—८ **अकृतत्वश्रवणादिति** । ब्रह्मदेवस्य यो लोकस्तस्य कृतकत्वं तल्लोकस्थस्य सांसारिकत्वेन सर्वबन्धविनिर्मोकासंभवश्च स्पष्ट एव ॥ १३ ॥

—१७ **न चेति** । न हीत्यर्थः । यतः परब्रह्मोपासकान्तर्भूतानपि प्रतीकालम्बनान्न नयत्यतः परमेवोपासीनानिति नियमो न संभवतीत्यर्थः ।

—१८ **प्रकृतिवियुक्तमिति** । भूतसूक्ष्मव्यतिरिक्तमित्यर्थः ।

—१९ **ये त्विति** । एते प्रागुक्ता (विवृति-पृ. ३२९ प. १४) द्विविधाः प्रतीकालम्बनाः ।

७५५-६ **प्रकुप्येयुरिति** । अस्यां श्रुतौ परज्योतिःप्राप्तिरुक्ता । न हि हिरण्यगर्भोपासकस्य परब्रह्मप्राप्तिः संभवति ।

—७ **तद्य इति** । अत्र य इत्यनेन पञ्चाग्निविदः परामृश्यन्ते । ते च पञ्चाग्निविदः प्रागुक्त-(विवृति-पृ. ३२९ प. ९) रीत्या जीवोपासकाः ॥ १४ ॥

७५६-२ यावन्नाम्नो गतमिति। देवादिनाम्नो गोचर इत्यर्थः। ब्रह्मणा सह ते सर्वे इत्यादिवचनं नार्चिरादिगतपुरुषविषयम्। अपि तु चतुर्मुखलोकस्थयोगिविषयम्। ते च योगिनः पुण्यकर्मविशेषेण हिरण्यगर्भलोकं प्राप्तास्तत्रैव तदुपर्यपि (ब्रह्मसू. १।३।२५) इति न्यायेन निष्पन्नविद्याः। ते ब्रह्मलोक इति श्रुतेस्तु ब्रह्मैव लोको ब्रह्मलोकस्तत्र वर्तमाना ब्रह्मनिष्ठाः परान्तकालेन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरमित्युक्तचरमदेहावसानसमये परामृतात्प्रसन्नाद्ब्रह्मणो हेतोः सर्वे परिमुच्यन्त इत्यर्थः (श्रु.) ॥ १५ ॥ (५)

॥ अथ चतुर्थाध्यायस्य चतुर्थः पादः प्रारभ्यते ॥

७५७-१० साध्येन रूपेणेति। अपूर्वोत्पन्नेनाकारेणेत्यर्थः।

७५८-६ कस्येति। अनुकूलशब्दो हि पुत्रशब्दादिवत्साकाङ्क्षार्थप्रतिपादकोमुकस्यानुकूल इति।

—१० अनर्थकं स्यादिति। अभिनिष्पद्यत इत्यस्यापूर्वाकारेणोत्पद्यत इत्यर्थप्रतिपादकत्वात्। अपूर्वाकारस्य च साध्यत्वादेव श्रुतौ यत्स्वेनेति स्वशब्दः प्रयुक्तः स नासाध्यार्थकः किं त्वसाधारणार्थक इत्याशयः।

—१५ यं दशाविशेषमिति। ज्ञानविकासरूपमित्यर्थः।

—१८ स्वकीयरूपत्वसिद्धेरिति। न चासाधारणार्थकं स्वपदमावश्यकमिति वाच्यम्। परं ज्योतिरुपसंपद्याभिनिष्पद्यत इत्युक्तयैवासाधारणत्वस्यापि गम्यमानत्वात्। न ह्यन्यस्य रूपेणान्यो निष्पद्यत इति बोध्यम् ॥ १ ॥

७५९-१५ इत्यादिष्विति। आदिशब्देन विचार्य च पुनः पुनः इदमेकं सुनिष्पन्नमित्यादिप्रयोगो विवक्षितः (श्रु.) ॥ २ ॥

—२० अयमात्मेति। जीवात्मेत्यर्थः।

७६०-७ आविर्भवन्तीति। तथा च सुषुप्तावनाविर्भूतानां स्वाभाविकानां गुणानां मोक्ष आविर्भावान्मोक्षशास्त्रस्य पुरुषार्थावबोधित्वं सिद्धमिति बोध्यम्।

—११ यथोदपानेति। उदकं पीयतेस्मिन्नित्युदपानं सरः। तत्रस्थमाकाशं सरःकरणात्पूर्वं तत्र विद्यमानमेव सरःकरणेन व्यक्तं भवतीत्यर्थः ॥ ३ ॥ (१)

—२० अविभागेनेति। मुक्तोहं ब्रह्मास्मीत्यविभागेन ब्रह्मानुभवति। स्वात्मनोपि ब्रह्मण आत्मतया तथाविधस्वरूपस्योपासने दृष्टत्वादिति सूत्रार्थः।

७६१-१-१० तत्प्रकारतयेति। यथा पाञ्चभौतिकं शरीरं जीवात्मनः प्रकारभूतं तथैव जीवात्मा परमात्मनः प्रकारभूत इति भावः। साहित्येति।

सोश्नुत इति श्रुतौ सह ब्रह्मणेति साहित्यमवगम्यते । सहशब्दो भोक्तृसाहित्यं दर्शयतीति पूर्वपक्ष्यभिप्रायः । यदा पश्य इति श्रुतौ साम्यमुपैतीति साम्यमवगम्यते । इदं ज्ञानमिति स्मृतौ च साधर्म्यमागता इति साधर्म्यमवगम्यते । साधर्म्यं च साम्यमेव नार्थान्तरम् । श्रुत्यनुरोधात्साम्यसाधर्म्यैतच्छब्दद्वयोक्तिः । अविभागेनानुभवे तु साहित्यं साम्यं च न संगच्छते । सोश्नुत इति श्रुतेः सिद्धान्तिकृतोर्थः प्रागुक्तः (विवृति–पृ. १३२ प. ८–१३) ।

७६१–२० परमात्मात्मकमिति । परमात्मैवान्तर्यामितयात्मा यस्य तत्परमात्मात्मकमित्यर्थः ।

७६२–७ न विरुध्यत इति । यद्यविभागः स्वरूपैक्यमेवेति स्वीक्रियते तदा संकल्पादेवेत्यधिकरणविरोधः । तत्र हि स मुक्तो यदि प्राचीनानेकजन्मसंबन्धिपितृवर्गं दिदृक्षेत तदा स पितृवर्ग एतस्य संकल्पमात्रसमुत्थितो भवतीत्युच्यते । ब्रह्ममुक्तयोः स्वरूपैक्ये त्वेतद्विरोधः स्पष्ट एव । किं च स्वरूपैक्येधिकं तु भेदनिर्देशादित्यादिसूत्रविरोधः । तत्र हि भेद एव सिध्यति नाभेद इति बोध्यम् ॥ ४ ॥ (२)

—१३–४ अपहतपाप्मत्वादिकमेवेति । एवकारेण विज्ञानव्यावृत्तिः । विज्ञानमात्रमेवेति । एवकारेणापहतपाप्मत्वादिगुणाष्टकव्यावृत्तिः । मात्रशब्देनांशतोपि जडत्वसंबन्धो नास्तीति सूचितम् ।

—१६ ब्राह्मेणेति । ब्रह्मण इदं ब्राह्मम् । ब्रह्मसंबन्धीत्यर्थः । तस्येदम् (पा. सू. ४।३।१२०) इति पाणिनिसूत्रेणाण्प्रत्ययः ।

७६३–४ न संभवतीति । विज्ञानमात्रस्वरूपत्वाङ्गीकारे ज्ञानमात्रस्वरूपस्य ज्ञातृत्वाभावेन पूर्वोक्तजक्षणादिव्यवहारासंभव एव स्यादिति भावः ॥ ५ ॥

—१३ अपहतपाप्मेत्यादय इति । एतैः शब्दैर्न ते ते धर्माः प्रतिपाद्यन्ते । किं तु तद्विरोधिभूता धर्मा निषिध्यन्ते । अपहतपाप्मेत्यनेन परब्रह्मणि पातकं निराक्रियते । विजर इत्यनेन जरारूपविकारो निराक्रियते । विमृत्युरित्यनेन मरणरूपो विकारो निराक्रियते । विशोक इत्यनेन दुःखं निराक्रियते । अविजिघत्स इत्यनेन बुभुक्षा निराक्रियते । अपिपास इत्यनेन तृषा निराक्रियते । सत्योकादाचित्कः कामः सुखमस्येति सत्यकामः । अनेनापि न नित्यसुखं प्रतिपाद्यते । किं तु कादाचित्कं सुखं निराक्रियते । सत्यसंकल्प इत्यनेनोपेक्षा निराक्रियते । उपेक्षावतः सत्यसंकल्पत्वासंभवादित्यौडुलोमेरभिप्रायः ॥ ६ ॥

७६४–२ औपनिषदादिति । यथा श्रुतिप्रमाणेन ब्रह्मणो विज्ञानघनत्वमौडुलोम्यभिमतं स्वीक्रियते तथा श्रुतिप्रमाणेनैव पूर्वे जैमिन्यभिमता अपहतपाप्मत्वादयो गुणाः स्वीक्रियन्त इति भावः ।

७६४–५ **वस्तुविरोधादिति** । वस्तुविरोधोत्र ज्ञानस्वरूपस्य ब्रह्मणो गुणाधारत्वासंभवः ।

—१३ **जडव्यावृत्त इति** । परमात्मनि स्वल्पोपि भागो जडो नास्तीत्येवकारतात्पर्यम् । तथा चात्रायोगव्यवच्छेदार्थक एवकारः । अयोगः संबन्धाभावस्तस्य व्यवच्छेदो व्यावृत्तिः । परमात्मनि क्वचिदप्यंशे विज्ञानसंबन्धाभावस्यात्र व्यावृत्तेः प्रतीयमानत्वात् । अत एव सत्यकाम इति श्रुतिः स्वरसतः संगच्छते । एवकारस्यान्ययोगव्यवच्छेदार्थकत्वे तु विज्ञानादन्ये ये सत्यकामत्वादयो गुणास्तद्व्यावृत्तौ प्रतीयमानायां सत्यकामश्रुतिविरोधः । यद्यप्यनुपदमेवोक्तरीत्या यथा कथंचित्सत्यकामश्रुत्युपपत्तिर्भवति तथापि न स श्रुतेः स्वारसिकोर्थ इति बोध्यम् ।

—१७ **न चैवमिति** । न ह्येवमित्यर्थः ॥ ७ ॥ (३)

७६५–१० **प्रयत्नान्तरेति** । भृत्यप्रेषणादीत्यर्थः ।

—१४ **स यदीति** । स मुक्तो यदि प्राचीनानेकजन्मसंबन्धिपितृवर्गं दिदृक्षेत तदा स पितृवर्ग एतस्य संकल्पमात्रेणैव प्राप्तो भवतीति श्रुत्यर्थः ।

—१६ **न च प्रयत्नेति** । यथा सत्यकामश्रुत्यनुरोधेन विज्ञानघन एवेत्येवकारस्यायोगव्यवच्छेदार्थकत्वमनुपदमेवोक्तं तथा यदि प्रयत्नान्तरबोधिकान्या श्रुतिः स्यात्तर्हि तदनुरोधेन संकल्पादेवेत्येवकारस्यायोगव्यवच्छेदार्थकत्वं स्वीक्रियेत । अयोगः संकल्पसंबन्धाभावस्तस्य व्यवच्छेदो व्यावृत्तिः । संकल्पावश्यकत्वमिति यावत् । श्रुत्यन्तरविरोधाभावात्तु संकल्पादेवेत्येवकारोन्ययोगव्यवच्छेदार्थक एवेति संकल्पादन्ये ये प्रयत्नास्तत्संबन्धव्यावृत्तिः सिध्यतीति बोध्यम् ॥ ८ ॥

७६६–२ **अनन्याधिपतिश्चेति** । परमात्मव्यक्तिरिक्तोधिपतिर्मुक्तस्य नास्तीत्यर्थः ॥ ९ ॥ (४)

—९ **विशये शरीरेन्द्रियाणामिति** । विशयः संशयः । अस्मिन्नेवाधिकरणे तन्वभावे (४।४।१३) इति सूत्रेऽभावस्य प्रतियोगित्वेन तनोर्निर्देशादत्राप्यभावे तनोरेव प्रतियोगित्वेनान्वयो लभ्यत इत्याशयेन शरीरशब्दोक्तिः । शरीरभावभाविनामिन्द्रियाणां च शरीराभावेऽभावादिन्द्रियपदोक्तिरिति बोध्यम् ॥ १० ॥

७६७–२ **त्रिधाभावादय इति** । मुक्तस्यैकस्यैव जीवस्य शरीरद्वारकं त्रिविधत्वादि । उपाधिभूतशरीरगतं त्रित्वाद्युपधेये जीवात्मन्यारोप्यत इति भावः ।

७६७-३ तदेव हीति। न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतौ मोक्षावस्थायां शरीरस्य यो निषेधः प्रतिपाद्यते स शरीरस्य प्रियाप्रिय-हेतुत्वात्प्रतिपाद्यते। तथा च प्रियाप्रियहेतुभूतं यच्छरीरं तदेव निषिध्यत इति कर्ममूलकस्यैव स निषेधः। कर्ममूलकस्यैव शरीरस्य प्रियाप्रियहेतुत्वात्। एवं च मुक्तस्यैच्छिकं शरीरमस्त्येवेत्याशयः ॥ ११ ॥

—९ उभयीति। उभयी द्विप्रकारा। सशरीरत्वप्रतिपादिकाऽशरीरत्वप्रतिपादिका च।

यथा द्वादशाहमिति। चोदना विधिः। यत्रासीरन्नित्यादिप्रकारेणास्धातुनोपेयुरित्यादिप्रकारेणोपोपसर्गपूर्वकेण्धातुना वा विधिर्निर्दिश्यते तत्सत्रमिति सत्रस्य लक्षणम्। सत्रे च बहुयजमानसंकल्पः। यत्र च याजयेदित्यादिप्रकारेण यज्धातुना विधिर्निर्दिश्यते तदहीनमित्यहीनस्य लक्षणम्। अहर्गणेन साध्यमहीनम्। अहीने चैकस्य संकल्पः। एवं च द्वादशाहस्य विधिद्वैविध्येन सत्रत्वेऽहीनत्वे च सिद्धे प्रयोगकाले कर्ता यथा संकल्पयेत्तथा तदनुरोधेन द्वादशाहस्य क्वचित्सत्रत्वं क्वचिदहीनत्वं चेति बोध्यम् ॥ १२ ॥

—१५ तन्वभाव इति। संध्यशब्दः स्वप्नवाची ॥ १३ ॥

७६८-११ स्वयमेवेति। परमपुरुष एवेत्यर्थः ॥ १४ ॥

—१४ अनेकशरीरेष्विति। स एकधा भवति त्रिधा भवतीत्यत्र प्रागुक्त-(श्रीभाष्य-पृ. ७६७ प. २) रीत्यैकेनैव मुक्तेन स्वीकृतेष्वनेकशरीरेष्वित्यर्थः।

—१९ हृदयाद्येकप्रदेशवर्तिनोपीति। हृदयाद्येकदेशस्थितस्य बद्धजीवस्यापीत्यर्थः।

७६९-१ इयान्विशेष इति। बद्धमुक्तयोर्मध्य इति शेषः।

—३ इदमिति ग्रहणानुगुणेति। यथा मुक्तस्यैकस्मिन्स्वशरीर इदं घटादीति विषयप्रकाशनशक्तिरस्ति तथैवानेकेषु शरीरेष्विति भावः ॥ १५ ॥

१६—प्राज्ञप्राप्तिरिति। प्राज्ञः परमात्मा। सता सोम्य तदा संपन्नो भवतीति श्रुतौ सुषुप्त्यवस्थायां जीवस्य परमात्मप्राप्तिः प्रतिपाद्यते। तेजः परस्यां देवतायामिति श्रुतौ मरणावस्थायां जीवस्य परमात्मप्राप्तिः प्रतिपाद्यते।

—२० विनाशमिति। अदर्शनमित्यर्थः ॥ १६ ॥ (५)

७७०-१० जगदिति। सूत्रार्थः प्रागुक्तः (विवृति पृ. ७२ प. २२)।

—११ किं मुक्तस्येति। किं मुक्तस्य भोगः परब्रह्मानुभवरूप एवाथ वा जगत्सृष्ट्यादिलीलारूपोपीति संशय इति भावः।

७७१-१ निर्व्याजब्रह्मानुभवरूपमिति। यथावस्थितब्रह्मानुभवरूपमि-

त्यर्थः । निखिलहेयप्रत्यनीककल्याणैकतानसकलेतरविलक्षणानवधिकातिशयानन्दमहाविभूतिरूपपरब्रह्मानुभवरूपमिति यावत् ।

७७१–१० न व्यभवदिति । एकत्वादेव ब्रह्म न व्यभवद्विवृद्धं नाभवत् । तद्ब्रह्म श्रेयोरूपं श्रेष्ठं क्षेत्रं क्षत्त्रियाख्यं शरीरमसृजत् । किं तच्छरीरमित्याह यान्येतानीति । देवत्रेत्यस्य देवेष्वित्यर्थः । ब्रह्म बृहस्पतिः क्षत्त्रमिन्द्र इति श्रुतेरिन्द्रादीनां क्षत्त्रियत्वम् । देवेष्वपि तपोविशेषेण वर्णविशेषसंभवात्तदभिमानित्वाद्वा क्षत्त्रियत्वं द्रष्टव्यम् ।

—१७ कन्येति । कन्याशब्देनात्र मनसो ग्रहणम् । मनसो विषयादिवस्तुप्रकाशकत्वात् । कनूधातुः प्रकाशार्थकः ।

—२० असंनिहितत्वाच्चेति । सृष्ट्यादिप्रतिपादकवाक्येषु मुक्तस्याप्रकृतत्वाच्चेत्यर्थः । ननु मुक्तस्य ब्रह्मानुभवरूप एव भोगश्चेत्तस्य निरञ्जनः परमं साम्यमुपैतीति श्रुतीरितं परमसाम्यं न संभवतीति चेन्न । अनवधिकातिशयानन्दब्रह्मानुभव एव साम्यसद्भावात् । ब्रह्म हि स्वस्य परस्य चानुभूयमानमविशेषेणानवधिकातिशयानन्दाय भवति । आनन्दस्वरूपत्वाविशेषात् । सत्यसंकल्पत्ववचनं चानवधिकातिशयानन्दब्रह्मानुभवविषयकमेव । ब्रह्मनिष्ठस्य ब्रह्मैव लब्ध्वानन्दसद्भावादिति बोध्यम् ॥ १७ ॥

७७२–१२ उच्यत इति । हिरण्यगर्भादिलोकस्थभोगेषु मुक्तस्य यदीच्छा वर्तते तर्हि तत्र यथाकामं परमपुरुषानुग्रहेण वर्तमानस्तत्स्थान्भोगान्भुङ्क्ष इति तया श्रुत्योच्यत इत्याशयः ॥ १८ ॥

७७३–१३ न मुक्तस्येति । मुक्तस्य सविभूतिकब्रह्मानुभवितृत्वेन स्थितिवचनात्सर्वत्र कामचारादयो भवन्ति न नियन्तृत्वादिकमित्यर्थः (श्रु.) ॥ १९ ॥

—१५ दर्शयत इति । प्रत्यक्षं श्रुतिः । अनुमानं स्मृतिः ।

७७४–१५–६ ब्रह्मणो हीति । ब्रह्म जीवः । अमृतं मोक्षः । शाश्वतधर्मो ज्ञानम् । सुखमानन्दः (श्रु.) ।

—१९ तस्य तथाविधत्वमिति । गुणगणस्य स्वाभाविकत्वं जीवात्मनो नित्यस्थितिश्च परमपुरुषाधीना । यतश्चैतस्य जीवस्य नित्यता परमपुरुषस्य नित्यमिष्टातो हेतोर्जीवो नित्यतया वर्तते । तथा च यद्यपीश्वरस्येव जीवस्यापि नित्यत्वं सत्यसंकल्पत्वादिगुणविशिष्टत्वं चास्तीति जीवेनापि जगत्सृष्ट्यादि कर्तव्यं तथापि जीवे नित्यत्वस्य सत्यसंकल्पत्वादिगुणविशिष्टत्वस्य चेश्वराधीनत्वान्न क्रियत इति न विरोधः । यतः परमेश्वरो जगत्सृष्ट्यादीनां स्वासाधारणत्वरक्षणाय जीवगतसत्यसंकल्पत्वरक्षणाय च जगत्सृष्ट्यादिविषयकं संकल्पमेव जीवेन न कारयतीति बोध्यम् ।

७७४-२२ **एवमेवेति**। परमपुरुषभोगोपकरणं लीलोपकरणं च नित्यमिति शास्त्राद्यदवगम्यते तत्परमपुरुषस्य नित्यमिष्टमेवेति तस्य भोगोपकरणस्य लीलोपकरणस्य च नित्यं स्थितिर्भवतीति शास्त्रादवगम्यत इत्यर्थः ॥ २० ॥

७७५-६ **सोश्नुत इति**। श्रुत्यर्थः प्रागुक्तः (विवृति-पृ. १३२ प. ८-१३) ॥ २१ ॥

—११ **तस्य स्वतन्त्रत्वेनेति**। परमात्मा स्वतन्त्र इति मुक्तस्य पुनरावृत्तिमपि कदाचित्संकल्पयेदिति शङ्काशयः।

—१६ **निरस्तेति**। परमेश्वरेण समः परमेश्वरादभ्यधिकश्च कश्चित्स्यादित्येवमाकारा याः समस्ताः सकलाः संभावनाः कल्पनास्ता निरस्ता यस्मिन्नेतादृश इत्यर्थः।

७७६-९-११ **न चेति**। न हीत्यर्थः। **अन्यापेक्षेति**। अन्यस्य ब्रह्मणोन्यस्य पुनरावृत्तिरूपसंसारस्यापेक्षेछान्यापेक्षा। तस्मै पुनरावृत्तिरूपसंसारायायं तदर्थो य आरम्भः कर्मारम्भः स तदर्थारम्भः। आदिशब्देन वासनायाः संग्रहः। अयं भावः-मुक्तस्य या पुनरावृत्तिराशङ्क्यते सा किं तदिच्छया कर्मणा वा कर्मवासनया वा। नाद्यः। इच्छाया असंभवात्। न हि ब्रह्मानुभवन्मुक्तो ब्रह्मणः सकाशादन्यो यः पुनरावृत्तिरूपः संसारस्तमपेक्षते। न द्वितीयः। कर्मणोसंभवात्। न हि मुक्तेन पुनरावृत्त्यर्थं कर्मारम्भः क्रियते। नापि तृतीयः। मुक्तेन पूर्वकृतस्य कर्मणः सवासनस्य नष्टत्वाद्वासनाया अप्यसंभवादिति।

—१४ **प्रियो हीति**। ज्ञानिनोहं यथा प्रियस्तथा मया सर्वज्ञेन सर्वशक्तिनाप्यभिधातुं न शक्यते। प्रियत्वस्येयत्तारहितत्वात्। यथा ज्ञानिनामग्रेसरस्य प्रह्लादस्य स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः। न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थित इति। सोपि तथैव मम प्रियः। सर्व एवैते मामेवोपासत इत्युदारा वदान्या ये मत्तो यत्किंचिदपि गृह्णन्ति ते हि मम सर्वस्वदायिनः। ज्ञानी त्वात्मैव मे मतम्। तदायत्तधारणोहमिति मन्य इत्यर्थः (गी. भा.) ॥ २२ ॥ (६)

इति श्रीमदभ्यंकरोपाह्वमहादेवभट्टात्मजवासुदेवशास्त्रिविरचितायां श्रीभाष्यविवृतौ चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ श्रीः ॥

BOMBAY SANSKRIT AND PRAKRIT SERIES

Edited under the Superintendence of Professor S. K. Belvalkar, M. A., Ph. D., and Professor A. B. Dhurva, M. A., LL. B.

[For Copies Apply to Government Book Depôt, Poona.]

		RS.	AS.
No. I	Pañchatantra, Book IV and V, edited with Notes, by Dr. G. Bühler	0	4
No. II	Nâgojibhaṭṭa's Paribhâshendus'ekhara, Part I, Sanskrit Text and Various Readings, edited by Dr. F. Kielhorn (*out of Stock*)	...	
No. III	Pañchatantra, Books II and III, edited with Notes, by Dr. G. Buhler....	0	4
No. IV	Pañchatantra, Book I, edited with Notes, by Dr. F. Kielhorn	0	6
No. V	Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha, Part I (Cantos 1--VI), edited with Notes, by Mr. S. P. Pandit, M. A.	1	8
No. VI	Mâlavikâgnimitra of Kâlidâsa, edited with Notes, by Mr. S. P. Pandit, M. A., 2nd edition (*under revision*)	2	2
No. VII	Nâgojibhaṭṭa's Paribhâshendus'ekhara, Part II A, (Paribhâshâs 1–37), Translation and Notes, by Dr. F. Kielhorn	0	8
No. VIII	Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha, Part II (Cantos VII–VIII), edited with Notes, by Mr. S. P. Pandit, M. A. (*out of Stock*)... ...	...	
No. IX	Nâgojibhaṭṭa's Paribhâshendus'ekhara, Part II B, (Paribhâshâs 38–69), Translation and Notes, by Dr. F. Kielhorn	0	8
No. X	Das'akumâracharita of Daṇḍin, Part I, edited with Notes, by Dr. G. Bühler (*under revision*)	0	8
No. XI	Nîtis'ataka and Vairâgyas'ataka of Bhartṛihari, edited with Notes, by Justice K. T. Telang, M. A. (*copyright restored to the editor*)		

	RS.	AS.
No. XII Nâgojibhatta's Paribhâshendus'ekhara, Part II C, (Paribhâshâs 70–122), Translation and notes, by Dr. F. Kielhorn	0	8
No. XIII Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha, Part III (Cantos XIV–XIX) edited, with Notes, by Mr. S. P. Pandit, M. A. (*out of Stock*)	...	
No. XIV Vikramâṅkadeva-charita of Bilhaṇa, by Dr. G. Bühler (*copyright restored to the editor*)	...	
No. XV Mâlatî-Mâdhava, with Commentary, Critical Notes, etc., by Dr. R. G. Bhandarkar, *Second edition*	4	4
No. XVI Vikramorvas'îya of Kâlidâsa, with Notes, by Mr. S. P. Pandit, M. A., *Third edition*	2	0
No. XVII Hemachandra's Des'î-nâmamâlâ, Part I, by Prof. Pischel and Dr. Buhler, (*copies not available*)	...	
No. XVIII* Vyâkarana-Mahâbhâshya of Patañjali, Vol. I, Part I, by Dr. F. Kielhorn, *Second edition*	1	8
No. XIX* Vyâkaraṇa-Mahâbhâshya of Patañjali, Vol. I, Part II, by Dr. F. Kielhorn, *Second edition*	1	8
No. XX* Vyâkaraṇa-Mahâbhâshya of Patañjali, Vol. I, Part III, by Dr. F. Kielhorn, *Second edition*	1	8
No. XXI† Vyâkaraṇa-Mahâbhâshya of Patañjali, Vol. II, Part I, by Dr. F. Kielhorn, *Second edition*	3	0
No. XXII† Vyâkarana-Mahâbhâshya of Patañjali, Vol. II, Part II, by Dr. F. Kielhorn, *Second edition*	3	0
No. XXIII Vâsishṭha-Dharmas'âstra, edited with Notes, by Dr. A. A. Fuhrer (*under revision*)	0	8
No. XXIV Kâdambarî by Bâṇa and his Son, Vol. I, Text; Vol. II, Notes and Introduction, by Dr. P. Peterson, *both together*	6	8
No. XXV Kîrti-kaumudî, edited with Notes, by Professor A. V. Kathawate (*copy-right restored to the editor*) ...	...	
No. XXVI† Vyâkaraṇa-Mahâbhâshya of Patañjali, Vol. II, Part III, by Dr. F. Kielhorn, *Second edition*	3	0
No. XXVII Mudrârâkshasa of Vis'âkhadatta, with the Commentary of Dhuṇḍirâja, edited, with Notes, by Justice K. T. Telang, M. A. (*copy-right restored to the editor*)	...	

* Nos. 18, 19 and 20 are bound together in one volume, the whole volume being priced Rs. 4-8.

† Nos. 21, 22 and 26 are bound together in one volume, the whole volume being priced Rs. 9.

	RS.	AS.
No. XXVIII* Vyâkaraṇa-Mahâbhâshya of Patañjali, Vol. III, Part I, by Dr. F. Kielhorn, *Second edition* ...	3	0
No. XXIX* Vyâkaraṇa-Mahâbhâshya of Patañjali, Vol. III, Part II, by Dr. F. Kielhorn, *Second edition* ...	3	0
No. XXX* Vyâkaraṇa-Mahâbhâshya of Patañjali, Vol. III, Part III, by Dr. F. Kielhorn, *Second edition*...	3	0
No. XXXI Subhâshitâvali of Vallabhadeva, edited by Dr. P. Peterson and Pandit Durgaprasad	2	8
No. XXXII Tarka-kaumudî of Laugâkshi Bhâskara, edited by Mr. N. M. Dvivedi (*copy-right restored to the author*)	...	
No. XXXIII Hitopades'a of Nârâyaṇa, edited by Dr. P. Peterson	0	14
No. XXXIV Gaüdavaho of Vâkpati, edited by Mr. S. P. Pandit, M. A. (*under revision*)	...	
No. XXXV Mahânârâyaṇa Upanishad, edited by Col. G. A. Jacob	0	7
No. XXXVI Selections of Hymns from the Rigveda (First Series) By Dr. P. Peterson (*under revision*)	4	0
No. XXXVII S'âṅgadharapaddhati, Vol. I, edited by Dr. P. Peterson	3	0
No. XXXVIII Naishkarmyasiddhi, by Col. G. A. Jacob	2	8
No. XXXIX Concordance to the principal Upanishads and the Bhagavadgîtâ, by Col. G. A. Jacob	4	0
No. XL Eleven Âtharvaṇa Upanishads, with Dîpikâs, by Col. G. A. Jacob, *Second edition*	1	8
No. XLI Handbook to the study of Rigveda, Part I, Comprising Sâyaṇa's Introduction to his Rigvedabhâshya, with English Translation, by Dr. P. Peterson ...	1	8
No. XLII Das'akumâracharita of Daṇḍin, Part II, by Dr. P. Peterson (*under revision*)	0	8
No. XLIII Handbook to the Study of Rigveda, Part II, Comprising the Seventh Maṇḍala of Rigveda with the Bhâshya of Sâyaṇa	2	8
No. XLIV Âpastambha Dharmasûtra, with the Various Readings of the Hiraṇyakes'î Dharmasûtra, Part I, by Dr. G. Bühler	1	6

* Nos. 28, 29 and 30 are bound together in one volume, the whole volume being priced Rs. 9.

	RS.	AS.
No. XLV Râjataraṅgiṇi of Kalhaṇa Part I, (Cantos I to VII) by Pandit Durgaprasada	1	8
No. XLVI Patañjali's Yogasûtra, with the Scholia of Vyâsa, and the Commentary of Vâchaspati, by Mahâmahopâdhyâya Rajarama Shastri Bodas (*under revision*)	1	10
No. XLVII Parâs'ara's Dharma-saṁhitâ, with the Commentary of Sâyaṇa-Mâdhavâchârya, Vol. I, Part I, by Mr. Vaman Shastri Islampurkar	2	2
No. XLVIII Parâs'ara Dharma-Saṁhitâ, with the Commentary of Sâyaṇa-Mâdhavâchârya Vol. I, Part II, by Mr. Vaman Shastri Islampurkar	2	0
No. XLIX Nyâyakos'a, by Mahâmahopâdhyâya Bhimacharya Zalkikar, *Second edition*	6	0
No. L Âpastambha Dharmasûtra, Part II, by Dr. Buhler	1	2
No. LI Râjataraṅgiṇi of Kalhaṇa, Vol. II, (Canto VIII) by Pandit Durgaprasad	1	4
No. LII Mṛichchhakaṭika, Vol. I, Text with two Commentaries and Various Readings, by Mr. N. B. Godbole ...	3	8
No. LIII Navasâhasâṅka-charita, Part I, by Mr. Vaman Shastri Islampurkar	1	10
No. LIV Râjataraṅgiṇî of Kalhaṇa, Vol. III, containing the suppliments to the work by Dr. P. Peterson ...	1	2
No. LV Tarkasaṁgraha of Aṇṇambhaṭṭa, by Mr. Y. V. Athalye (*under revision*)	...	
No. LVI Bhaṭṭikâvya, edited with the Commentary of Mallinâtha, Vol. I, by Rao Bahadur K. P. Trivedi ...	9	0
No. LVII Bhaṭṭikâvya, edited with the Commentary of Mallinâtha, Vol. II, by Rao Bahadur K. P. Trivedi ...	6	0
No. LVIII Selections of Hymns from the Ṛigveda (Second Series), by Dr. P. Peterson	4	0
No. LIX Parâs'ara Dharma-Saṁhitâ, with the Commentary of Sâyaṇa-Mâdhavâchârya, Vol. II, Part I, by Mr. Vaman Shastri Islampurkar	4	0
No. LX Kumârapâla-charita of Hemachandra, (in Prâkṛita) by Mr. S. P. Pandit, M. A.	8	8
No. LXI Rekhâgaṇita, Vol. I, by Messrs. H. H. Dhruva and K. P. Trivedi...	12	0

	Rs.	As.
No. LXII Rekhâgaṇita, Vol. II, by Messrs. H. H. Dhruva and K. P. Trivedi...	9	0
No. LXIII Ekâvali of Vidyâdhara, with Mallinâtha's Commentary, edited by Rao Bahadur K. P. Trivedi. ...	14	0
No. LXIV Parâs'ara Dharma-Saṁhitâ, with the Commentary of Sâyaṇa-Mâdhavâchârya, Vol. II, Part II, by Mr. Vaman Shastri Islampurkar	5	0
No. LXV Pratâparudra-yas'obhûshaṇa of Vidyânâtha, with Commentary, edited by Rao Bahadur K. P. Trivedi ...	11	0
No. LXVI Harsha-charita of Bâṇa, Part I, Text with Commentary, edited by Dr. A. A. Führer	2	0
No. LXVII Parâs'ara Dharma-Saṁhitâ, with the Commentary of Sâyaṇa-Mâdhavâchârya, Vol. III, Part I, by Mr. Vaman Shastri Islampurkar	4	0
No. LXVIII S'rîbhâshya of Râmânuja, Vol. I, Text, edited by Mr. Vasudev Shastri Abhyankar	11	0
No. LXIX Dvyâs'raya-kâvya of Hemachandra, Vol. I, (Cantos I—X) by Prof. A. V. Kathawate	9	0
No. LXX Vaiyâkaraṇabhûshaṇa of Koṇḍabhaṭṭa, with two Commentaries and Notes, by Rao Bahadur K. P. Trivedi	10	0
No. LXXI Shaḍbhâshâchandrikâ of Lakshmîdhara, with Introduction, Notes etc., by Rao Bahadur K. P. Trivedi	7	8
No. LXXII S'rîbhâshya of Râmânuja, Vol II, Notes, by Mr. Vasudev Shastri Abhyankar...	6	0

WORKS OUT OF SERIES

Aitareya Brâhmaṇa, Word-index to, compiled by Pandit Vishwanath Balkrishna Joshi	4	0
Amarakos'a with the Commentary of Mahes'vara, edited, with an Index, by Mr. Ramchandra Shastri Talekar ...	0	13
Atharvaveda Saṁhitâ, with the Commentary of Sâyaṇâchârya, edited, by Mr. S. P. Pandit, M.A., *four volumes at Rs. 10 each*	40	0
Kâvyaprakâs'a, edited by Vamanacharya Zalkikar with his own Commentary (*in the Press*)	5	4
Vendidad, *Complete in two Volumes*	5	0

THE SAME LIST ABRIDGED AND ARRANGED ALPHABETICALLY

	RS.	AS.
Aitareya Brâhmaṇa, Word-index to, by Vishwanath Balkrishna Joshi	4	0
Amarakos'a with Mahes'vara's Commentary, by Ramchandra Shastri Talekar, (out of Series)	0	13
Âpastambha Dharmasûtra, Part I, by G. Buhler, (No. 44)	1	6
Âpastambha Dharmasûtra, Part II, by G. Bühler. (No. 50)	1	2
Atharvaveda Saṁhitâ with Sâyaṇabhâshya, four volumes, by S. P. Pandit, (out of Series)	40	0
Atharvaṇa Upanishads, eleven, with Dîpikâs, by G. A. Jacob, (No. 40)	1	8
Bhaṭṭikâvya with Mallinâtha's Commentary, Part I, by K. P. Trivedi, (No. 56)	9	0
Bhaṭṭikâvya with Mallinâtha's Commentary, Part II, by K. P. Trivedi, (No. 57)	6	0
Concordance to the principal Upanishads and the Bhagavadgîtâ, by G. A. Jacob, (No. 39)	4	0
Das'akumâracharita, Part I, by G. Buhler, (No. 10) ...	0	8
Das'akumâracharita, Part II, by P. Peterson (No. 12)	0	8
Des'î-nâmamâlâ, Part I, by Pischel and Buhler (No. 17) ...	...	
Dvyâs'raya-kâvya, Part I, by A. V. Kathawate, (No. 69) ...	9	0
Ekâvalî, with Commentary, by K. P. Trivedi, (No. 63) ...	14	0
Gauḍavaho, by S. P. Pandit (No. 34)	3	0
Handbook to the Study of Ṛigveda, Part I, by P. Peterson (No. 41)	1	8
Handbook to the Study of Ṛigveda, Part II, by P. Peterson (No. 43)	2	8
Harsha-charita, with Commentary, by A. A. Führer, (No. 66)	2	0
Hitopades'a, by P. Peterson, (No. 33)	0	14
Hymns from Ṛigveda, Selection of, (First Series), by P. Peterson, (No. 36)	4	0
Hymns from Ṛigveda, Selection of, (Second Series) by P. Peterson, (No. 58)	4	0
Kâdambarî, Vol. I, Text and Vol. II, Notes and Introduction, by P. Peterson, (No. 24)	6	8

	RS.	AS
Kâvyaprakâ'sa, with a Commentary, by Vamanacharya Zalkikar, (out of Series)...	5	4
Kîrtikaumudî, by A. V. Kathawate, (No. 25)		
Kumârapâlacharita, by S. P. Pandit, (No. 60)	8	6
Mṛichchhakaṭika, Vol I, by N. B. Godbole (No. 52) ...	3	8
Mâlavikâgnimitra, by S. P. Pandit, (No. 6)	2	2
Mâlatî-Mâdhava, by R. G. Bhandarkar, (No. 15)	4	4
Mahâbhâshya, Vyâkaraṇa—, of Patañjali, Vol. I, Parts I, II, and III bound together (Nos. 18, 19, 20).	4	8
Mahâbhâshya, Vyâkaraṇa—, of Patañjali, Vol. II, Parts I, II, and III bound together (Nos. 21, 22 and 26)... ...	9	0
Mahâbhâshya, Vyâkaraṇa—, of Patañjali, Vol. III, Parts I, II, and III bound together (Nos. 28, 29, 30).	9	0
Mudrârâkshasa, by K. T. Telang, (No. 27)		
Mahânârâyaṇa Upanishad, by G. A. Jacob (No. 35) ...	0	7
Naishkarmyasiddhi by G. A. Jacob, (No. 38)	2	8
Navasâhasâṅkacharita Part I, by Vaman Shastri Islampurkar, (No. 53)	1	10
Nîti and Vairâgya S'atakas, by K. T. Telang, (No. 11)		
Nyâyakos'a, by Bhimacharya Zalkikar, (No. 49)	6	0
Pañchantra, Book I, by F. Kielhorn, (No. 4)	0	6
Pañchatantra, Books II and III, by G. Bühler, (No. 3) ...	0	4
Pañchatantra, Books IV and V by G. Bühler, (No. 1) ...	0	4
Parâs'ara Dharmasamhitâ, Vol. I, Part I, by Vaman Shastri Islampurkar, (No. 47)	2	2
Parâs'ara Dharmasamhitâ, Vol. I, Part II, by Vaman Shastri Islampurkar, (No. 48)	2	0
Parâs'ara Dharmasaṁhitâ, Vol. II, Part I, by Vaman Shastri Islampurkar, (No. 59)	4	0
Parâs'ara Dharmasaṁhitâ, Vol. II, Part II, by Vaman Shastri Islampurker, (No. 64)	5	0
Parâs'ara Dharmasaṁhitâ, Vol. III, Part I, by Vaman Shastri Islampurkar, (No. 67)	4	0
Paribhâshendus'ekhara, Part I, by F. Kielhorn, (No. 2)		
Paribhâshendus'ekhara, Part II A, by F. Kielhorn, (No. 7)	0	8

	RS.	AS.
Paribhâshendus'ekhara, Part II B, by F. Kielhorn, (No. 9)	0	8
Paribhâshendus'ekhara, Part II C, by F. Kielhorn, (No. 12)	0	8
Pratâparudrayas'obhûshana of Vidyânâtha, with Commentary, by K. P. Trivedi, (No. 65)	11	0
Raghuvaṁs'a, Part I, by S. P. Pandit, (No. 5)	1	8
Raghuvaṁs'a, Part II, by S. P. Pandit, (No. 8)	0	12
Raghuvaṁs'a, Part III, by S. P. Pandit, (No. 13) ...	0	8
Râjataraṅgiṇî, Part I, by Pandit Durgaprasad, (No. 45)	1	8
Râjataraṅgiṇî, Part II, by Pandit Durgaprasad, (No. 51)	1	4
Râjataraṅgiṇî, Part III, by P. Peterson, (No. 54) ...	1	2
Rekhâgaṇita, Part I, by H. H. Dhruva and K. P. Trivedi, (No. 61)	12	0
Rekhâgaṇita, Part II, by H. H. Dhruva and K. P. Trivedi, (No. 62)	9	0
S'ârṅgadharapaddhati, Part I, by P. Peterson (No. 37)	3	0
Shaḍbhâshâchandrikâ of Lakshmîdhara, by K. P. Trivedi, (No. 71)	7	8
S'rîbhâshya, Part I, by Vasudev Shastri Abhyankar, (No. 68)	11	0
S'rîbhâshya, Part II, by Vasudeo Shastri Abhyankar, (No. 72)	6	0
Subhâshitâvalî of Vallabhadeva, by P. Peterson, (No. 31)	2	8
Tarkakaumudî of Laugâkshi Bhâskara, by N. M. Dvivedi, (No. 32)	...	
Tarkasaṁgraha of Aṇṇambhaṭṭa, by Y. V. Athalye,(No. 55)	...	
Vâsishṭha Dharmas'âstra, by A. A. Fuhrer, (No. 23) ...	0	8
Vaiyâkaraṇabhûshaṇa of Koṇḍabhaṭṭa, with two Commentaries, by K. P. Trivedi, (No. 70)	10	0
Vendidad, in Two Volumes, (out of Series)	5	0
Vikramâṅkadeva-charita, by G. Buhler, (No. 14)	...	
Vikramorvas'îya by S. P. Pandit, (No. 16)	2	0
Yogasûtras, of Patañjali, by Râjâram Shastri Bodas, (No. 46)	1	10

WORKS IN THE PRESS

Yâska's Nirukta, with the Commentary of Durgâchârya, Vol. I, by Prof. H. M. Bhadkamkar, B. A.

Parâs'arasmṛiti, with the Commentary of Sâyaṇa-Mâdhavâchârya, Vol. III, part II by Pandit Vaman Shastri Islampurkar.

Vâsishṭha Dharmas'âstra by Dr. A. A. Führer (2nd edition).

Kâvyaprakâs'a, edited with his own Commentary by Vamanacharya Zalkikar (3rd edition).

WORKS UNDER REVISION

No. VI Mâlvikâgnimitra of Kâlidâsa, by Mr. S. P. Pandit.

No. X and XLII Das'akumâracharita of Daṇḍin, by Dr. G. Bühler and Dr. P. Peterson.

No. XXIII Vâsishṭha-Dharmas'âstra, by Dr. Fuhrer.

No. XXXIV Gaüḍavaho of Vâkpati, by S. P. Pandit.

No. XXXVI Hymns from Ṛigveda (First series) by Dr. P. Peterson.

No. XLVI Yogasûtras of Patañjali, by Rajaram Shastri Bodas.

No. LV Tarkasaṁgraha of Aṇṇambhaṭṭa, by Y. V. Athalye.

WORKS IN PREPARATION

Dvyâs'raya Kâvya, Vol. II, by A. V. Kathawate.

Harshacharita Vol. II, Introduction and Notes, by Dr. Fuhrer.

Navasâhasâṅkacharita, Vol. II, by Vaman Shastri Islampurkar.

Mṛichchhakaṭika, Vol. II, Introduction and notes, by K. C. Mehendale.

Yâska's Nirukta with the Commentary of Durgâchârya, Vol. II. by H. M. Bhadkamkar.

WORKS UNDERTAKEN

Aṇubhâshya of Vallabhâcharya, with Notes, by Shridhar Shastri Pathak.

Kâvyâdars'a of Daṇḍin, by Manmohan Chakravarti, M. A., B. L.

Ratnâvali of S'rîharsha, by N. S. Panse, B. A.

Samudra-Saṅgama-Grantha, with English Translation, by A. V. Kathawate, B. A.

Shaṭprâbhṛitaṭîkâ, by K. B. Pathak, B. A.

Syâdvâdamañjarî of Hemachandra, by A. B. Dhruva, M. A., LL. B.,

Tarkabhâshâ of Kes'avamis'ra with the Commentary of Chinnabhaṭṭa by D. R. Bhandarkar, M. A., and Pandit Kedarnath.

Udbhaṭa's Kâvyâlaṅkâra-Sâra-Saṅgraha, with the Laghuvṛitti of Pratîhârendurâja, by N. D. Banhatti, B. A.

Uttara-Râmacharita of Bhavabhûti, by Dr. R. G. Bhandarkar, and S. R. Bhandarkar, M. A.

Veṇîsaṁhâra of Bhaṭṭa Nârâyaṇa, by N. S. Panse, B. A.

Vyavahâra-Mayûkha of Nîlakaṇṭha, by P. V. Kane, M. A., LL. M.